मदीयवाणीरमणी चरितार्था चिरादभूत् ।
वव्रे जीवन्धरं देवं या भावैर्जिननायकम् ॥ ११ ॥

निर्जनदेशास्तस्मिन् । मुक्तिर्निर्वृतिरेव कान्ता वल्लभा तया विराजिताः शोभितास्तान् । नष्टं शुक्लध्यानानलभस्मसात्कृतं कर्माष्टकं ज्ञानावरणाद्यष्टकर्मनिकुरम्बं यैस्तान् । विशुद्धान् विमलान् । सिद्धान् भगवतः सिद्धपरमेष्ठिनः । हृदि चेतसि भावये चिन्तयामि । तेषां ध्यानं करोमीति भावः ॥५॥

अथ रत्नत्रयं स्तोतुमाह—भजे इति—प्रत्नं प्राचीनं श्रेष्ठं वा । भव्याश्च ते लोकाश्चेति भव्यलोकास्तेषामेकमद्वितीयं भूषणमाभरणं तत् । मुक्तिरेव निर्वृतिरेव कान्ता प्रिया तस्याः । तोषणं सन्तोषप्रदम् । ध्वान्तस्य मोहतिमिरस्य या सन्ततिः समूहस्तस्याः पूषणं सूर्यम् । रत्नत्रयं सम्यग्दर्शनज्ञानचारित्रात्मकं मणित्रितयं भजे सेवे । रूपकालंकारः ॥ ६ ॥

अथ जिनवाणीं स्तोतुमाह—वाणीति—कर्मणां ज्ञानावरणादीनां कृपाणी करवालिका छुरीति यावत् ; संसार एव जलधिः सागरस्तस्य संतरणे प्लवने द्रोणी नौका, वेण्या केशपाशेन जिता निर्जिता घनमाला मेघपङ्क्तिर्यया सा । जिनस्यार्हतो वदनाम्भोजे मुखकमले भासुरा शोभमाना वाणी सरस्वती जीयात् सर्वोत्कर्षेण वर्तताम् ॥ ७ ॥

अथ पूर्वाचार्यपरम्परां स्मर्तुमाह—अरन्ध्रेति—अहं हरिचन्द्रः । पूर्वे च त आचार्याश्च पूर्वाचार्यास्तेषां परम्परा तां पूर्वसूरिसन्ततिम् । अपूर्वमालां विचित्रस्रजम् । मन्ये वेद्मि । अथ तस्या अपूर्वत्वं द्योतयितुमाह—अरन्ध्राणि निश्छिद्राणि निरतिचाराणि सद्वृत्तानि सच्चारित्राण्येव मण्यो रत्नानि यस्यां तां प्रसिद्धमाला सरन्ध्रमणियुक्ता भवतीयं तु तद्भिन्नेति वैशिष्ट्यम् । मणिशब्द ईकारान्तोऽप्यस्ति । अनन्ता अपरिमिता ये गुणाः सूत्राणि सम्यग्दर्शनादयो वा तैर्गुम्फिता ग्रथिता ताम् । प्रसिद्धमाला ह्येकगुणगुम्फिता भवतीयं त्वनन्तानन्तगुणगुम्फितेति वैशिष्ट्यम् । अधिकारूढवैशिष्ट्यरूपकालङ्कारः ॥ ८ ॥

अथ चम्पूकाव्यस्य वैशिष्ट्यमाह—गद्यावलिरिति—गद्यानामावलिः पंक्तिर्गद्यावलिः 'वृत्तबन्धोज्झितं गद्यम्' इति गद्यलक्षणम् । पद्यानां परम्परेति पद्यपरम्परा पद्यपङ्क्तिश्च 'छन्दोबद्धपदं पद्यम्' इति पद्यलक्षणम् । प्रत्येकमप्येकैकमपि । प्रमोदमानन्दम् । आवहति विदधाति । तद्द्वयं मिलित्वा तु बाल्यतारुण्यवती शैशवयौवनवती शैशवान्तयौवनप्रारम्भवर्तीति यावत् । कान्तेव कामिनीव । द्राग्झटिति हर्षस्य प्रमोदस्य प्रकर्षम् आधिक्यं तनुते विस्तारयति । उपमालंकारः ॥ ९ ॥

अथ ग्रन्थारम्भप्रतिज्ञामाह—या कथेति—सुधर्मगणनाथेन सुधर्माभिधानगणधरेण भूतधात्रीशं भूतश्चासौ धात्रीशश्च तम् वृत्तावनिपतिम् श्रेणिकं मगधसम्राजं प्रति या कथा वर्णिता यदाख्यानं वर्णितम् । तां कथां वक्तुं कथयितुम् । प्रयतामहे प्रयत्नं कुर्महे ॥ १० ॥

स्ववाण्याश्चारितार्थ्यं द्योतयितुमाह—मदीयेति—सा मदीया मामकीना वाणी भारत्येव रमणी

जीवन्धरस्य चरितं दुरितस्य हन्तृ
प्राप्ता मलीमसतमापि मदीयवाणी ।
धीराम् धिनोति नियतं मलिनाञ्जनश्री-
र्बिम्बाधरीनयनपङ्कजसंगतेव ॥ १२ ॥

अथ लवणरत्नाकरनिर्लोलकल्लोलशयकुशेशयप्रक्षिप्तमुक्ताविद्रुमराजीविराजितवेलालङ्कृते, सकलद्वीपमध्यमध्यासीनेऽपि शोभातिशयेन तेषामुपरि वर्तमाने, स्वमहिमनिराकृतसुराधिपलोकं गगनतलचुम्बिजम्बूविटपिकपटेन मस्तकमुद्धृत्य प्रतिक्षणमीक्षमाण इव, अपारसंसारसंतमसान्धीकृतजीवलोकस्य पुरुषार्थचतुष्टयप्रकाशनायेव दिवाकरयुगलनिशाकरयुगलव्याजेन प्रदीपचतुष्टयमाबिभ्राणे, मूर्तीकृतलावण्य इव महीमहिलायाः,रङ्गस्थल इव श्रीलासिकालास्यस्य, प्रतिच्छन्द इव नाकलोकस्य सकललेखलोचनमीनानामालम्बनकूपे जम्बूद्वीपे, भरतखण्डमण्डनायमानकमलवनमधुलुब्धभृङ्गमालाव्याजेन सकललोकलोचनबन्धनार्थमायसशृङ्खलामिव बिभ्राणम् , परिपाकपि-

रामा । चिरात् चिरकालेन चरितार्था कृतकृत्या अभूद् बभूव । या भावैरनुरागपूर्णाभिप्रायैः जिननायकं जिनेन्द्रम्, जीवन्धरमेतन्नामधेयं देवं स्वामिनं वव्रे स्वीकृतवती । जीवन्धरोपाख्यानवर्णनेन मदीया वाणी कृतकृत्याभूदिति भावः ॥ ११ ॥

अथ जीवन्धरचरितस्याद्भुतप्रभावमाविर्भावयितुमाह—जीवन्धरस्येति—दुरितस्य पापस्य हन्तृ विघातकं जीवन्धरस्य जीवकस्य कथानायकस्य चरितमाख्यानम् । प्राप्ता प्राप्तवती मदीयवाणी मद्भारती मलीमसतमापि सातिशयमलिनापि सती नियतं निश्चयेन बिम्बाधरीणां सुरक्ताधराणां नयनपङ्कजसंगता लोचनारविन्दसंलग्ना मलिनाञ्जनश्रीरिव मलिनकज्जलश्रीरिव धीरान् विदुषः सुहृच्चेतसश्च धिनोति प्रणयति कम्पयति च । उपमालंकारः ॥ १२ ॥

अथ जम्बूद्वीपे हेमाङ्गदं नाम मण्डलमस्तीति निरूपयति । तत्र पूर्वं जम्बूद्वीपं वर्णयितुमाह—अथाद्य निवेदनानन्तरम् , लवणरत्नाकरस्य लवणोदस्य निर्लोला अतिशयचपला ये कल्लोलास्तरङ्गा त एव शयकुशेशयाः करकमलानि तैः प्रक्षिप्ता ये मुक्ताविद्रुमा मुक्ताफलप्रवालास्तेषां राजी पङ्क्तिस्तया विराजिता शोभिता या वेला तटी तयाऽलंकृतस्तस्मिन्, सकलाश्च ते द्वीपाश्च सकलद्वीपा निखिलद्वीपा धातकीखण्डप्रभृतय इति यावत् । तेषां मध्यं मध्यभागम्, अध्यासीनेऽप्यधिष्ठितेऽपि शोभातिशयेन सौन्दर्यातिरेकेण तेषां निखिलद्वीपानामुपर्यूर्ध्वं वर्तमाने विद्यमाने, अत्यन्तं शोभमान इति यावत् ; गगनतलचुम्बी नभस्तलस्पर्शी यो जम्बूविटपी जम्बूवृक्षस्तस्य कपटेन व्याजेन, मस्तकं मूर्धानम्, उद्धृत्योन्नमय्य, स्वमहिम्ना स्वकीयप्रभावेण निराकृतस्तिरस्कृतो यः सुराधिपलोकः पुरन्दरभुवनं स्वर्ग इति यावत् तम्, प्रतिक्षणं प्रतिसमयम्, ईक्षत इतीक्षमाणस्तस्मिन्निवावलोकमान इव, अपारमनवसानं यत्संसारसंतमसं भवतिमिरं तेनान्धीकृतो यो जीवलोको जन्तुसमूहस्तस्य, पुरुषार्थानां धर्मार्थकाममोक्षाणां यच्चतुष्टयं चतुष्कं तस्य प्रकाशनायेवावलोकनायेव दिवाकरयुगलस्य सूर्ययुग्मस्य निशाकरयुगलस्य चन्द्रयुग्मस्य च व्याजेन दम्भेन प्रदीपचतुष्टयं दीपकचतुष्टयम् । आबिभ्राणे आदधति । महीमहिलायाः पृथिवीवनितायाः, मूर्तीकृतं लावण्यं सविग्रहीकृतं सौन्दर्यं तस्मिन्निव, श्रीलासिकालास्यस्य लक्ष्मीनर्तकीनाट्यस्य, रङ्गस्थल इव रङ्गभूमाविव, नाकलोकस्य स्वर्गप्रदेशस्य प्रतिच्छन्द इव प्रतिबिम्ब इव, सकलाश्च ते लेखाश्च सकललेखा निखिलदेवास्तेषां लोचनान्येव मीना मत्स्यास्तेषाम् । आलम्बनकूपे आधारकूपे जम्बूद्वीपे प्रथमद्वीपे । भरतखण्डस्य भारतवर्षस्य मण्डनायमानमाभरणवदाचरद्यत्कमलवनं तस्य मधु मकरन्दं तस्मिन् लुब्धात्यासक्ता या भृङ्गमाला भ्रमरश्रेणिस्तस्य व्याजेन दम्भेन, सकललोकानां निखिलजनानां लोचनानि नयनानि तेषां बन्धनार्थमवरोधनार्थम् । आयसशृङ्खला-

१. सकलमध्यमध्यासीने ब० ।

शालिकलममञ्जरीपुञ्जपिञ्जरीभूततया पत्त्रिकुलपातभयात् कृषीवलस्थगितपीताम्बरमिव बिभ्राणम्, तत्र तत्र समर्पितैरभ्रंलिहैर्बीजावापप्रभृति तपनकलितसन्तापजनितवैरतया तदीयपदवीमुपरुन्धद्भिरिव निजसौन्दर्यसंदर्शनार्थमागतैः कुलाचलैरिव उदयास्ताचलमध्यसञ्चारखिन्नस्य सरोजबन्धोर्विश्रमाय वेधसा विरचितैरिव धराधरैर्धान्यराशिभिरुद्भासितम्, अतिदूरप्रवृद्धशाखावलयविलसितकिसलयकैतवेन हस्तमुदस्य विचित्रपतत्त्रिविरुतैः कल्पपादपाञ्जेतुमिवाह्वयमानैर्जन्मप्रभृति जलसेकाद्युपकारेण वर्धकेभ्यो बलाहकेभ्यः फलपुष्पादीनि समर्पयितुमिव मेघमण्डलमवलम्बमानैरुपवनतरुषण्डैर्मण्डितम्, विकचनीलोत्पलनयनाभिः पद्ममुखीभिर्भृङ्गजालनीलालकाभिर्मुदितमीनलाञ्छनमकरीशोभितचारुचक्रपयोधराभिर्घनपुलिनजघनाभिस्तटिनीवधूटीभिः परिवृतमस्ति निस्तुलं हेमाङ्गदं नाम मण्डलम्।

तत्रास्ति राजनगरी जगति प्रसिद्धा
यत्सालनीलमणिदीधितिरुद्धमार्गः।
राहुभ्रमेण विवशस्तरणिः सहस्रैः
पादैर्युतोऽपि न हि लङ्घयति स्म सालम्॥ १३॥

मिव लोहश्रृङ्खलां बिभ्राणमिव दधदिव। परिपाकेन परिणामेन पिशङ्गाः पिङ्गला या कलममञ्जर्यो धान्यमञ्जर्यस्तासां पुञ्जेन समूहेन पिञ्जरीभूततया पीतीभूततया पत्त्रिणां पक्षिणां कुलस्य समूहस्य पातः सम्पतनं तस्य भयं तस्मात्, कृषीवलैः कृषकैः स्थगितमाच्छादितं पीताम्बरं पीतवसनं बिभ्राणमिव दधानमिव तत्र तत्र सर्वत्र समर्पितैः प्ररूढैः, अभ्रंलिहैर्मेघस्पर्शिभिः, बीजावापप्रभृति बीजविकिरणादारभ्य तपनेन सूर्येण कलितः समुत्पादितो यः संताप आतपबाधा तेन जनितवैरतया समुत्पन्नविद्वेषतया तदीयपदवीं सूर्यमार्गम्, उपरुन्धद्भिरिव समाच्छादयद्भिरिव, निजसौन्दर्यस्य स्वकीयरामणीयकस्य संदर्शनार्थं समवलोकनार्थम् आगतैरायातैः कुलाचलैरिव कुलगिरिभिरिव 'हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणो वर्षधरपर्वताः' इत्युक्ताः षट् कुलाचलाः, उदयास्ताचलयोः पूर्वापरगिर्योर्मध्ये संचारेण निरन्तरगमनेन खिन्नः श्रान्तस्तस्य, सरोजबन्धोः सूर्यस्य, विश्रमाय श्रमदूरीकरणाय वेधसा प्रजापतिना विरचितैर्निर्मितैः, धराधरैः पर्वतैरिव धान्यराशिभिर्व्रीहिपुञ्जैः उद्भासितं सुशोभितम्, अतिदूरं दूरतरं प्रवृद्धेषु विस्तृतेषु शाखावलयेषु शाखामण्डलेषु विलसिताः शोभमाना ये किसलयाः पल्लवास्तेषां कैतवेन व्याजेन हस्तं करम्, उदस्योत्क्षिप्य विचित्रा विविधजातयो ये पतत्त्रिणः पक्षिणस्तेषां विरुतैः शब्दैः, कल्पपादपान् सुरतरून्, जेतुं पराभवितुम्, आह्वयमानैराकारयद्भिः, जन्मप्रभृति यदा जन्म तदारभ्य जलसेको नीराभिषेचनमादौ यस्य तथाभूतो य उपकार उपग्रहस्तेन, वर्धकेभ्यो वृद्धिदायकेभ्यः, वारिवाहका बलाहकास्तेभ्यो मेघेभ्यः 'पृषोदरादीनि यथोपदिष्टम्' इति निपातनेन पूर्वपदस्य वः, उत्तरपदादेश्च लत्वम्, फलपुष्पाणि प्रसवकुसुमान्यादौ येषां तानि, समर्पयितुमिव प्रदातुमिव, मेघमण्डलं घनसमूहम्, अवलम्बमानैराश्रयद्भिः, तरुषण्डैर्वृक्षसमूहैः, मण्डितं शोभितम्, विकचानि प्रफुल्लानि नीलोत्पलान्येव कुवलयान्येव नयनानि लोचनानि यासां ताभिः, पद्मानि कमलान्येव मुखानि यासां ताभिः, भृङ्गजालानि भ्रमरसमूहा एव नीलालकाः कृष्णचूर्णकुन्तला यासां ताभिः, मुदितस्य प्रसन्नस्य मीनलाञ्छनस्य मदनस्य या मकर्यो ध्वजचिह्नभूता जलजन्तुविशेषास्ताभिः शोभिता अलङ्कृता ये चारुचक्रा मनोहरचक्रवाकास्त एव पयोधराः कुचा यासां ताभिः, घनपुलिनानि विपुलतटान्येव जघनानि नितम्बानि यासां ताभिः, तटिन्यो नद्य एव वध्व्यो युवतयस्ताभिः परिवृतं परिवेष्टितम्, निस्तुलमुपमातीतम्, हेमाङ्गदमेतन्नामधेयं मण्डलं जनपदः, अस्ति विद्यते।

अथ तत्र पुरीं वर्णयितुमाह—तत्रास्तीति—तत्र हेमाङ्गदमण्डले, जगति भुवने, प्रसिद्धा प्रख्याता, सा, राजनगरी राजपुरी, अस्ति विद्यते, यस्या राजपुर्याः साले प्राकारे खचितानां नीलमणीनां वैडूर्यमणीनां दीधितिभिः किरणैः रुद्धो व्याप्तो मार्गः पन्था यस्य सः, तरणिः सूर्यः, सहस्रं पादाश्चरणाः किरणाश्च तैः,

अम्भोमुक्चुम्बिसौधध्वजपटपवनोद्धूतसप्ताश्वरथ्य-
श्रान्तेः सौदामिनीश्रीतुलिततनुलतामानिनीमानितायाः ।
यस्या माणिक्यगेहप्रसृतरुचिभरीकल्पितोद्यद्वितानै
निर्यन्नीलाश्मसालद्युतिरमरपुरे वन्दनस्रग्बभूव ॥ १४ ॥

यस्या हरिन्मणिमयालयकान्तिजालै-
र्व्याप्ते बलाहककुलेऽपि सहस्ररश्मिः ।
दूर्वाम्बुबुद्धिपतदात्मरथाश्वरोध-
क्लेशासहः किमकरोद्गमनेऽयने द्वे ॥ १५ ॥

यत्सुन्दरीवदनचन्द्रविलीनचन्द्र-
कान्ताश्मसौधगलितं सलिलं पिपासुः ।
एणाङ्करङ्कुरतिवेगवशात्समेत्य
भीतो रयेन निरयात् कृतसौधसिंहात् ॥ १६ ॥

यस्यामनर्घ्यनृपमन्दिरदेहलीषु
गारुत्मतैर्मृगगणा बहु वञ्चिताः प्राक् ।
दृष्ट्वापि कोमलतृणानि न [1]संस्पृशन्ति
स्त्रीमन्दहासधवलानि चरन्ति तानि ॥ १७ ॥

युतोऽपि सहितोऽपि, राहुभ्रमेण विधुन्तुदविभ्रमेण, विवशः परायत्तः स्खलितगतिरिति यावत् सन्, सालं प्राकारं, नहि लङ्घयति स्म नातिक्रामति स्म । सुन्नतसालसुशोभिता सासीदिति भावः । भ्रान्तिमदुत्प्रेक्षा-विरोधाभासाः ॥१३॥

अथ तामेव राजपुरीं वर्णयितुमाह—अम्भोमुगिति—अम्भोमुक्चुम्बिनो घनस्पर्शिनो ये सौधध्वजपटाः प्रासादपताकावस्त्राणि तेषां पवनेन समीरेणोद्धूता दूरीकृता सप्ताश्वरथ्यानां सूर्यवाहानां श्रान्तिः क्लान्तिर्यया तस्याः, सौदामिनीश्रिया विद्युल्लक्ष्म्या तुलिता सदृशी तनुलता शरीरवल्लरी यासां, तथाभूता या मानिन्यो वनितास्ताभिर्मानिता सत्कृता शोभितेति यावत् तस्याः, यस्या राजपुर्याः, माणिक्यगेहानां रत्नमयप्रासादानां प्रसृताभिर्निर्गत्य विसृताभां रुचिभरीभिः कान्तिपरम्पराभिः कल्पितं रचितमुद्यद्वितानं विततोल्लोचो यस्मिंस्तस्मिन्, अमरपुरे स्वर्गे, निर्यन्ती निर्गच्छन्ती नीलाश्मसालस्य नीलमणिमयप्राकारस्य द्युतिः कान्तिः, वन्दनस्रक् वन्दनमाला, बभूव । उदात्तालङ्कारः ॥१४॥

अथ तस्या आलयान्वर्णयितुमाह—यस्या इति—सहस्ररश्मिः सूर्यः, यस्या राजपुर्या हरिन्मणिमयानां हरिद्वर्णरत्ननिर्मितानामालयानां निलयानां कान्तिजालैर्दीप्तिसमूहैः, व्याप्तेऽभितते, बलाहककुलेऽपि मेघसमूहेऽपि दूर्वाम्बुबुद्ध्या शतपर्वसलिलधिया पतन्तो नीचैरायान्तो य आत्मरथाश्वाः स्वकीयस्यन्दनवाहास्तेषां रोधे निवारणे यः क्लेशो दुःखं तस्यासहस्तं सोढुमसमर्थः सन् किम् गमने गतौ द्वे अयने दक्षिणोत्तराभिधौ द्वौ मार्गौ अकरोत् विदधौ । भ्रान्तिमदुत्प्रेक्षे ॥१५॥

यत्सुन्दरीति—यस्या राजपुर्याः सुन्दरीणां ललनानां वदनचन्द्रैर्मुखेन्दुभिर्विलीना द्रुता ये चन्द्रकान्ताश्मसौधाश्चन्द्रकान्तमणिमन्दिराणि तेभ्यो गलितं पतितं, सलिलं जलं पिपासुः पातुमिच्छुः, एणाङ्करङ्कुश्चन्द्रमृगः, अतिवेगवशात् सत्वरम्, समेत्य समागत्य, कृतः कृत्रिमश्चासौ सौधसिंहश्च भवनमृगेन्द्रश्च तस्मात्, भीतस्त्रस्तः सन्, रयेन वेगेन, निरयात् निरगच्छत् ॥१६॥

यस्यामिति—यस्यां नगर्याम्, अनर्घ्याणि अमूल्यानि श्रेष्ठानीति यावत्, यानि नृपमन्दिराणि राज-

1. संस्पृशन्तः ब० ।

उदग्रहर्म्यावलिमाश्रितानां यत्राङ्गनानां नयनोत्पलश्रीः ।
गङ्गां सखीं स्वामवलोकितुं द्राक्स्वर्गं गता सूर्यसुतेव भाति ॥ १८ ॥
यत्प्रासादपरम्पराप्रतिफलद्देवाङ्गनास्वाङ्गना-
भेदं दृष्टिनिमेषकौशलवशाज्जानाति यूनां ततिः ।
यद्वैडूर्यशिरोगृहस्थसुदतीवक्त्रेन्दुबिम्बं विधो-
र्बिम्बं चैव समीक्ष्य संशयमगात् स्वर्भानुरभ्राजिरे ॥ १९ ॥
यत्सौधानवलोक्य निर्जरपतिर्द्राङ्निर्निमेषोऽभवद्
यस्या वीक्ष्य सरोजशोभिपरिखां गङ्गा विषादं गता ।
यत्रत्यानि जिनालयानि कलयन्मेरुः स्वकार्तस्वरं
स्वीचक्रे च बलद्विषं सुरपुरी या वीक्ष्य शोकाकुला ॥ २० ॥

भवनानि तेषां देहल्यस्तासु गारुत्मतैर्गारुडै रत्नैः, प्राक् पूर्वम्, बहु भूरिशः, वञ्चिताः प्रतारिताः, मृगगणा हरिणसमूहाः, कोमलतृणानि मृदुशष्पाणि हरिद्वर्णतृणानीति यावत्, दृष्ट्वाप्यवलोक्यापि, न संस्पृशन्ति, न तेषां स्पर्शं कुर्वन्ति, तान्येव हरिततृणानि यदा स्त्रीणां नारीणां मन्दहासेन स्मितेन धवलानि सितानि भवन्ति तदा चरन्ति भक्षयन्ति । भ्रान्तिमदलङ्कारः ।

उदग्रेति—यत्र नगर्याम्, उदग्रा समुन्नता चासौ हर्म्यावलिश्च सौधसन्ततिश्च ताम्, आश्रितानामधिष्ठितानाम्, अङ्गनानां नारीणाम्, नयनान्युत्पलानीवेति नयनोत्पलानि नेत्रकुवलयानि तेषां श्रीः शोभा, स्वां स्वकीयां सखीं वयस्यां गङ्गां मन्दाकिनीम्, अवलोकितुं द्रष्टुं द्राग् झटिति, स्वर्गं त्रिदिवं गता सूर्यसुतेव यमुनेव भाति शोभते । उत्प्रेक्षालङ्कारः ॥१८॥

यत्प्रासादेति—यूनां तरुणानां ततिः पङ्क्तिः समूह इति यावत्, यस्या राजपुर्याः प्रासादपरम्परायां भवनश्रेण्यां प्रतिफलन्त्यः प्रतिबिम्बत्वेन परिणमन्त्यो या देवाङ्गनाः सुर्यः, ताश्च स्वाङ्गनाश्च स्वकीयवल्लभाश्चेति द्वन्द्वस्तासु भेदं वैशिष्ट्यम्, दृष्टिषु नयनेषु निमेषः पक्ष्मपात एव कौशलं नैपुण्यं तस्य वशात्तस्मात्, जानाति बुध्यते, तत्रत्या युवतयो देवीसन्निभा आसन् केवलं निमेष एव तासां नारीत्वबोधको बभूव । देवीनां नयनेषु निमेषो न जायत इति प्रसिद्धिः । अभ्राजिरे गगनाङ्गणे, स्वर्भानू राहुः, यस्या नगर्या वैडूर्यशिरोगृहस्थानां नीलमणिमयाग्रनिकेतनपृष्ठस्थितानां सुदतीनां शोभनदन्तानां नारीणां वक्त्रेन्दुबिम्बं मुखचन्द्रमण्डलं, विधोश्च चन्द्रमसश्च, बिम्बमेव मण्डलमपि, समीक्ष्य विलोक्य, संशयं कोऽत्र चन्द्र इति संदेहम्, अगात् प्रापत्, इण् गतावित्यस्य लुङि रूपम् 'इणो गाङ् लुङि' इति गाङादेशः । यत्रत्यसुदतीवदनानि विधुबिम्बसदृशान्यासन्निति भावः । पूर्वार्धे व्यतिरेक उत्तरार्धे च संशयालङ्कारः ॥ १९ ॥

यत्सौधानिति—यस्या राजपुर्याः सौधान् राजभवनानि, अवलोक्य दृष्ट्वा, निर्जरपतिरिन्द्रः द्राक् क्षिप्रम्, निर्निमेषः पक्ष्मपातरहितः, अभवद् बभूव, सौधानां शोभातिशयं दृष्ट्वा विस्मयेन विनिर्निमेषोऽभूदिति भावः । यस्या नगर्याः, सरोजैः कमलैः शोभिनीं समुल्लासिनीं परिखां खातं ताम्, वीक्ष्य विलोक्य, गङ्गा भागीरथी, विषादं खेदं पक्षे विषमत्तीति विषादः शिवस्तं गता प्राप्ता । यत्रत्यानि यत्रभवानि जिनालयानि जिनेन्द्रमन्दिराणि कलयन्परयन् मेरुर्हेमाद्रिः, स्वकस्यात्मन आर्तस्वरं पीडाजनितवैस्वर्यं पक्षे स्वस्य कार्तस्वरं स्वस्य सुवर्णमयत्वम्, स्वीचक्रेऽङ्गीचकार, सुरपुरी च देवपुरी च, यां राजपुरीं, वीक्ष्य दृष्ट्वा, शोकाकुला दुःखव्यग्रा सती बलद्विषमिन्द्रं पक्षे वयोरैक्याद्बलद्विषं पराक्रमरिपुं निर्बलमिति यावत्, स्वीचक्र इति क्रियया सम्बन्धः । निर्जरपतिप्रभृतीनां स्वभावसिद्धेषु निर्निमेषत्वादिषु सौधादीनां दर्शनस्य कारणत्वेनोत्प्रेक्षणादुत्प्रेक्षालङ्कारः, तत्र श्लेषोऽनुप्राणयति ॥ २० ॥

---

१. —यस्याः ब० ।

शास्ति स्म शस्तमहिमा महनीयवृत्ति-
स्तां भूपमौलिमणिरञ्जितपादपीठः ।
सत्यंधरक्षितिपतिर्भुवि यस्य कीर्तिः
प्रत्यर्थिभिः सह दिगन्तमवाप शुभ्रा ॥ २१ ॥

यश्च किल संक्रन्दन इवानन्दितसुमनोगणः, अन्तक इव महिषीसमधिष्ठितः, वरुण इवाशान्तरक्षणः, पवन इव पद्मामोदरुचिरः, हर इव महासेनानुयातः, नारायण इव वराहवपुष्कलोदयोद्धृतधरणीवलयः, सरोजसंभव इव सकलसारस्वतामरसभानुभूतिः भद्रगुणोऽप्यनागो, विबुधपतिरपि कुलीनः, सुवर्णधरोऽप्यनादित्यागः, सरसार्थपोषकवचनोऽपि नरसार्थपोषकवचनः, आगमाल्याश्रितोऽपि नागमाल्याश्रितः ।

अथ नगरीवर्णनानन्तरं राजानं वर्णयितुमाह—शास्ति स्मेति—शस्तो महिमा यस्य स प्रशस्तमाहात्म्योपेतः महनीया श्लाघनीया वृत्तिर्व्यवहृतिर्यस्य सः, भूपानां पार्थिवानां मौलिमणिभिर्मुकुटरत्नै रञ्जितोऽरुणीकृतः पादपीठश्चरणासनं यस्य सः, सत्यंधरश्चासौ क्षितिपतिश्चेति सत्यंधरक्षितिपतिः, सत्यन्धराभिधानो नृपः, तां राजपुरीम्, शास्ति स्म पालयति स्म, यस्य नृपस्य शुभ्रा धवला, कीर्तिः समज्ञा, 'यशः कीर्तिः समज्ञा च' इत्यमरः । भुवि पृथिव्याम्, प्रत्यर्थिभिररातिभिः सह सार्धम्, दिगन्तं काष्ठान्तम्, अवाप प्राप्ता । विगतारातिरवदातकीर्तिसम्पन्नश्चासावासीदिति भावः । सहोक्तिरलंकारः ॥ २१ ॥

अथ तस्य वैशिष्ट्यं दर्शयितुमाह—यश्चेति—यश्च सत्यन्धरः, किलेति वाक्यालङ्कार ऐतिह्ये वा, संक्रन्दन इव पुरन्दर इव, आनन्दितः समाह्लादितः सुमनसां विदुषां गणः समूहो येन, पुरन्दरपक्षे सुमनोगणो देवसमूहः, अन्तक इव यम इव महिष्या कृताभिषेकया पट्टराज्ञ्या समधिष्ठितो युक्तः, यमपक्षे स्ववाहनभूतमहिषपत्नीमहितः, वरुण इव प्रचेता इव, आ समन्तात्क्षान्तं निरुपद्रवं रक्षणं यस्य सः, वरुणपक्षे आशान्तस्य पश्चिमकाष्ठान्तस्य रक्षणं यस्मात्सः, पवन इव समीर इव, पद्मायाः लक्ष्म्याः आमोदेन हर्षेण रुचिरो मनोहरः, पवनपक्षे पद्मानां कमलानामामोदेन सौरभातिशयेन रुचिरः सुभगः, हर इव शिव इव, महासेनया विशालपृतनयाऽनुयातोऽनुगतः, शिवपक्षे महासेनेन कार्तिकेयाभिधानेन स्वपुत्रेणानुयातोऽनुगतः, नारायण इव विष्णुरिव, वराहवेषूत्कृष्टयुद्धेषु य उदयो विजयस्तेनोद्धृतं समुन्नमितं धरणीवलयं महीमण्डलं येन सः, विष्णुपक्षे वराहस्य सूकरस्य वपुष्कलया शरीरकलया य उदयोऽवतारस्तेनोद्धृतं रसातलात्समुन्नीतं धरणीवलयं भूमण्डलं येन सः, सरोजसंभव इव वेधा इव कलाभिश्चातुरीभिः सहितः सकलः, सारो बलं स्वं धनं यस्य सः सारस्वः, तामरसस्य कमलस्येव भाया दीप्तेरनुभूतिरुपभोगो यस्य सः, सकलश्चासौ सारस्वश्चेति सकलसारस्वः सकलसारस्वश्चासौ तामरसभानुभूतिश्चेति सकलसारस्वतामरसभानुभूतिः, अथवा सकलाः समग्रा ये सारस्वताः सरस्वतीभक्ता पण्डितास्तेषां यामरसभा स्थायिसमितिस्तस्यामनुभूतिः प्रभावो यस्य सः, वेधःपक्षे सकलाः सचातुरीकाः समग्रा वा येऽमरा देवा अथवा सारस्वतामरा लौकान्तिकदेवविशेषास्तेषां सभायामनुभूतिः प्रभावो यस्य सः, अत्र सर्वत्र श्लिष्टोपमालङ्कारः । भद्रगुणोऽपि दिग्गजविशेषगुणोऽपि अनागोऽगजः पक्षे भद्रगुणयुक्तोऽप्यपराधशून्यः, आगश्शब्दस्यादन्तत्वमपि क्वचित्प्रयुज्यते, विबुधपतिरपीन्द्रोऽपि कौ पृथिव्यां लीनः स्थितः पक्षे विबुधानां विदुषां पतिः स्वामी विद्वच्छ्रेष्ठोऽपि सन् कुलीनोऽभिजातः, सुवर्णधरोऽपि सुमेरुरपि, अनादित्यागोऽसूर्यपर्वतः सूर्यागमनरहितशैल इति यावत् पक्षे सुवर्णधरोऽपि सुन्दररूपधारकोऽपि, अनादिरादिरहितस्त्यागो दानं यस्य सः, रसेनोपलक्षितोऽर्थो रसार्थस्तस्य पोषकाणि समर्थकानि वचनानि यस्य तथाभूतोऽपि सन्, न तथाभूत इति नरसार्थपोषकवचनः पक्षे नराणां मनुजानां सार्थस्य समूहस्य पोषकाणि वचनानि यस्य सः, आगमस्याप्तनिबन्धनशास्त्रस्याल्या पङ्क्त्याऽऽश्रितोऽपि सेवितोऽपि तथा न भवतीति नागमाल्याश्रितः पक्षे नागानां गजानां माल्येन पङ्क्त्याऽऽश्रितः सेवितः सहित इति यावत् । अत्र सर्वत्र विरोधाभासालङ्कारः । अस्तीति शेषः ।

कीर्तिर्यस्य दिगङ्गनाकुचतटीपाटीरसंवादिनी
तेजःश्रीः किल तत्र कुङ्कुमकृतालंकारशङ्कावहा ।
आज्ञा यस्य महामहीशमकुटीष्वाकल्पमालायते
यत्सेवा सकृदर्थिनां परिचिता स्वर्गद्रुवर्गीयते ॥ २२ ॥

यस्मिञ्छासति महीमण्डलं मदमालिन्यादियोगो मत्तदन्तावलेषु, परागः कुसुमनिकरेषु, नीचसेवना निम्नगासु, आर्तवत्त्वं फलितवनराजिषु, करपीडनं नितम्बिनीकुचकुम्भेषु, विविधार्थचिन्ता व्याख्यानकलासु, नास्तिवादो नारीमध्यप्रदेशेषु, गुणभङ्गो युद्धेषु, खलसङ्गः कलमकुलेषु, अपाङ्गता कुरङ्गाक्षीलोचनतरङ्गेषु, मलिनमुखता मानिनीस्तनमुकुलेषु, आगमकुटिलता भुजङ्गेषु, अजिनानुरागः शूलपाणौ, सोपसर्गता धातुषु, दरिद्रभावः शातोदरीणामुदरेषु, द्विजिह्वता फणिषु, पला-

---

तमेव वर्णयितुमाह—कीर्तिरिति—यस्य सत्यन्धरस्य, कीर्तिः समज्ञा यश इति यावत्, दिगङ्गनानां काष्ठाकामिनीनां कुचतटीषु वक्षोजप्रदेशेषु पाटीरस्य चन्दनस्य संवादिनी समर्थिका तत्तुल्येति यावत् । तेजःश्रीः प्रतापलक्ष्मीः, तत्र दिगङ्गनाकुचतटीषु कुङ्कुमेन काश्मीरेण कृतो विहितो योऽलङ्कारो भूषा तस्य शङ्कावहा संदेहोत्पादिका, अस्तीति शेषः, किलेति वार्तायाम् । यस्य नृपस्य, आज्ञा निदेशः, महामहीशानां महाराजानां मकुटीषु मौलिषु, आकल्पमालेव नेपथ्यस्रगिवाचरतीत्याकल्पमालायते । सकृदेकवारम्, परिचिता प्राप्ता, यस्य नृपस्य सेवा शुश्रूषा, अर्थिनां याचकानाम्, स्वर्गद्रवः कल्पवृक्षास्तेषां वर्गः समूह इवाचरति । उपमा ॥२२॥

अथ श्लेषगर्भेण परिसंख्यालङ्कारेण तमेव वर्णयितुमाह—यस्मिन्निति—यस्मिन् सत्यन्धरे महीमण्डलं पृथिवीवलयं शासति रक्षति सति, मदमालिन्यादियोगो दानजन्यकालुष्यादिसंबन्धः, मत्तदन्तावलेषु मत्तमतङ्गजेष्वेव परमत्यन्तं व्यवस्थितं नान्यत्र गर्वजन्यकालुष्यादिसम्बन्धो बभूव, परागः कौसुमं रजः कुसुमनिकरेषु पुष्पसमूहेष्वेव नान्यत्र परागो महापराधो बभूव, नीचस्य निम्नस्थानस्य सेवना प्राप्तिः निम्नगासु नदीष्वेव नान्यत्र नीचानां क्षुद्राणां सेवनोपासना बभूव, ऋतूनां विकार आर्तवं तस्य भाव आर्तवत्वं, फलिताः सञ्जातफला या वनराजयः काननपङ्क्तयस्तासु नान्यत्रार्तवतां दुःखवतां भाव आर्तवत्वं दुःखमिति यावद् बभूव, करैर्युवजनपाणिभिः पीडनं संमर्दनं नितम्बिनीनां कामिनीनां कुचकुम्भेषु स्तनकलशेष्वेव नान्यत्र करैर्बलिभिर्नृपतिग्राह्यद्रव्यभागैरिति यावत् पीडनं क्लेशो बभूव, विविधार्थानां नैकविधपदार्थानां चिन्ता विचारो व्याख्यानकलासु देशनाचातुरीष्वेव नान्यत्र विविधानां नैकप्रकाराणामर्थानां लवणतैलहिङ्गुगुडादीनां चिन्ता बभूव, नास्तिवादः कृशतरत्वेन नास्त्येवेति कथनं नारीणां वनितानां मध्यप्रदेशेषु कटिस्थानेष्वेव नान्यत्र नास्तिवादोऽभिलषितपदार्थाभावनिवेदनं बभूव, गुणस्य मौर्व्या भङ्गो विनाशश्छेद इति यावत्, युद्धेषु समरेष्वेव नान्यत्र गुणानां दयादाक्षिण्यादीनां भङ्गो विनाशो बभूव, खलेन गोधूमादिधान्यपवित्रीकरणयुक्तस्थानविशेषेण सङ्गः समागमः, कलमकुलेषु व्रीहिसमूहेष्वेव नान्यत्र खलैर्दुष्टैः सङ्गः संसर्गो बभूव, अपाङ्गता कटाक्षता कुरङ्गाक्षीणां मृगलोचनानां लोचनतरङ्गेषु नयनपरम्परास्वेव नान्यत्रापाङ्गता विकलाङ्गता बभूव, मलिनमुखता कृष्णाग्रता मानिनीनां नारीणां स्तनमुकुलेषु कुचकुड्मलेष्वेव नान्यत्र मलिनमुखता दुर्जनता बभूव, दुर्जनो हि कृष्णवदनत्वेन प्रसिद्धः, आगम आगमने कुटिलता वक्रत्वं भुजङ्गेषु सर्पेष्वेव नान्यत्रागमे सिद्धान्ते कुटिलता वक्रत्वं मायाविन्वं बभूव, अजिने चर्मण्यनुरागः प्रीतिः शूलपाणौ शिव एव नान्यत्र जिनानुरागस्य जिनेन्द्रभक्तेरभावोऽजिनानुरागो बभूव, सोपसर्गता प्राद्युपसर्गसहितता धातुष्वेव भूप्रभृतिधातुष्वेव नान्यत्र सोपसर्गता सोपद्रवता बभूव, दरिद्रता कृशता शातोदरीणां कृशोदरीणां नारीणामुदरेषु जठरेष्वेव नान्यत्र दरिद्रभावो निर्धनत्वं बभूव, द्विजिह्वता सर्पत्वं फणिषु सर्पेष्वेव नान्यत्र द्विजिह्वता पिशुनता बभूव, पलाशिता पत्रसहितता विपिनतरुषु काननानोकहकलापेष्वेव नान्यत्र पलं मांसमश्नातीति पलाशी तस्य भावः

शिता विपिनतरुषण्डेषु, अधररागः सुदतीमुखकमलेषु, तीक्ष्णता कोविदबुद्धिषु, कठिनता कान्ताकुचेषु, नीचता नाभिगह्वरेषु, विरोधः पञ्जरेषु, अपवादिता नीरोष्ठ्यकाव्येषु, घनयोगभङ्गो वर्षावसानेषु, कलिकोपचारः कामसंतापेषु, कलहंसकुलं क्रीडासरसीषु परमेवं व्यवस्थितम् ।

वक्त्रं चन्द्रप्रभं यद्भुजयुगमजितं यस्य गात्रं सुपार्श्वं
　　कृत्यं स्वाधीनधर्म्यं हृदि पुरुचरितं शीतलं सुव्रताढ्यम् ।
राज्यं श्रीवर्धमानं कुलमतिविमलं कीर्तिवृन्दं त्वनन्तं
　　सोऽयं प्रत्यक्षतीर्थेश इव विजयते विश्वविद्याविनोदः ॥ २३ ॥

यत्पाणिपल्लवधृतासिजलान्निमज्ज-
　　च्छत्रुव्रजात्समुदितां जलबिन्दुराजिम् ।
तारावलीति तु वदन्ति जना मृषैत-
　　त्त्रान्यथा मकरमीनकुलीरकाः के ॥ २४ ॥

पलाशिता मांसाशित्वं बभूव, अधरे दन्तच्छदे रागोऽरुणिमा सुदतीनां नारीणां मुखकमलेषु वदनारविन्देष्वेव नान्यत्राधरेषु नीचेषु रागः प्रीतिरधररागो बभूव, तीक्ष्णस्य भावस्तीक्ष्णता कुशाग्रता कोविदानां विपश्चितां बुद्धयो धियस्तास्वेव नान्यत्र तीक्ष्णता तिग्मता कठोरतेति यावद् बभूव, कठिनता कठोरता कान्तानां वनितानां कुचेषु वक्षोजेष्वेव नान्यत्र कठिनता निर्दयता बभूव, नीचता गभीरता नाभिगह्वरेषु तुन्दिगर्तेष्वेव नान्यत्र नीचता खलता बभूव, वीनां पक्षिणां रोध आवरणं पञ्जरेषु शलाकायन्त्रेष्वेव नान्यत्र विरोधो विद्वेषो बभूव, पश्च वश्चेति पवौ तावादी येषां ते पवादयः पकारवकारप्रभृतिवर्णाः, न सन्ति पवादयो येषु तान्यपवादीनि, तेषां भावोऽपवादिता नीरोष्ठ्यकाव्येषु—ओष्ठस्थानोच्चारणयोग्यपवर्गादिवर्णरहितकाव्येष्वेव नान्यत्र, अपवादो निन्दाऽस्ति येषां तेऽपवादिनस्तेषां भावोऽपवादिता बभूव, घनैर्मेघैर्योगः सङ्गो घनयोगस्तस्य भङ्गो विरहो वर्षावसानेषु प्रावृट्समाप्तिष्वेव नान्यत्र घनो निबिडो यो योगः सम्बन्धस्तस्य भङ्गो विनाशो बभूव, कलिकानां पुष्पदलानामुपचारः शय्यादिषु प्रयोगः कामसंतापेषु मदनज्वरेष्वेव नान्यत्र कलिषु कलहेषु कोपस्य क्रोधस्य चारो गमनं बभूव, कलहंसानां कादम्बानां कुलं समूहः क्रीडासरसीषु केलिकासारेष्वेव नान्यत्र सकुलं सन्ततियुतं कलहं विद्वेषो बभूव । परिसंख्यालंकारः ।

वक्त्रमिति—विश्वासां विद्यानां विनोदो विश्वविद्याविनोदो निखिलागमकोविदः, सोऽयं सत्यन्धरः, प्रत्यक्षतीर्थेश इव प्रत्यक्षतीर्थंकर इव विजयते सर्वोत्कर्षेण वर्तते 'विपराभ्यां जेः' इत्यात्मनेपदम्, तथाहि यस्य राज्ञः वक्त्रं वदनं चन्द्रस्य प्रभेव प्रभा यस्य तत् पक्षेऽष्टमतीर्थंकररूपम्, यस्य नृपस्य भुजयो र्बाह्वोर्युगं युगलम्, अजितं केनाप्यपराभूतं पक्षे द्वितीयतीर्थकृद्रूपम्, यस्य गात्रं शरीरम्, शोभने पार्श्वे यस्मिंस्तत् पक्षे सप्तमतीर्थंकररूपम्, कृत्यं कार्यम्, स्वस्याधीनं स्वाधीनं, धर्मादनपेतं धर्म्यं, स्वाधीनञ्च तद् धर्म्यञ्चेति स्वाधीनधर्म्यम् स्वतन्त्रं धर्मोपेतञ्च पक्षे स्वाधीनपञ्चदशतीर्थंकरम्, हृदि चित्ते, शीतलं शान्तम्, सुव्रतेन शोभनव्रतेनाढ्यं सहितम्, पुरु विपुलं चरितं चारित्रं पक्षे पुरोर्भगवतो वृषभनाथस्य चरितं गमनं शीतलं दशमतीर्थंकररूपम्, सुव्रताढ्यं विंशतितीर्थंकररूपम्, राज्यं साम्राज्यम्, श्रिया लक्ष्म्या वर्धमानमेधमानम्, पक्षेऽष्टप्रातिहार्योपलक्षितमहावीरतीर्थंकररूपम्, कुलं गोत्रम्, अतिविमलं निर्मलतरम्, पक्षे त्रयोदशतीर्थंकररूपम्, कीर्तिवृन्दं यशःसमूहस्तु, अनन्तमन्तातीतं पक्षे चतुर्दशतीर्थंकररूपम् । यस्येत्यस्य सर्वत्र सम्बन्धः । श्लेषः ॥ २३ ॥

यत्पाणीति—निमज्जन् बुडन् शत्रुव्रजः शत्रुसमूहो यस्मिंस्तस्मात्, यस्य पाणिपल्लवेन करकिसलयेन धृतस्य गृहीतस्यासेः खड्गस्य जलं पानीयं तस्मात्, समुदितां समुच्छलिताम्, जलबिन्दूनां तोयपृषतानां राजिं पंक्तिम्, ताराणां नक्षत्राणामावली पंक्तिरिति तु जना लोकाः, वदन्ति कथयन्ति, एतल्लोककथनम्, मृषा मिथ्या, अस्तीति शेषः, अन्यथा मृषात्वाभावे, तत्र तारावल्याम्, मकराश्च नक्राश्च,

यस्य च वदनतटे कोपकुटिलितभ्रुकुटिघटितेऽशरणतया वनं प्रति धावमानानां प्रतिपक्षपार्थिवानां वृक्षराजिरपि वातान्दोलितशाखाहस्तेन पतत्रिविरुतेन च राजविरोधिनोऽत्र न प्रवेष्टव्या इति निषेधं कुर्वाणा तामतिक्रामत्सु तेषु राजापराधभयेनेव प्रवातकम्पमाना विशङ्कटकण्टकेन केशेषु कर्षतीति शङ्कामङ्कुरयामास। यस्य प्रतिपक्षलोलाक्षीणां काननवीथिकादम्बिनीशम्पायमानतनुसंपदां वदनेषु वारिजभ्रान्त्या पपात हंसमाला, तां कराङ्गुलीभिर्निवारयन्तीनां तासां करपल्लवानि चकर्षुः कीरशावकाः, हा हेति प्रलपन्तीनां कोकिलभ्रान्तिभाविताः शिरस्सु कुट्टायितं कुर्वन्ति स्म करटाः, ततश्चलितवेणीनामेणाक्षीणां नागभ्रान्त्या कर्षन्ति स्म वेणीं मयूराः, ततो दीर्घं निःश्वासमातन्वतीनां तद्गन्धलुब्धमुग्धमधुकरा मदान्धाः समापतन्तः पश्यन्तोऽपि नासाचम्पकं न निवृत्ता बभूवुः, गुरुतरनितम्बकुचकुम्भभारानतानां वेधसा स्तनकलशसृष्टं काठिन्यं पादपद्मेषु वाञ्छन्तीनां धावनोद्युक्तमनसां चलितपादयुगलप्रसृतनखचन्द्रचन्द्रिकासु संमिलिताश्चकोरा उप-

---

मीनाश्च, पाठीनाश्च, कुलीरकाश्च कर्कटाश्च, इत्येषां द्वन्द्वो जलजन्तुविशेषाः, के किन्नामधेयाः सन्तीति शेषः, जलजन्तवो जलबिन्दुष्वेव निवसन्ति न च तारावत्यास्, पक्षे मकरादयो राशिविशेषाः। अपह्नुतिरलंकारः ॥२४॥

अथ तस्य प्रभावातिशयं वर्णयितुमाह—यस्येति—यस्य सत्यन्धरभूपालस्य, वदनतटे मुखतटे, कोपेन क्रोधेन कुटुलिताभ्यां भ्रुकुटिभ्यां घटिते सहिते सति अशरणतया रक्षकाभावेन, वनं काननं प्रति धावमानानां वेगेन गच्छताम्, प्रतिपक्षपार्थिवानां शत्रुभूपतीनाम्; वृक्षाणां तरूणां राजिरपि ततिरपि, वातेन वायुनान्दोलिता कम्पिता शाखैव हस्तः करस्तेन, पतत्रिणां पक्षिणां विरुतं ध्वनिस्तेन च, राज्ञो विरोधिनो राजविरोधिनो नृपतिप्रतिकूलाः, अत्र वने न प्रवेष्टव्या न प्रवेष्टुमर्हाः, इति निषेधं प्रतिषेधं, कुर्वाणा विदधाना, तां वृक्षराजिम्, अतिक्रामत्सूल्लङ्घयत्सु तेषु प्रतिपक्षपार्थिवेषु, राज्ञोऽपराधो राजापराधस्तस्माद्भयं भीतिस्तेनेव, प्रवातेन प्रकृष्टवायुना कम्पमाना सती, विशङ्कटकण्टकेन विशालकण्टकैः, जातित्वादेकवचनम्, केशेषु कचेषु कर्षतीति शङ्कां संशीतिम्, अङ्कुरयामास प्रादुर्भावयामास। उत्प्रेक्षालङ्कारः।

यस्येति—काननवीथिः श्यामलवनसरणिरेव कादम्बिनी मेघमाला तस्यां शम्पायमाना विद्युदिवाचरन्ती तनुसंपच्छरीरसंपत्तिर्यासां तासाम्, यस्य नृपस्य, प्रतिपक्षलोलाक्षीणां शत्रुचपललोचनानाम्, वदनेषु मुखेषु, वारिजभ्रान्त्या कमलविभ्रमेण, हंसमाला मरालपङ्क्तिः, पपात पतति स्म। तां हंसमालाम्, कराङ्गुलीभिर्हस्तशाखाभिः, निवारयन्तीनां प्रतिषेधयन्तीनां तासां शत्रुस्त्रीणां करपल्लवानि पाणिकिसलयान्, 'पल्लवः किसलयोऽस्त्रियाम्' इत्यमरः, कीरशावकाः शुकशिशवः, चकर्षुः कर्षन्ति स्म। हा हेति दुःखप्रदर्शकशब्दमुच्चार्य प्रलपन्तीनां विलपन्तीनां तासां शिरस्सु मूर्धसु, कोकिलानां पिकानां भ्रान्त्या भ्रमेण भाविता युक्ताः करटाः काकाः, कुट्टायितमनुकरणशब्दः, आघातं कुर्वन्ति स्म विदधति स्म। ततः शिरःसु करटकृतकुट्टायितानन्तरम्, चलिताः पतिता वेण्यः कबर्यो यासां तासाम्, एणाक्षीणां मृगनेत्राणाम्, वेणीं कबरीं केशपाशमिति यावत्, नागानां सर्पाणां भ्रान्त्या सन्देहेन, मयूराः केकिनः, कर्षन्ति स्म चकृषुः, ततस्तदनन्तरम्, दीर्घमायतम्, निःश्वासं श्वासोच्छ्वासम्, आतन्वतीनां विस्तारयन्तीनां तासाम्, मदेन गर्वेण मकरन्दपानजनितमोहेन वान्धा व्यपगतलोचनाः, समापतन्तः समन्तादागच्छन्तः तासां गन्धे लुब्धास्तद्गन्धलुब्धाः, तद्गन्धलुब्धाश्च ते मुग्धाश्चेति तद्गन्धलुब्धमुग्धाः, तथाभूताश्च ते मधुकराश्च भ्रमराश्चेति तद्गन्धलुब्धमुग्धमधुकराः, नासा नासिकैव चम्पकं चाम्पेयम् तत्, पश्यन्तोऽपि विलोकयन्तोऽपि निवृत्ता विमुखा न बभूवुः। भ्रमरा हि चम्पकोपरि न पतन्ति, तद्गन्धलुब्धास्तु ते नासाचम्पकं पश्यन्तोऽपि तन्मुखोपरि लम्पेतुरिति भावः। गुरुतरा अतिपीना ये नितम्बकुचकुम्भा जघनवक्षोजकलशास्तेषां भारेणानतानां नम्राणां वेधसा प्रजापतिना, स्तनकलशेषु कुचकुम्भेषु सृष्टं रचितं, काठिन्यं कठोरत्वं, पादपद्मेषु चरणकमलेषु, वाञ्छन्तीनामभिलषन्तीनाम्, धावने वेगगमन उद्युक्तं मनो मानसं यासां तासाम्,

रुन्धन्ति स्म मार्गम्, ततो भुवि निपत्य लुठन्तीनां सुवर्णसवर्णमुरोजयुगलं पक्वतालफलभ्रान्त्या कदर्थयन्ति वानराः, इति राजविरोधिनामरण्यमपि न शरण्यम्। किं च—

यस्य प्रतापतपनेन [1]चतुर्षु दिक्षु
निःशोषिताः किल पयोनिधयः क्षणेन।
प्रत्यर्थिभूपसुदतीनयनाम्बुपूरैः
संपूरिता पुनरतीत्य तटं ववल्गुः॥ २५॥

यस्य च रिपुमहिला वनमध्यमध्यासीना वनमोहनसंजातमञ्जुलमालतीलतानुकारिण्यः स्वशिशुभ्यः पूर्ववासनावशेन क्रीडाराजहंसमानयेति निर्भर्त्सयद्भ्यो बाष्पाम्बुपूरपूरितवदनकमलनयनमीनप्रतिबिम्बपरिष्कृतस्तनान्तरसरोवरप्रतिफलितचन्द्रमसं निर्दिश्यायं ते हंसो ममापि विरहाग्निव्यालीढवपुषस्तथेति परिसान्त्वयामासुः, कदाचिन्मामकीनक्रीडामयूरं दर्शयेति रोदनपरवशेभ्यः स्वार्भकेभ्यो मयूरीपुरतो नृत्यकलाविलासिनं कलापिनं निर्दिश्य तवायं शिखी ममापि तथेति सगद्गदमालपन्ति स्म।

मार्गं पन्थानम्, चलितानां निर्गतानां पादयुगलानां चरणकमलानां प्रसृता विस्तृता या नखचन्द्रचन्द्रिका नखरेन्दुज्योत्स्नास्तासु, संमिलिता एकत्र संगताः, चकोरा जीवंजीवाः, उपरुन्धन्ति समावृण्वते स्म। ततस्तदनु, भुवि पृथिव्याम्, निपत्य पतित्वा, लुठन्तीनां लुण्ठनं कुर्वन्तीनाम्, तासाम् सुवर्णसवर्णं काञ्चनकल्पम्, उरोजयुगलं स्तनयुग्मम्, पक्वानि परिणतानि यानि तालफलानि तेषां भ्रान्तिस्तया, वानराः कपयः, कदर्थयन्ति पीडयन्ति, इतीत्थम्, राजविरोधिनाम् नृपतिप्रतिकूलानाम्, अरण्यमपि काननमपि शरण्यं शरणे साधु, न—नो वर्तत इति शेषः। भीत्या वनं गता अपि प्रत्यर्थिनस्तत्र शरणमलभमानाः सत्यन्तरस्यैव शरणमुपाजग्मुरिति भावः। किञ्चान्यत्—

यस्येति—यस्य स यन्धरस्य, प्रतापस्तेज एव तपनः सूर्यस्तेन 'स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्' इत्यमरः, चतुर्षु दिक्षु चतसृषु काष्ठासु, अत्र चतुर्ष्विति पुंस्त्वप्रयोगश्चिन्त्यः, सामान्ये नपुंसकं वा, पयोनिधयः सागराः, क्षणेनाल्पेनैव कालेन, निःशेषिता निःशेषेण शोषिता निर्जलत्वं प्रापिताः, किलेति वार्तायाम्, पुनरनन्तरम्, प्रत्यर्थिभूपानां शत्रुमहीपालानां सुदतीनां वल्लभानां नयनाम्बुपूरैरश्रुप्रवाहैः संपूरिताः संभृताः सन्तः, तटं तीरम्, अतीत्य समुल्लङ्घ्य, ववल्गुः संचलन्ति स्म। अतिशयोक्तिः॥२५॥

यस्य चेति—वनमध्यं काननमध्यम्, अध्यासीना अधिष्ठिताः, वने कानने मोहनार्थं विभ्रमार्थं संजाताः समुत्पन्ना या मञ्जुलमालतीलता मनोहरजातीवल्लयस्तासामनुकारिण्यः प्राप्तसादृश्याः, यस्य च नृपतेश्च, रिपुमहिलाः शत्रुस्त्रियः, पूर्वा चासौ वासना च पूर्ववासना तस्या वशस्तेन पुरातनसंस्कारनिघ्नत्वेन, क्रीडायाः केल्या राजहंसो मरालविशेषस्तम्, आनय समर्पय, इतीत्थम्, निर्भर्त्सयद्भ्यस्तर्जनं कुर्वद्भ्यः स्वशिशुभ्यः स्वीयाबोधबालकेभ्यः, बाष्पाम्बुपूरेणाश्रुप्रवाहेन पूरितः संभृतः, वदनकमलानां मुखमहोत्पलानां नयनमीनानां लोचनतिमीनां च प्रतिबिम्बेन प्रतिफलनेन परिष्कृतः सहितश्च यः स्तनान्तरसरोवरः कुचमध्यवर्तिकासारस्तस्मिन् प्रतिफलितः प्रतिबिम्बितो यश्चन्द्रमास्तम्, निर्दिश्य प्रदर्श्य, अयं दृश्यमानः, ते तव हंसो मरालः, विरहाग्निना वियोगानलेन व्यालीढं व्याप्तं वपुः शरीरं यस्यास्तस्या ममापि हतभाग्यायाः, तथा तादृशः, हंसः सूर्यः 'हंसः पक्ष्यात्मसूर्येषु' इत्यमरः। इत्येवं प्रकारेण, परिसान्त्वयामासुः शमयन्ति स्म। तान् स्वशिशूनिति सम्बन्धः।

कदाचिदिति—कदाचित् जातुचित्, ममायं मामकीनः स चासौ क्रीडामयूरश्च तं मदीयकेलिकलापिनम्, दर्शय दृष्टिगोचरं कुरु, इतीत्थम्, रोदनपरवशेभ्यो रुदद्भ्यः, स्वासामर्भकास्तेभ्यः स्वकीयशिशुभ्यः

[1] अत्र 'दिक्षु' इति स्त्रीविशेष्यस्य 'चतुर्षु' इति पुंविशेषणं चिन्त्यम्।

तस्य सत्यंधरस्यासीत्कान्ता कान्त्यधिदेवता।
वेला लावण्यपाथोधेर्विश्रुता विजयाख्यया॥ २६॥

सौदामिनीव जलदं नवमञ्जरीव
चूतद्रुमं कुसुमसंपदिवाद्यमासम्।
ज्योत्स्नेव चन्द्रमसमच्छविभेव सूर्यं
तं भूमिपालकमभूषयदायताक्षी॥ २७॥

अस्याः पादयुगं गलश्च वदनं किञ्चाब्जसाम्यं दधुः
कान्तिः पाणियुगं [1]दृशौ च विदधुः पद्माधिकोल्लासताम्।
वेणी मन्दगतिः कुचौ च बत हा सन्नागसंकाशतां
स्वीचक्रुः सुदृशोऽङ्गसौष्ठवकला दूरे गिरां राजते॥ २८॥

'पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः' इत्यमरः। मयूरीपुरतः, मयूर्याः पुरस्तात्, नृत्यस्य ताण्डवस्य कलया चातुर्येण विलसति शोभत इत्येवंशीलस्तम्, कलापिनं मयूरम्, निर्दिश्य प्रदर्श्य, अयं पुरोवर्तमानः तव शिखी मयूरः, ममापि मन्दभाग्यायाः, तथा शिखी वह्निः, इत्येवं प्रकारेण, सगद्गदं यथा स्यात्तथा, आलपन्ति स्म कथयन्ति स्म। श्लेषालङ्कारः।

अथ तस्य सत्यन्धरस्य भार्यां वर्णयितुमाह—तस्येति—तस्य पूर्वोक्तस्य सत्यन्धरस्यैतन्नाममहीपतेः, कान्तेर्दीप्तेरधिदेवताधिष्ठातृदेवी, लावण्यपाथोधेः सौन्दर्यसागरस्य, वेला तटी, विजयाख्यया विजयेति नाम्ना विश्रुता प्रख्याता, कान्ता वल्लभा, आसीद् बभूव॥२६॥

तां वर्णयितुमाह—सौदामिनीवेति—आयते अक्षिणी यस्याः सा विशाललोचना सा विजया, सौदामिनी तडित्, जलदं मेघमिव, नवमञ्जरी नूतनपुष्पस्तबक् चूतद्रुममिव माकन्दमहीरुहमिव, कुसुमसंपत् पुष्पसम्पत्तिः, आद्यमासमिव चैत्रमासमिव ज्योत्स्ना चन्द्रिका, चन्द्रमसमिव शशिनमिव, अच्छविभा निर्मलप्रभा सूर्यमिव प्रभाकरमिव, तं भूमिपालकं सत्यन्धरमहीपालम्, अभूषयदलञ्चकार। मालोपमा॥२७॥

अस्या इति—किञ्चान्यत्, अस्या विजयामहादेव्याः, पादयुगं चरणयुगलम्, गलः कण्ठः, वदनं च मुखं च, अब्जानां साम्यं सादृश्यं दधुर्दधति स्म, पादयुगपक्षेऽब्जस्य कमलमिति, गलपक्षे शङ्ख इति, वदनपक्षे चन्द्र इति चार्थः। 'अब्जो धन्वन्तरौ चन्द्रे निचुले क्लीबमम्बुजे। अस्त्री कम्बुनि' इति विश्वलोचनः, कान्तिर्दीप्तिः, पाणियुगं हस्तयुगलम्, दृशौ च नयने च, पद्माधिकोल्लासतां पद्माधिकशोभाम्, विदधुश्चक्रुः, कान्तिपक्षे पद्माया लक्ष्म्या अधिकोल्लासतामधिकशोभामिति, पाणियुगपक्षे, पद्मेभ्यः कमलेभ्यः स्वाभिलषितदायकत्वेन निधिविशेषेभ्यो वाधिकोल्लासतामधिकशोभामिति, दृक्पक्षे च पद्मेभ्यो मृगेभ्यः कमलेभ्यो-वाधिकोल्लासतामधिकशोभामिति चार्थः। 'पद्मोऽस्त्री पद्मनालेऽब्जे व्यूहसंख्यान्तरे निधौ। पद्मके नागभेदे ना पद्मा भार्ङ्गीश्रियोः स्त्रियाम्' इति विश्वलोचनः। वेणी कबरी मन्दगतिर्मन्थरगतिः, कुचौ च स्तनौ च, सन्नागसंकाशतां सन्नागसादृश्यम्, स्वीचक्रुरङ्गीचक्रुः, वेणी पक्षे संश्चासौ नागश्च सन्नागः सत्सर्पस्तस्य संकाशतां सादृश्यमिति, मन्दगतिपक्षे संश्चासौ नागश्च हस्ती चेति सन्नागस्तस्य संकाशतां समानतामिति, कुचपक्षे न गच्छत इति नगौ, नगावेव नागौ, सन्तौ च तौ नागौ चेति सन्नागौ सत्पर्वतौ, यद्वा सन्नौ निकटवर्तिनौ च तावगौ च पर्वतौ चेति सन्नागौ तयोः संकाशतां सदृशतामिति चार्थः। 'नागः पन्नगपुन्नागनागकेसरदन्तिषु' इति विश्वलोचनः। इत्थम्, अस्याः सुदृशः सुलोचनाया विजयाया इति यावत्, अङ्गानां हस्तपाद्याद्यवयवानां सौष्ठवकला सौन्दर्यकला, गिरां वाणीनां, दूरे विप्रकृष्टं राजते शोभते। वागगोचराङ्गशोभावती सासीदिति भावः। 'बत' 'हा' इत्यव्ययद्युगं विस्मयार्थे पादपूर्तौ वा। श्लिष्टोपमा॥२८॥

[1]. कन्नश्च ब०।

अमूर्तेरप्यनङ्गस्य सत्सु सञ्जीवनेष्विव ।
अन्येष्वन्तःपुरेष्वेषा राज्ञः प्राणा इवाभवत् ॥ २९ ॥

शृङ्गारसागरतरङ्गपरम्परां तां
देवीं सुखेन रमयन्नधिपो नराणाम् ।
आनन्दसिन्धुजठरे विलुठन्सदायं
गीर्वाणराजपदवीं च तृणाय मेने ॥ ३० ॥

अथैकदा भूपालमणिरयमग्रगण्योऽपि प्राज्ञपरिषदामधिपतिरपि राजनयविदामधिकोऽपि परावरतत्त्वयाथात्म्यवेदिनामुदाहरणमपि सकलसमुचिताचाराणाम्, कामपरतन्त्रितचित्ततया कृत्याकृत्यमजानानः, कर्मसारथिचोदित इव सज्जनवनविलसदङ्गाराय काष्ठाङ्गाराय काश्यपीं दातुमियेष । ततो विदितवृत्तान्ता मूर्तिमन्त इव राजतन्त्रमन्त्रा विवर्ता इव प्रजाभागधेयानां प्रकारा इव कुलप्रतिष्ठायाः परिणाम इव समानुरागाणां पारदृश्वानः शास्त्रपाथोनिधीनाममात्यमुख्याः स्वयं संमन्त्र्य नरपतिमभ्येत्य समुचितं विज्ञापयामासुः ।

देव त्वयि प्रथितनीतिपयोधिचन्द्रे विज्ञापनं न घटते ध्रुवमस्मदीयम् ।
विश्वप्रसिद्धसुरभौ मृगनाभिपुञ्जे मल्लीसुमेन सुरभीकरणं यथेह ॥ ३१ ॥

अमूर्तेरिति—अमूर्तेरपि शरीररहितस्यापि, अनङ्गस्य कन्दर्पस्य, सञ्जीवनेषु जीवनदायकेषु, अन्येष्वितरेषु, अन्तःपुरेष्ववरोधेषु विविधवनितासमूहेष्विति यावत् । सत्सु विद्यमानेष्वपि, एषा विजया, राज्ञो नरपतेः, प्राणा इव चेतनेव, अभवद् बभूव सर्वाधिकप्रियासीदिति भावः ॥२९॥

शृङ्गारेति—शृङ्गारसागरस्य शृङ्गारपाथोधेस्तरङ्गपरम्परां कल्लोलमालाम्, ताम्, पूर्वोक्ताम्, देवीं महिषीम्, सुखेन शर्मणा, रमयन् क्रीडयन्, सदा शश्वत्, आनन्दसिन्धुजठरे प्रमोदपारावाराभ्यन्तरे, विलुठन् लुण्ठनं कुर्वन्, च, अयं नराणामधिप एष सत्यन्धरो नृपः, गीर्वाणराजस्य पुरन्दरस्य पदवीं पदं तृणाय मेने तृणवत्तुच्छं मेने मन्यते स्म 'मन्यकर्मण्यनादरे' इति चतुर्थी । इन्द्रादप्यात्मानं श्रेष्ठं मन्यते स्मेति भावः ॥३०॥

अथैकदेति—अथानन्तरम्, एकदैकस्मिन् समये, अयं भूपालमणिरेष राजश्रेष्ठः, प्राज्ञपरिषदाम् विद्वत्समितीनाम्, अग्रगण्योऽपि प्रमुखोऽपि, राजनयविदां राजनीतिज्ञानाम् अधिपतिरपि प्रधानोऽपि, परावरतत्त्वानामुच्चावचपदार्थानां याथात्म्यं स्वस्वरूपं विदन्ति जानन्ति, तेषाम्, अधिकोऽपि श्रेष्ठोऽपि सकलाश्च ते समुदाचाराश्च तेषां निखिलोत्तमव्यवहाराणाम्, उदाहरणमपि निदर्शनमपि सन्; कामेन मदनेन परतन्त्रितं स्ववशीकृतं चित्तं मनो यस्य, तस्य भावस्तत्ता तया कृत्याकृत्यम् 'इदं कर्तव्यमिदञ्च न कर्तव्यम्' इति, अजानानोऽबुध्यमानः, कर्मैव सारथिस्तेन चोदितः स इव विधिसूतप्रेरित इव, सज्जनाः साधव एव वनं काननं तस्मिन् विलसन् शोभमानो योऽङ्गारस्तद्रूपाय, काष्ठाङ्गाराय-एतन्नामसचिवविशेषाय, काश्यपीं क्षितिम्, दातुमियेष दातुमभिलषितवान् ।

तत इति—ततस्तदनु, विदितो विज्ञातो वृत्तान्त उदन्तो यैस्ते, मूर्तिमन्तः शरीरधारिणः, राज्ञां तन्त्रमन्त्रा इव, तन्त्रः स्वराष्ट्रस्य चिन्तनम्, मन्त्रो मन्त्र्यादिभिः सह गुप्तविमर्शः, प्रजाया जनताया भागधेयानि भाग्यानि तेषां विवर्ता इव पर्याया इव, कुलस्य गोत्रस्य प्रतिष्ठाः सत्कृतिस्तस्याः प्रकारा इव विशेषा इव, समानुरागाणां पृथिवीप्रेम्णाम् परिणामा इव पर्याया इव, शास्त्रपाथोधीनामागममहोदधीनाम्, पारं दृष्टवन्तः पारदृश्वानः पारगामिनः, अमात्यमुख्याः सचिवप्रधानाः, स्वयं स्वत एव, संमन्त्र्य सम्यग् विमृश्य, नरपतिं सत्यन्धरमहाराजम्, अभ्येत्य सम्मुखमागत्य, समुचितं सुचितं यथा स्यात्तथा, विज्ञापयामासुर्निवेदयाञ्चक्रुः ॥

देव इति—हे देव हे राजन्! नीतिरेव पयोधिर्नीतिपयोधिर्नयसागरस्तस्य चन्द्रः शशी, प्रथितः प्रसिद्धश्चासौ नीतिपयोधिचन्द्रश्च तस्मिन्, त्वयि भवति, अस्मदीयं मामकीनम्, विज्ञापनं निवेदनम्, ध्रुवं

अथापि रसनाकण्डूखण्डनाय विनिर्मिता ।
विज्ञप्तिः श्रोतुमधुना श्रीमन्तं संप्रतीक्षते ॥ ३२ ॥

देव श्रीमदीयभुजपरिघालालिता भूमिभामिनी भुजान्तरारोपणम्, नन्दनवनोल्लासिता हरिचन्दनलतेव वनान्तरम्, चूतवनकलिता मल्ली-वल्लीव स्नुहिवनम्, कमलवनालया लक्ष्मीरिवार्कवनम्, अरविन्दस्यन्दिमकरन्दमुदिता चञ्चरीकपङ्क्तिरिव गोक्षुरकवनम्, सज्जनसंदोहसमभ्यस्यमाना विद्येव कुदृष्टिजनं नार्हति । अयं किल राजधर्मः श्रीमद्भिरवश्यं ज्ञातव्यो, यन्निजहृदयमपि सर्वथा न विश्वसनीयं किमुत जनान्तरम्, किन्तु सर्वेषामपि स्वीयत्वेन विश्वसनीयत्वेन च ज्ञातव्यो यथा चन्द्रसूर्यौ ।

धर्मार्थयुग्मं किल काममूलमिति प्रसिद्धं नृप नीतिशास्त्रे ।
मूले गते कामकथा कथं स्यात्केकायितं वा शिखिनि प्रणष्टे ॥ ३३ ॥

उर्वश्यामनुरागतः कमलभूरासावकीर्णो[1] क्षणात्
पार्वत्याः प्रणयेन चन्द्रमकुटीऽप्यर्धाङ्गनोऽजायत ।

निश्चयेन, तथा तेन प्रकारेण न घटते न संगतं जायते, यथा येन प्रकारेण, इह लोके, विश्वस्मिन् निखिलसंसारे प्रसिद्धः प्रथितः सुरभिर्गन्धो यस्य तस्मिन्, मृगनाभिपुञ्जे कस्तूरीसमूहे, मल्लीसुमेन मालतीकुसुमेन, सुरभीकरणं सुगन्धीकरणं, न घटत इति क्रियासम्बन्धः ॥३१॥

अथापि—अथापि तथापि, रसनाया जिह्वायाः कण्डूः खर्जनं तस्याः खण्डनं तस्मै, विनिर्मिता कृता, विज्ञप्तिः प्रार्थना, अधुना साम्प्रतम्, श्रोतुमाकर्णयितुम्, श्रीमन्तं भवन्तम्, संप्रतीक्षते भवतः प्रतीक्षां कुरुत इत्यर्थः ॥३२॥

देव इति—हे देव हे राजन् ! श्रीमदीयेन भवदीयेन भुजपरिघेण बाहुर्गलेन, आलालिता सम्यग्धृता, भूमिभामिनी महीमहिला, नन्दनवने पुरन्दरोपवन उल्लासिता वर्धिता, हरिचन्दनलता कल्पवृक्षविशेषवल्लरी वनान्तरमिव काननान्तरमिव, चूतवनकलिता माकन्दारण्योद्भूता मल्लीवल्ली मालतीलता स्नुहीवनमिव गुडाकाननमिव 'वज्रः स्नुक् स्त्री स्नुही गुडा । समन्तदुग्धा' इत्यमरः 'थूवर इति प्रसिद्धवनस्पतिवनमिवेति यावत्, कमलवनं वारिजविपिनमालयो निवासो यस्याः सा, लक्ष्मीः श्रीः, अर्कवनमिव 'आक' इतिप्रसिद्धवृक्षकाननमिव, अरविन्देभ्यः कमलेभ्यः स्यन्दिना क्षरता मकरन्देन कौसुमेन मुदिता प्रहृष्टा चञ्चरीकपङ्क्तिर्भ्रमरश्रेणिः गोक्षुरकवनमिव 'गोखुरू' इति प्रसिद्धकण्टकिवनस्पतिगहनमिव, सज्जनसन्दोहेन साधुसमूहेन समभ्यस्यमाना सम्यगाराध्यमाना विद्या कुदृष्टिजनमिव मिथ्यादृष्टिपुरुषमिव, भुजान्तरारोपणं बाह्वन्तराश्रयणम्, नार्हति न तद्योग्यास्ति । अयं वक्ष्यमाणः, किलेति वार्तायाम्, राजधर्मः पृथिवीपतिकर्तव्यम्, श्रीमद्भिर्भवद्भिः अवश्यं प्राधान्येन, ज्ञातव्यो बोध्यः, यत्, निजहृदयमपि, स्वचेतोऽपि सर्वथा सर्वप्रकारेण, न विश्वसनीयं न विश्वासभाजनमस्ति, किमुत जनान्तरं लोकान्तरम् । किन्त्वेवं सत्यपि, सर्वेषां निखिलानामपि, स्वीयत्वेनात्मीयत्वेन, विश्वसनीयत्वेन च विश्वासभाजनत्वेन च चन्द्रसूर्यौ यथा शशिदिवाकराविव, ज्ञातव्यो बोध्यः । यथा चन्द्रसूर्यौ सर्वेषां स्वकीयत्वेन विश्वसनीयत्वेन च ज्ञायेते तद्वन्नृपतिरपि सर्वेषां स्वीयत्वेन विश्वसनीयत्वेन च ज्ञातव्य इति भावः ।

धर्मार्थयुग्ममिति—हे नृप हे राजन्, नीतिशास्त्रे नीत्यागमे, कामस्य कामपुरुषार्थस्य मूलं कारणम्, धर्मार्थयोर्धर्मार्थपुरुषार्थयोर्युग्मं युगलम्, अस्तीति प्रसिद्धं प्रख्यातम्, किलेति वार्तायाम्, मूले कारणभूते, धर्मार्थयुग्मे गते नष्टे सति, शिखिनि मयूरे, प्रणष्टे गते मृते वा, केकायितं वा केकेव 'वा स्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये' इत्यमरः, कामस्य मदनस्य कथा चर्चा कामकथा कथं केन प्रकारेण, स्याद्भवेत् ॥३३॥

उर्वश्यामिति—उर्वश्याम् एतन्नामस्वर्वेश्यायाम्, अनुरागतः, प्रेम्णा, कमलभूर्ब्रह्मा, क्षणादचिरम्,

1. -वकीर्णः प० ।

विष्णुः स्त्रीषु विलोलमानसतया निन्दास्पदं सोऽप्यभूद्
बुद्धोऽप्येवमिति प्रतीतमखिलं देवस्य पृथ्वीपते ॥ ३४ ॥

इत्यादिनीतिप्रचुरा वाणी राज्ञो न संस्थिता ।
कामजर्जरिते चित्ते क्षीरं छिद्रघटे यथा ॥ ३५ ॥

तदनन्तरमयं क्षितिपतिरिक्षुचापशरलक्ष्यतया मोहाक्रान्तचेतनः काष्ठान्तरविदितदुराचारं काष्ठाङ्गारमाहूयानीय च विजनं देशमेवमुवाच ।

कामसाम्राज्यमस्माभिः पाल्यते यन्निरन्तरम् ।
तत्पाल्यतामिदं राज्यं भवतावहितात्मना ॥ ३६ ॥

इति नरपतिवाणीमाहरन्नेष तोषात्
प्रतिवचनमुवाच श्रीमता न्यस्तभारम् ।
नृप न हि परिशक्नोम्यद्य वोढुं समस्तं
वृषभ इव करीन्द्रेणार्पितं तुङ्गभारम् ॥ ३७ ॥

तुरगस्य खरो यथा विलासं गरुडस्येव गतानि कुक्कुटः ।
चटकः कलहंसकस्य यद्वत्तव मार्गं न हि गन्तुमुत्सहे ॥ ३८ ॥

अवकीर्णी दोषयुक्तः, आस बभूव, 'आस' इति विभक्तिप्रतिरूपकमव्ययम्, न त्वस्तेर्लिटि प्रयोगः । पार्वत्या दुर्गायाः, प्रणयेन स्नेहेन, चन्द्रमकुटोऽपि शिवोऽपि, अर्धमङ्गना यस्य तथाभूतोऽर्धस्त्रीकः, अजायत बभूव । स प्रसिद्धः, विष्णुरपि कृष्णोऽपि, स्त्रीषु गोपवनितासु, विलोलं चपलं मानसं चित्तं यस्य, तस्य भावस्तया, निन्दास्पदं गर्हास्थानम्, अभूत् । एवमनेन प्रकारेण बुद्धोऽपि तथागतोऽपि निन्दास्पदमजायत । इतीत्थम्, अखिलं सर्वम्, हे पृथ्वीपते हे राजन् ! देवस्य भवतः, प्रतीतं प्रख्यातम् ॥३४॥

इत्यादीति—इत्यादि नीत्या पूर्वोक्तप्रकारकनयोपदेशेन प्रचुरा प्रभूता वाणी भारती मन्त्रिणामिति शेषः, राज्ञो नृपस्य, कामेन मदनेन, जर्जरिते जीर्णे चित्ते चेतसि, छिद्रेणोपलक्षितो घटश्छिद्रघटस्तस्मिन् सच्छिद्रकुम्भे क्षीरं यथा दुग्धमिव, न संस्थिता न सम्यक् प्रकारेण स्थितिं प्राप्ता ॥३५॥

तदनन्तरमिति—तदनन्तरं तत्पश्चात्, अयमेष क्षितिपतिर्भूपाल इक्षुचापस्य कामस्य शराणां बाणानां लक्ष्यतया वेध्यत्वेन, मोहाक्रान्ता व्यपगतविवेका चेतना यस्य तथाभूतः सन्, काष्ठान्तरेषु दिगवकाशेषु विदितो दुर्णयो यस्य तं काष्ठाङ्गारमेतन्नामानं सचिवविशेषम्, आहूयाकार्य, विजनं विविक्तं निर्जनमिति यावत्, देशं स्थानम्, आनीय च प्रापय्य च, एवं वक्ष्यमाणप्रकारेण, उवाच जगाद ।

कामेति—यद्यस्मात् कारणात्, अस्माभिः, निरन्तरं शश्वत्, कामसाम्राज्यं मदनराज्यम्, पाल्यते रक्ष्यते, तत्तस्मात्कारणात्, भवता त्वया, अवहितः प्रमादरहित आत्मा यस्य तथाभूतेन सता इदमद्यावधि मया पाल्यमानम्, राज्यं साम्राज्यम्, पाल्यताम् रक्ष्यताम्, कर्मणि प्रयोगः ॥३६॥

इतीति—इति पूर्वोक्तप्रकाराम्, नरपतिवाणीं नरेन्द्रभारतीम्, आहरन् प्राप्नुवन् शृण्वन्निति यावत्, एष काष्ठाङ्गारः, तोषादानन्दात्, प्रतिवचनं प्रत्युत्तरम्, उवाच जगाद । हे नृप हे राजन् ! करीन्द्रेण गजेन्द्रेण, अर्पितं न्यस्तम्, तुङ्गभारं समुन्नतभारम्, वृषभ इवानड्वानिव, अद्येदानीम्, समस्तं निखिलम् श्रीमता भवता, न्यस्तभारं निक्षिप्तभारम्, वोढुं धर्तुं न हि परिशक्नोमि नैव समर्थोऽस्मि । उपमालङ्कारः । मालिनीवृत्तम् 'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ॥३७॥

तुरगस्येति—तुरगस्य हयस्य, विलासं शोभाम्, खरो यथा वैशाखनन्दन इव 'खरो वैशाखनन्दनः' इत्यमरः, गरुडस्य तार्क्ष्यस्य, गतानि गमनानि कुक्कुट इव ताम्रचूड इव, कलहंसकस्य कादम्बस्य, चटकः कलविङ्कः, यद्वत् तव भवतः मार्गं पन्थानम्, गन्तुं व्रजितुम्, न हि नैव, उत्सहे प्रेरितो भवामि । भवदर्पितं भारं धर्तुं सर्वथाहमसमर्थोऽस्मीति भावः ॥३८॥

इति सप्रश्रयमालपन्तं कुतुककोरकितस्वान्तं भूपतिर्वचनान्तरमत्र न वक्तव्यमिति नियम्य, धन्योऽस्मीति तन्निदेशं शिरसि निदधानं[1] राज्यभारे नियोज्य, प्रतिदिनमेधमानरागलतालवाला-यितहृदयो विषयसुखविवशः कानिचिद्दिनानि निनाय।

अथ कदाचिदवसन्नायां निशायां वारुणीसुवासिनीकज्जलकलित[2]राजतकरण्डक इव ग्रह-राजदर्शनभयेन सत्वरं निर्गच्छन्त्या निशास्वैरिण्या निपतितताटङ्क इव नभोवारणकुम्भस्थलकलित-मौक्तिकपत्र इव अपरसिन्धुपयःपूरणार्थं यामिनीकामिनीकरकलितस्फाटिकघट इव वरुणदिशा-वशावल्लभशुण्डादण्डच्युतसपङ्कबिस इव मदनसायकशाणोपल इव पश्चिमदिशाविशालाक्षी-पुष्पकन्दुक[3] इव चरमधराधरदन्तावलकुम्भस्थलसंभाव्यमानशम्बरारिवज्रखेट[4] इव निशाकरे, वीरजिनपतिकोपाग्निदग्धाङ्गमनङ्गं कलङ्कच्छलेन निजाङ्कमारोप्य संजिजीविषयेव संजीवनौषधानि गगनकाननेषु मार्गयित्वा तत्परिमार्गणायेव चरमशिखरिशिखरमधिरूढे, तत्र विरलतया वर्तमानैः संध्यारुणतमःकालेयपङ्कैरङ्कितगगनपर्यङ्कतले निशाचन्द्रयोः क्रीडासंमर्दविलुलितकुसुमनिकरेष्विव म्लानतामुपगतेषु तारकानिकरेषु, निजकान्तं निःश्रीकमालोक्येव नैजतेजोविरहितेष्वौषधिनिचयेषु,

---

इतीति—इत्येवं प्रकारेण, सप्रश्रयं सविनयम्, आलपन्तं निगदन्तम्, कुतुकेनाविचारितराज्यल-क्ष्मीप्राप्तिजनितकुतूहलेन कोरकितं कुड्मलितं व्याप्तमिति यावत् स्वान्तं मानसं यस्य तथाभूतम्, तं काष्ठा-ङ्गारम्, भूपतिः सत्यन्धरः, अत्रास्मिन् विषये, अन्यद् वचनं वचनान्तरम्, न निगाद्यम्, इतीत्थं प्रकारेण नियम्यावरुध्य, धन्योऽस्मीति कृतपुण्योऽस्मीति विचार्य तन्निदेशं राजाज्ञाम्, शिरसि मूर्ध्नि, निदधानं धरन्तम्, तम्, राज्यभारे राज्यकर्मणि, नियोज्य नियुक्तं कृत्वा, प्रतिदिनं प्रतिदिवसम्, एधमाना वर्धमाना या रागलता स्नेहवल्लरी, तस्या आलवालायितमालवालवदाचरितं हृदयं यस्य सः 'स्यादालवालमावाल-मावापः' इत्यमरः, विषयसुखस्य कामसुखस्य विवशः पराधीनः सन्, कानिचिद् दिनानि कतिपयदिवसान्, निनाय नयति स्म।

अथ कदाचिदिति—अथानन्तरम्, कदाचित् जातुचित्, निशायां रजन्याम् अवसन्नायां क्षीणायाम् सत्याम्, वारुणी पश्चिमदिशैव या सुवासिनी सौभाग्यवती वनिता तस्याः कज्जलेनाञ्जनेन कलितो युक्तो यो राजतकरण्डको रौप्यनिर्मितभाजनं तस्मिन्निव, ग्रहराजस्य सूर्यस्य दर्शनमवलोकनं तस्माद्भयं भीतिस्तेन सत्वरं सवेगं निर्गच्छन्त्या निर्व्रजन्त्याः पलायमानाया इति यावत्, निशा रजन्येव स्वैरिणी पुंश्चली तस्याः, निपतितताटङ्क इव स्खलितकर्णाभरण इव, नभोवारणस्य गगनगजस्य कुम्भस्थले गण्डप्रदेशे कलितं धृतं यन् मौक्तिकपत्रं मुक्ताफलपट्टं तस्मिन्निव, अपरसिन्धोः पश्चिमसमुद्रस्य पयसो जलस्य पूरणार्थं भरणार्थं यामिनी-कामिन्या रजनीरमण्याः करकलितो हस्तधृतो यः स्फाटिकघटः सितोपलकुम्भस्तस्मिन्निव, वरुणदिशायाः पश्चिमदिशाया यो वशावल्लभो गजस्तस्य शुण्डादण्डात् करदण्डाच्च्युतं यत् सपङ्कबिसं सकर्दममृणालं तस्मिन्निव, मदनसायकानां कामबाणानां शाणोपल इव तीक्ष्णीकरणप्रस्तर इव, पश्चिमदिशैव या विशा-लाक्षी दीर्घलोचना ललनेति यावत्, तस्याः पुष्पकन्दुक इव कुसुमगेन्दुक इव चरमधराधरोऽस्ताचल एव दन्तावलो गजस्तस्य कुम्भस्थलेन गण्डप्रदेशेन संभाव्यमानो ध्रियमाणो यः शम्बरारेर्मनसिजस्य वज्र-खेटो हीरकमौलिस्तस्मिन्निव, निशाकरे चन्द्रमसि, वीरजिनपतेर्वर्धमानजिनेन्द्रस्य कोपाग्निना क्रोधपावकेन दग्धं भस्मीभूतमङ्गं शरीरं यस्य तथाभूतम्, अनङ्गं मदनम्, कलङ्कच्छलेन लक्ष्मव्याजेन, निजाङ्कं स्वोत्सङ्गम्, आरोप्य स्थापयित्वा, संजिजीविषयेव संजीवयितुमिच्छयेव, गगनकाननेषु नभोऽरण्येषु, संजीवनौषधानि संजीवनभैषज्यानि, मार्गयित्वा गवेषयित्वा, तत्परिमार्गणायेव तदन्वेषणायेव, चरमशिखरिणोऽस्ताच-लस्य शिखरं शृङ्गम्, अधिरूढेऽधिष्ठिते सति, तत्र, विरलतया सान्तरतया, वर्तमानैर्विद्यमानैः, संध्यया तत्कालव्यासक्तलोहितिम्नारुणा ये तमःकालेयपङ्का ध्वान्तकस्तूरीद्रवास्तैः, अङ्कितं चिह्नितं यद् गगनमेव पर्यङ्कतलं पर्यङ्कपृष्ठस्तस्मिन्, निशाचन्द्रयो रजनीरजनीकरयोः, क्रीडासंमर्देन केलिसंमर्देन विलुलितानि व्यस्तानि यानि कुसुमानि पुष्पाणि तेषां निकराः समूहास्तेष्विव, तारकानिकरेषु नक्षत्रनिचयेषु, म्लानतां कान्तिराहि-

---

१. विदधानं ब० । २. कज्जलकलित ब० । ३. पुण्यकन्दुक ब० । ४. वज्रखेटक इव ब० ।

अनेन कुमुदबन्धुना निजवसतिः कमलावलिर्विध्वस्तेति कोपादिव निशाकान्तान्निष्क्रान्तायां कमलायाम्, निजनायकविरहानलधूमरेखां निर्गच्छद्भृङ्गमालाव्याजेनोद्वमन्तीषु कुमुदिनीषु, संभोगस्वेदसलिलैः प्रशान्तं मनसिजाग्निं विकचकमलरजःकणैरुद्दीपयितुमिव वहति प्राभातिके मारुते,

> निद्रावती सा नरपालकान्ता स्वप्नं ददर्श स्वशुभाशुभान्तम् ।
> अस्वप्नगम्यं किल भावि तस्याः स्वप्नेन गम्यं बत संबभूव ॥ ३९ ॥
> ततः पुरन्दराशायां सन्ध्याबन्धूकसच्छविः ।
> रुरुचे गगनाम्भोधिविद्रुमोद्यानराजिवत् ॥ ४० ॥
> अथाविरासीद्दिवसाधिनाथः प्राचीवधूटीगृहरत्नदीपः ।
> व्योमश्रियः सन्मणिकन्दुको वा सन्ध्याङ्गनाया मुखकुङ्कुमं वा ॥ ४१ ॥

पूर्वपयोराशितैलोपान्तविराजमाने पतङ्गपातभयेनेवोपरिविन्यस्तगगनमरकतपात्रविशोभिते प्रदीप इव, पूर्ववारिधिविद्रुमच्छटाकान्तिझरीभिरिव प्राच्यपयोनिधिसकाशाद्गगनजलधिशोषणायोद्गताभिरिव वाडवाग्निज्वालाभिः प्रभाराजिभिरनुरक्तमण्डले चण्डकरे उदयधराधरशिखरमधिरूढे,

---

स्यम्, उपगतेषु प्राप्तेषु, निजकान्तं स्ववल्लभं चन्द्रमिति यावत्, निःश्रीकं लक्ष्मीरहितम्, आलोक्येव दृष्ट्वेव, औषधिनिचयेषु भैषज्यसमूहेषु तृणज्योतिःप्रभृतिष्विति यावत्, नैजं स्वकीयं यत्तेजस्तेन विरहितेषु वर्जितेषु सत्सु, अनेन कुमुदबन्धुना एतेन चन्द्रमसा, निजवसतिर्निजनिकेतनम्, कमलावलिः पद्मपङ्क्तिर्विध्वस्ता नाशिता, इति कोपादिव क्रोधादिव, निशाकान्ताच्चन्द्रमसः, कमलायां लक्ष्म्यां निष्क्रान्तायां निर्गतायां सत्याम्, निर्गच्छन्त्यो निष्कामन्त्यो या भृङ्गमालाः षट्पदपङ्क्तयस्तासां व्याजेन छलेन, कुमुदिनीषूत्पलिनीषु, निजनायकस्य स्वपतेर्विरहो वियोग एवानलो वह्निस्तस्य धूमरेखां धूम्रपङ्क्तिम्, उद्वमन्तीषु प्रकटयन्तीषु, सतीषु, संभोगस्वेदसलिलैः सुरतघर्मोदकैः, प्रशान्तं मन्दीभूतम्, मनसिजाग्निं कंदर्पानलम्, विकचकमलानां प्रस्फुटितपद्मानां रजःकणाः परागांशास्तैः उद्दीपयितुमिव प्रज्वलयितुमिव, प्राभातिके प्रातःकालिके, मारुते पवने, वहति वाति सति । अत्र सर्वत्र 'यस्य च भावे भावलक्षणम्' इति सप्तमी ।

निद्रावती—निद्रावती शयाना, सा पूर्वोक्ता, नरपालकान्ता राज्ञी, स्वस्याः शुभाशुभे श्रेयोऽश्रेयसी अन्तौ परिणामौ फले यस्य तम्, स्वप्नम्, ददर्श विलोकयामास । तस्या राज्ञ्याः, न स्वप्नेऽपि गम्यमित्यस्वप्नगम्यं सुदुर्लभं भावि भविष्यत्, स्वप्नेन, गम्यं ज्ञातुं योग्यम्, संबभूव सम्यगभूत् । किलेति वार्तायाम्, बतेति खेदे ॥३९॥

ततः पुरन्दराशायामिति—ततस्तदनन्तरम्, पुरन्दरस्य पुरुहूतस्याशा काष्ठा तस्याम्, पूर्वदिशायामिति यावत्, बन्धूकस्येव सच्छविर्यस्याः सा जीवककुसुमसदृक्कान्तिः, सन्ध्या सूर्योदयात्प्राग्भूतोऽरुणिमा, गगनं नभ एवाम्भोधिः सागरस्तस्य या विद्रुमोद्यानराजिः प्रवालोपवनपङ्क्तिस्तद्वत् । रुरुचे शुशुभे ॥ ४० ॥

अथेति—अथ सन्ध्याप्रसारानन्तरम्, प्राच्येव वधूटी प्राचीवधूटी पूर्वदिक्कामिनी तस्या गृहे विद्यमानो यो रत्नदीपो मणिमयदीपः, व्योमश्रियो गगनलक्ष्म्याः, सन् समीचीनः, मणिकन्दुको वा रत्नगेन्दुक इव, सन्ध्याङ्गनायाः सन्ध्यैवाङ्गना वनिता तस्या मुखकुङ्कुमं वा वदनतिलकमिव, दिवसाधिनाथः सूर्यः, आविरासीत् प्रकटीबभूव ॥ रूपकम् ॥४१॥

पूर्वपयोराशीति—पूर्वश्चासौ पयोराशिश्चेति पूर्वपयोराशिः पूर्वसागरस्तस्य तैलस्य स्नेहस्योपान्ते समीपे विराजमाने शोभमाने, पतङ्गानां शलभानां पातस्य पतनस्य भयेनेव भीत्येव, उपरिविन्यस्तेनोर्ध्वधारितेन मरकतपात्रेण हरिन्मणिभाजनेन विशोभिते विराजिते प्रदीप इव दीपक इव, पूर्ववारिधेः पूर्वसागरस्य विद्रुमच्छटानां पल्लवसमूहानां कान्तिझरीभिरिव दीप्तिपरम्पराभिरिव, प्राच्यपयोनिधेः पूर्वसागरस्य सकाशात्समीपात्, गगनमेव जलधिर्गगनजलधिराकाशपारावारस्तस्य शोषणं तस्मै, उद्गताभिरुत्पतिताभिः, वाडवाग्निज्वालाभिरिव वडवानलार्चिभिरिव, प्रभाभिः कान्तिसमूहैः अनुरक्तमरुणं मण्डलं बिम्बं यस्य तथाभूते चण्डकरे सूर्ये, उदयधराधरस्य पूर्वाचलस्य शिखरं शृङ्गम्, अधिरूढेऽधिष्ठिते सति ।

तावन्महीपालकमन्दिरान्तःपिकप्रतिस्पर्धिमनोज्ञकर्णाः[1] ।
प्राबोधिकाः पेठुरुपेत्य देव्याः प्रबोधनार्थं ध्वनिभिर्गभीरैः ॥ ४२ ॥

देवि प्रभातसमयोऽयमिहाञ्जलिं ते
पद्मैः करैर्विरचयन्दरफुल्लरूपैः ।
भृङ्गालिमञ्जुलरवैस्तनुते प्रबोध-
गीतिं नृपालमणिमानसहंसकान्ते ॥ ४३ ॥

देवि त्वदीयमुखपङ्कजनिर्जितश्री-
श्चन्द्रो विलोचनजितं दधदेणमङ्के ।
अस्ताद्रिदुर्गसरणिः किल मन्दतेजा
द्राग्वारुणीभजनतश्च पतिष्यतीव ॥ ४४ ॥

बलरिपुहरिदेषा रक्तसन्ध्याम्बरश्री-
रविमयमणिदीपं रथ्यदूर्वासमेतम् ।
गगनमहितपात्रे कुर्वती भाक्षताढ्ये[2]
प्रगुणयति निकामं देवि ते मङ्गलानि ॥ ४५ ॥

तावदिति—तावत्, यावद्भास्वानुदेतुमुदयाचलशिखरमधिरोहति तावत्, महीपालकस्य नृपस्य मन्दिरान्तर्भवनाभ्यन्तरे, पिकप्रतिस्पर्धिनः कोकिलमत्सरिणो मनोज्ञाः प्रियाः कर्णाः सुवर्णसमूहाः येषां ते, मधुरवाच इति यावत्, 'कर्णः पृथाज्येष्ठपुत्रे सुवर्णालौ श्रुतावपि' इति मेदिनी, प्राबोधिकाः प्रबोधः प्रयोजनं येषां ते मागधविशेषाः उपेत्याभिमुखमागत्य, गभीरैरर्थगाम्भीर्यसहितैः, ध्वनिभिः शब्दैः, देव्या राज्ञ्याः, प्रबोधनार्थं जागरणार्थं, पेठुः पठन्ति स्म ॥४२॥

देवीति—नृपालमणे राजरत्नस्य सत्यन्धरमहाराजस्येति यावत् मानसं चित्तमेव मानसं मानससरोवरस्तत्र हंसकान्ता हंसी तत्संबुद्धौ तथाभूते, हे देवि हे राज्ञि ! दरफुल्लरूपैरीषद्विकसितस्वरूपैः, पद्मैः कमलैः, करैः पाणिभिः, अञ्जलिं करसम्पुटं, विरचयन् कुर्वन्, अयं प्रभातसमयः प्रातःकाल, भृङ्गालीनां भ्रमरपङ्क्तीनां मञ्जुलरवा मनोहरशब्दास्तैः, ते भवत्याः, प्रबोधगीतिं जागरणगीतिकाम्, तनुते विस्तारयति । रूपकोत्प्रेक्षा ॥४३॥

देवि त्वदीयेति—हे देवि हे राज्ञि ! त्वदीयमुखपङ्कजेन त्वदीयास्यारविन्देन, निर्जिता पराभूता श्रीः शोभा यस्य तथाभूतश्चन्द्रः शशी, अङ्के क्रोडे, विलोचनाभ्यां जितं विलोचनजितं नेत्रपराभूतम्, एणम् हरिणम्, दधद् बिभ्रद्, अस्ताद्रिरस्ताचल एव दुर्गो दुर्गम्यस्थानं तस्य सरणिर्मार्गो यस्य सः, अथवास्ताद्रिदुर्गं एव शरणं यस्य सः, अथवा अस्ता गृहीताद्रिदुर्गस्य शैलदुर्गस्य सरणिर्मार्गो येन सः, तथाभूतः सन् मन्दतेजा क्षीणप्रतापः अभूदिति शेषः; किलेति वार्तायाम् । किञ्च, वारुणीभजनतः पश्चिमदिक्सेवनात्, अथ च मदिरासेवनात्, द्राक् झटिति, पतिष्यतीव नीचैर्गमिष्यतीव, पतितो भविष्यतीव । अन्योऽपि निर्बलः केनचिद्बलीयसा पराजितः सन् पर्वतादौ भ्रमन् पतत्येवेति भावः । श्लिष्टोत्प्रेक्षा ॥४४॥

बलरिपुहरिदिति—रक्तसन्ध्यया लोहितसन्ध्योपलक्षिताम्बरश्रीर्नभोलक्ष्मीः पक्षे निचेलकर्मा यस्याः सा, एषा बलरिपोरिन्द्रस्य हरित्काष्ठा पूर्वदिशेति यावत्, पक्षे कांश्चित्साम्यात्काचिद्वनिता, रथ्या एव हया एव दूर्वा शतपर्वा तया समेतं सहितम्, रविमयश्चासौ मणिदीपश्चेति रविमयमणिदीपस्तं सूर्यरूपरत्नदीपम्, भाक्षताढ्ये नक्षत्रतण्डुलसहिते, गगनं व्योमैव महितं प्रशस्तं पात्रं भाजनं तस्मिन्, कुर्वती विदधती सती, हे देवि हे राज्ञि ! ते भवत्याः मङ्गलानि श्रेयांसि, निकाममत्यन्तं यथा स्यात्तथा, प्रगुणयति वर्द्धयति अन्यापि काचित्सुवासिनी धृतलोहिताम्बरा साक्षते कस्मिंश्चित्पात्रे दूर्वासहितं दीपकं निधाय कस्यचिन्मङ्गलं प्रगुणयति तद्वदत्रापीति भावः ॥ रूपकम् ॥४५॥

---

१. कर्णाः मु० । २. भाक्षताढ्यं ब० ।

देवि त्वदीयकचडम्बरचौर्यतुङ्गा
　　भृङ्गावली सपदि पङ्कजबन्धनेषु ।
राज्ञा निशासु रचिताद्य विसृष्टहृष्टा
　　त्वां स्तौति मञ्जुलरवैरुररीकुरुष्व ॥ ४६ ॥

पयोजधूलीपरिधूसराङ्गः पत्नौ विधूयाद्य वियोगखिन्नः ।
कोकः स्वकान्तां परिरभ्य तस्या वक्त्रे स्वचञ्चुं कलयन्विभाति ॥ ४७ ॥

हंसतूलमयीं शय्यां हंसीव सिकताततिम् ।
चान्द्री कलेव शुभ्राभ्रपङ्क्तिं देवि जहीहि भो ॥ ४८ ॥

इत्यादिप्राबोधिकपद्यालापैर्मङ्गलवाद्यनिनादैश्च कादम्बिनीकलकलैः केकिकान्तेव स्वप्नेन प्रबुद्धपूर्वापि सा [1]प्रबुद्धा विधाय च प्रत्यूषकृत्यमभ्यग्रमभ्येत्य कृतवैभातिकविधये महासुधिये गुणमन्धराय सत्यंधराय निजकान्ताय महीकान्ताय स्वप्नोदन्तमिमं निवेदयामास ।

आर्यपुत्र जितामित्र दृष्टाः स्वप्नास्त्रयो भृशम् ।
वाचालयन्ति मां चूतकोरकाः कोकिलामिव ॥ ४९ ॥

आर्यपुत्र सुत्रामविभव विभावर्याः पश्चिमे यामे कश्चन तरुरशोकोऽपि केनचित्कुठार-

---

देवीति—हे देवि हे राज्ञि ! त्वदीयस्य कचडम्बरस्य केशकलापस्य चौर्येऽपहरणे तुङ्गा सून्नता पट्वीति यावत्, भृङ्गावली भ्रमरश्रेणिः निशासु रजनीषु, राज्ञा भूपालेन चन्द्रेण च 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इति कोशः, पङ्कजबन्धनेषु कमलकारावासेषु, सपदि झटिति, रचिता स्थापिता, अद्य साम्प्रतं प्रभातवेलायामिति यावत्, विसृष्टा चासौ हृष्टा चेति विसृष्टहृष्टा विमुक्ता अतएव च प्रसन्ना सती, मञ्जुलरवैर्मनोहरशब्दैः, त्वां भवतीम्, स्तौति नौति, उररीकुरुष्व स्वीकुरु ॥४६॥

पयोजेति—पयोजधूलीभिः पद्मपरागैः परिधूसरं परिमलिनमङ्गं यस्य तथाभूतः वियोगेन विरहेण खिन्नो विषण्णः, कोकश्चक्रवाकः, अद्य साम्प्रतं प्रभात इति यावत्, पत्नौ पतत्रे, विधूय कम्पयित्वा, स्वकान्तां स्वकीयवल्लभाम्, परिरभ्य समाश्लिष्य, तस्याः स्वकान्तायाः, वक्त्रे मुखे, स्वचञ्चुं स्वकीयत्रोटिम्, कलयन् धारयन्, विभाति शोभते । स्वभावोक्तिः ॥४७॥

हंसतूलमयीमिति—भो देवि हे राज्ञि ! सिकताततिं वालुकाश्रेणिम्, हंसीव मरालीव, शुभ्राभ्रपङ्क्तिं सितवारिदसन्ततिम्, चन्द्रस्येयं चान्द्री चन्द्रसम्बन्धिनी कलेव षोडशभाग इव, हंसतूलस्य विकारो हंसतूलमयी ताम् अतिमृदुलामिति यावत्, शय्यां पर्यङ्कम्, जहीहि मुञ्च ॥४८॥

इत्यादिप्राबोधिकेति—इत्यादयः पूर्वोक्तप्रकारका ये प्राबोधिकानां प्रबोधकार्यनियुक्तानां मागधविशेषाणां पद्यालापाः कविताशब्दास्तैः, मङ्गलवाद्यानां मङ्गलप्रयोजनकवादित्राणां निनादा ध्वनयस्तैश्च, कादम्बिन्याः मेघमालायाः कलकला अनुकरणशब्दास्तैः, केकिकान्तेव मयूरीव, स्वप्नेन, पूर्वं प्रबुद्धेति प्रबुद्धपूर्वाऽपि सा विजया प्रबुद्धा जागृता सती, प्रत्यूषकृत्यमहर्मुखकार्यं स्नानादिकमिति यावत् । 'प्रत्यूषोऽहर्मुखं कल्यम्' इत्यमरः । विधाय कृत्वा, अभ्यग्रं पुरस्तात्, अभ्येत्याभ्यागत्य, कृता वैभातिकाः प्रातःकालिका विधयो येन तस्मै, महांश्चासौ सुधीश्चेति महासुधीस्तस्मै महापण्डिताय, गुणमन्धराय दयाशौर्यादिगुणविशिष्टाय, निजकान्ताय स्ववल्लभाय, इमं वक्ष्यमाणं स्वप्नोदन्तं स्वप्नवृत्तान्तम्, निवेदयामास कथयामास ।

आर्यपुत्रेति—जितानि पराभूतान्यमित्राणि शत्रवो येन तत्सम्बुद्धौ हे जितामित्र, आर्यपुत्र हे नाथ ! दृष्टा अवलोकिताः, त्रयस्त्रिसंख्याविशिष्टाः स्वप्नाः चूतकोरका आम्रमञ्जरीकुड्मलाः, कोकिलामिव पिकीमिव, मां विजयाम्, भृशमत्यन्तम्, वाचालयन्ति मुखरयन्ति । उपमा ॥४९॥

आर्यपुत्र सुत्रामविभवेति—सुत्रामा वज्री इन्द्र इति यावत्, तस्येव विभवमैश्वर्यं यस्य तत्सम्बुद्धौ हे सुत्रामविभव 'सुत्रामा गोत्रभिद्वज्री' इत्यमरः, आर्यपुत्र नाथ ! विभावर्यां निशायाः पश्चिमेऽन्तिमे यामे

---

१. प्रबुध्य ब० ।

पाणिना छेदनशोकं प्रापितो जातश्च हाटकमकुटघटितो बालाशोकविटपी तत्परिसरेऽष्टापि माला दृष्टा इति।

तमिमं स्वप्नोदन्तमाकर्ण्य, विचिन्त्य च शुभाशुभोदर्कफलम्, आत्मापायशङ्काशङ्कुनिचितचेतनो हर्षशोकरसोन्मग्न इव चन्दनविषरसाभ्यां मनस्यालिप्त इव कमलिनीकण्टककमलदलकलितपक्षः सितपक्ष इव स्थितोऽपि, अहार्यधैर्यचातुर्यावगाढमतिरयमम्भोनिधिगम्भीरः कुम्भिनीपतिरशुभफलमाद्यस्वप्नं मनसिकृत्य शुभफलं स्वप्नद्वयमन्तःकृतक्षुद्रदन्तो दन्तावल इव दन्तयुगलमुदञ्चयामास।

पुत्रं नृपालतिलकं कुलरत्नदीपं
प्राप्नोषि देवि सुरराजदिशेव सूर्यम्।
दृष्टो यतः समकुटो नवबालवृक्षः
कान्ता भवन्ति खलु तस्य तदष्टमालाः॥ ५०॥

श्रुत्वा च देवी श्रवणायताक्षी पत्युर्वचः सा पुनराबभाषे।
जिज्ञासते मे हृदयं प्रियाद्यस्वप्नस्य साध्यं प्रतिपादयाद्य॥ ५१॥

प्रहरे, कश्चन कोऽपि, तरुर्वृक्षः अशोकोऽपि शोकार्तातोऽपि पत्रे कङ्केलिरपि, कुठारः पाणौ यस्य तेन परशुकरेण, केनचिज्जनेन, छेदनेन शोकस्तं छेदनदुःखम्, प्रापितो लम्भितः, किञ्च, तत्परिसरे तन्निकटे, हाटकमकुटघटितः काञ्चनमौलिसहितः, बालश्चासावशोकविटपी चेति बालाशोकविटपी, अशोकस्य नूतनो वृक्षः जातः समुत्पन्नः, किञ्च, अष्टमाला अपि, अष्टस्रजोऽपि, दृष्टा अवलोकिताः। परशुपाणिना केनचिच्छिद्यमानोऽशोकानोकहः, सन्निकटे समुत्पन्नः समकुटः कश्चिन्नूतनाशोकपादपः, तस्य परिसरेऽष्टमालाश्च लम्बमाना इति स्वप्नत्रयं मयाद्य निशि दृष्टमिति भावः। इतीत्थं त्रयः स्वप्ना मां भृशं वाचालयन्तीति श्लोकस्य क्रियया सह सम्बन्धः।

तमिममिति—इमं तं पूर्वोक्तं स्वप्नोदन्तं स्वप्नवृत्तान्तम्, आकर्ण्य श्रुत्वा, शुभाशुभं च तदुदर्कफलञ्चेति शुभाशुभोदर्कफलं मङ्गलामङ्गलोदयपरिणामम्, विचिन्त्य च विचार्य च, आत्मापायस्य स्वकीयमरणस्य या शङ्का संशीतिः सैव शङ्कुः कीलस्तेन निचिता चेतना यस्य सः, हर्षश्च शोकश्चेति हर्षशोकौ तौ च तौ रसौ चेति हर्षशोकरसौ तयोरुन्मग्न इव मुदित इव, चन्दनविषरसाभ्यां मलयजगरलरसाभ्याम्, मनसि चेतसि, आलिप्त इव दिग्ध इव, कमलिन्याः पद्मिन्याः कण्टकेन कमलदलेन पद्मपत्रेण च कलितौ सहितौ पक्षौ गरुतौ यस्य तथाभूतः, सितपक्ष इव मराल इव, स्थितोऽपि विद्यमानोऽपि, धैर्यं च चातुर्यञ्चेति धैर्यचातुर्ये, अहार्ये धैर्यचातुर्ये इत्यहार्यधैर्यचातुर्ये शाश्वतिकधैर्यदक्षत्वे तयोरवगाढा लीना मतिर्यस्य सः, अम्भोनिधिरिव सागर इव गम्भीरोऽगाधो विपुलधैर्ययुक्त इति यावत्, अयं पूर्वोक्तः, कुम्भिनीपतिर्नृपः सत्यन्धर इति यावत्, अशुभममङ्गलं फलं परिणामो यस्य तम्, आद्यस्वप्नं प्रथमस्वप्नं, मनसिकृत्य चेतसि कृत्वा गूढं विधायेति भावः, शुभफलं मङ्गलप्रयोजनम्, स्वप्नद्वयं द्वितीयतृतीयस्वप्नयुगलम्, अन्तःकृतो मुखान्तर्धृतः क्षुद्रदन्तोऽल्परदनो यस्य तथाभूतः, दन्तावल इव गज इव, दन्तयोर्बहिःप्रकाशमानयो रदनयोर्युगलं युग्मम्, उदञ्चयामास प्रकटयामास।

पुत्रमिति—हे देवि हे राज्ञि! यतो यस्मात् कारणात्, त्वया समकुटो मौलियुतः, नवबालवृक्षः प्रत्यग्राशोकपादपः, दृष्टोऽवलोकितः, ततः, सुरराजदिशा प्राच्या सूर्यमिव प्रभाकरमिव, नृपालतिलकं राजश्रेष्ठम्, कुलरत्नदीपं वंशमणिदीपकम्, पुत्रं शिशुं, प्राप्नोषि लभसे, तस्मिन् नवबालवृक्षे या अष्टमाला अष्टस्रजः सन्ति ताः खलु निश्चयेन तस्य पुत्रस्य कान्ता वल्लभा भवन्ति जायन्ते॥५०॥

श्रुत्वा चेति—श्रवणपर्यन्तं कर्णपर्यन्तमायते दीर्घे अक्षिणी लोचने यस्यास्तत्सम्बुद्धौ, सा देवी विजया, पत्युर्वल्लभस्य, वचःस्वप्नद्वयफलसूचकवचनम्, श्रुत्वा चाकर्ण्य च, पुनर्भूयः, आबभाषे जगाद। हे प्रिय हे कान्त, मे मम हृदयं चित्तम्, आद्यस्वप्नस्य, साध्यं फलम्, जिज्ञासते ज्ञातुमिच्छति, अद्येदानीम्, प्रतिपादय निवेदय॥५१॥

इति निजवल्लभाप्रश्नमौदासीन्येनोत्तरयति महीवल्लभे, तदिङ्गितज्ञा सा कुरङ्गलोचना, तरङ्गितदुःखपूरपरिमिलितान्तरङ्गा करिनितम्बिनीव गिरिनितम्बान्निजासनान्निपत्य भुवि लुठन्ती, स्वात्मनि दुष्पूरतया बाष्पव्याजेन प्रवहता दुःखपूरेण बहिःस्रावितयेव चेतनया विमुमुचे। तावन्निजकान्ताचेतनापरिमार्गणायेव गतया संज्ञया विनिर्मुक्तो नरनाथोऽपि कथंचिल्लब्धसंज्ञः प्राज्ञाग्रेसरः कथंकथमपि राज्ञीमुत्थाप्य तीरातीतशोकपारावारमध्ये प्लवविप्लवविवशायास्तस्याः पोतायितं वचनजातमुत्तरङ्गयामास।

स्वप्नेन दृष्टेन सरोजनेत्रे किं मां विनष्टासुमितस्तनोषि।
संत्रातुकामाः खलु साधुवृक्षं नराः कदाचिन्न हि निर्दहन्ति ॥ ५२ ॥

किं कल्पते कुरङ्गाक्षि शोचनं दुःखशान्तये।
आतपक्लेशनाशाय पावकस्य प्रवेशवत् ॥ ५३ ॥

ततो विशालाक्षि निशाकरास्ये धर्मो विपन्नाशनमातनोति।
सूरो यथा स्फारहिमप्रणाशं चन्द्रो यथा संतमसस्य नाशम् ॥ ५४ ॥

इत्यादिसान्त्ववचनैः कान्तां परिसान्त्वयन्लब्धाश्वासया तया समं यथापुरं नरपतिर्विषयसुखपारवश्येन रममाणः कानिचिदहान्यतिवाहयाञ्चक्रे।

इति निजवल्लभेति—इति पूर्वोक्तप्रकारेण, महीवल्लभे नृपतौ, निजवल्लभाया विजयायाः प्रश्नमनुयोगम्, औदासीन्येनोपेक्षाभावेन, उत्तरयति समादधति सति, तस्य महीवल्लभस्येङ्गितानि हृच्चेष्टितानि जानातीति तदिङ्गितज्ञा, सा कुरङ्गलोचना मृगनयना, तरङ्गितेन कल्लोलितेन वृद्धिंगतेनेति यावत्, दुःखपूरेणाशातप्रवाहेण परिमिलितमापूर्णमन्तरङ्गं हृदयं यस्यास्तथाभूता सती, गिरिनितम्बात् पर्वतकटकात्, करिनितम्बिनीव हस्तिनीव, निजासनात्स्वविष्टरात्, निपत्य नितरां पतित्वा, भुवि पृथिव्यां, लुठन्ती लोठनं कुर्वती, स्वात्मनि स्वस्वरूपे, दुष्पूरतया मातुमशक्यतया, बाष्पव्याजेन नयनसलिलमिषेण, प्रवहता स्यन्दता, दुःखपूरेणासुखप्रवाहेण, बहिःप्लावितयेव बहिर्निःसारितयेव, चेतनया चैतन्यशक्त्या विमुमुचे विमुक्ता। तावत् तावता कालेन, निजकान्ताया स्ववल्लभायाश्चेतना चैतन्यं तस्याः परिमार्गणायेव पर्यन्वेषणायेव, गतया कुत्रापि प्रयातया, संज्ञया चेतनया, विनिर्मुक्तो रहितो मूर्च्छित इति यावत्, नरनाथोऽपि सत्यन्धरोऽपि, कथञ्चित्केनापि प्रकारेण, लब्धा पुनरासादिता संज्ञा चेतना येन तथाभूतः, प्राज्ञाग्रेसरो विद्वद्श्रेष्ठः सः, कथं कथमपि केनापि प्रकारेण, राज्ञीं देवीम्, उत्थाप्य ससंज्ञां विधाय, तीरातीत उद्वेलो यः शोकपारावारः शोकसागरस्तस्य मध्येऽभ्यन्तरे, प्लवविप्लवाभ्याम् उन्मज्जननिमज्जनाभ्याम् विवशा परायत्ता तस्याः, तस्या राज्ञ्याः, पोतायितं नौकावदाचरत्, वचनजातं गीःसमूहम्, उत्तरङ्गयामास वर्धयामास। जगादेति भावः।

स्वप्नेन दृष्टेनेति—हे सरोजनेत्रे हे कमललोचने! दृष्टेनावलोकितेन, इतोऽनेन स्वप्नेन, मां प्रियम्, विनष्टासुं मृतम्, किं तनोषि किं बुध्यसे। हि यतः, खलु निश्चयेन, संत्रातुकामा रक्षणाभिलाषिणो नरा जनाः, साधुवृक्षं सज्जनद्रुमम्, कदाचिज्जातुचित्, न निर्दहन्ति न भस्मसात्कुर्वन्ति ॥५२॥

किं कल्पत इति—हे कुरङ्गाक्षि हे मृगलोचने! आतपेन घर्मेण क्लेशो दुःखं तस्य नाशोऽपहारस्तस्मै, पावकस्य वह्नेः, आधारेऽर्थे षष्ठी, प्रवेशवत् प्रवेश इव, शोचनं शोकः, दुःखस्य शान्तिस्तस्यै दुःखनाशाय, कल्पते किम् जायते किम्, अपितु न कल्पत इति भावः ॥५३॥

ततो विशालाक्षीति—ततस्तस्मात्कारणात्, हे विशालाक्षि हे दीर्घलोचने, हे निशाकरास्ये हे चन्द्रवदने, स्फारश्च तद्धिमञ्चेति स्फारहिमं विशालतुषारस्तस्य प्रणाशो विनाशस्तं सूरो यथादित्य इव, संतमसस्य गाढान्धकारस्य 'अवसमन्धेभ्यस्तमसः' इत्यच्, नाशं ध्वंसनम्, चन्द्रो यथा शशीव, धर्मः सुकृतपरिणामः, विपदो नाशनं विपन्नाशनम्, विपत्त्यपहरणम्, आतनोति विदधाति ॥५४॥

इत्यादीति—इत्यादीनि पूर्वोक्तप्रकाराणि च तानि सान्त्ववचनानि प्रशमवचनानि चेति तैः, कान्तां प्रेयसीम्, विजयामिति यावत्, परिसान्त्वयन् प्रशमयन्, लब्ध आसादित आश्वासो धैर्यं यया तया समं

ततश्च विषयसुखपरवशस्य विशांपतेः स्वप्नवृत्तान्तप्रबोधनायेव सा नरपालसती, महाकविभारतीव गभीरार्थम्, शारदाब्जसरसीव राजहंसम्, रत्नाकरवेलेव मणिम्, पुरन्दरहरिदिवेन्दुमण्डलम्, गिरिगुहेव सिंहकिशोरम्, हेमकरण्डिकेव रत्नम्, सिन्धुशुक्तिकेव मुक्ताफलम्, गर्भं बभार।

तदा हि तस्या वदनाम्बुजातं गर्भार्भकस्येव यशोविलासैः।
अल्पैरहोभिः परिपाण्डरत्वमवाप चन्द्रेण च सर्वसाम्यम् ॥ ५५ ॥
यथा यथासीदुदरं विवृद्धं तथा तथास्याः कुचकुम्भयुग्मम्।
श्यामाननत्वं सममाप राज्ञा स्वप्नस्य पाकादनुतापकर्त्रा ॥ ५६ ॥
संवृद्धमुदरं वीक्ष्य तत्स्तनौ मलिनाननौ।
न सहन्ते हि कठिना मध्यस्थस्यापि संपदम् ॥ ५७ ॥
श्यामाननं कुचयुगं दधती वधूः सा
पाथोजिनीव मधुपाञ्चितकोशयुग्मा।
पङ्कास्यहंसमिथुना सरसीव रेजे
लोलम्बचुम्बितगुलुच्छयुगी लतेव ॥ ५८ ॥

सार्धम्, यथापुरं पूर्ववत्, विषयसुखानां मदनशर्मणां पारवश्येन परतन्त्रतया, रममाणः क्रीडन्, नरपतिः सत्यंधरः, कानिचित्कतिचित्, अहानि दिनानि, अतिवाहयाञ्चक्रेऽतिगमयामास।

ततश्चेति—ततश्च तदनन्तरञ्च, विषयसुखस्य मदनसुखस्य परवशः परायत्तस्तस्य, विशांपते राज्ञः, स्वप्नस्य वृत्तान्त उदन्तः स्वप्नवृत्तान्तस्तस्य प्रबोधनायेव ज्ञपनायेव, सा पूर्वोक्ता, नरपालसती विजया, महाकवीनां जिनसेनादीनां भारती वाणी गभीरार्थमिव गूढाभिधेयमिव, शरदि भवानि शारदानि शरदृतुभवानि, तानि च तान्यब्जानि पद्मानीति शारदाब्जानि तैरुपलक्षिता सरसी सरोवरः, राजहंसमिव मरालविशेषमिव, 'राजहंसास्तु ते चञ्चूचरणैर्लोहितैः सिताः' इत्यमरः, रत्नाकरस्य सागरस्य वेला तटी, मणिमिव रत्नमिव, पुरन्दरस्याखण्डलस्य हरित्काष्ठा प्राचीति यावत्, इन्दुमण्डलमिव चन्द्रबिम्बमिव, गिरिगुहा पर्वतकन्दरा सिंहकिशोरमिव मृगेन्द्रमाणवकमिव, हेम्नः करण्डिका हेमकरण्डिका सुवर्णभाजनकं रत्नमिव मणिमिव, सिन्धोः सागरस्य शुक्तिका मुक्तास्फोटः मुक्ताफलमिव मौक्तिकमिव, गर्भं भ्रूणम्, बभार दधार। मालोपमा।

अथ तस्या गर्भावस्थां वर्णयितुमाह—तदा गर्भधारणवेलायाम्, हि निश्चयेन, तस्या राज्ञ्याः, वदनं मुखमेवाम्बुजातं कमलम्, अल्पैरेव कतिपयैरेव, अहोभिर्दिवसैः, गर्भे स्थितोऽर्भको गर्भार्भकस्तस्य भ्रूणस्थशिशोः यशोविलासैः कीर्तिसञ्चारैरिव, परिपाण्डरत्वं धवलत्वम्, अथ च चन्द्रेण निशाकरेण, सर्वसाम्यं सर्वप्रकारेण सादृश्यम्, अवाप लेभे। उत्प्रेक्षा ॥५५॥

यथा यथेति—अस्या विजयायाः, उदरं जठरम्, यथा यथा येन येन प्रकारेण, विवृद्धं वृद्धियुक्तमासीत्, तथा तथा तेन तेन प्रकारेण, कुचकुम्भयुग्मं स्तनकलशयुगलम्, स्वप्नस्य, पाकात्परिणामात्, अनुतापस्य पश्चात्तापस्य कर्त्रा विधायकेन, राज्ञा सत्यन्धरेण, समं सह, श्यामाननत्वं कृष्णमुखत्वम्, आप लेभे, राजा स्वमरणदिवसस्य निकटस्थत्वेन पश्चात्तापान्मलिनमुखो बभूव, स्तनकलशयुगलं च गर्भकाले कृष्णचूचुकं भवत्येव। सहोक्तिः ॥५६॥

संवृद्धमिति—तस्याः स्तनौ तत्स्तनौ तत्कुचौ, उदरं जठरम्, समन्तात् वृद्धं संवृद्धं संविस्तृतम्, वीक्ष्य दृष्ट्वा, मलिनं कृष्णमाननं मुखं ययोस्तौ कृष्णाग्रभागाविति यावत्, जाताविति शेषः। हि यतः, कठिनाः परुषप्रकृतयः, मध्यस्थस्यापि मध्ये विद्यमानस्यापि पक्षे रागद्वेषरहितस्यापि, संपदं सम्पत्तिम्, न सहन्ते न तितिक्षन्ते। अर्थान्तरन्यासः ॥५७॥

श्यामाननमिति—श्यामाननं कृष्णचूचुकम्, दधती बिभ्रती, सा वधूर्विजया, मधुपाभ्यां भ्रमराभ्यामञ्चितं शोभितं कोशयुग्मं कुड्मलयुगलं यस्यास्तथाभूता, पाथोजिनीव कमलिनीव, पङ्कः कर्दमः आस्ये मुखे यस्य तत्पङ्कास्यं तथाभूतं हंसमिथुनं मरालयुग्मं यस्यां तथाभूता, सरसीव सरोवर इव, लोलम्बाभ्यां

अन्तःस्थशिशुगाम्भीर्यं दृष्ट्वास्या नाभिमण्डलम् ।
लज्जयेवाद्य तत्याज गाम्भीर्यं भूभुजा समम् ॥ ५६ ॥
मध्यदेशश्चकोराक्ष्याः शिशुना बलिना तदा ।
भङ्क्त्वा वलित्रयं राज्ञस्तापेनाभूत्समं गुरुः ॥ ६० ॥
नीलाब्जानि जितान्यासन्नजय्यमद्य सिताम्बुजम् ।
इतीव देव्या नयनयुगलं धवलं बभौ ॥ ६१ ॥

तावत्सदोहलां महिलामिमां दृष्ट्वा स्मृत्वा च दुःस्वप्नफलं पश्चात्तापपराहतस्वान्तो महीकान्तोऽयमात्मरक्षणपरायणश्चिन्तामेवमकरोत् । दुष्कर्मपरिपाकपराभूततया मया विषयानुरागापथ्यसेवनेनातिलङ्घितानि सचिववचनसञ्जीवनौषधानि । अथवा कृतमनयास्थानपतितया गतजलसेतुबन्धनसकाशया वाञ्छया । किंतु फलकालिककलिकापचयवाञ्छेवोपहास्यतां प्राप्नोति ।

एवं विचिन्त्य धरणीरमणस्तदानीं
वंशस्य रक्षणविधौ परिक्लृप्तचित्तः ।
आस्थां यशस्युपरतिं च शरीरवृत्तौ
कुर्वन्नचीकरदसाविह केकियन्त्रम् ॥ ६२ ॥

भ्रमराभ्यां चुम्बितमालिङ्गितं गुलुच्छयुगं स्तबकयुगलं यस्यास्तथाभूता, लतेव वल्लरीव, रेजे शुशुभे । मालोपमा ॥ ५८ ॥

अन्तःस्थेति—अस्या नरेन्द्रमानिन्याः, नाभिमण्डलं तुन्दिगह्वरम्, अन्तःस्थस्य गर्भस्थस्य शिशोर्बालकस्य गाम्भीर्यमगाधत्वं धैर्यंवत्त्वञ्च, दृष्ट्वा विलोक्य, लज्जयेव त्रपयेव, अद्य गर्भधारणवेलायाम् । भूभुजा भूपालेन, समं साकम्, गाम्भीर्यमगाधतां धैर्यञ्च, तत्याज त्यजति स्म । उत्प्रेक्षाश्लेषसहोक्तयः ॥५६॥

मध्यदेश इति—तदा तस्यां वेलायाम्, चकोराक्ष्या जीवंजीवलोचनायाः, मध्यदेशः कटिप्रदेशः, बलिना बलवता, शिशुना बालकेन, वलित्रयं नाभेरधस्ताद्विद्यमानरेखात्रयं पक्षे बलवत्त्रयम्, भङ्क्त्वा नाशयित्वा पराजित्य च, राज्ञो नृपतेः, तापेन विषादेन, समं सार्धम्, गुरुरधिको विस्तृतश्च । अभूत् बभूव । श्लेषाद्बवयोरभेदः । विरोधाभाससहोक्ती ॥६०॥

नीलाब्जानीति—नीलानि च तान्यब्जानीति नीलाब्जानि नीलारविन्दानि, जितानि पराभूतानि, अद्येदानीम्, सितञ्च तदम्बुजञ्चेति सिताम्बुजं पुण्डरीकं, अजय्यं जेतुं शक्यम् 'क्षय्यजय्यौ शक्यार्थे' इति निपातितम्, अस्तीति शेषः । इति विचार्येव, देव्या विजयायाः, नयनयुगलं लोचनयुगम्, धवलं सितम्, बभौ शुशुभे । उत्प्रेक्षा ॥६१॥

तावदिति—तावत्-तावता कालेन, सदोहलां सगर्भाम्, इमां महिलाम्, विजयाम्, दृष्ट्वा विलोक्य, दुःस्वप्नफलं कङ्केलिपादपपतनात्मकस्य दुःस्वप्नस्य फलं परिणामं स्वमरणात्मकमिति यावत्, स्मृत्वा च ध्यात्वा च, पश्चात्तापेनानुशयेन पराहतं पीडितं स्वान्तं मनो यस्य सः, महीकान्तो भूपतिः, अयं सत्यन्धरः, आत्मनः स्वस्य रक्षणे त्राणे परायणस्तत्परः सन्, एवं वक्ष्यमाणप्रकाराम्, चिन्तां विचारम्, अकरोत् विदधौ । दुष्कर्मणां पापकर्मणां परिपाकेन परिणामेन पराभूततया तिरस्कृततया, मया सत्यंधरेण, विषयेषु पञ्चेन्द्रियविषयेष्वनुरागः प्रीतिर्विषयानुरागः स एवापथ्यमहितं तस्य सेवनेन, सचिववचनानि मन्त्र्युपदेशा एव सञ्जीवनौषधानि जीवनाधायकभैषज्यानि, अतिलङ्घितानि त्यक्तानि, उपेक्षितानीति यावत् । अथवेति पक्षान्तरे, अस्थाने पतिता तया—असमयप्रादुर्भूतया, गतमग्रे प्रयातं यज्जलं सलिलं तस्य सेतुबन्धनं पुलिननिर्माणं तस्य सकाशया सदृशया, अनया वाञ्छया—एतयेच्छया, कृतं व्यर्थम् । किन्तु-अपितु, कलिकानां पुष्पदलानामपचयस्य वाञ्छा मनोरथः इति कलिकापचयवाञ्छा, फलकालिकी फलकालोत्पन्ना या कलिकापचयवाञ्छा, तद्वत्, उपहास्यतां हास्यभाजनताम्, प्राप्नोति लभते । इदानीं चिन्ताकरणं व्यर्थमिति भावः ।

एवमिति—तदानीं तस्मिन् काले, एवं पूर्वोक्तप्रकारेण, विचिन्त्य विचार्य, वंशस्य गोत्रस्य, रक्षणस्य-

मेघावलिः सुखकरी स्वसमाननाम्नां
वर्षासु मत्तशिखिनां शिखिनाशहेतुः ।
इत्थं विचिन्त्य किल कल्पितकेकियन्त्रं
राज्ञा विनुन्नमचरद्घनसंनिधाने ॥६३॥

राजा च राजवदनां महिषीं विधाय
यन्त्रे तदीयघनकेशविनिर्जिताभ्रम् ।
संद्रष्टुकाम इव दौहृदकाललीलां
संभोक्तुमभ्रसरणौ विजहार धीरः ॥ ६४ ॥

तावत्स दुराचारः काष्ठाङ्गारः, काष्ठान्तरेषु शान्ताङ्गारसकाशभासं राजघः कृतघ्न इत्याद्ययशोविलासं समार्जयन्, संमार्जयंश्च सकलहितवृत्तिम्, राजद्रोहनियन्त्रितचित्तो निजान्तःकरणे चिन्तयामास । लोके पराधीनं जीवितं परमोत्कृष्टपदवीमवाप्तमपि सरसमोचाफलनीचेतरमधुरक्षीराद्युपचारपरिलालितपञ्जरबद्धशुकशावकजीवनमिव विनिन्दितम्, निजबलविभवसमार्जितमृगेन्द्रपदसंभावितस्य कुम्भीन्द्रकुम्भस्थलपाटनपटुतरखरनखरस्य मृगेन्द्रस्येव स्वतन्त्रजीवनमविनिन्दितमभिनन्दितमनवद्यमतिहृद्यम्, इति ।

विघ्रिस्तस्मिन् रक्षाकार्ये, परिक्लृप्तं प्रलीनं चित्तं मनो यस्य तथाभूतः, असौ धरणीरमणो महीपतिः, यशसि कीर्तौ, आस्थामादरबुद्धिम्, शरीरस्य गात्रस्य वृत्तिः सद्भावस्तस्याम्, उपरतिं विरक्तिम्, च कुर्वन् विदधन् सन्, इह स्वनगरे, केकियन्त्रं मयूराकारयन्त्रम्, अर्चाकरत् कारयामास ॥ ६२ ॥

मेघावलिरिति—वर्षासु प्रावृट्सु, स्वसमानं नाम येषां तेषां स्वसदृशनामधेयानाम्, मत्ताश्च ते शिखिनश्च तेषां मत्तमयूराणां सुखकरी सुखोत्पादिका, मेघावलिर्घनपङ्क्तिः, शिखिनां वह्नीनां नाशस्य हेतुः कारणमस्ति, इत्थमनेन प्रकारेण, विचिन्त्य विचार्य, कल्पितं च तत्केकियन्त्रं चेति कल्पितकेकियन्त्रं निर्मितमयूरयन्त्रम्, राज्ञा नृपेण, विनुन्नम् प्रेरितं सत्, घनसंनिधाने मेघसमीपे, अचरत् विजहार, किलेति वार्तायाम् ॥ ६३ ॥

राजा चेति—धीरो गभीरः, राजा च सत्यन्धरश्च, राजेव चन्द्र इव वदनं मुखं यस्यास्ताम्, महिषीं राज्ञीम्, यन्त्रे मयूराकारनभोयाने, विधाय कृत्वा, तदीयाश्च ते घनकेशाश्चेति तदीयघनकेशास्तदीयसान्द्रशिरोरुहास्तैर्विनिर्जितं पराभूतं यदभ्रं मेघस्तत्, संद्रष्टुकाम इव विलोकयितुमना इव 'तुं काममनसोरपि' इति मलोपः, दौहृदकाललीलां गर्भकालक्रीडाम्, संभोक्तुमनुभवितुम्, अभ्राणां मेघानां सरणिर्मार्गस्तस्यां गगन इत्यर्थः, विजहार विहारमकार्षीत् ॥ ६४ ॥

तावदिति—तावत् तावता कालेन, दुराचारो दुर्वृत्तः, स पूर्वोक्तः, काष्ठाङ्गारो राज्यकर्मणि नियुक्तः, काष्ठान्तरेषु दिगन्तरालेषु, शान्ताङ्गारैः, इङ्गालैः 'कोयला' इति प्रसिद्धैः सकाशा सदृशी भा दीप्तिर्यस्य तम्, राजघो नृपहा, कृतं हन्तीति कृतघ्न उपकारानभिज्ञः, इत्यादिश्चासावयशोविलासश्चेतीत्याद्ययशोविलासस्तम्, इति प्रभृत्यकीर्तिविस्तारम्, समार्जयन् प्राप्नुवन् सकलहितवृत्तिं निखिलजनकल्याणकारिप्रवृत्तिम्, संमार्जयन् उत्सारयन्, राजद्रोहे नृपतिविद्वेषे नियन्त्रितं निलीनं चित्तं मनो यस्य तथाभूतः सन्, निजान्तःकरणे स्वकीयचेतसि चिन्तयामास विचारयामास । लोके भुवने, पराधीनं परायत्तम्, जीवितं जीवनम्, परमोत्कृष्टा चासौ पदवी चेति परमोत्कृष्टपदवी ताम्, सर्वश्रेष्ठपदम्, अवाप्तमपि लब्धमपि, सरसमोचाफलानि च रसाढ्यकदलीफलानि च नीचेतरमधुरक्षीराणि च सातिशयमिष्टपयांसि चेति सरसमोचाफलनीचेतरमधुरक्षीराणि, तान्यादौ येषां ते तथाभूताश्च त उपचाराश्च तैः परिलालितः परितोषितो यः पञ्जरबद्धः शलाकागृहनिबद्धः शुकशावकः कीरबालकस्तस्य जीवनमिव जीवितमिव, विनिन्दितं निन्दापात्रम्, अस्तीति शेषः, निजबलविभवेन स्वकीयपराक्रमसम्पत्त्या समार्जितं प्राप्तं यन्मृगेन्द्रपदं मृगराजपदवी तेन संभावितस्य शोभितस्य, कुम्भीन्द्रकुम्भस्थलस्य गजेन्द्रगण्डस्थलस्य पाटने विदारणे पटुतराणि दक्षतराणि खरनखराणि तीक्ष्णनखानि यस्य तस्य मृगेन्द्रस्येव सिंहस्येव, स्वतन्त्रजीवनं पराधीनजीवितम्, अविनिन्दितम् अगर्ह-

इत्थं मनसि संचिन्त्य कृतघ्नः सचिवैः सह ।
संमन्त्रयितुमारेभे राजद्रोहपरायणः ॥ ६५ ॥

भवतां वचसां पदं प्रदातुं मम वाणी पुर एव संनिधत्ते ।
नवनाटकवस्तुसंकथानां पुरतो रङ्गभुवं गता नटीव ॥ ६६ ॥

राजद्रोहसमुद्यतं प्रतिदिनं दैवं हि मां बाधते
द्रोहं राज्ञि समाचरेति तदिदं किं वा सुखान्तं भवेत् ।
यद्वा दुःखफलं ममेति हृदयं डोलायते मन्त्रिण-
स्तत्तर्कप्रमितकर्णैर्नियमितैर्निश्चेयमन्यादृशैः ॥ ६७ ॥

वक्तुं निवर्तमानाऽपि ह्रियैतत्परिनिन्दितम् ।
दैवतस्य भयादेव प्रह्वा जिह्वा प्रवर्तते ॥ ६८ ॥

इत्थं कृतावहित्थात्काष्ठाङ्गारवचनबन्धात्सत्कुलप्रसूता इव वचनीयात्, धर्मिजना इव प्राणिगणपरिपीडनात्, हरिणशावका इव दावानलज्वालात्, राजहंसा इव घनाघनघनगर्जितात्, दरिद्रा इव दुर्भिक्षयोगात्, सभास्तारास्तत्र तत्रसुः ।

णीयम्, अभिनन्दितं प्रशंसितम्, अनवद्यं निष्पापम्, 'कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः' इत्यमरः, अतिहृद्यमतिमनोहरञ्च, विभात इति शेषः । इत्येवं प्रकारेण चिन्तयामासेति सम्बन्धः ।

इत्थमिति—कृतघ्नो नीचः कृतोपकारापलापनपटुरिति यावत्, राज्ञा सह द्रोहो राजद्रोहो नृपतिविद्वेषस्तस्मिन् परायणस्तत्परः, स काष्ठाङ्गारः, इत्थं पूर्वोक्तप्रकारेण, मनसि चेतसि, संचिन्त्य विचार्य, सचिवैर्मन्त्रिभिः सह सार्धम्, संमन्त्रयितुं मन्त्रणां कर्तुम्, आरेभे तत्परोऽभूत् ॥ ६५ ॥

भवतामिति—भवतां युष्माकम्, वचसां वाचाम्, पदं स्थानम् 'पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । प्रदातुं वितरितुम्, मम काष्ठाङ्गारस्य, वाणी भारती, पुर एव पूर्वमेव, नवनाटकवस्तुसंकथानां नूतननाटकीयवस्तुव्यावर्णनानाम्, पदं प्रदातुम्, पुरतोऽग्रे, रङ्गभुवं रङ्गभूमिम्, गता प्राप्ता, नटीव शैलूषीव, पदं चरणं स्थानं वा, संनिधत्ते निक्षिपति, पूर्वमहं कथयामीति यावत् ॥ ६६ ॥

राजद्रोहसमुद्यतमिति—राजद्रोहे राजविद्वेषे समुद्यतं तत्परम्, दैवं भागधेयम्, राज्ञि नृपतौ सत्यन्धरमहाराज इति यावत्, विषयार्थे सप्तमी, द्रोहं विद्वेषं कार्तघ्न्यमिति यावत्, समाचर कुरु, इतीत्थम् प्रतिदिनं प्रतिदिवसम्, मां बाधते पीडयति, अनिच्छन्तमपि मां राजविद्रोहं कर्तुं बलात्प्रेरयतीति भावः । इदं तद् दैवबाधनम्, किं वा सुखान्तं सुखावसानम्, भवेत् स्यात्, यद्वा अथवा, दुःखमेव फलं यस्य तद्दुःखपरिणामं स्यात्, इत्येवं प्रकारेण मम हृदयं चेतः, डोलायते डोलावच्चपलं वर्तते, तत्तस्मात्कारणात्, हे मन्त्रिणः हे सचिवाः, तर्कप्रमितकर्णैर्विमर्शप्रतिविमर्शैः, नियमितैर्नियन्त्रितैः, अन्यादृशैरन्यप्रकारैश्च, तद्वृत्तम्, निश्चेयं निश्चेतुं योग्यमस्तीति शेषः ॥ ६७ ॥

वक्तुमिति—परिनिन्दितं जुगुप्सितम्, एतत्कार्यम्, वक्तुं कथयितुम्, ह्रिया त्रपया, निवर्तमानापि पश्चात्कृतपदापि, प्रह्वा नम्रा, जिह्वा रसना, दैवतस्य दैवस्य, भयादेव भीतेरेव प्रवर्तते कथयितुं तत्परा भवति । नास्ति चेद्दैवतस्य भयं न तर्हि प्रवर्तेत मदीया जिह्वा जुगुप्सितमेतन्निगदितुमिति भावः ॥ ६८ ॥

इत्थमिति—इत्थमनेन प्रकारेण, कृतं विहितमवहित्थाकारगोपनं यस्मिंस्तस्मात्, 'भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था । व्यापारान्तरसक्त्यन्यथाभाषणविलोकनादिकरी', इत्यवहित्थालक्षणम्, काष्ठाङ्गारस्य वचनबन्धस्तस्मात् काष्ठाङ्गारवचनरचनायाः वचनीयात् निन्दायाः, सत्कुले समीचीनवंशे प्रसूता उत्पन्ना अभिजना इति यावत्, तद्वत्, प्राणिगणस्य जन्तुसमूहस्य परिपीडनं व्यथनं तस्मात्, धर्मिजना इव मुनय इव, दावानलस्य वनवह्नेर्ज्वालस्तस्मात्, हरिणशावका इव मृगशिशव इव, घनाघनस्य मेघस्य घनं सान्द्रम्, यद् गर्जितं गर्जनं तस्मात्, राजहंसा इव मराला इव, दुर्भिक्षयोगात् अन्नदौर्लभ्यसंयोगात्, दरिद्रा इव निर्धना इव, ताराः स्थूला विशाला इति यावत्, सभाः सभास्थितजनाः, तत्र तत्रसुर्बिभ्युः । काष्ठाङ्गारस्य राजद्रोहविधायकं वचनं श्रुत्वा सर्वे सभासदा भयेन कम्पिता बभूवुरिति भावः ।

तत्र राजनयराजितचित्तो धर्मदत्तसचिवस्तमुवाच ।
स्वामिभक्तिपरिवर्धितवाग्मीमात्मजीवितविनाशकृपाणीम् ॥ ६९ ॥
प्राणा नृपालाः सकलप्रजानां यत्तेषु सत्स्वेव च जीवनानि ।
भूपेषु या द्रोहविधानचिन्ता सर्वप्रजास्वेव कृता भवित्री ॥ ७० ॥
समस्तपातकानां हि सामानाधिकरण्यभूः ।
राजध्रुगेव भविता सर्वद्रोहित्वसंभवात् ॥ ७१ ॥
राज्ञो विरोधो वंशस्य विनाशाय भविष्यति ।
ध्वान्तं राजविरोधेन सर्वत्र हि निरस्यते ॥ ७२ ॥
हर्षाय लोकस्य धराधिनाथः क्लिश्नाति नित्यं परिपालनेन ।
छायाश्रितानां परिपालनाय तरुर्यथाप्नोति रविप्रतापम् ॥ ७३ ॥

इति नीतिविदां वरिष्ठस्य सचिवप्रेष्ठस्य वचनं पित्तोपहत इव मधुरतरक्षीरं राजद्रोहगुरुद्रोहादिषु बद्धान्तरङ्गः काष्ठाङ्गारः स्वहितं मनसि न चकार, चकार च विकारजनितविद्वेषम् ।

तत्र राजनयेति—तत्र सभायाम्, राजनयेन राजनीत्या राजितं शोभितं चित्तं मनो यस्य सः, धर्मदत्तश्चासौ सचिवश्चेति धर्मदत्तसचिवः, धर्मदत्तामात्यः, तं काष्ठाङ्गारम्, आत्मनः स्वस्य जीवितं जीवनमात्मजीवितं तस्य विनाशो विध्वंसस्तस्मै कृपाणी छुरिका ताम्, स्वामिनि नृपे भक्तिरनुरागातिशयः स्वामिभक्तिस्तया परिवर्धिता वाग्मी वाणी च भारती च ताम्, उवाचान् जगाद । स्वागताच्छन्दः । द्वितीयचरणे तु रथोद्धता । इत्थमुपजातिवृत्तम् ॥ ६९ ॥

प्राणा इति—नन्पालयन्तीति नृपाला राजानः सकलाश्च ताः प्रजाश्च तासां निखिललोकानाम्, प्राणा आयूंषि, सन्तीति शेषः । यद्यस्मात् कारणात्, तेषु नृपालेषु सत्स्वेव विद्यमानेष्वेव जीवनानि जीवितानि भवन्तीति शेषः । चकारः पादपूर्त्यर्थः । भूपेषु महीपालेषु, या द्रोहविधानस्य विद्वेषकरणस्य चिन्ता विचारसन्ततिः, सा सर्वप्रजास्वेव निखिलप्रकृतिष्वेव, कृता विहिता, भवित्री भविष्यति । न खलु राजद्रोहो राजद्रोह एव किन्तु सर्वप्रजाद्रोहः । अतोऽसौ न कर्तव्य इति भावः ॥ ७० ॥

समस्तपातकानामिति—हि निश्चयेन, सर्वद्रोहित्वस्य निखिलजनविद्वेषस्य संभवः समुत्पत्तिस्तस्मात्, राजध्रुगेव राजद्रोह्येव, समस्तपातकानां निखिलपापानाम्, सामानाधिकरण्यस्य भूराधारः, भविता भविष्यति । सर्वद्रोहित्वसंभवाद्धेतो राजद्रोह्येव समस्तपापानां पात्रं भविष्यतीति भावः ॥ ७१ ॥

राज्ञो विरोध इति—राज्ञो नृपतेः, विरोधो विद्रोहः, वंशस्य कुलस्य, विनाशाय विध्वंसनाय, भविष्यति भविता, हि यतः राजविरोधेन चन्द्रविद्वेषेण, ध्वान्तं तिमिरम्, सर्वत्र सर्वेषु स्थानेषु, निरस्यते-ऽपसार्यते दूरीक्रियत इति यावत् । अत्र राजशब्दः श्लिष्टः 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इति कोशः ॥ ७२ ॥

हर्षाय लोकस्येति—यथा येन प्रकारेण, तरुर्वृक्षः छायामनातपं श्रिता आगतास्तेषाम्, परिपालनाय रक्षणाय, रविप्रतापं तपनतापम् आप्नोति लभते, तथा तेन प्रकारेण, धराधिनाथो नृपः, लोकस्य जनतायाः, हर्षाय प्रमोदाय, परिपालनेन रक्षणविधिना, नित्यं निरन्तरम्, क्लिश्नाति क्लेशमनुभवति । स्वयं दुःखमनुभूय परेषां सुखमुत्पादयति पार्थिव इति भावः ॥ ७३ ॥

इति नीतिविदामिति—राजद्रोहश्च गुरुद्रोहश्चेति राजद्रोहगुरुद्रोहास्त आदौ येषां तेषु, बद्धं लग्नमन्तरङ्गं मनो यस्य सः, काष्ठाङ्गारः, अतिशयेन मधुरं मधुरतरं तच्च तत् क्षीरञ्चेति मधुरतरक्षीरम्, अतिशयमिष्टदुग्धम्, पित्तेन दोषविशेषेणोपहतः पीडितस्तद्वत् पित्तोपहत इव, स्वहितं निजकल्याणप्रदम्, नीतिविदां नयज्ञानाम्, वरिष्ठस्य श्रेष्ठस्य, सचिवप्रेष्ठस्य मन्त्रिश्रेष्ठस्य, इति पूर्वोक्तप्रकारम्, वचनं वाक्यम्, मनसि न चकार चेतसि न दधौ, विकारेण क्रोधादिना जनितः समुत्पन्नो विकारजनितः, स चासौ विद्वेषश्च विरोधश्च तम्, चकार च कृतवांश्च ।

स्यालस्तदीयो मथनाभिधानो वाणीं कृतघ्नस्य हिताममंस्त ।
काकः स्फुरन्निम्बफलप्रसूतिमास्वादनीयां बहुमन्यते हि ॥ ७४ ॥

अथ सोऽपि काष्ठाङ्गारस्तत्काल एव नरपालजिघांसानिघ्नः कृतघ्नः करटतटविलुठन्मदधाराव्याजेन बह्वीः कल्लोलिनीरुद्वमद्भिरिव धराधरैर्गन्धसिन्धुरैः सैन्यसागरतरङ्गैरिव रङ्गत्तुरङ्गै रयविजितरविरथैरमितरथैर्भुजचन्दनतरुकोटरान्निर्गच्छन्तीर्भुजगीरिव कृपाणीलताः समुद्वहद्भिः पादातैः परिशोभमानां सेनां नरेन्द्रमन्दिररोधनाय समादिदेश ।

समुज्जजृम्भे संभूतस्तदा दुन्दुभिनिस्वनः ।
धुन्वन्निव धरामद्रींश्चालयन्दलयन्नभः ॥ ७५ ॥

ततो नटद्भटाटोपघटितभुजास्फोटचटुलरवनिष्ठुरेण मदवारणकण्ठरवघण्टाघोषभैरवेण कण्ठीरवरवकुण्ठनपटुपोषितहयहेषितभीषणखरतरखुरपुटघट्टनकुट्टिमजनितकठोरध्वनिनिर्भरेण पदातिततिपादाहतिप्रोद्भूतभूरिभूरवभीकरेण सन्ततपरिस्पन्दन्मदमन्दवेगस्यन्दनचक्रचीत्कारमेदुरेण धानुष्ककरकलितधनुष्टंकारकर्कशेन प्रतिध्वानितकुलाचलकन्दरकुलेन कोलाहलेन भरितं तस्य बलं भूपतिभवनमुपरुरोध ।

स्याल इति—मथन इत्यभिधानं नामधेयं यस्य सः, 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः, तस्यायं तदीयः काष्ठाङ्गारसम्बन्धी, स्यालो भार्याभ्राता, कृतघ्नस्य नीचस्य तस्य काष्ठाङ्गारस्य वाणीं भारतीम्, हितां कल्याणकरीम्, अमंस्त मन्यते स्म । हि यतः, काको वायसः, स्फुरन्तीं प्रादुर्भवन्तीं निम्बफलस्य पिचुमन्दफलस्य प्रसूतिमुत्पत्तिम्, आस्वादनीयां स्वादयोग्यां मधुरामिति यावत्, बहुमन्यते नितरां जानाति ॥ ७४ ॥

अथ सोऽपीति—अथानन्तरम्, नरपालस्य सत्यन्धरस्य जिघांसा हन्तुमिच्छा तस्या निघ्न आधीनः, कृतघ्नः कृतोपकारापलापी, सोऽप्यपरिमितमायाभाण्डागारः काष्ठाङ्गारः, तत्काल एव तत्समय एव, करटतटेषु गण्डस्थलेषु विलुठन्तीनां मदधाराणां दानप्रवाहाणां व्याजेन दम्भेन, बह्वीः प्रभूताः, कल्लोलिनीर्नदीः, उद्वमद्भिः प्रकटयद्भिः, धराधरैरिव शैलैरिव, गन्धसिन्धुरैर्मत्तमतङ्गजैः, सैन्यमेव सागरः सैन्यसागरः पृतनापाथोधिस्तस्य तरङ्गा भङ्गास्तैरिव रङ्गन्तः समुच्छलन्तश्च ते तुरङ्गाश्च हयाश्च तैः, रयेण जवेन विजितस्तिरस्कृतो रविरथः सूर्यस्यन्दनो यैस्तैः, अमितरथैरगणितशताङ्गैः, भुज एव बाहुरेव चन्दनतरुर्मलयजमहीरुहस्तस्य कोटराद् गर्त्तात्, निर्गच्छन्तीर्निःसरन्तीः, भुजगीरिव पन्नगीरिव, कृपाणीलताः खड्गवल्लरीः, समुद्वहद्भिर्धरद्भिः पदातीनां समूहास्तैः पत्तिसमूहैः परिशोभमानां परितो विराजमानाम्, सेनां चमूम्, नरेन्द्रस्य नृपस्य मन्दिरं सदनं तस्य रोधनं समावरणं तस्मै, समादिदेश समाज्ञातवान् ।

समुज्जजृम्भे—तदा तस्मिन् काले, धरां पृथिवीम्, धुन्वन्निव, कम्पयन्निव, अद्रीन् पर्वतान्, चालयन्निवोत्पाटयन्निव, नभो गगनम्, दलयन्निव खण्डयन्निव, संभूतः प्रभूतः, दुन्दुभेरानकस्य स्वनः शब्दः, समुज्जजृम्भे वर्धयामास । उत्प्रेक्षा ॥ ७५ ॥

तत इति—ततस्तदनन्तरम्, नटन्त इतस्ततः क्राम्यन्तो ये भटाटोपा योद्धृसमूहास्तैर्घटितः कृतो यो भुजास्फोटो बाहुताडनं तस्य यश्चटुलश्चञ्चलो रवः शब्दस्तेन, निष्ठुरेण कठोरेण, मदवारणानां मत्तकरिणां यः कण्ठरवो गलध्वनिर्घण्टाघोषश्च घण्टाशब्दश्च ताभ्यां भैरवो भयंकरस्तेन, कण्ठीरवरवाणां सिंहशब्दानां कुण्ठने तिरस्करणे पटूनि दक्षाणि यानि पोषितहयानां परिपुष्टवाजिनां हेषितानि हेषाशब्दास्तैर्भीषणो भयङ्करः, खरतराणामतितीक्ष्णानां खुरपुटानां क्षुरावयवानां घट्टनेन संघर्षणेन कुट्टिमेभ्यः सुदृढभूमिप्रदेशेभ्यो जनितः समुत्पन्नो यः कठोरध्वनिः कठिनशब्दः, कण्ठीरवरवकुण्ठनपटुपोषितहयहेषितभीषणश्चासौ खरतरखुरपुटघट्टनकुट्टिमजनितकठोरध्वनिश्चेति कर्मधारयः, तथाभूतेन ध्वनिना नादेन निर्भरः सम्पूर्णस्तेन, पदातीनां पदगानां ततयः पङ्क्तयस्तासां पादाहतिभिश्चरणाघातैः प्रोद्भूतः समुत्पन्नो यो भूरिभूरवोऽधिकवसुधाशब्दस्तेन भीकरो भयंकरस्तेन, सन्ततं निरन्तरं परिस्पन्दतां परिचलतां मदमन्दवेगानां युग्मानां मदेन, मन्थरवेगाणां स्यन्दनानां रथानां यानि चक्राणि रथाङ्गानि तेषां चीत्कारोऽव्यक्तशब्दविशेषस्तेन मेदुरो मिलितो वृद्धिङ्गतो वा,

दौवारिकस्य वचनादुपरोधकृत्य-
माकर्ण्य कर्णपरुषं पुरुषाधिराजः ।
रोषेण चूषितशुचा स हि धीरधीरः
पञ्चाननासनतलादुदतिष्ठतायम् ॥७६॥

तावत्प्रतिष्ठमानं प्राणकान्तमनुसृत्य कृतप्रयाणान्प्राणान्परिमार्गितुमिव भूमौ निपतितां तां निर्भरगर्भभरतान्तामालोक्य पुनर्न्यवर्तिष्ट नरवरिष्ठः ।

प्राबोधयच्च पृथ्वीशः कथंचिल्लब्धचेतनाम् ।
देवीं ज्ञानं हि दुःखाब्धितरणे तरणीयते ॥७७॥

शम्पानिभा संपदिदं शरीरं चलं प्रभुत्वं जलबुद्बुदाभम् ।
तारुण्यमारण्यसरित्सकाशं क्षयिष्णुनाशो हि न शोचनीयः ॥७८॥

संयुक्तयोर्वियोगो हि संध्याचन्द्रमसोरिव ।
रक्तयोरपि दंपत्योर्भविता नियतेर्वशात् ॥७९॥

बन्धुत्वं शत्रुभूयं च कल्पनाशिल्पिनिर्मितम् ।
अनादौ सति संसारे तद्द्वयं कस्य केन न ॥८०॥

धानुष्काणां धनुर्धारिणां करेषु हस्तेषु कलितानि धृतानि यानि धनूंषि चापास्तेषां टंकारोऽव्यक्तशब्दस्तेन कर्कशः कठोरस्तेन, प्रतिध्वनितं प्रतिशब्दितं कुलाचलानां कुलगिरीणां कन्दरकुलं गह्वरगणो येन तेन, कोलाहलेन कलकलशब्देन, भरितं पूर्णम्, तस्य काष्ठाङ्गारस्य, बलं सैन्यम्, भूपतिभवनं नरेन्द्रमन्दिरम्, उपरुरोध आवृणुते स्म ।

दौवारिकस्येति—धीरधीरोऽतिशयधैर्यशाली, अयं सः पूर्वोक्तः पुरुषाधिराजो नराधिपः, द्वारे भवो दौवारिको द्वारपालकस्तस्य, वचनात् कथनात्, कर्णपरुषं श्रवणकठोरम्, उपरोध आवरणमेव कृत्यं कार्यम्, आकर्ण्य श्रुत्वा, चूषिता शुक् येन तेन दूरीकृतशोकेन, रोषेण क्रोधेन, पञ्चाननासनतलात् सिंहासनपृष्ठात् , उदतिष्ठत उत्तिष्ठते स्म ॥ ७६ ॥

तावदिति—तावत् तावता कालेन, प्रतिष्ठमानं प्रयान्तम्, प्राणकान्तम् वल्लभम्, अनुसृत्यानुगम्य, कृतं प्रयाणं प्रस्थानं यैस्तान् , प्राणान् जीवितानि, परिमार्गितुमन्वेष्टुमिव, भूमौ पृथिव्याम्, निपतितां स्खलिताम्, निर्भरेण सातिशयेन गर्भभरेण दौहृदभरेण तान्तां दुःखीभूताम्, तां कान्तां वल्लभाम्, आलोक्य दृष्ट्वा, नरवरिष्ठो नृपः, पुनर्भूयः, न्यवर्तिष्ट प्रत्यावृत्ते ।

प्राबोधयच्चेति—पृथ्वीशो महीकान्तः, कथञ्चित् केनापि प्रकारेण, लब्धा प्राप्ता चेतना संज्ञा यया तां लब्धचेतनाम्, देवीं राज्ञीम्, प्राबोधयच्च सम्बोधयामास च, हि यतः, ज्ञानं बोधः, दुःखमेवाब्धिः सागरस्तस्य तरणे प्लवने, तरणिरिवाचरतीति तरणीयते नौकायते ॥ ७७ ॥

शम्पानिभेति—संपत् सम्पत्तिः, शम्पानिभा तडित्सदृशी, 'शम्पा सौदामिनी तडित्' इति धनञ्जयः, इदं शरीरम्, अयं विग्रहः 'शरीरं वर्ष्म विग्रहः' इत्यमरः, चलं चपलम्, प्रभुत्वमैश्वर्यम्, जलबुद्बुदाभं जलस्फोटसदृशम्, तारुण्यं यौवनम्, आरण्यसरित्सकाशं वनापगासदृशम्, अस्तीति शेषः, हि निश्चयेन क्षयिष्णो नश्वरस्य नाशो विनाशः, शोचनीयः शुग्भाजनं, न भवतीति भावः ॥ ७८ ॥

संयुक्तयोरिति—हि निश्चयेन, संध्या च चन्द्रमाश्चेति सन्ध्याचन्द्रमसौ तयोरिव पितृप्रसूशशिनोरिव, संयुक्तयोः संयोगं प्राप्तयोः, रक्तयोः परस्परानुरागसहितयोः, दम्पत्योः, जाया च पतिश्चेति दम्पती तयोः 'जायया जम्भावो दम्भावो निपात्यते' वियोगो विरहः नियतेर्दैवस्य वशात् परतन्त्रत्वात्, भविता भविष्यति ॥ ७९ ॥

बन्धुत्वमिति—बन्धूनां सहोदराणाम्, बन्धुत्वं भ्रातृत्वं, शत्रुभूयं शत्रुत्वं च, कल्पनैव शिल्पी कार्यकरस्तेन निर्मितम्, अस्तीति शेषः । संसारे भुवने, अनादावादिरहिते सति, तयोर्द्वन्द्वं युग्मं बन्धुत्वं शत्रुत्वञ्च, कस्य जनस्य केन अनेन सह न, अपितु सर्वस्य सर्वेणैव सह वर्तते इति भावः ॥ ८० ॥

इति नरनाथवचनपरिपाटी निष्टप्तलोहपतितवारिधारेव शोकानलज्वालालीढे देव्या मनसि किञ्चिदप्यार्द्रतामनापादयन्ती निर्दग्धभूम्युप्तबीजराजिरिव विफला बभूव ।

राजा समारोप्य शिखण्डियन्त्रमापन्नसत्त्वां सरसीरुहाक्षीम् ।
संभ्रामयामास च मेघमार्गे हा हा बत क्रूरविधेर्विपाकः ॥८१॥

अथ कलापियन्त्रे वलाहकमार्गमधिरूढे, मृगेन्द्र इव गिरिकन्दरान्मन्दिरान्निर्गत्य, निखिलपरिवारविकलो वसुधापतिरसहाय एव रणाङ्गणमवतीर्य, धैर्यावगाढहृदयस्तत्राभ्यमित्रीणं शात्रवमन्त्रिणं संगरसंनद्धं निध्याय, क्रोधपरतन्त्रितचित्तो योद्धुमुपचक्राम ।

चण्डवात इवाम्भोदान्मण्डलाधिपतिर्भटान् ।
निनाय कान्दिशीकत्वं पञ्चाननपराक्रमः ॥८२॥

जिगाय मन्त्रिणं वीरो जनानामधिपस्ततः ।
जन्याजिराभ्रतिग्मांशुर्जयश्रीप्राणवल्लभः ॥८३॥

अथ काष्ठाङ्गारोऽपि संगरे निजामात्यभङ्गं निशम्य, तरङ्गितक्रोधकुटिलितभ्रुकुटीविटङ्कः सामजसमाजवाजिपादातशबलेन बलेन सनाथो नरनाथमभिगम्य, बहुधा युद्ध्वा, वैराग्यायत्तचि-

---

इति नरनाथवचनेति—इति पूर्वोक्तप्रकारा नरनाथस्य सत्यन्धरमहाराजस्य वचनपरिपाटी वाक्यपरम्परा, निष्टप्तश्चासौ लोहश्चेति निष्टप्तलोहः संतप्तायः तस्मिन् पतिता मुक्ता या वारिधारा तद्वत्, शोकानलस्य विषादवह्नेर्ज्वालाभिरर्चिभिरालीढं व्याप्तं तस्मिन्, देव्या राज्याः, मनसि चेतसि, किञ्चिदपि मनागपि, आर्द्रतां क्लिन्नताम्, अनापादयन्ती न कुर्वन्ती, निर्दग्धभूमौ निर्दग्धपृथिव्यामुप्ता संतानिता या बीजराजिः कणश्रेणिस्तद्वत्, विफला निष्फला, बभूवाभूत् ।

राजा समारोप्येति—राजा नरेन्द्रः, आपन्नसत्त्वां गर्भिणीम्, सरसीरुहाक्षीम् कमललोचनाम्, विजयामिति यावत्, शिखण्डियन्त्रं मयूरयन्त्रम्, समारोप्याधिष्ठापयित्वा, मेघमार्गे च नभसि च, संभ्रामयामास संचालयामास, 'हा हा बत' इति खेदार्थेऽव्ययत्रयम्, क्रूरविधेर्दुर्दैवस्य, विपाकः परिणामः फलमिति यावत् । कर्मणामुदयो विचित्रोऽस्तीति महादुःखकरमिति भावः ॥ ८१ ॥

अथ कलापियन्त्र इति—अथानन्तरम्, कलापियन्त्रे मयूरयन्त्रे, वलाहकमार्गं मेघमार्गम् गगनमिति यावत्, अधिरूढेऽधिष्ठिते सति, गिरिकन्दरात्पर्वतगह्वरात्, मृगेन्द्र इव सिंह इव 'सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः' इत्यमरः, निर्गत्य बहिरागत्य, निखिलश्चासौ परिवारश्चेति निखिलपरिवारः समस्तपरिजनः, तेन विकलो रहितः, वसुधापतिर्नृपः सत्यन्धरः, असहाय एव एकाक्येव, रणाङ्गणं समरचत्वरं युद्धभूमिमिति यावत्, अवतीर्य प्रविश्य, धैर्येण स्थैर्येणावगाढं प्रचुरं हृदयं चेतो यस्य तथाभूतः सन्, तत्र रणाङ्गणे, अभ्यमित्रीणं शत्रुपक्षीयम्, शात्रवमन्त्रिणं शत्रुसचिवम्, संगराय युद्धाय संनद्धं तत्परम्, निध्याय दृष्ट्वा, क्रोधेन कोपेन परतन्त्रितं परायत्तं चित्तं मनो यस्य तथाभूतो भवन्, योद्धुं युद्धं कर्तुम्, उपचक्राम तत्परो बभूव ।

चण्डवात इति—पञ्चाननस्येव पराक्रमो यस्य स मृगेन्द्रविक्रमः, मण्डलाधिपतिर्भूपतिः चण्डवातस्तीक्ष्णपवनः अम्भोदानिव मेघानिव, भटान् योद्धॄन्, कान्दिशीकत्वं भयद्रुतत्वम् 'कांदिशीको भयद्रुते' इत्यमरः, भयकृतपलायमानताम्, निनाय प्रापयामास । 'अकथितञ्च' इति नयतेर्द्विकर्मकत्वम् ॥ ८२ ॥

जिगायेति—ततः कतिपयक्षणव्यापियुद्धानन्तरम्, जन्याजिरं समराङ्गणमेवाभ्रं गगनं तत्र तिग्मांशुः सूर्यः, जयश्रिया विजयलक्ष्म्याः प्राणवल्लभो जीवितेशः, वीरः शूरः, जनानां लोकानाम्, अधिपः स्वामी सत्यन्धर इति यावत्, मन्त्रिणं शत्रुसचिवम्, जिगाय जयति स्म 'सन्लिटोर्जेः' इत्यभ्यासस्य कुत्वम् ॥ ८३ ॥

अथ काष्ठाङ्गारोऽपीति—अथ तदनु, काष्ठाङ्गारोऽपि कृतघ्नशिरोमणिरपि, संगरे समरे, निजामात्यस्य स्वसचिवस्य भङ्गं पराजयम्, निशम्य श्रुत्वा, तरङ्गितक्रोधेन वृद्धिङ्गतकोपेन कुटिलितो वक्रीकृतो भ्रुकुटीविटङ्को भ्रूप्रदेशो यस्य तथाभूतः सन् सामजसमाजश्च गजगणश्च वाजिनश्च हयाश्च पादातानि च पदातिसमूहश्चेति

सतया प्राणिगणवधविरतं तं वयस्य इव स्वस्थतां निनाय ।

> स्वर्गं भूपो राजहा राज्यलक्ष्मीं भेरीशब्दः श्रोत्रदेशं च देव्याः ।
> पौराः शोकं पण्डिताः स्त्रीविरक्तिं जन्यं शान्तिं यौगपद्यात्प्रपेदे ॥८४॥
> तावच्च यन्त्रं भ्रमणेन हीनं शनैः शनैस्तद्वियतोऽवतीर्य ।
> तां भर्तृशोकानलदह्यमानां प्रपातयामास वने पितृणाम् ॥

ततश्च कुणपकवलनार्थं मिलितनिःशङ्ककङ्ककाकसङ्कुलमभ्यर्णसंज्वलच्चिताचक्रज्वालामंतप्ततया निजाग्रभागसमारोपितपाटच्चरगलनिरर्गलनिर्गलल्लोहितधारासंसर्गसंजातचुंकारिधूम्यसञ्छादितैः शूलैः समाकीर्णं सामिदग्धं शवं चिताहुतवहादाकृष्य खण्डशो विच्छिद्य खादन्तीनां डाकिनीनां कोलाहलेन कटाग्निदह्यमाननृकरोटिपटुचटात्कारेण च भीकरं यत्पुरप्रेतागारमवलोकमाना सा नरदेवमहिषी मूर्छापहृतचेतना बभूव ।

> अजानती कश्मलपारवश्यात्प्रसूतिपीडां नरपालजाया ।
> मासे तदा वै जनने दिनेऽस्मिन्प्रासूत सूनुं तपनं यथा द्यौः ॥८५॥

साम जम्माजवाजिपादातं तेन शबलं चित्रितं तेन, बलेन सैन्येन, सनाथः सहितः सन्, नरनाथं नरेन्द्रम्, अभिगम्य तस्य संमुखं गत्वा, बहुधा विविधप्रकारेण, युद्ध्वा युद्धं कृत्वा, वैराग्यस्य निर्वेदस्यायत्तं निघ्नं चित्तं हृदयं यस्य तस्य भावस्तत्ता तया, प्राणिगणस्य जन्तुसमूहस्य वधाद्धिंसनात्, विरतो विरक्तस्तम्, तं नृपम्, वयस्य इव सखेव, स्वःस्थतां स्वः स्वर्गस्तस्मिंस्तिष्ठतीति स्वःस्थस्तस्य भावः स्वःस्थता तां स्वर्गवासित्वम्, पक्षे स्वस्थतां 'शर्परे शरि विसर्गलोपो वा वक्तव्यः' इति वार्तिकेन विकल्पेन विसर्गलोपः । नीरोगताम्, निनाय प्रापयामास ।

स्वर्गं भूप इति—भूपः सत्यन्धरः, स्वर्गं त्रिदिवम्, राजहा काष्ठाङ्गारः, राज्यलक्ष्मीं राज्यश्रियम्, भेरीशब्दश्च ढक्कानादश्च, देव्या विजयायाः, श्रोत्रदेशं कर्णप्रदेशम्, पौरा नागरिकाः, शोकं खेदम्, पण्डिता विद्वांसः, स्त्रीविरक्तिं ललनाभ्यो विरागम्, जन्यं युद्धम्, शान्तिं प्रशमम्, यौगपद्याद्युगपदेव, प्रपेदे प्राप । अनेकेषां एकक्रियया सह सम्बन्धाद्दीपकालङ्कारः ॥ ८४ ॥

तावच्चेति—तावत्कालपर्यन्तम्, भ्रमणेन भ्रमणशक्त्या, हीनं रहितं तत यन्त्रं शनैःशनैः मन्दं मन्दं वियतो गगनात्, अवतीर्य अवरुह्य, भर्तुः शोक एवानलस्तेन दह्यमाना तास्, प्राणपतिविरहजन्यखेदपावकभस्मीभवन्तीम्, तां विजयाम्, पितृणां वने श्मशाने प्रपातयामास स्खलयामास ॥

ततश्चेति—ततश्च राज्ञः स्वर्गप्रयाणानन्तरम्, कुणपकवलनार्थं मृतकदेहभक्षणार्थम्, मिलिता एकत्र संगता निःशङ्का निर्भयाश्च ये कङ्ककाकाः पक्षिविशेषास्तैः सङ्कुलं व्याप्तम् अभ्यर्णं निकटं संज्वलत् प्रदीप्यमानं यच्चिताचक्रं चितासमूहस्तस्य ज्वालाभिरर्चिभिः संप्तततया निष्टप्तत्वेन, निजाग्रभागे स्वशिखरे समारोपितोऽधिष्ठापितो यः पाटच्चरश्चोरस्तस्य गलात्कण्ठात् निरर्गलं निर्बाधं यथा स्यात्तथा निर्गलन्त्यो निःशेषेण पतन्त्यो या लोहितधारा रुधिरश्रेणयस्तासां संसर्गेण संपर्केण संजाता समुत्पन्ना चुंकारिणी चुमितिशब्दकारिणी या धूम्या धूमसमूहः 'पाशादिभ्यो यः' इति य प्रत्ययः, तया सञ्छादितैरावृतैः, शूलैरायसकीलैः, समाकीर्णं व्याप्तम्, सामिदग्धमर्धदग्धम्, शवं मृतदेहम्, चिताहुतवहात् चित्याग्नेः आकृष्याकृष्टं विधाय, खण्डशः खण्डेन खण्डेन, विच्छिद्य विदार्य, खादन्तीनां भक्षयन्तीनां डाकिनीनां पिशाचीनाम्, [कविसमयेनैतद्वर्णनं न तु जैनसिद्धान्तेन तत्र देवानां मांसभोजनस्य निषिद्धत्वात्] कोलाहलेन कलकलशब्देन, विकटाग्निना विशालानलेन दह्यमानः पच्यमानो यो नृकरोटिर्नरकपालप्रदेशस्तस्य पटुस्तीव्रो यश्चटात्कारोऽव्यक्तशब्दविशेषस्तेन च, भीकरं भयङ्करम्, तत्पुरस्य राजपुरीनगरस्य प्रेतागारं श्मशानम्, अवलोकमाना पश्यन्ती, सा नरदेवमहिषी, नृपतिप्रधानपत्नी विजयेति यावत् 'कृताभिषेका महिषी' इत्यमरः, मूर्छया निःसंज्ञतयापहृता दूरीभूता चेतना संज्ञा यस्यास्तथाभूता बभूव ।

अजानतीति—तदा तदानीम्, वै जनने मासे दशमे मासे, अस्मिन् दिने नृपतिप्राणावसानदिवसे,

१ अयं श्लोको मुद्रितपुस्तके नास्ति ।

तदा जनकराज्यश्रीर्द्रष्टुं मूर्तिमिवास्थिता ।
सुतस्य भाग्यसंपद्वा देवता काचिदागता ॥ ८६ ॥

दिशि दिशि विसरद्भिः पुत्रतेजोविलासै-
र्बहलतिमिरजाले[1] नाशिते तत्क्षणेन ।
विलसितमणिदीपा[2] देवताक्लृप्तरूपाः
सुतरुचिपरिभूता मङ्गलार्था बभूवुः ॥ ८७ ॥

तस्या मुखेन्दोरवलोकनेन शोकाम्बुधिर्वृद्धिमवाप देव्याः ।
अभ्यग्रभावः किल बान्धवानां सुखस्य दुःखस्य च वृद्धिहेतुः ॥ ८८ ॥

हा मनोजाकाररूप हा महागुणमणिद्वीप हा मानसविहारराजहंसस्वरूप हा मदनकेलिचतुरभूप मम प्राणैकरूप क्वासि क्वासीति विलपन्तीं शोकविषमोहिताङ्गीं लताङ्गीं तां देवतापि लोकोत्तरतोकोत्तममहिमवर्णनपीयूषपरिषेचनेन समुज्जीवयन्ती सुवर्णसवर्णेषु तदीयाङ्गेषु लसदूर्णाप्रमुखविलक्षणलक्षणप्रदर्शनेन प्रत्याययन्ती तनुजवर्धनोपायचिन्तासंतमसदूरीकरणधीरतरमित्थं गिरमुत्थापयामास ।

कश्मलपारवश्यात् कृच्छ्रपारतन्त्र्यात्, प्रसूति-पीडां प्रसवकष्टम्, अजानती न बुध्यमाना, नरपतिजाया राज्ञी विजयेति यावत्, द्यौर्गगनं तपनं यथा सूर्यमिव, सूनुं सुतम्, प्रासूत जनयामास । उपमा ॥ ८५ ॥

तदेति—तदा तस्मिन् काले, मूर्तिं शरीरम्, आस्थिता प्राप्ता, जनकराज्यश्रीरिव पितृराज्यलक्ष्मीरिव सुतस्य पुत्रस्य, भाग्यसंपद्वा पुण्यसम्पत्तिर्वा, द्रष्टुं विलोकयितुं तां विजयामिति शेषः, काचित् कापि, देवता, देवी, आगता समायाता ॥ ८६ ॥

दिशि दिशीति—दिशि दिशि प्रतिकाष्ठम्, विसरद्भिः, प्रसरद्भिः पुत्रस्य शिशोस्तेजोविलासैः सहजज्योतिःप्रकाशैः, बहलं प्रभूतं यत्तिमिरजालं ध्वान्तसमूहस्तस्मिन्, तत्क्षणेन तत्कालेन, नाशिते विध्वस्ते सति, देवतया देव्या क्लृप्तं रचितं रूपं येषां ते तथाभूताः, विलसिताः शोभिता ये मणिदीपा रत्नप्रदीपाः ते, सुतस्य पुत्रस्य रुच्या देहदीप्त्या परिभूतास्तिरस्कृताः सन्तः, मङ्गलमेवार्थः प्रयोजनं येषां तथाभूताः, बभूवुरासन् ॥ ८७ ॥

तस्या इति—तस्या देवतायाः, मुखेन्दोर्वदनचन्द्रमसः, अवलोकनेन दर्शनेन, देव्या विजयायाः, शोक एवाम्बुधिः खेदसागरः वृद्धिम् उन्नतिम्, अवाप लेभे । बान्धवानामिष्टजनानाम्, अभ्यग्रभावः सांमुख्यम्, सुखस्य शर्मणः, दुःखस्य चाशातस्य च 'शर्मशातसुखानि च' इत्यमरः, वृद्धिहेतुः प्राबल्यकारणं भवतीति शेषः, किलेति वार्तायाम् ॥ ८८ ॥

हा मनोजेति—हा मनोजस्येव कामस्येवाकाररूपे संस्थानसौन्दर्ये यस्य तत्सम्बुद्धौ, हा महागुणा एव मणयो रत्नानि तेषां द्वीपस्तत्सम्बुद्धौ, हा मानसं चित्तमेव मानसं मानससरोवरस्तस्मिन् विहारे क्रीडने राजहंसस्येव मरालस्येव पक्षे राजश्रेष्ठस्येव स्वरूपं यस्य तत्सम्बुद्धौ, हा मदनकेल्यां कामक्रीडायां चतुरो दक्षस्तत्सम्बुद्धौ, मम विजयायाः, प्राणैकरूप जीवितोपम, भूप राजन्, क्वासि कुत्रासि क्वासि कुत्रासि, इत्येवं प्रकारेण, विलपन्तीं विलापं कुर्वन्तीम्, शोक एव विषाद एव विषं गरलं तेन मोहितानि प्राप्तमूर्छानि अङ्गानि यस्यास्ताम्, लताङ्गीं कृशाङ्गीम्, तां राज्ञीं, देवतापि देव्यपि, लोकोत्तरस्य सर्वश्रेष्ठस्य तोकस्य पुत्रस्य य उत्तममहिमा परममाहात्म्यं तस्य वर्णनमाख्यानमेव पीयूषममृतं तेन परिषेचनं पर्युक्षणं तेन, समुज्जीवयन्ती समुल्लासयन्ती, सुवर्णसवर्णेषु कनककल्पेषु, तदीयाङ्गेषु पुत्रावयवेषु, लसन्ति शोभमानानि, ऊर्णाप्रमुखानि मकरिकाप्रधानानि यानि विलक्षणलक्षणानि विचित्रचिह्नानि तेषां प्रदर्शनेन विलोकनेन, प्रत्याययन्ती विश्वासमुत्पादयन्ती, तनुजवर्धनस्य पुत्रवृद्धेर्य उपायाः साधनानि तेषां चिन्तैव संतमसं गाढध्वान्तम् तस्य दूरीकरणेऽपहरणे धीरतरमतिशयेन धीरं यथा स्यात्तथा, इत्थं वक्ष्यमाणप्रकाराम्, गिरं वाणीम्, उत्थापयामास उत्थापयति स्म, जगादेति यावत् ।

१ तिमिरबहलजाले ब० । २ मणिरूपा मु० ।

पुत्रस्य वर्धनविधौ विजहाहि चिन्तां
संवर्धयिष्यति सुतं तव कश्चिदेनम् ।
चन्द्रश्चकोरमिव चूततरुर्यथा वा
बालं पिकं कमलिनीविसरो मरालम् ॥८९॥

तदात्व एवात्र मृतं तनूजं विसृज्य गन्धोत्कटवैश्यनाथः ।
योगीन्द्रवाक्यस्मरणेन सूनुं गवेषयन्लोचनगोचरोऽभूत् ॥९०॥

तं दृष्ट्वा देवतावाक्यं प्रमाणं निश्चिकाय सा ।
संवादेन हि सर्वेषां प्रामाण्यमवगम्यते ॥९१॥

ततो महीकान्तकान्ता, निजान्तरङ्गरविकान्तजाज्वल्यमानप्रियविप्रयोगशोकानलकीलाकलापं तनयसुन्दरवदनचन्दिरालोकेन शमयिष्यन्ती, सरोजलोद्धृतशफरीव विना शिशुना स्थातुं क्षणमपारयन्त्यपि देवतावचनजनितविस्रम्भभावेन गत्यन्तराभावेन च गन्धोत्कटश्रेष्ठिसमर्पणाय कथं कथमप्यनुमतिमापाद्यमाना, स्वभावत एव समुद्रमपि निर्निद्राणतेजसां पुत्रं पित्रीयमुद्रया समुद्रं विधाय, विधाय च पुरतो, देवतया सह सहसान्तरधात् ।

पितृवनवनमध्ये बालसूर्यप्रकाशं
सुतमतिविततताभ्यां लोचनाभ्यां पिबन् सः ।

पुत्रस्येति—पुत्रस्य सुतस्य, वर्धनविधौ संरक्षणकार्ये, चिन्ताम्, विजहाहि विमुञ्च, 'ओहाक् त्यागे' इत्यस्य लोटि मध्यमपुरुषैकवचने रूपम् 'आ च हौ' इत्यात्वम्, तव भवत्याः, एनं वर्तमानम्, सुतं पुत्रम्, कश्चित् कोऽपि नरः, चन्द्रः शशी, चकोरमिव जीवं जीवमिव, यथा वा येन प्रकारेण वा, चूततरुराम्रवृक्षः, बालमदीर्घायुषम्, पिकं कोकिलम्, कमलिनीविसरः पद्मिनीसमूहः, मरालं हंसम्, वा, संवर्धयिष्यति पालयिष्यति । मालोपमा ॥ ८९ ॥

तदात्व इति—तदात्व एव तस्मिन्नेव काले, अत्र पितृवने, मृतं परासुम्, तनूजं सुतम्, विसृज्य त्यक्त्वा, गन्धोत्कटवैश्यनाथो गन्धोत्कटनाम वैश्यपतिः, योगीन्द्रस्य महामुनेर्वाक्यस्य वचनस्य स्मरणमाध्यानं तेन, सूनुं जीवितमपरं पुत्रम्, गवेषयन्नन्वेषयन्, लोचनगोचरो दृष्टिविषयः, अभूत् ॥ ९० ॥

तं दृष्ट्वेति—तं पूर्वोक्तं गन्धोत्कटम्, दृष्ट्वा विलोक्य, सा विजया देवतावाक्यं देवीवचनम् 'संवर्धयिष्यति सुतं तव कश्चिदेनम्' इति रूपमिति यावत्, प्रमाणं सत्यम्, निश्चिकाय निश्चितवती, 'विभाषा चेः' इति विकल्पेन कुत्वम्, हि यतः, संवादेनानुकूलसमर्थनेन, सर्वेषां निखिलानाम्, प्रामाण्यं याथार्थ्यम्, अवगम्यते ज्ञायते । अर्थान्तरन्यासः ॥ ९१ ॥

तत इति—ततस्तदनन्तरम्, महीकान्तस्य भूवल्लभस्य कान्ता प्रेयसी, विजयेति यावत्, निजान्तरङ्गमेव स्वकीयान्तःकरणमेव रविकान्तः सूर्यकान्तोपलस्तस्मिन् जाज्वल्यमानः पुनः पुनरतिशयेन वा ज्वलन् यः प्रियविप्रयोगशोक एव वल्लभविप्रलम्भविषाद एवानलो वह्निस्तस्य कीलाकलापं ज्वालासमूहम्, तनयस्य सुतस्य सुन्दरवदनमेव सुभगास्यमेव चन्दिरश्चन्द्रस्तस्यालोकनं दर्शनं तेन, 'चन्दिरोऽनेकपे चन्द्रे' इति मेदिनी, शमयिष्यन्ती शान्तं करिष्यन्ती, सरोजलात्कासारनीरादुद्धृता समुद्धृत्य बहिर्नीता शफरीव मत्सीव, शिशुना पुत्रेण, विनान्तरेण, क्षणमप्यल्पकालपर्यन्तमपि, स्थातुं निवसितुम्, अपारयन्त्यपि असमर्थापि, देवतावचनेन देवीवाक्येन जनितः समुत्पादितो यो विस्रम्भभावो विश्वासपरिणामस्तेन, गत्यन्तराभावेन च साधनान्तराभावेन च, गन्धोत्कटश्रेष्ठिने समर्पणं प्रदानं तस्मै, कथं कथमपि केनापि प्रकारेण, अनुमतिमनुमोदनम्, आपाद्यमाना प्राप्यन्ती, स्वभावत एव निसर्गेणैव, निर्निद्राणानि स्फुरन्ति च तानि तेजांसि ज्योतींषि तेषाम्, समुद्रमपि सागरमपि, पुत्रं तनूजम्, पितुरियं पित्रीया सा चासौ मुद्रा च तया पितुराङ्गुलीयकेन, समुद्रं मुद्रया सहितम्, विधाय कृत्वा, पुरतोऽग्रे विधाय च कृत्वा च, देवतया देव्या, सह सार्धम्, सहसा झटिति, अन्तरधात् तिरोहिताभूत् ।

पितृवनवनमध्य इति—पितृवनं श्मशानं तस्य वनस्य गहनस्य मध्ये, बालसूर्यस्येव प्रातःप्रभाकर-

तृषित इव सरोऽम्भश्चातको यद्वदभ्र-
प्रसृतजलकणालिं नातृपद्वैश्यनाथः ॥ ६२ ॥

अयं च, एधोऽन्वेषिजन इव महानिधिं महीशसुतमासाद्य, सद्य एवाङ्कुरितपुलकापदेशेन हृदयालवालसंजातमञ्जुलमोदलताकोरकानिव बिभ्राणः, प्रीतेः परां कोटिमात्मजं चादधानः, तदङ्ग-स्पर्शसुखपारवश्येन प्रमदजलनिधिमग्न इव, हृदयान्तरे मलयजरसलिप्त इव, हिमवालुकादीर्घिका-निमज्जन्मूर्तिरिव, मोहाक्रान्त इव, निद्राण इव, मत्त इव, परिमूढेन्द्रियगण इव, निमीलितचैतन्य इव, आनन्दपरम्परायाः परां काष्ठामातिष्ठमानो, जीवेत्याद्याशीर्वचनमाकर्ण्य, तमनङ्गरूपधेयं महा-भागधेयमङ्गजं तन्नामधेयेनालंचकार ।

ततः स्वकीयावसथं समेत्य वणिक्पतिः क्रुद्ध इवाबभाषे ।
जीवन्तमप्यात्मजमद्य मत्ते विना परीक्षां मृतकं किमात्थ ॥ ६३ ॥
यद्वा संभ्रान्तचित्तानां वनितानां स्वभावतः ।
युक्तं न किं कुमारस्य मारान्तत्वप्रकल्पनम् ॥ ६४ ॥

इत्यादिवचनसायकेन निजनायकेन समर्पितं नयनानन्दनं नन्दनं सुनन्दापि समादराना

स्येव प्रकाश उज्ज्वलत्वं यस्य तम्, सुतं पुत्रम्, अतिविततभ्यामतिदीर्घाभ्याम्, लोचनाभ्यां नयनाभ्याम्, पिबन्नवलोकयन्, स पूर्वोक्तः, वैश्यनाथो गन्धोत्कटः, सरोऽम्भः कासारसलिलम्, पिबन् धयन्, तृषित इव पिपासुरिव, अभ्रान्मेघात् प्रसृतानां निःसृत्य विसृतानां जलकणानां वारिबिन्दूनामालिः पङ्क्तिस्ताम्, पिबन्, चातको यद्वत् जीवंजीव इव, नातृपत् संतृप्तो नाभूत् ॥ ६२ ॥

अयं चेति—अयं च गन्धोत्कटश्च, महानिधिं विपुलभाण्डारम्, आसाद्य प्राप्य, एधोऽन्वेषिजन इवेध्मगवेषिपुरुष इव, महीशसुतं राजपुत्रम्, आसाद्य लब्ध्वा; सद्य एव झटित्येव, अङ्कुरितानां प्रादुर्भूतानां पुलकानां रोमाञ्चाणामपदेशेन व्याजेन, हृदयमेव स्वान्तमेवालवालमावापस्तस्मिन् संजाता समुत्पन्ना या मञ्जुलमोदलता मनोहरानन्दवल्लरी तस्याः कोरकाः कुड्मलास्तान्, बिभ्राण इव दधान इव, प्रीतेः प्रसन्नतायाः, परामन्त्याम्, कोटिमवधिम्, आत्मजं पुत्रं च, आदधान आधरन्, तदङ्गस्य पुत्रशरीरस्य स्पर्शेन संगेन यत्सुखं तस्य पारवश्यं परायत्तत्वं तेन, प्रमद एव जलनिधिः प्रमदजलनिधिर्हर्षपारावारस्तस्मिन्मग्न इव ब्रुडित इव, हृदयाभ्यन्तरे चित्तमध्ये, मलयजरसेन चन्दननिस्यन्देन लिप्त इव दिग्ध इव, हिमवालुकानां प्रालेयसिकतानां दीर्घिका वापिका तस्यां निमज्जन्ती वगाहमाना मूर्तिः शरीरं यस्य स तथाभूत इव, मोहेनाक्रान्तो मोहाक्रान्तो मूढस्तद्वत्, निद्राण इव शयान इव, मत्त इव, क्षीब इव, परिमूढः प्राप्तमोह इन्द्रियगणो हृषीकसमूहो यस्य तथाभूत इव, निमीलितं तिरोहितं चैतन्यं यस्य तथाभूत इव, आनन्दपरम्परायाः प्रमोदसन्ततेः, परामुत्कृष्टाम्, काष्ठां सीमानम्, आतिष्ठमानः प्राप्नुवन्, सन्, 'जीव' 'जीवतात्' इत्याद्याशीर्वचनमितिप्रभृतिदीर्घायुष्यवचनम्, आकर्ण्य निशम्य, अनङ्गस्येव कामस्येव रूपधेयं सौन्दर्यं यस्य तम्, महद्भागधेयं भाग्यं यस्य तं विपुलभाग्यम्, तं पूर्वोक्तम्, अङ्गजं सुतम्, तन्नामधेयेन जीवेति नाम्ना, अलञ्चकार भूषयामास ।

तत इति—ततस्तदनन्तरम्, वणिक्पतिर्गन्धोत्कटः, स्वकीयावसथं स्वकीयगृहम्, समेत्यागत्य, क्रुद्ध इव कुपित इव, वनितां प्रति, आबभाषे जगाद, अयि मत्ते कान्ते ! अद्यास्मिन् दिवसे, जीवन्तमप्य-मृतमपि, आत्मजं पुत्रम्, परीक्षां विना विचारमन्तरेण, मृतकं परासुम्, किं केन कारणेन, आत्थ कथयसि ? इति । अन्यस्या मातुरपत्यं विज्ञाय कदाचिदियं स्त्रीस्वभावादस्य निजापत्यवत्पालनं न कुर्यादित्याशङ्क्य गन्धोत्कटेन तस्यान्यापत्यकत्वं निरस्तमिति रहस्यम् ॥ ६३ ॥

यद्वेति—यद्वेति पक्षान्तरे, स्वभावतो निसर्गेण, सम्भ्रान्तं क्षुभितं चित्तं यासां तासां, वनितानां नारीणाम्, कुमारस्य पुत्रस्य, मारान्तत्वप्रकल्पनं मृतपर्यन्तकल्पनम्, किं न युक्तं किं न योग्यमपि तु योग्यमेव । निसर्गेण संभ्रान्तचित्तानां विवेकः कुत इति भावः ॥ ६४ ॥

इत्यादिवचनेति—इत्यादीनि इतिप्रभृतीनि वचनान्येव सायकः शरस्तेन सह, निजनायकेन स्व-

तदङ्गसौष्ठवकलावलोकनजनितदृष्टिदोषपरिहारायेव तरलतरकटाक्षनीलोत्पलदाममेचकरुचिवीचिकाविचितमातेने ।

पायं पायं नयनचषकै रूपलावण्यलक्ष्मीं
सौधीं धारां प्रकृतिमधुरां वैश्यजायापती तौ ।
स्पर्शं स्पर्शं कुसुममृदुलं विग्रहं तस्य सूनो-
स्तृप्तिं प्राप्यानितरसुलभां प्रापतुर्विस्मयाब्धिम् ॥ ६५ ॥

देवता च महिषीतनुवल्ल्याः साम्यमाश्रमलतास्विव द्रष्टुम् ।
बान्धवालयपराङ्मुखीमिमां दण्डकावननिवासमनैषीत् ॥ ६६ ॥

अथ समीहितार्थसिद्धिजनिततोषकलितायां देवतायां सव्याजमन्तर्हितायामियं च राजपत्नी नैजमानससरोवरे सन्ततविकचजिनपादपयोजविशोभिते नन्दनराजहंसं संक्रीडयामास ।

या हंसतूलशयनस्थलतान्तवृन्त-
क्लेशासहा पुरि पुराजनि काननान्ते ।
दर्भेषु हन्त शयनं बहुमन्यते स्म
सा मालतीकुसुमकोमलगात्रवल्ली ॥ ६७ ॥

वल्लभेन, समर्पितं प्रदत्तम्, नयनान्यानन्दयतीति नयनानन्दनस्तं लोचनाह्लादकम्, नन्दनं पुत्रम्, समाददाना गृह्णाना सुनन्दापि गन्धोत्कटवल्लभापि, तस्य पुत्रस्याङ्गसौष्ठवकलायाः शरीरसौन्दर्यकलाया अवलोकनेन जनितः समुत्पन्नो यो दृष्टिदोषस्तस्य परिहारो निराकरणं तस्मा इव, तादर्थ्ये चतुर्थी, तरलतरा अतिचपलाः कटाक्षा अपाङ्गान्येव नीलोत्पलदामानि नीलारविन्दमाल्यानि तेषां मेचकरुचिर्वीचिकया कृष्णकान्तिसन्तत्या विचितं व्याप्तम्, आतेने चकार ।

पायं पायमिति—सा च स चेति तौ सुनन्दागन्धोत्कटौ, वैश्यजायापती वणिग्दम्पती, तस्य सूनोः पुत्रस्य, प्रकृत्या स्वभावेन मधुरा मनोहरा मिष्टेति यावत् ताम्, रूपलावण्यलक्ष्मीं वर्णसौन्दर्यश्रियम्, सौधीं सुधाया इयं सौधी ताम् पीयूषसम्बन्धिनीम, धारां प्रवाहम्, नयनचषकैर्लोचनपानपात्रैः, पायं पायं पीत्वा पीत्वा, 'आभीक्ष्ण्ये णमुल् च' इति णमुल्, कुसुममिव पुष्पमिव मृदुलं कोमलम्, विग्रहं शरीरम्, स्पर्शं स्पर्शं स्पृष्ट्वा स्पृष्ट्वा, नेतरेषां सुलभेत्यनितरसुलभा तामन्यजनदुर्लभाम्, तृप्तिं संतोषम्, प्राप्यासाद्य, विस्मयाब्धिमाश्चर्यसागरम् प्रापतुर्लेभाते ॥ ६५ ॥

देवता चेति—देवता च देवी च, महिषीतनुवल्ल्या राज्ञीशरीरवल्लर्याः, साम्यं सादृश्यम्, आश्रमलतासु तपोवनवल्लीषु, द्रष्टुमिवावलोकयितुमिव, बान्धवालयाद्भ्रातृगृहात्पराङ्मुखीं विमुखाम्, इमाम् विजयाम्, दण्डकावने दण्डकाभिधानकानने निवासस्तपोवनवासम्, अनैषीत्प्रापयत् । अत्र तृतीयं चरणं रथोद्धताया अन्यानि च त्रीणि स्वागतायाः । इत्थमुपजातिवृत्तम् । तदुक्तम् 'इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम' ॥ ६६ ॥

अथेति—अथानन्तरम्, समीहितार्थस्य समभिलषितकार्यस्य सिद्ध्या साफल्येन जनितः समुद्भूतो यस्तोषः सुखं तेन कलितायां सहितायाम्, देवतायां देव्याम्, सव्याजं कस्यापि कार्यस्य मिषेण, अन्तर्हितायां तिरोभूतायां सत्याम्, इयं च राजपत्नी विजया, सन्ततं निरन्तरं विकचाभ्यां प्रस्फुटिताभ्यां जिनपादपयोजाभ्यां जिनेन्द्रचरणकमलाभ्याम् विशोभिते विराजिते, नैजं स्वकीयं मानसमेव चित्तमेव सरोवरः कासारस्तस्मिन् , नन्दन एव राजहंसस्तम्, पुत्रमरालम्, संक्रीडयामास खेलयामास । जिनेन्द्रचरणारविन्दे पुत्रञ्च ध्यायन्ती समयमजीगमदिति तात्पर्यम् ।

या हंसेति—पुरा भर्तृराज्यवेलायाम्, या विजया, पुरि नगर्याम्, हंसतूलशयनस्थानां हंसतूलोपकल्पितमृदुलबिछरस्थितानां लतान्तानां पुष्पाणां वृन्तैर्बन्धनैर्यः क्लेशो दुःखं तस्यासहा सोढुमसमर्था, अजनि बभूव, मालतीकुसुममिव मल्लीपुष्पमिव कोमला मृदुला गात्रवल्ली शरीरलता यस्यास्तथाभूता, सा विजया, काननान्ते वनमध्ये, दर्भेषु कुशेषु, शयनं स्वापम्, बहुमन्यते स्म श्रेष्ठं बुध्यते स्म, हन्तेति खेदेऽव्ययम् ॥ ६७ ॥

पुरेऽपि मानिनीवारतोषितायाः सतीमणेः ।
काननेऽजनि नीवारोऽप्याहारोऽस्याः किमद्भुतम् ॥ ९८ ॥

तावन्नन्दनसमागमसञ्जातमोदबन्धोत्कटेन तंतन्यमानं महोत्सवसार्थमात्मार्थं गणयता सकलसद्धर्मपरमकाष्ठाङ्गारेण काष्ठाङ्गारेण दापितमर्थजातं तत्क्षणजातैस्तदाज्ञासमानीतैरितरैरपत्यैः सह लब्ध्वायमूरुजपतिरितरात्मजैः समं निजात्मजमविशेषेण वर्धयामास ।

यथा यथा जीवकयामिनीशो विवृद्धिमागाद्विलसत्कलापः ।
तथा तथावर्धत मोदवार्धिरुद्वेलमूरव्यनिकायभर्तुः ॥ ९९ ॥

उत्तानशयने बिभ्रन्मुष्टिं तुष्टिकरः सुतः ।
उद्यत्कुड्मलयुग्मश्रीपद्माकरतुलां दधौ ॥१००॥

मुग्धस्मितं मुखसरोजगलन्मरन्द-
धारानुकारि मुखचन्द्रिचन्द्रिकाभम् ।
पित्रोः प्रमोदकरमेष बभार सूनुः
कीर्तेर्विकासमिव हासमिवास्यलक्ष्म्याः ॥१०१॥

पुरेऽपि—पुरेऽपि नगरेऽपि, मानिनीनां मानवतीनां वारः समूहस्तेन तोषिता प्रसादिता तस्याः, पक्षे मानिना प्रमाणवता, नीवारेण वन्यधान्येन तोषितायाः, अस्याः सतीश्रेष्ठायाः काननेऽपि वनेऽपि, नीवारो वन्यधान्यम्, आहारो भोजनम्, अजनि बभूव, अत्र किमद्भुतं किमाश्चर्यम्, न किमपीति यावत् ॥ ९८ ॥

तावन्नन्दनेति—तावता कालेन, नन्दनस्यार्भकस्य समागमेन लाभेन संजातः समुत्पन्नो य आमोदबन्धो हर्षसम्बन्धस्तेनोत्कटः प्रगल्भस्तेन, 'नन्दनो दारकोऽर्भकः' इति धनञ्जयः, गन्धोत्कटेन तन्नामवैश्यपतिना तंतन्यमानमतिशयेन विस्तार्यमाणम्, महोत्सवानां महोल्लासानां सार्थः समूहस्तम्, आत्मार्थं निजप्रयोजनकम्, गणयता बुध्यमानेन, सकलसद्धर्म एव निखिलसमीचीनधर्म एव काष्ठान्येधांसि तेषामङ्गारः प्रज्वलितानलस्तेन, काष्ठाङ्गारेण कृतघ्नेन, दापितं प्रापितम्, अर्थजातं धनसमूहम्, तत्क्षणं तत्काले जाताः समुत्पन्नास्तैः, तस्याज्ञया तन्निदेशेन समानीताः प्रापितास्तैः, इतरैरन्यैः, अपत्यैः पुत्रैः, सह सार्धम्, लब्ध्वा प्राप्य, अयमेषः, ऊरुजपतिर्वैश्यपतिः, इतरेषामन्येषामात्मजाः पुत्रास्तैः, समं साकम्, निजात्मजं स्वाङ्गजम् जीवमिति यावत्, अविशेषेण सामान्येन भेदभावमन्तरेणेति यावत्; वर्धयामास वर्धयति स्म ।

यथा यथेति—विलसन्तीः शोभमानाः कलाश्चातुरीः पक्षे षोडशभागानयते गच्छति प्राप्नोतीति विलसत्कलापः, जीवक एव यामिनीशो जीवकयामिनीशो जीवन्धरचन्द्रः, यथा यथा येन प्रकारेण, विवृद्धिमौन्नत्यम्, आगात् प्राप्नोत्, तथा तथा तेन तेन प्रकारेण, ऊरव्यानां वैश्यानां निकायः समूहस्तस्य भर्ता स्वामी तस्य गन्धोत्कटस्येत्यर्थः, मोदवार्धिर्हर्षपारावारः, उद्वेलं निर्मर्यादं यथा स्यात्तथा, अवर्धत वृद्धिंगतो बभूव । रूपकालङ्कारः ॥ ९९ ॥

उत्तानशयन इति—उत्तानशयने ऊर्ध्वमुखस्वापे, मुष्टिं बद्धकरपुटम्, बिभ्रद् दधत्, तुष्टिकरः सुखकरः, सुतो नन्दनः, उद्यत्समुत्पद्यमानं कुड्मलयुग्मं मुकुलयुगलं यस्मिन्, एवंभूतो यः श्रिया लक्ष्म्याः पद्माकरः कमलोपलक्षितकासारस्तस्य तुलामुपमां, दधौ धृतवान् ॥ १०० ॥

मुग्धस्मितमिति—एष सूनुः—अयं बालकः, मुखमेव सरोजं मुखसरोजं वदनारविन्दं तस्माद्गलन्त्याः पतन्त्या मरन्दधारया आसवसन्ततेरनुकारि विडम्बयितृ, मुखमेव वक्त्रमेव चन्द्रिश्चन्द्रस्तस्य चन्द्रिकाया ज्योत्स्नाया आभेवाभा दीप्तिर्यस्य तद्, माता च पिता चेति पितरौ तयोः 'पिता मात्रा' इत्येकशेषः, प्रमोदकरमानन्दधायकम्, कीर्तेर्यशसः, विकासमिव प्रस्फुरणमिव, आस्यलक्ष्म्या मुखश्रियाः, हासमिव हसितमिव, मुग्धञ्च तत्स्मितञ्चेति मुग्धस्मितं सुन्दरमन्दहसितम्, बभार दधार 'मुग्धः सुन्दरमूढयोः' इत्यमरः । उपमोत्प्रेक्षे ॥ १०१ ॥

पयोधरं धयन् सूनुः पयो गण्डूषितं मुहुः ।
उद्गिरन्कीर्तिकल्लोलं किरन्निव विदिद्युते ॥१०२॥

सञ्चरन् स हि जानुभ्याममले मणिकुट्टिमे ।
प्रतिबिम्बं परापत्यबुद्ध्या संताडयन्बभौ ॥१०३॥

क्रमेण सोऽयं मणिकुट्टिमाङ्गणे नखस्फुरत्काञ्चिझरीभिरञ्चिते ।
स्खलत्पदं कोमलपादपङ्कजक्रमं ततान प्रसवास्तृते यथा ॥१०४॥

तावत्सुनन्दापि जलगर्भेव कादम्बिनी रत्नगर्भेव वसुमती फलगर्भेव वल्लरी तेजोगर्भेव शुनासीरकाष्ठा श्रेष्ठिसती शनैरन्तर्वत्नीधुरामाबिभ्राणा क्रमेण नवमासेष्वतीतेषु नन्दाढ्यं नाम नन्दनं जनयामास ।

तत्सौभ्रात्रेण विभ्राजन्मन्मनालापलालितः ।
जीवकस्तनयैरन्यैर्मुदा चिक्रीड पांसुषु ॥१०५॥

अथ पञ्चमे वयसि सञ्चरन्नत्यक्तपञ्चशरः समुदञ्चितव्यक्तवचनप्रपञ्चः स्वयमागतस्य सकल-

---

पयोधरमिति—पयोधरं मातुः स्तनम्, धयन् पिबन्, सूनुः पुत्रः, मुहुर्बहुवारम्, गण्डूषितं कुरलकवदाचरितम्, पयो दुग्धम्, उद्गिरन् उद्वमन्, कीर्तिकल्लोलं यशस्तरङ्गम्, किरन्निव क्षिपन्निव, बभौ शुशुभे ॥ १०२ ॥

सञ्चरन्निति—अमले स्वच्छे, मणिकुट्टिमे रत्नखचितभूभागे, जानुभ्यां जङ्घाभ्याम्, 'जघनं जानु जङ्घुच' इति धनञ्जयः, सञ्चरन् समन्ताद् भ्रमन्, स सूनुः, प्रतिबिम्बं स्वस्यैव प्रतिकृतिम्, परमन्यच्च तदपत्यं च पुत्रश्चेति परापत्यं तस्य बुद्धिर्धिषणा तया अन्यपुत्रभ्रान्त्या, ताडयन् पीडयन्, बभौ शुशुभे, हीत्यव्ययं पादपूर्तौ । भ्रान्तिमान् ॥ १०३ ॥

क्रमेणेति—सोऽयं बालकः, क्रमेण क्रमशः, नखानां नखराणां स्फुरन्त्यः प्रसरन्त्यः कान्तयो दीप्तय एव झर्यो वारिप्रवाहास्ताभिः अञ्चिते शोभिते, अतएव प्रसवैः पुष्पैरास्तृतं व्याप्तं तस्मिन् यथा दृश्यमाने मणिकुट्टिमाङ्गणे रत्नखचितचत्वरे स्खलत्पदं पतच्चरणं यथा स्यात्तथा, कोमलपादपङ्कजयोर्मृदुलचरणकमलयोः क्रमं विक्षेपम्, ततान विस्तारयामास । उत्प्रेक्षा ॥ १०४ ॥

तावदिति—तावत् तावता कालेन, श्रेष्ठिनः सती श्रेष्ठिसती गन्धोत्कटवैश्यपतिपत्नी, सुनन्दापि सुनन्दाभिधानापि, जलं तोयं गर्भे मध्ये यस्यास्तथाभूता कादम्बिनीव मेघमालेव, रत्नं मणिर्गर्भे यस्यास्तथाभूता वसुमतीव पृथिवीव, फलं गर्भे मध्ये यस्यास्तथाभूता, वल्लरीव लतेव, तेजो दिवाकराभिधानं गर्भे यस्यास्तथाभूता शुनाशीरकाष्ठेव पुरन्दरदिशेव प्राचीवेति यावत्, शनैः क्रमशः, अन्तर्वत्नीधुरां गर्भिणीभारम्, अन्तरस्ति गर्भो यस्या अन्तर्वत्नी 'अन्तर्वत्पतिवतोर्नुक्' इति निपातितम्, आबिभ्राणा आदधाना सती, क्रमेण क्रमशः, नवमासेषु, अतीतेषु अपगतेषु सत्सु, नन्दाढ्यं नाम नन्दनं तनयम्, जनयामास प्रासूत ।

तत्सौभ्रात्रेण—सुभ्रातुर्भावः कार्यं वा सौभ्रात्रं, तस्य नन्दाढ्यस्य सौभ्रात्रं सुसहोदरत्वं तेन, विभ्राजन् शोभमानः, मन्मनालापैरस्पष्टाक्षरवार्त्ताभिः लालितः शोभितः, जीवकः विजयासुतः, अन्यैरितरैः, तनयैः पुत्रैः, सह पांसुषु धूलिषु, चिक्रीड क्रीडति स्म । बाला हि पांसुषु रमन्ते तरामिति जातिः ॥ १०५ ॥

अथ पञ्चमे वयसीति—अथानन्तरम्, पञ्चमे वयसि सञ्चरन् पञ्चमवर्षावस्थायां संचारं कुर्वाणः, समुदञ्चितः सम्यक्प्रकारेण प्रकटितो व्यक्तवचनानां स्पष्टवचसां प्रपञ्चः समूहो यस्य सः, कण्ठीरवकिशोरस्य मृगेन्द्रमाणवकस्येवाकृतिः संस्थानं तेज इति यावत्, यस्य सः, अयं जीवकः, स्वेच्छया, आगतस्य प्राप्तस्य, सकलकला एव विविधवैदग्ध्य एव कल्लोलिन्यः सरितस्तासाम्, शैलः पर्वतस्तस्य, शैलो हि सरितामुद्गम-

कलाकल्लोलिनीशैलस्यार्यनन्दिनामधेयस्याचार्यवर्यस्योपकण्ठे कण्ठीरवकिशोराकृतिरयं प्रत्यूहव्यूह-परिहाराय परिकलितसिद्धनमस्यः सिद्धमातृकाप्रसिद्धां सरस्वतीं परिशीलयामास।

लेभे जीवंधरो वाणीं क्रमनिर्जितसिन्धुरः।
नमस्यत गुरुं सोऽयं मनस्यमितभक्तितः ॥१०६॥

इति महाकविहरिचन्द्रविरचिते श्रीमति जीवन्धरचम्पूकाव्ये
सरस्वतीलम्भो नाम प्रथमो लम्भः।

स्थानत्वेन प्रसिद्धः, आर्यनन्दीति नामधेयं नाम यस्य तस्य आचार्यवर्यस्य सूरिश्रेष्ठस्य, उपकण्ठे समीपे, प्रत्यूहव्यूहस्य विघ्नसमूहस्य परिहारो निवारणं तस्मै, परिकलिता कृता सिद्धनमस्या सिद्धपरमेष्ठिपूजा येन तथाभूतः सन्, 'पूजा नमस्यापचितिः सपर्याऽर्चार्हणा समा' इत्यमरः, सिद्धमातृकया अनादिवर्णपरम्परया प्रसिद्धा प्रख्याता ताम्, सरस्वतीं परिशीलयामास, परिशीलनं चकार, सरस्वत्या अभ्यासमकार्षीदिति भावः।

लेभे—क्रमेण गत्या निर्जितः पराजितः सिन्धुरो हस्ती येन सः, सोऽयं जीवन्धरः, वाणीं सरस्वतीम्, लेभे, प्राप्तवान्, मनसि चित्ते, अमितभक्तितोऽसीमभक्त्या, गुरुम्, आर्यनन्दिनम् अनमस्यत नमश्चकार 'नमो वरिवसश्चित्रङः क्यच्' इति क्यच् ॥ १०६ ॥

इति महाकविश्चासौ हरिचन्द्रश्चेति महाकविहरिचन्द्रस्तेन विरचिते सुविहिते चम्पुर्जीवंधरे जीवन्धर-चम्पूनाम सन्दर्भे सरस्वत्या लम्भः प्राप्तिर्यस्मिंस्तथाभूतो नाम प्रथमो लम्भः प्रथमप्रकरणम्, समाप्तः। इतिशब्दः समाप्त्यर्थवाचकः।

इति महाकविहरिचन्द्रविरचिते श्रीमति 'कौमुदी' व्याख्याधरे जीवन्धरचम्पूकाव्ये
सरस्वतीलम्भो नाम प्रथमो लम्भः।

द्वितीयो लम्भः

अथ हृद्यतमं किञ्चन विद्यासदनमासाद्य वयस्यसंसदवतंसितं, जीवंधरः सकलकलाकलापैर-परकलाविलुब्धैरिव स्वयं निवासगृहतया परिगृहीतादखिलपण्डिताखण्डलादस्मादाचार्यवर्या-दखिलाः कलाः, वसन्तादिव वनप्रियः कलरवलीलाः, घनसमयादिव केकितरुणः केकाः, अध्यगीष्ट।

तच्चित्ताम्बुजमापेदे सूर्यालोकाद्विनिद्रताम्।
प्रासूत च कलाजालमकरन्दझरीं ततः॥ १॥

समस्तविद्यावनितासमागमे निरस्तविघ्ना गुरुभक्तिरेव।
विलोभनीयस्य वधूभिरन्ततः सुतस्य तस्य प्रबभूव दूती॥ २॥

पराभूते जीवन्धरशशभृता पर्वशशिनि
कलाचातुर्गुण्याद्विलसदमृतं वाचमगमत्।
मुखं कान्तिः प्राप्ता सकलजगदानन्दकरता
तदीयाङ्कं प्रापत्पदनखमभूत्सोऽपि शशभृत्॥ ३॥

अथेति—अथ सिद्धमातृकाज्ञानानन्तरम्, हृद्यतममतिमनोहरम्, वयस्यानां सखीनां संसदा समू-हेनावतंसितं शोभितम्, किञ्चन किमपि, विद्यासदनं विद्यालयम्, आसाद्य प्राप्य, जीवन्धरः सत्यन्धरसुतः, अपराश्च ता भिन्नाश्च ताः कलाश्च वैदग्ध्यश्रेण्यपरकलास्तासु विलुब्धैरिवासक्तैरिव, सकलकलानां निखिल-वैदग्धीनां कलापाः समूहास्तैः, स्वयं स्वत एव परप्रेरणामन्तरेणैवेति यावत्, निवासगृहतया वासभव-नत्वेन, परिगृहीतात्स्वीकृतात्, अखिलपण्डितेषु समस्तसूरिष्वाखण्डलः सहस्राक्षः श्रेष्ठ इति यावत् तस्मात्, अस्मात् आचार्यवर्यात् आर्यनन्दिनामविद्वद्वरात्, अखिलाः सर्वाः, कला विद्या वैदग्धीर्वा, वसन्तात् सुर-भिमासात्, कलरवलीला मधुरशब्दकेलीः, वनप्रियः कोकिल इव, घनसमयाज्जलदकालात्, केका मयूरवाणीः, 'केका वाणी मयूरस्य' इत्यमरः, केकितरुण इव मयूरयुवेव अध्यगीष्ट अध्यैष्ट 'इङ् अध्ययने' इत्यस्य लुङि रूपम्, 'विभाषा लुङ्लृङोः' इति वैकल्पिको गाङादेशः, 'घुमास्थागापाजहातिसां हलि' इत्यात ईत्वम्।

तच्चित्ताम्बुमिति—यतः कारणात्, तस्य जीवन्धरस्य चित्तमेव मन एवाम्बुजं कमलम्, सूरेराचा-र्यस्यालोको दर्शनमेव सूर्यस्य दिवाकरस्यालोकः प्रकाशस्तस्मात्, विनिद्रतां सावधानताम् पक्षे विकासिताम्, आपेदे प्राप, ततः कारणात्, कलाजालमेव विद्यासमूह एव मकरन्दस्य मधुनो झरी धारा ताम्, प्रासूत च, जनयामास च, रूपकालङ्कारः॥ १॥

समस्तविद्येति—वधूभिर्नारीभिः, विलोभनीयस्याकर्षणीयस्य, तस्य सुतस्य जीवन्धरस्य, समस्त विद्या एव वनिता योषितस्ताभिस्तासां वा समागमः संयोगस्तस्मिन्, गुरौ भक्तिर्गुरुभक्तिर्गुरुप्रीत्यतिशय एव, निरस्तं दूरीकृतं विघ्नमन्तरायो यया सा, दूती दौत्यकर्मणि प्रवृत्ता अन्ततः कार्यसिद्धिपर्यन्तम्, प्रब-भूव। गुरुभक्तिप्रसादादेव तस्याखिला विद्याः प्राप्ता बभूवुरिति भावः। वंशस्थोपेन्द्रवज्रयोः संमिश्रणादुपजा-तिवृत्तम्॥ २॥

पराभूत इति—जीवन्धरः सात्यन्धरिरेव शशभृच्चन्द्रमास्तेन, कलानां चातुर्गुण्यं तस्मात्, जीवन्धरे हि चतुःषष्टिः कला आसन् पर्वशशिनि तु षोडशैव, इत्थं कलाचातुर्गुण्यहेतोः, पर्वशशिनि राकानिशाकरे, पराभूते पराजिते सति, तत्र विलसच्छोभमानम्, अमृतं पीयूषम्, वाचं वचनं, जीवन्धरस्येति यावत्, अगमत् प्रापत्, कान्तिर्दीप्तिः, मुखं वदनम्, प्राप्ता गता, सकलजगतो निखिललोकस्यानन्दकरता सुखवि-धायकता, तदीयाङ्कं जीवन्धरशरीरम्, प्रापज्जगाम, स पराजितः, शशभृदपि पर्वचन्द्रोऽपि, स्वयम्, पद-नखं चरणनखम्, अभूदजायत। रूपकालङ्कारः शिखरिणीच्छन्दः॥ ३॥

इति निजविद्याललितलतामस्य हृदयालवालपल्लवितामवलोक्य, प्रीतेः परां काष्ठामधितिष्ठमानः प्रसन्नचित्तवृत्तिरयं सूरिः, एकदा विजने निजप्रान्तमावसन्तमन्तेवासिनमित्थमचीकथत् ।

श्रुताम्बुधेः पारगत शृणु त्वं प्रवीण कस्यापि चरित्रभावम् ।
अवाप्य यः श्रोत्रपथेन चित्तं दयानटीनर्तनसूत्रधारः ॥ ४ ॥
विद्याधराणां विनिवासलोके कालं नृपः कश्चिदजीगमद्यः ।
कृत्येन नाम्नापि च लोकपालो विद्याधरोऽभूद्विबुधेश्वरोऽपि ॥ ५ ॥

एकदा महीपतिरयमुदयशिखरिशेखरं हरिदश्व इव हर्यक्षासनमलङ्कुर्वन्, गगनजलधिजलनीलीपटलमिव वियद्वनविहरमाणस्तम्बेरममिव सुरलोकसमारोहणार्थमाकलितसोपाननीलोपलमिव कञ्चन जलधरं नीलमपि नयनेन पीतमातन्वन्, क्षीबाणां क्षितिपानामैश्वर्यं क्षणक्षीणमिति बोधयन्तमिव तत्क्षणमन्तर्हितमवलोक्य निजनन्दनक्षिप्तराज्यभारो विजृम्भितवैराग्यसाम्राज्यप्रतिष्ठामधितिष्ठन्, सकलसांसारिकदुःखशमनदीक्षां जैनीं दीक्षामाससाद ।

इतीति—इत्येवं प्रकारेण, निजविद्यैव स्वविद्यैव ललितलता सुन्दरवल्लरी ताम्, अस्य जीवन्धरस्य, हृदयमेव चित्तमेवालवालमावापस्तस्मिन् पल्लवितां किसलयितां, आलोक्य दृष्ट्वा, प्रीतेः प्रसन्नतायाः परामन्त्याम्, काष्ठामवधिम्, अधितिष्ठमानः प्राप्नुवन्, प्रसन्ना निर्मला चित्तवृत्तिर्मनःप्रवृत्तिर्यस्य तथाभूतः, अयं सूरिराचार्यः, एकदा एकस्मिन् काले, विजने निर्जने, निजप्रान्तं स्वाभ्यर्णम्, आवसन्तं विद्यमानम्, अन्तेवासिनं छात्रं जीवन्धरमिति यावत्, इत्थमनेन प्रकारेण, अचीकथत् कथयामास । प्रायेण जैनकाव्येषु 'अचीकथत्' इति प्रयोगो दृश्यते स कथं सिध्यतीति न वेद्मि। पाणिनीयव्याकरणे तु 'अचकथत्' इत्येव साधुः ।

श्रुताम्बुधेरिति—हे श्रुतमेवाम्बुधिस्तस्य शास्त्रसागरस्य, पारंगतः पारगतस्तत्सम्बुद्धौ पारगामिन्, प्रवीण निपुण त्वम्, कस्यापि जनस्य, चरित्रभावं जीवनोपाख्यानम्, शृणु समाकर्णय, यश्चरित्रभावः, श्रोत्रपथेन कर्णमार्गेण, चित्तं हृदयम्, अवाप्य लब्ध्वा, दयानट्याः करुणाशैलूष्या नर्तने नाट्ये सूत्रधारो नाट्यव्यवस्थापको भवेदिति शेषः। 'नाट्योपकरणादीनि सूत्रमित्यभिधीयते । सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते' । इति सूत्रधारस्य लक्षणम् । यं श्रुत्वा भवच्चेतसि दयासंचारो भविष्यतीति भावः ॥ ४ ॥

विद्याधराणामिति—विद्याधराणां खेचराणाम्, विनिवासलोके निवासक्षेत्रे, विजयार्धगिराविति यावत्, कश्चित्कोऽपि, नृपो राजा, कालं समयम्, अजीगमद् व्यपगमयामास । यो नृपः, कृत्येन कार्येण, नाम्नापि च नामधेयेनापि च, लोकपालो लोकं पालयतीति लोकपालः, लोकपालनामधेयः, अभूद् आसीत्, किञ्च, विगतो बुधेश्वरो विबुधेश्वरो मूर्खोऽपि विद्याधरो विद्याधारकः पण्डित इति यावत्, अभूदिति विरोधः। विबुधानां विदुषामीश्वरः स्वामीति परिहारः ॥ ५ ॥

एकदेति—एकदैकस्मिन्काले, उदयशिखरिणः शिखरमित्युदयशिखरिशिखरं पूर्वाचलचूलिकाम्, हरिदश्व इव भास्वानिव, 'भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः' इत्यमरः। हर्यक्षासनं सिंहासनम् । अलङ्कुर्वन् शोभयन्, अयं लोकपालः, महीपतिर्नृपः, गगनमेव जलनिधिर्गगनजलनिधिराकाशसमुद्रस्तस्य जलनीलीपटलमिव शैवालसमूहमिव, वियद्वने गगनकानने विहरमाणश्चासौ स्तम्बेरमश्चेति विहरमाणस्तम्बेरमो भ्रमन्मातङ्गस्तमिव, सुरलोकस्य देवसमूहस्य, स्वर्गस्य वा समारोहणार्थमुपरिगमनार्थम्, आकलितं निर्मितं यानि सोपानानि निःश्रेणयस्तेषां नीलोपलमिव नीलप्रस्तरमिव, कञ्चन कमपि, जलधरं मेघम्, नीलमपि श्याममपि, नयनेन नेत्रेण, पीतं पीतगुणविशिष्टं पक्षेऽवलोकितम्, आतन्वन् कुर्वन्, क्षीबाणां मत्तानाम्, क्षितिपानां महीपतीनाम्, ऐश्वर्यं वैभवम्, क्षणक्षीणमल्पकालभङ्गुरम्, इत्येवम्, बोधयन्तमिव ज्ञापयन्तमिव, तत्क्षणं तत्कालम्, अन्तर्हितं तिरोहितं नष्टमिति यावत्, अवलोक्य दृष्ट्वा निजनन्दने स्वकीयपुत्रे क्षिप्तो राज्यभारो येन सः, विजृम्भितं वृद्धिङ्गतं यद् वैराग्यसाम्राज्यं निर्वेदवैभवं तस्मिन् प्रतिष्ठामास्थाम्, अधितिष्ठन्, प्राप्नुवन् सन्, सकलानि समस्तानि यानि सांसारिकदुःखानि भवोद्भूताशर्माणि तेषां शमने दमने दक्षा समर्था ताम्, जिनस्येमां जैनीं जिनमन्यनिर्मिताम्, दीक्षां तपस्याम्, आससाद प्राप ।

तपांसि भूपः स हि तप्यमानस्तपस्यया प्रापितरुग्विलासः ।
विपाकतः सञ्चितकर्मणां तद्रुगन्तरं भस्मकमाटिटीके ॥ ६ ॥

तदनु दिने दिने प्रवर्धमानं भस्मकरोगमल्पेन तपसा विस्फुलिङ्गेनार्द्रेन्धनं खद्योतेनेव संतमसं नखरञ्जिकयेव महारण्यं शमयितुमशक्नुवानः, पूर्वं राज्यमिव तपःसाम्राज्यमपि परित्यजन् , पाषण्डितपसा समाच्छादितः, स्वैराहारान्नाफल इव गुल्मान्तर्हितो विष्किरान्समाददानो यथेष्टमवर्तिष्ट ।

तदनु नगरारामं सोऽयं जगाम दृढक्षुधा
क्वचिदविरलैरक्ताशोकोल्लसन्नवपल्लवैः ।
विशदवियतः सन्ध्यारागाञ्चितस्य सुलक्षणं
क्वचन कुसुमैरन्यारामान्हसन्तमिव स्थितम् ॥ ७ ॥

यस्मिन्पिके पञ्चममञ्जुगानं समाश्रिते मन्दमरुद्भुकुंसः ।
आनाटयत्याततभृङ्गनादकलारवां लोललतावधूटीम् ॥ ८ ॥

यश्च किल कुत्रचिन्निरन्तरनिष्पतत्पुष्पपरिष्कृततया वनदेवतासमाराधनाय विस्तृतदुकूलसंस्तरणमिव बिभ्राणः, क्वचन कुसुमासवपानमत्तमधुपान्धीकृततया समुदञ्चिताञ्जनपुञ्जमिव

तपांसीति—तपांस्यनशनादीनि, तप्यमानः कुर्वाणः, तपस्यया तपश्चरणेन, प्रापिता लम्भिता रुग्विलासा कान्तिप्रकारा यं तथाभूतः, स पूर्वोक्तः, भूपो नृपः, लोकपालमुनिरिति यावत्, सञ्चितानि पुरा बद्धानि यानि कर्माणि सातेतरवेद्यादीनि तेषाम्, विपाकत उदयात्, तत्प्रसिद्धम्, भस्मकं भस्मकनामकम्, रुगन्तरं रोगान्तरम्, आटिटीके प्राप । आङ्पूर्वकस्य 'टीकृ गतौ' इत्यस्य लिटि रूपम् ॥ ६ ॥

तदन्विति—तदनु तदनन्तरम्, दिने दिने प्रतिदिवसम्, प्रवर्धत इति प्रवर्धमानम् एधमानम्, भस्मकरोगं भस्मकव्याधिम्, अल्पेन तुच्छेन, तपसा तपश्चरणेन, विस्फुलिङ्गेनाग्निकणेन, आर्द्रेन्धनमिव सरसेध्मसमूहमिव, खद्योतेन ज्योतिरिङ्गणेन, संतमसमिव निबिडध्वान्तमिव, 'अवसमन्धेभ्यस्तमसः' इत्यच् समासान्तः, नखरञ्जिकया नखरच्छेदिकया, महारण्यमिव दीर्घकाननमिव, शमयितुं शान्तं कर्तुम्, अशक्नुवानो ऽसमर्थो भवन् , पूर्वं प्राग् , राज्यमिव साम्राज्यमिव, तपःसाम्राज्यमपि तपश्चरणवैभवमपि, परित्यजन्मुञ्चन् , पाषण्डितपसा-मायावितपश्चरणेन, समाच्छादितस्तिरोहितः सन् , गुल्मान्तर्हितः क्षुपाच्छादितः, नाफलः शाकुनिकः, विष्किरानिव शकुन्तानिव, स्वैराहारान् स्वच्छन्दाहारान् जैनप्रक्रियाविरुद्धानिति यावत् , समाददानो गृह्णानः, यथेष्टं स्वैरम्, यथा स्यात्तथा, अवर्तिष्ट प्रवृत्तिमकरोत् ।

तदनु नगरारामामिति—तदनु तदनन्तरम्, सोऽयं लोकपालो मुनिवरः, दृढक्षुधा भूयिष्ठबुभुक्षया, क्वचित्कुत्रचित्, अविरलैः सघनैः, रक्ताशोकेषु लोहितवञ्जुलेषूल्लसन्तः शोभमाना ये नवपल्लवा नूतनकिसलयास्तैः, सन्ध्या पितृप्रसूस्तस्या रागेणारुणिम्नाञ्चितं सहितं तस्य, विशदवियतो निर्मलगगनस्य, सलक्षणं सदृशम्, क्वचन कुत्रचित् , कुसुमैः पुष्पैः, अन्यारामान् इतरोपवनानि, हसन्तमिव तिरस्कुर्वन्तमिव, स्थितं विद्यमानम्, नगरारामं नगरोपवनम्, जगाम ययौ । उत्प्रेक्षालंकारः ॥ ७ ॥

यस्मिन्निति—यस्मिन् नगरारामे, पिके वनप्रिये कोकिल इति यावत् , पञ्चमश्च तन्मञ्जुगानञ्चेति पञ्चममञ्जुगानम् पञ्चमस्वरविशिष्टमनोहरगानम्, समाश्रिते प्राप्ते सति, 'यस्य च भावे भाव लक्षणम्' इति सप्तमी, मन्दश्चासौ मरुच्चेति मन्दमरुत्, स एव भुकुंस इति मन्दमरुद्भुकुंसः, मन्थरपवननटः, आततो विस्तारितो भृङ्गनादो भ्रमरशब्द एव कलरवो मधुरशब्दो यया ताम्, लोललता चञ्चलवल्लर्येव वधूटी युवतिस्ताम्, आनाटयति नर्तयति । रूपकालंकारः ॥ ८ ॥

यश्च किलेति—यश्च नगरारामः, किलेति वाक्यालंकारे वार्तायां वा, कुत्रचित्क्वचित् , निरन्तरं निर्व्यवधानं यथा स्यात्तथा निष्पतद्भिर्वर्षद्भिः पुष्पैः कुसुमैः परिष्कृततया विशोभिततया, वनदेवतानां वनाधिष्ठातृदेवीनां समाराधनाय सेवनाय, विस्तृतमातानितं यद् दुकूलं संस्तरणं क्षौमास्तरणं तद् , बिभ्राण इव दधान इव, क्वचन कस्मिंश्चित्स्थाने, कुसुमासवस्य पुष्परसस्य पानेन सेवनेन मत्ता धृतमोहा ये मधुपा

संदधानः, क्वचिदतिविततकङ्केलीपल्लवतल्लजरुचिझरीविराजिततया निजानुरागं प्रकटयन्निव, क्वचन विकचकोकनदकान्तिसंक्रान्तसरोवरशोभिततया कुङ्कुमक्षोदभरमिव समाकलयन्, कुत्रचन डोलार्थमिव लताप्रतानमातन्वन्नदृश्यत ।

सुतान्तरैस्तत्र समाचरन्तं क्रीडां भवन्तं स हि संददर्श ।
नक्षत्रवृन्दैः परिशोभमानं यथा सुराणां पथि बालचन्द्रम् ॥ ९ ॥
कियद्विदूरं पुरमित्यनेन पृष्टो गिरं त्वं मधुरामुवक्थ ।
मुखेऽम्बुजभ्रान्तिपतद्द्विरेफांस्तन्वन्सितान्दन्तमणिप्रभाभिः ॥१०॥
नगरोपवने बालक्रीडासमवलोकनात् ।
पुरमासन्नवृत्तीति वृद्धो नानुमिनोति कः ॥११॥
धूमदर्शनतो वह्निं नावगच्छति कः पुमान् ।
शीते वाते समायाते कः समीपे जलस्थितिम् ॥१२॥

इत्यादिवचनपीयूषधारासंसेकेन त्वदीयरूपलक्षणसंपदवलोकनजनितसुखबीजेन च हृदयालवालजनितप्रीतिप्रतानिनीं तावकान्वयनिश्चयेन पुष्पितां चिकीर्षुं दुर्धर्षजाठरदहनबाधां शिशम-

भ्रमरास्तैरन्धीकृततया श्यामलीकृततया, समुदञ्चितं समुत्क्षेपितं यदञ्जनं कज्जलं तस्य पुञ्जो राशिस्तम्, संदधान इव बिभ्राण इव, क्वचित्कुत्रचित्, अतिविततानामतिविस्तृतानां कङ्केलीपल्लवतल्लजानामशोककिसलयश्रेष्ठानां रुचिझरीभिः कान्तिसन्ततिभिर्विराजिततया शोभिततया, निजानुरागं स्वकीयप्रेमाणम्, प्रकटयन्निव प्रकाशयन्निव, क्वचन कुत्रचित्, विकचकोकनदानां प्रस्फुटितरक्तारविन्दानां कान्तिभिर्दीप्तिभिः संक्रान्ता व्याप्ता ये सरोवराः कासारास्तैः शोभिततयालंकृततया, कुङ्कुमक्षोदस्य काश्मीरचूर्णस्य भरं वारिप्रवाहम्, समाकलयन्निव दधदिव, कुत्रचित्क्वचित्, डोलार्थमिव वनदेवतान्दोलिकार्थमिव, लताप्रतानं वल्लीसमूहम्, आतन्वन्विस्तारयन्, अदृश्यतावलोक्यत ।

सुतान्तरैरिति—स मुनिचरः, हि निश्चयेन, तत्र नगरोपवने, सुतान्तरैरन्यैः पुत्रैः सह, क्रीडां केलिम्, समाचरन्तं कुर्वन्तम्, भवन्तम्, सुराणां देवानाम्, पथि मार्गे, गगन इति यावत्, नक्षत्रवृन्दैरुडुसमूहैः, परिशोभमानं विराजन्तम्, बालचन्द्रं यथा द्वितीयेन्दुमिव, भवन्तं त्वाम्, संददर्श सम्यगवलोकयामास ॥ ९ ॥

कियद्विदूरमिति—पुरं नगरम्, कियद्विदूरं कियद्विप्रकृष्टम्, इतीत्थम्, अनेन मुनिचरेण, पृष्टोऽनुयुक्तः, त्वम् जीवन्धरः, मुखे वदने, अम्बुजभ्रान्त्या कमलभ्रमेण पतन्तो झम्पापातं कुर्वन्तो ये द्विरेफा भ्रमरास्तान्, दन्ता रदना मणयो रत्नानीवेति दन्तमणयस्तेषां प्रभा दीप्तयस्ताभिः, सितान् धवलान्, तन्वन् कुर्वन्, मधुरां मनोहराम्, गिरं वाणीम्, उवक्थ कथयामासिथ । तद्गुणालंकारः ॥ १० ॥

नगरोपवन इति—नगरोपवने पुरोद्याने, बालानां शिशूनां क्रीडायाः केल्या विलोकनं दर्शनं तस्मात्, पुरं नगरम्, आसन्ना निकटस्थवृत्तिः सद्भावो यस्य तत्, इत्येवम् को वृद्धो विशेषज्ञः, नानुमिनोति नावबुध्यते । अपि तु सर्व एव इति भावः ॥ ११ ॥

धूमदर्शनतः—धूमस्य धूम्रस्य दर्शनं विलोकनं तस्मात्, धूमाद्धेतोरिति यावत्, कः पुमान् को मनुष्यः, वह्निमग्निम्, नावगच्छति नो जानाति । शीते शिशिरे, वाते वायौ, समायाते सति, समीपे पार्श्वे, जलस्य तोयस्य स्थितिः सद्भावस्ताम्, कः पुमान् नावगच्छतीति पूर्वार्धक्रियया सह सम्बन्धः । कार्यात्कारणस्य ज्ञानं सर्वेषामेव सुकरमिति भावः ॥ १२ ॥

इत्यादीनि—इत्यादिवचनमेव पीयूषधारा सुधासन्ततिस्तया संसेकः समुक्षणं तेन, रूपं च लावण्यं च लक्षणानि च सामुद्रिकशास्त्रप्रकटितशुभचिह्नानि चेति रूपलक्षणानि, तान्येव संपद् त्वदीया भवदीया या रूपलक्षणसंपत्, तस्या अवलोकनेन दर्शनेन जनितं समुत्पन्नं यत्सुखं शर्म तस्य बीजं कारणं तेन च, हृदयमेव चित्तमेवालवालमावापस्तस्मिन् जनिता समुत्पन्ना या प्रीतिप्रतानिनी प्रीतिलता ताम्, तावकान्वयस्य त्वदीयवंशस्य निश्चयो दृढज्ञानं तेन, पुष्पाणि संजातानि यस्यां तां पुष्पिताम् कुसुमिताम्,

यिषुमाहारयाच्ञापरतन्त्रितमानसमेनं कुहनातापसं भवान्भवनमानीय तदीयभोजनकृते पौरोगवमादिदेश ।

तदनु त्वयि भोजनाथ यत्नं कृतवत्यारभताशमेष भोक्तुम् ।
तव वाङ्मयगोस्तनीविमिश्रं मुखशोभामृतपानकं पिपासुः ॥१३॥

तावदर्भकस्वभावेन सर्वमुष्णमिदं कथं भुञ्जेऽहमिति रोदनवशेन नयनकञ्जयुगसञ्जातमकरन्दपूरकानुकारिणीभिरश्रुधाराभिर्नयनकमलवास्तव्यलक्ष्मीवक्षःस्थलस्थपुटितमालामुक्ता इव किरन्तं भवन्तं समीक्ष्य, भिक्षुरयं विश्वातिशायिमतिमहिममहितस्य भृशमपरोदननिदानस्यापि तव रोदनं कथमिति चित्रभित्तीयते चित्तमित्याबभाषे ।

श्रुत्वा वाणीं तस्य मन्दस्मितेन तन्वन्निर्यत्क्षीरधारेति शङ्काम् ।
इत्थं वाचामाचचक्षे भवान्वै मोचामाध्वीमाधुरीमादधानाम् ॥१४॥

श्लेष्मच्छेदो नयनयुगलीनिर्मलत्वं च नासा-
शिङ्घाणानां भुवि निपतनं कोष्णता भोज्यवर्गे ।

चिकीर्षु कर्तुमिच्छुम्, दुर्धर्षा चासौ जाठरदहनस्य बाधा चेति दुर्धर्षजाठरदहनबाधा ताम् कठिनोदराग्निपीडाम्, शिशमयिषुं शमयितुमिच्छुम्, आहारस्य भोजनस्य याच्ञया प्रार्थनेन परतन्त्रितं वशीकृतं मानसं चित्तं यस्य तम्, एनमिमम्, कुहनातापसं मिथ्यातापसम्, भवान् जीवन्धरः, भवनं गृहम्, आनीय प्रापय्य, तदीयभोजनकृते तं भोजयितुम्, पौरोगवं पाचकम्, आदिदेशाज्ञातवान् ।

तदनु त्वयीति—तदनु तदनन्तरम्, त्वयि भवति, भोजनाय भोक्तुम्, यत्नमुद्यमम्, कृतवति विहितवति सति, त्वयि भोक्तुमुद्यते सतीति यावत्, तव भवतः, वाङ्मयानि वचनान्येव गोस्तन्यो द्राक्षास्ताभिर्विमिश्रं मिलितम्, मुखशोभा वदनसौन्दर्यमेवामृतपानकं पीयूषपेयं तत् पिपासुः पातुमिच्छुः, एष साधुः, अन्नं खाद्यपदार्थम्, भोक्तुमत्तुम्, आरभत प्रारम्भं चकार ॥ १३ ॥

तावदर्भकस्वभावेनेति—तावत् तावता कालेन, अर्भकस्वभावेन डिम्भनिसर्गेण 'पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः' इत्यमरः, सर्वं निखिलम्, इदं भोजनम्, उष्णमशीतम्, वर्तते, कथं केन प्रकारेण, भुञ्जेऽहम् 'भुजोऽनवने' इत्यात्मनेपदम्, इतीत्थम्, रोदनवशेन—आक्रन्दनाधीन्येन, नयनकञ्जयुगे लोचनकमलयुगले संजातं समुत्पन्नं यन्मकरन्दं कौसुमं तस्य पूरकस्य प्रवाहस्यानुकारिण्योऽनुविधायिन्यस्ताभिः, अश्रुधाराभिर्नयनसलिलसन्ततिभिः, नयनकमलवास्तव्या लोचनारविन्दकृतनिवासा या लक्ष्मीः श्रीस्तस्या वक्षःस्थले भुजान्तरप्रदेशे स्थपुटिता नतोन्नतभावेन विद्यमाना या माला मौक्तिकस्रक् तस्या मुक्ता मुक्ताफलानीव, किरन्तं विक्षिपन्तम्, भवन्तम्, समीक्ष्य दृष्ट्वा, अयमेषः, भिक्षुः साधुः, विश्वातिशायिनी सर्वाधिका या मतिर्बुद्धिस्तस्या महिम्ना माहात्म्येन महितस्य शोभितस्य, भृशमत्यन्तम्, सर्वथेति यावत्, अपगतानि दूरीभूतानि रोदननिदानानि रोदनादिकारणानि यस्य तथाभूतस्यापि 'निदानं त्वादिकारणम्' इत्यमरः तव भवतः, रोदनमश्रुविमोचनम्, कथं केन कारणेन, इतीत्थम्, चित्रस्यालेख्यस्य भित्तिरिव कुड्यमिवाचरतीति चित्रभित्तीयते, चित्तं हृदयम्, मदीयमिति शेषः इत्येवम्, आबभाषे जगाद ।

श्रुत्वेति—तस्य भिक्षोः, वाणीं गिरम्, श्रुत्वा निशम्य, भवान् त्वम्, मन्दस्मितेन मन्दहसितेन, निर्यन्ती निर्गच्छन्ती चासौ क्षीरधारा च पयोधारा चेति निर्यत्क्षीरधारा, इतीत्थम्, शङ्कां संशयम्, तन्वन्विस्तारयन्, सन्, मोचामाध्वीनां कदलीफलद्राक्षाणां माधुरीं माधुर्यम्, आदधानां बिभ्रतीम्, इत्थं वक्ष्यमाणप्रकाराम्, वाचाम् वचनम्, भागुरिमते हलन्तादपि टाप् प्रत्ययो भवति । तथा चोक्तम्, 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा निशा दिशा' ॥ इति । वै निश्चयेन, आचचक्षे कथयामास । 'चक्षिङ् व्यक्तायां वाचि' इत्यस्य लिटि रूपम्, 'वा लिटि' इत्यस्य वैकल्पिकत्वेन ख्यादेशाभावपक्षे रूपम् । शालिनीच्छन्दः 'शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः', इति तल्लक्षणात् ॥ १४ ॥

श्लेष्मच्छेद इति—श्लेष्मच्छेदः कफापहारः, नयनयुगल्या नेत्रयुगलस्य निर्मलत्वं स्वच्छत्वम्, नासाशिङ्घाणानां घ्राणमलानाम्, भुवि पृथिव्याम्, निपतनं नितरां पतनम्, भोज्यवर्गे खाद्यपदार्थसमूहे,

शीर्षाबद्धभ्रमकरपयोदोषबाधानिवृत्ति-
रन्येऽप्यस्मिन्परिचितगुणा रोदने संभवन्ति ॥१५॥

इति वचनमयसुधां श्रवणपुटे सिञ्चता भिक्षोरपारबुभुक्षासमीक्षणजनितवैलक्ष्यप्रापितजोषभावेन करुणावरुणालयेन भवता वितीर्णम्, शयकुशेशयकररुहरुचिसुरसरिड्डिण्डीरखण्डायमानम्, करकल्पतरुस्तबकशङ्कावहं नखचन्द्रैः सह परिचयाय समागतचन्द्रबिम्बसंभावनासंपादकम्, आशातरङ्गिणीशोषणशारदसमयखण्डायितं करकवलमासाद्य, सद्य एव तृप्तिमापन्नः कर्मन्दी, संदीपितजठरदहनशमनेन महोपकारं मन्यमानः, परमनन्यसामान्यसौजन्यतया परमोत्कृष्टफलां कलां तुभ्यं प्रतिपादयामास ।

विद्यावल्ली पात्रसुक्षेत्रदत्ता प्रज्ञासिक्ता सूक्तिभिः पुष्पिता च ।
आशायोषित्कर्णभूषायमाणां कीर्तिप्रोद्यन्मञ्जरीमादधाति ॥१६॥

विद्याकल्पतरुः समुन्नतिमितः प्राप्तोऽपि गम्यो नतैः
पुष्पाण्यत्र समेत्य मञ्जुलमहोऽमुत्र प्रसूते फलम् ।
किं चायं खलु मूलमाश्रितवतां संतापमन्तस्तनो-
त्यूर्ध्वं संचरतां नृणां पुनरसौ तापं धुनीतेतमाम् ॥१७॥

कोष्णता मन्दोष्णता 'कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति' इत्यमरः । शीर्षे शिरस्याबद्धो यो भ्रमो भ्रमरोगस्तस्य करो विधायको यो पयोदोषो जलदोषस्तस्य बाधायाः पीडाया निवृत्तिर्दूरीकरणम्, अन्येऽपरेऽपि, परिचिताश्च ते गुणाश्चेति परिचितगुणा अनुभूतलाभाः अस्मिन् रोदन आक्रन्दने, संभवन्ति सम्यक्-प्रकारेण जायन्ते । न नो रोदनं व्यर्थमिति भावः । मन्दाक्रान्ताच्छन्दः 'मन्दाक्रान्ताजलधिषडगैर्म्भौ नतौ ताद्गुरू चेत्' इति लक्षणात् ।

इति वचनेति—इति पूर्वोक्ताम्, वचनमयसुधां वार्णमयपीयूषम्, श्रवणपुटे कर्णपुटे, सिञ्चता क्षरता, भिक्षोः साधोः, अपारबुभुक्षायाः सीमातीतक्षुधः समीक्षणेन, समवलोकनेन जनितमुत्पादितं यद्वैलक्ष्यं विस्मयस्तेन प्रापितो लम्भितो जोषभावस्तूष्णींभावो यं तेन, करुणाया दयाया वरुणालयः समुद्रस्तेन, भवता त्वया, वितीर्णं प्रदत्तम्, शयकुशेशयस्य हस्तकमलस्य कररुहा नखानि तेषां रुचिः कान्तिरेव सुरसरिद्गङ्गा तस्या डिण्डीरः फेनस्तस्य खण्डायमानं शकलायमानम्, कर एव कल्पतरुः करकल्पतरुः पाणिसुरपादपस्तस्य स्तबकस्य पुष्पगुलुच्छस्य शङ्कावहः सन्देहाधायकस्तम्, नखचन्द्रैर्नखरेन्दुभिः, सह साकम्, परिचयाय मेलनाय, समागतं समायातं यच्चन्द्रबिम्बं शशिमण्डलं तस्य संभावनायाः समुत्प्रेक्षायाः संपादकं जनकम्, आशातरङ्गिण्यास्तृष्णानद्याः शोषणेऽल्पीकरणे शारदसमयखण्डायितं जलदान्तकालखण्डवदाचरितम्, करकवलं हस्तग्रासम्, आस्वाद्य भक्षयित्वा, सद्य एव झटित्येव, तृप्तिं सन्तोषम्, आपन्नः प्राप्तः, कर्मन्दी भिक्षुः, संदीपितो वृद्धिङ्गतो यो जठरदहन उदराग्निस्तस्य शमनेन शान्त्या, महोपकारं भूरिकल्याणम्, मन्यमानो बुध्यमानः, सन्, परमत्यर्थम्, अनन्यसामान्यमनुपमं यत्सौजन्यं साधुत्वं तस्य भावस्तत्ता तया, परमोत्कृष्टं श्रेष्ठतरं फलं परिणामो यस्यास्ताम्, कलां विद्याम्, तुभ्यं भवते, प्रतिपादयामास समर्पयामास ।

विद्यावल्लीति—पात्रं योग्यशिष्य एव सुक्षेत्रं सुभूमिस्तस्मिन् दत्तोप्ता, प्रज्ञा नवनवोन्मेषशालिनी बुद्धिस्तया सिक्तोक्षिता, सूक्तिभिः सुभाषितैः पुष्पिता च कुसुमिता च, विद्यावल्ली विद्यालता, आशायोषितां दिगङ्गनानां कर्णभूषायमाणां श्रवणालङ्कारवदाचरन्तीम्, कीर्तिरेव यश एव प्रोद्यन्मञ्जरी प्रादुर्भवन्मञ्जरीम्, आदधाति बिभर्ति । रूपकालंकारः । शालिनीच्छन्दः ॥ १६ ॥

विद्याकल्पतरुरिति—विद्यैव कल्पतरुरिति विद्याकल्पतरुर्विद्याकल्पवृक्षः, इतो लोके, समुन्नतिमुत्तुङ्गताम्, प्राप्तोऽपि लब्धोऽपि, नतैर्वामनैः पक्षे नम्रैः गम्यः प्राप्यः समुन्नतो वृक्षो वामनैः कथं प्राप्य इति विरोधः परिहारश्च नतैर्नम्रैर्विनयवद्भिर्जनैर्गम्यः सेवनीय इति । स एव च विद्याकल्पतरुः, अत्र लोके, पुष्पाणि कुसुमानि, समेत्य प्राप्य, अमुत्र परलोके, मञ्जुलं मनोहरम्, फलम्, प्रसूते जनयति, इत्यहो आश्चर्यम्, यत्र पुष्पलाभस्तत्रैव फलोपलब्धिरुचिता विद्याकल्पतरौ च विपरीतेत्याश्चर्यम्, परिहारस्तु

इति गुरोरुदन्तमाकर्ण्य कर्णरसायनम्, मौनमेवोत्तरमादधानो, वदनवनजे मानससरसि च प्रश्रयमृणालीमधिमुखमादधतीं शैष्योपाध्यायिकामरालीं खेलयन्, गुरुशुद्धिविज्ञानेन लब्धमणि-परिशुद्धिज्ञानेनेव मोदजलधेः परं पारं गतोऽपि, गुरूपदिष्टे सागारधर्मसागरे ममज्ज सज्जनहृदय-चन्दनो नन्दनः।

तदनु विजनं देशं नीत्वा गुरुः सुतपुङ्गवं
व्यवृणुत गिरा राजोदन्तं दुरन्तमिदंतया।
विदितजनकोदन्तः सत्यंधरस्य सुतस्तदा
सुलभजनुषा रोषेणासीज्जगन्ति दहन्निव ॥१८॥

एवं गुरुवचनेन स्वस्य राजपुत्रत्वं काष्ठाङ्गारस्य राजहन्तृत्वं च निश्चित्य, समेधमानक्रोध-धनञ्जयस्येव संदीपितशराग्नेरपि तमेनमिन्धनं चिकीर्षुः क्रोधान्धगन्धसिन्धुर इव गुरुणा दुर्निवार-सरभससन्नाहः सात्यंधरिः, बन्धुरयुद्धारम्भसंरम्भान्न विरराम। गुरुरपि तदीयदुर्धर्षामर्षविस्ता-

परलोके स्वर्गादिसुखप्राप्तिर्जायत इति। किञ्चान्यच्च, खलु निश्चयेन, अयं विद्याकल्पतरुः, मूलं तलम्, आश्रित-वतां सेवमानानाम्, अन्तर्हृदये, संतापं दुःखं, तनोति विस्तारयति, पुनः किन्तु, ऊर्ध्वमुपरिष्टात्, संचरतां सञ्चरणं कुर्वताम्, नृणां जनानाम्, असौ विद्याकल्पतरु, तापं दुःखम्, अतिशयेन धुनीत इति धुनीतेतमाम्, अत्यन्तं दूरीकरोतीति यावत्, अन्ये वृक्षा मूलगतानां संतापं हरन्त्यूर्ध्वं गच्छतां च संतापं विदधति, विद्याकल्पतरुश्च तद्विलक्षण इत्याश्चर्यं परिहारस्तु मूलमधः श्रितवतां संतापं विस्तारयति, उपरि-चरतां चाज्ञानाभिधानं तापं निवारयतीति। रूपकव्यतिरेकौ, रूपकविरोधौ वा शार्दूलविक्रीडितं छन्दः। 'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥ १७ ॥

इति गुरोरिति—इति पूर्वोक्तप्रकारेण, कर्णरसायनं श्रवणामृतम्, गुरोरुपाध्यायस्य, उदन्तं वृत्तान्तम्, आकर्ण्य श्रुत्वा, वदनवनजे मुखकमले, मानससरसि च हृदयकासारे च, मुख इत्यधिमुखं तस्मिन्, प्रश्रयमृणालीं विनयबिसम्, आदधतीम् धृतवतीम्, शैष्योपाध्यायिका शिष्यगुरुव्यवहृतिरेव मराली हंसी ताम्, खेलयन् क्रीडयन्, गुरोरुपाध्यायस्य शुद्धिर्नैर्मल्यं तस्या विज्ञानं बोधस्तेन, लब्धमणेः प्राप्तरत्नस्य या परिशुद्धिर्नैर्मल्यं तस्या ज्ञानं तेनेव, मोदजलधेरानन्दाम्भोधेः, परं द्वितीयं पारं तटम्, गतोऽपि प्राप्तोऽपि, सज्जनहृदयचन्दनः साधुजनमनोमलयजः, नन्दनो जीवन्धरः, गुरुणोपदिष्टस्तस्मिन् गुरुप्रदर्शिते, सागारधर्म एव श्रावकधर्म एव सागरः समुद्रस्तस्मिन्, ममज्ज निमग्नोऽभूत्। सागारधर्मं दधारेति भावः।

तदनु विजनमिति—तदनु गृहस्थधर्मोपदेशानन्तरम्, गुरुरार्यनन्दी, सुतपुङ्गवं पुत्रश्रेष्ठम्, जीवन्धरमिति यावत्, विजनं निर्जनम्, एकान्तमिति यावत्, देशं स्थानम्, नीत्वा प्रापय्य, इदंतयाऽनेन प्रकारेण, दुरन्तं दुष्परिणामम्, राजोदन्तं सत्यन्धरनृपतिवृत्तान्तम्, गिरा वाण्या, व्यवृणुत वर्णयामास। तदा गुरुमुखाद्राजोदन्ताकर्णनानन्तरम्, विदितो ज्ञातो जनकस्य पितुरुदन्तो वृत्तान्तो येन तथाभूतः, सत्यन्धरस्य सुतो जीवन्धरः, सुलभं सुप्राप्यं जनुर्जन्म यस्य तेन, रोषेण क्रोधेन, जगन्ति भुवनानि, दहन्निव भस्मसात्कुर्वन्निव, आसीद् बभूव। भृशं चुकोपेति भावः, हरिणीच्छन्दः 'रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा' इति लक्षणात् ॥ १८ ॥

एवं गुरुवचनेनेति—एवं पूर्वप्रकारेण, गुरुवचनेनोपाध्यायवाण्या, स्वस्यात्मनः, राजपुत्रत्वं नृपतिसुतत्वम्, काष्ठाङ्गारस्य तादात्विकनृपस्य राजहन्तृत्वं सत्यन्धरमहाराजघातकत्वञ्च, निश्चित्य निर्णीय समेधमानो वर्धमानो यः क्रोध एव कोप एव धनञ्जयो वह्निस्तस्येव संदीपितः प्रज्वलितः शरा एव बाणा एवाग्निस्तस्यापि, एनं तं काष्ठाङ्गारम्, इन्धनं दारुनिचयं दाह्यमिति यावत्, चिकीर्षुः कर्तुमिच्छुः, क्रोधेनान्धः क्रोधान्धः कोपान्धः स चासौ गन्धसिन्धुरश्च गन्धगजश्च स इव, गुरुणोपाध्यायेन दुर्निवारो दुःखेन निवारयितुं शक्यः सरभससन्नाहस्तात्कालिकयुद्धोद्योगो यस्य सः, सत्यन्धरस्यापत्यं पुमान् सात्यन्धरिः 'अत इञ्' इति ञ् प्रत्ययः, जीवन्धरः, बन्धुरः पूर्णो यो युद्धारम्भः समरप्रारम्भस्तस्य संरम्भाद् दृढनिश्चयात्, न विरराम विरमति स्म। गुरुरपि, तदीयेन तत्सम्बन्धिना दुर्धर्षामर्षेण विकटक्रोधेन विस्तारित आयोजितो यः

रिसमरसंरम्भमवलोक्य, न पुनरयमन्यथा विरमतीति निश्चयमणिं हृदयपुटपेटके निधाय, वत्स वत्सरमेकं क्षमैव मह्यं गुरुदक्षिणा विधेयेति, कथंकथमपि सात्यंधरेरायोधनसन्नाहसंधानं निवारयामास ।

न कार्यः क्रोधोऽयं श्रुतजलधिमग्नैकहृदयै-
र्न चेद्व्यर्था शास्त्रे परिचयकलाचारविधुरा ।
निजे पाणौ दीपे लसति भुवि कूपे निपततां
फलं किं तेन स्यादिति गुरुरथोऽशिक्षयदमुम् ॥१६॥

इत्यादिर्नीतिपद्वीमाशास्य, तमाश्वस्य, विश्रान्तिशायिनं पन्थानमास्कन्दितुममन्दादरमेदुरे तस्मिन्गुरुवरे गतवति तपोवनम्, पश्चिमपयोधिवेलावनमिव भास्वति, जीवन्धरस्तत्स्मरणसंधुक्षित-गुरुविरहशोकाशुशुक्षणिं तत्त्वज्ञानपयःपूरेण निर्वापयामास ।

तावत्तारुण्यलक्ष्मीर्नृपतनयतनुं प्राप वल्लीं यथा वा
पुष्पश्रीः पारिजातस्थितिमिव विबुधाशास्यवासन्तलक्ष्मीः ।
गङ्गेवाम्भोधिवेलां शरदिव शशिनो मण्डलीमब्धिपालीं
प्रातः सूर्यप्रभेवामलकुमुदवनीं शारदी कौमुदीव ॥२०॥

समरसंरम्भो युद्धहठनिश्चयस्तम्, अवलोक्य दृष्ट्वा, अयं जीवन्धरः, अन्यथान्यप्रकारेण, न पुनः, विरमति विरतो भवतीति, निश्चय एव मणिस्तं निर्णयरत्नम्, हृदयपुटपेटके स्वान्तपुटकरण्डके, निधाय निक्षिप्य, हे वत्स हे तात, एकं वत्सरम्, एकं संवत्सरम् 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया, क्षमा क्षान्तिरेव युद्ध-विराम एव, मह्यं गुरवे, गुरुदक्षिणा गुरुपुरस्कारः, विधेया कर्तव्या, इत्येवं प्रकारेण, कथं कथमपि केनापि प्रकारेण, सात्यन्धरेर्जीवन्धरस्य, आयोधनाय युद्धाय सन्नाहस्तत्परीभावस्तस्य संधानं योजनं धारणमिति यावत्, निवारयामास दूरीचकार ।

न कार्य इति—श्रुतमेव शास्त्रमेव जलधिः सागरस्तस्मिन्मग्नं ब्रुडितमेकहृदयं मुख्यस्वान्तं येषां तैः, अयमेषः, क्रोधः कोपः 'रुट्कोपक्रोधमन्यवः' इति धनंजयः, न कार्यो न विधातव्यः, सर्वतोभावेन शास्त्रज्ञानपारावारे निमग्नहृदयैर्जनैः क्रोधो न कर्तव्य इति भावः । न चेदेवं न स्यात्तर्हि, आचारेण प्रयोगेण विधुरा रहिता शास्त्रे श्रुतौ, 'विषयार्थे सप्तमी' परिचयकलाभ्यासकला, व्यर्था मोघा, अस्तीति शेषः, शास्त्रे यल्लिखितं तदनुकूलाचरणाभावे तदभ्यासो व्यर्थ इति भावः, भुवि पृथिव्याम्, निजे स्वकीये पाणौ हस्ते, दीपे प्रदीपे, लसति शोभमाने सति, कूपे प्रहौ, निपततां पतनं कुर्वताम्, जनानाम्, तेन दीपेन, किं किन्नाम-धेयम्, फलं प्रयोजनम्, स्याद् भवेत्, इतीत्थम्, गुरुरार्यनन्दी, अथो युद्धारम्भसंरम्भाद्विरमणानन्तरम्, अमुं जीवन्धरम्, अशिक्षत् शिक्षयामास । शिखरिणीच्छन्दः 'रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इति लक्षणात् ॥ १६ ॥

इत्यादिर्नीतिपद्वीमिति—इत्यादिश्चासौ नीतिपद्वी च ताम् इति प्रभृतिनयमार्गम्, आशास्योपदिश्य, तं कुमारम्, आश्वस्य-सर्वथा शोभनं भविष्यति, काष्ठाङ्गारो नश्यति तव च राज्यं भविष्यतीति समाश्वासनं विधाय, विश्रान्तिशायिनं लोकोत्तरम्, संसारातिक्रामिणं मोक्षप्रापकमिति यावत्, पन्थानं मार्गम्, आस्कन्दितुं प्राप्तुम्, अमन्दश्चासावादरश्चेत्यमन्दादरो महाप्रीतिस्तेन मेदुरो मिलितस्तस्मिन्, तस्मिन्पूर्वोक्ते, गुरुवरे गुरुश्रेष्ठे, पश्चिमपयोधेर्वरुणाशासागरस्य वेलावनं तीरकाननम्, भास्वतीव सूर्य इव, तपोवनं तपश्चरणयोग्यकाननम्, गतवति प्रयाते सति, जीवन्धरो गुरुभक्तशिष्यः, संधुक्षितः संदीपितो यो गुरुविरहशोक एवोपाध्याय वियोगविषाद एवाशुशुक्षणिर्वह्निस्तम्, तत्त्वज्ञानमेव पयःपूरस्तेन पदार्थज्ञान-जलप्रवाहेण, निर्वापयामास शमयामास ।

तावदिति—तावत् तावता कालेन, तारुण्यलक्ष्मीर्यौवनश्रीः, नृपतनयस्य राजकुमारस्य जीवन्धरस्येति यावत् तनुः शरीरं ताम्, प्राप प्राप्तवती, केवेति चेदाह—पुष्पश्रीः कुसुमलक्ष्मीः, वल्लीं यथा वा लतामिव, विबुधैर्देवैराशास्या प्रशंसनीयेति विबुधाशास्या, सा चासौ वासन्तलक्ष्मीश्च मधुमासशोभा चेति

सौन्दर्यस्य परा काष्ठा शृङ्गारस्य परा गतिः ।
खनिः कलानां यस्यासीन्मूर्तिरानन्ददायिनी ॥२१॥

यस्य च रूपमादिमोदाहरणं रूपसंपन्नदेहानाम्, अधिदैवतं कान्तिसंपदाम्, संजीवनौषधं सौन्दर्यस्य, सङ्केतसदनं शृङ्गारस्य, जीवितरसः सारस्यसारस्य, केलीभवनं कलानाम्, शिक्षास्थानं नर्मविलासानाम्, शृङ्गाटकं संगीतविद्यानाम्, आकर्षणौषधमायताक्षीनयनानाम्, बन्धनगृहं युवतिजनमानसानाम्, सेचनकं सकलजनलोचनानाम्, अगोचरपदं कविवचनानाम्, अंकुरक्षेत्रं कीर्तिस्फूर्तीनाम्, आवासस्थलं जयलक्ष्मीविलासानाम्, आस्थामन्दिरं लक्ष्मीसरस्वत्योः, सञ्चरदिव सकलनयनसुखम्, सचेतनमिव महीमहिलाभाग्यम्, साकारमिव प्रतापपटलम्, सजीवमिव गाम्भीर्यम्, सङ्गीभूतमिव शौर्यम्, सरूपधेयमिव कुरुवंशभागधेयम्, वेधसः सकलशिल्पनैपुण्यप्रदर्शनमुदजृम्भत ।

अथैकदा व्याधजनाधिराजो मर्त्याकृतिं प्राप्त इवान्धकारः ।
कृत्येन नाम्नापि च कालकूटः सेनायुतो गाः सकला जहार ॥ २२ ॥

तथा, पारिजातानां कल्पवृक्षाणां स्थितिः स्थानं तामिव, नन्दनवनमिवेति यावत्, गङ्गा भागीरथी, अम्भोधिवेलामिव, सागरतटीमिव शरद् जलदान्तर्तुः, शशिमश्चन्द्रमसः, मण्डलीं बिम्बमिव, प्रातःसूर्यप्रभा प्रभातप्रभाकरप्रभा, अब्धिपालीमिव सागरवेलामिव 'पाली वेला तटोच्छ्रासः' इति धनञ्जयः, शारदी-शरत्सम्बन्धिनी, कौमुदी ज्योत्स्ना, अमलकुमुदवनीमिव निर्मलकैरवकाननमिव, इति, एकस्य बहूपमानान्मालोपमालङ्कारः । स्रग्धरावृत्तम् 'म्रभ्नैयानां त्रयेण त्रिमुनि यतियुता स्रग्धरा कीर्तितेयम्' इति लक्षणात् ॥ २० ॥

सौन्दर्यस्येति—यस्य जीवन्धरस्य, आनन्ददायिनी कल्याणप्रदा, मूर्तिः शरीरम्, सौन्दर्यस्य लावण्यस्य, परा चरमा, काष्ठा सीमा, शृङ्गारस्य शृङ्गाररसस्य परा सर्वश्रेष्ठा, गतिः स्थानम्, कलानां वैदग्धीनाम्, खनिराकरः, आसीद् बभूव । रूपकम् ॥ २१ ॥

यस्य चेति— यस्य च जीवन्धरस्य च, रूपं सौन्दर्यम्, रूपेण सौन्दर्येण सम्पन्नो युक्तो देहः शरीरं येषां तेषाम्, आदिमोदाहरणं प्रथमनिदर्शनम्, कान्तिसम्पदां दीप्तिसम्पत्तीनाम्, अधिदैवतम् अधिष्ठातृदेवता, सौन्दर्यस्य लावण्यस्य, संजीवनौषधं संजीवनभैषज्यम्, शृङ्गारस्य रसराजस्य, सङ्केतसदनं सङ्केतभवनम्, सारस्यस्य रसिकत्वस्य सारः श्रेष्ठोंऽशस्तस्य, जीवितरसः चेतनाह्लादः, कलानां वैदग्धीनाम्, केलीभवनं क्रीडासदनम्, नर्मविलासानां क्रीडाविभ्रमाणाम्, शिक्षास्थानं विद्यायतनम्, संगीतविद्यानां गन्धर्वविद्यानाम्, शृङ्गाटकं चतुष्पथस्थानम्, आयताक्षीनयनानां वनिताचक्षुषाम्, आकर्षणौषधं वशीकरणभैषज्यम्, युवतिजनमानसानां तरुणीजनचित्तानाम्, बन्धनगृहं नियन्त्रणभवनम्, सकलजनलोचनानां निखिलनरनयनानाम्, सेचनकमतृप्तिकरम् 'तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्' इत्युक्तत्वात्, कविवचनानां काव्यनिर्मातॄणाम्, अगोचरपदमविषयस्थानम्, कीर्तिस्फूर्तीनां समज्ञोत्साहानाम्, अथवा समज्ञोत्पत्तीनाम्, अङ्कुरक्षेत्रं प्ररोहस्थानं केदारमिति यावत्, जयलक्ष्मीविलासानां विजयश्रीविभ्रमाणाम्, आवासस्थलं निवासस्थानम्, लक्ष्मीश्च सरस्वती चेति लक्ष्मीसरस्वत्यौ तयोः श्रीशारदयोः, आस्थामन्दिरमादरभवनम्, सञ्चरद्भ्रमत्, सकलनयनसुखमिव निखिलजनशातमिव, सचेतनं सजीवम्, महीमहिलाभाग्यमिव पृथिवीपुरन्ध्रीभागधेयमिव, साकारं संस्थानसहितम्, प्रतापपटलमिव तेजःसमूह इव, सजीवं सचेतनम्, गाम्भीर्यमिव स्थैर्यमिव, सङ्गीभूतं पुञ्जीभूतम्, शौर्यमिव पराक्रम इव, सरूपधेयं सौन्दर्यसहितम्, कुरुवंशस्य सत्यन्धरवंशस्य भागधेयमिव भाग्यमिव, वेधसो ब्रह्मणः, सकलशिल्पनैपुण्यस्य निखिलशिल्पकौशलस्य प्रदर्शनं प्रदर्शनस्थानम्, उदजृम्भत वर्धयामास । रूपकोत्प्रेक्षे ।

अथैकदेति—अथानन्तरम्, एकदैकस्मिन् काले 'सर्वैकान्य किंयत्तदःकाले दा' इति दाप्रत्ययः, मर्त्याकृतिं मनुष्याकारं प्राप्तो लब्धः, अन्धकार इव ध्वान्तमिव, कृत्येन कार्येण परमारणात्मकेनेति यावत्, नाम्नापि च नामधेयेनापि च, कालकूटो हालाहलविषं कालकूटसंज्ञश्च, सेनायुतः पृतनासहितः, व्याधजनानां भिल्लजनानामधिराजः स्वामी, सकलाः समस्ताः, गा धेनूः, जहार—अहार्षीत् ॥ २२ ॥

तदनु गोपाक्रोशवशविदितवृत्तान्तः काष्ठाङ्गारोऽपि, असमानकृतामवज्ञां मृगाधिप इव शृगालकृतामसहमानः, अन्तर्दीप्यमानक्रोधानलज्वालाभिरिव पाटलरुचिभिराक्रान्तवदनः, शात्रवनितम्बिनीगर्भसमाविर्भूतार्भकनिर्भेदनपटुतरैर्भेरीभांकारैस्तिरोहितपारावाररवम्, कालकूटापदेशेन पुञ्जीभूतस्य तिमिरस्य संहरणाय विधात्रा विरचितैरनेकविवस्वन्मण्डलमण्डितैरुदयाचलैरिव कनकखेटककलितकुम्भस्थलैर्दन्तावलैः, संदानितलोहखलीनवदनबिलनिर्गलल्लालाजलफेनिलाननतया जन्याजिरकरिष्यमाणसपत्नयशःपानमनुकुर्वद्भिरिवार्वद्भिः, रथकड्यया, पादातेन च समधिकमनीकम्, कालकूटबलपाटनाय प्राहिणोत्।

वरूथिनीं वीक्ष्य स कालकूटः स्वकं पुरोधाय बलं चचाल।
प्रत्यर्थिसैन्यं परितो दिधक्षुः कोपाग्निना मृत्युरिव क्षणेन ॥ २३ ॥

तदनु मिलितं सैन्यद्वन्द्वं बलादुपचक्रमे
समरमतुलं पत्रिव्रातैर्विदीर्णपरस्परम्।
चलदसिलताघातैर्भिन्नेभकुम्भविनिर्गल-
न्मणिगणविभापूरैर्दीप्रं रजोऽन्धितमप्यलम् ॥ २४ ॥

तदन्विति—तदनु तदनन्तरम्, गोपानां धेनुपालकानाम्, आक्रोशवशेनाक्रन्दनस्याधीन्येन विदितोऽवगतो वृत्तान्तो येन सः, काष्ठाङ्गारोऽपि तात्कालिकनृपोऽपि, असमानकृतामसदृशजनविहिताम्, अवज्ञामनादृतिम्, शृगालकृतां गोमायुविहिताम्, मृगाधिप इव पञ्चानन इव, असहमानः सोढुमसमर्थो भवन्, अन्तर्दीप्यमाना हृदये प्रज्वलन्त्यो या क्रोधानलज्वाला कोपाग्न्यर्चींषि ताभिरिव, पाटलरुचिभिः श्वेतरक्तदीप्तिभिः, 'श्वेतरक्तस्तु पाटलः' इत्यमरः, आक्रान्तं व्याप्तं वदनं मुखं यस्य सः, शात्रवनितम्बिनीनां शत्रुस्त्रीणां गर्भेषु जठरेषु समाविर्भूताः समुत्पन्ना येऽर्भकाः शिशवस्तेषां निर्भेदने खण्डने पटुतरा दक्षतरास्तैः, भेरीभाङ्कारैरानकध्वनिभिः, तिरोहितोऽन्तर्धापितः पारावारस्य सागरस्य रवो नादो येन तत्, अनीकमित्यस्य विशेषणम्, कालकूटस्य व्याधजनाधिराजस्यापदेशो व्याजं तेन, पुञ्जीभूतस्य राशीभूतस्य, तिमिरस्य ध्वान्तस्य, संहरणाय विनाशाय, विधात्रा ब्रह्मणा, विरचितैः सृष्टैः, अनेकविवस्वतां बहुसूर्याणां मण्डलैर्बिम्बैर्मण्डिताः शोभितास्तैः, उदयाचलैरिव सूर्योदयशैलैरिव, कनकखेटैः सुवर्णमौलिभिः कलितानि युक्तानि कुम्भस्थलानि गण्डस्थलानि येषां तैः, दन्तावलैर्गजैः, संदानितं योजितं लोहखलीनमायसकविका येषु तथाभूतानि यानि वदनबिलानि मुखविवराणि तेभ्यो निर्गलन्निष्पतद्यल्लालाजलं लालातोयं तेन फेनिलं डिण्डीरयुक्तमाननं वक्त्रं येषां तेषां भावस्तत्ता तया, जन्याजिरे समराङ्गणे करिष्यमाणं विधास्यमानं यत् सपत्नयशःपानं शत्रुकीर्तिपानं तत्, अनुकुर्वद्भिर्विडम्बयद्भिः, अर्वद्भिर्हयैः, रथानां स्यन्दनानां समूहो रथकड्या (रथकड्या) तया, 'खलगोरथात्' इति प्रकरणे 'इनित्रकट्यचश्च' इति समूहार्थे कट्यच् प्रत्ययः, पदातीनां समूहः पादातं तेन पत्तिसमूहेन च, समधिकं प्रभूतम्, अनीकं सैन्यम्, कालकूटस्य शबरराजस्य बलं सैन्यं तस्य पाटनं विदारणं तस्मै। प्राहिणोत् प्रेषयामास।

वरूथिनीमिति—स कालकूटशबरराजः, वरूथिनीं काष्ठाङ्गारसेनाम्, वीक्ष्य दृष्ट्वा, स्वकं स्वकीयम्, बलं सैन्यम्, पुरोधायाग्रे कृत्वा, परितः समन्तात्, प्रत्यर्थिसैन्यं शत्रुपृतनाम्, कोपाग्निना क्रोधानलेन, क्षणेनाल्पकालेन, दग्धुमिच्छुर्दिधक्षुः सन्, मृत्युरिव यम इव, चचाल चलतिस्म। युद्धाय तत्परो बभूवेति भावः ॥ २३ ॥

तदन्विति—तदनु तदनन्तरम्, मिलितं संगतम्, सैन्यद्वन्द्वं सेनायुगलम्, बलाद् हठात्, अतुलमनुपमम्, समरं युद्धम्, उपचक्रमे प्रारब्धं चकार 'प्रोपाभ्यां समर्थाभ्याम्' इत्यात्मनेपदम्। अथ समरस्य विशेषणान्याह—पत्रिव्रातैर्बाणसमूहैः विदीर्णं खण्डितं परस्परमन्योऽन्यं यस्मिंस्तत्, रजसा परागेणान्धितमपि तिमिरितमपि, चलन्तीनामसिलतानां खड्गवल्लीनां घाताः प्रहारास्तैः भिन्नाः खण्डिताश्च इभकुम्भा गजगण्डास्तेभ्यो विनिर्गलतां बहिर्निःसरतां मणिगणानां रत्नसमूहानां विभापूरैः कान्तिसमूहैः, अलमत्यर्थम्, दीप्तं दीप्तियुक्तम्। हरिणीच्छन्दः ॥ २४ ॥

तदानीम्, अमित्रकरकलितमण्डलाग्रखण्डितगण्डतलनिःसरदसृग्धाराराजितगजतायां गैरिकधातुनिःसृतनिर्झरशोभितोभयभागधराधरानुकारिण्याम्, घनकीलालपङ्किलसमराजिरे निजखुरनिमज्जनशङ्कयेव गगनगमनतुङ्गेषु [1]निषादिजनविषादभङ्गेषु तुरङ्गेषु नाम्नेव कृत्येन च मदोत्कटकरटिघटायां हरिरिति विख्यातिं प्रख्यापयत्सु, करलाघववशेनालक्ष्यशरसन्धानमोक्षणकालेषु सदा समारोपितशरासनतयालेख्यलिखितेष्विव धानुष्केषु पद्गगनतलचराचरकरालकरवालखण्डितमस्तकनिकरेष्वतिदूरमुत्पत्य गगनजलधिशतपत्रशङ्काकरेषु, पुरुषद्वयसप्रवहल्लोहितवाहिनीसेतुशङ्कासंपादकभिन्नमतङ्गजगात्रपरंपराबन्धुरायामायोधनधरायाम्, व्याधयोधनिरन्तरनिर्मुक्तनाराचधारापूरिताङ्गेषु, व्याधसेना व्याजेष्टेति घोषो घोषान्तरमुत्तरङ्गयामास।

[2]तदोरुजानामधिभूः स्वमित्रैरालोच्य निश्चित्य च नन्दगोपः।
विवक्षितं तस्य नृपस्य कर्णपथप्रवृत्तं चतुरश्चकार ॥ २५ ॥

तदानीमिति—तदानीं तस्मिन्काले, अमित्राणां शत्रूणां करकलितैर्हस्तधृतैर्मण्डलाग्रैः कृपाणैः खण्डिताच्छिदारिताद् गण्डतलात्कटप्रदेशान्निःसरन्तीभिर्निर्गच्छन्तीभिरसृग्धाराभी रुधिरवेणीभी राजिता शोभिता या गजता गजसमूहस्तस्याम् 'गजसहायाभ्यां चेति वक्तव्यम्' इति समूहार्थे तल्प्रत्ययः। गैरिकधातुभ्यो रक्तवर्णमृत्तिकाप्रदेशेभ्यो निःसृता निर्गता ये निर्झरा वारिप्रवाहास्तैः शोभितौ राजितावुभयभागावुभयतटौ यस्य तथाभूतो यो धराधरः पर्वतस्तस्यानुकारिण्यां विडम्बिन्यां सत्याम्, घनकीलालेन सान्द्ररुधिरेण पङ्किलं कर्दमयुक्तं यत्समराजिरं युद्धाङ्गणं तस्मिन्, निजखुराणां स्वकीयशफानां निमज्जनस्य वगाहनस्य शङ्का संशीतिस्तयेव, गगनगमनाय नभोयानाय तुङ्गा उन्नता उच्छलन्त इति यावत् तेषु, निषादिजनानामारोहिनराणां विषादस्य खेदस्य भङ्गो विनाशो यैस्तेषु, तुरङ्गेषु हयेषु, नाम्नेव नामधेयेनेव कृत्येन च कार्येणापि 'हरिः' हय इति नाम्नेव 'हरिः' सिंहस्तस्य कार्येणापीति भावः। 'सप्तिर्वा हरीरथ्यः' इति धनंजयः, 'सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः' इत्यमरः, मदेन दानेनोत्कटा उद्दण्डाः ये करटिनो हस्तिनस्तेषां घटा समूहस्तस्याम्, हरिरिति सिंह इति विख्यातिं प्रसिद्धिम्, प्रख्यापयत्सु विस्तारयत्सु सत्सु, करलाघववशेन हस्तक्षिप्रकारित्ववशेनालक्ष्यो दृश्यगोचरः शरसन्धानमोक्षणयोर्बाणधारणमोचनयोः कालः समयो येषां तेषु, धानुष्केषु धनूंषि प्रहरणानि येषां तेषु धनुर्धरेषु, सदा शश्वत्, समारोपितं सगुणीकृतं शरासनं धनुर्यैषां तेषां भावस्तत्ता तया, आलेख्यलिखितेष्विव चित्रलिखितेष्विव सत्सु, पद्गगनतलयोश्चरणनभःप्रदेशयोश्चराचरैरतिशयचपलैः करालैर्भयङ्करैः करवालैः कृपाणैः खण्डितानां छिन्नानां मस्तकानां शिरसां निकराः समूहास्तेषु 'चरिचलिपतिवदीनां वा द्वित्वमच्याक् चाभ्यासस्येति वक्तव्यम्' इति वार्तिकेन चराचरपदस्य सिद्धिः। अतिदूरमतिविप्रकृष्टम्, उत्पत्योद्गत्य, गगनमेव जलधिर्गगनजलधिराकाशपारावारस्तस्य शतपत्राणां कमलानां शङ्काकराः संदेहोत्पादकास्तेषु तथाभूतेषु सत्सु, पुरुषद्वयस्य पुरुषप्रमाणाः प्रवहन्त्यः प्रकर्षेण गच्छन्त्यो या लोहितवाहिन्यो रुधिरस्रवन्त्यस्तासां सेतुशङ्कायाः पुलिनसंशयस्य संपादिका या भिन्नमतङ्गजानां खण्डितगजानां गात्रपरम्परा शरीरसन्ततिस्तया बन्धुरा नतोन्नता तस्यां तथाभूतायाम्, आयोधनधरायां समरभूमौ सत्याम्, व्याधयोधैर्भिल्लभटैर्निरन्तरं निरवकाशं यथा स्यात्तथा निर्मुक्ता त्यक्ता या नाराचधारा बाणपङ्क्तयस्ताभिः पूरितानि संभृतान्यङ्गानि शरीराणि येषां तेषु, काष्ठाङ्गारस्येमे इति काष्ठाङ्गारिकाः, ते च ते सैनिकाश्च योधाश्चेति काष्ठाङ्गारिकसैनिकास्तेषु, दिशि दिशि प्रतिकाष्ठम्, कान्दिशीकतां भयद्रुतताम्, 'कान्दिशीको भयद्रुते' इत्यमरः, प्रापितेषु लम्भितेषु सत्सु, व्याधसेना शबरपृतना, व्याजेष्ट विजययुक्ता बभूव, इति घोषः शब्दः, घोषाणामाभीराणामन्तरं हृदयं तदवगाहनप्रदेशं वा, उत्तरङ्गयामास क्षोभयामास।

तदोरुजानामिति—तदा काष्ठाङ्गारपृतनापराजये सति, ऊरुजानां वैश्यानाम्, अधिभूः स्वामी, चतुरो निपुणः, तात्कालिककार्यसाधनपटुरिति यावत्, नन्दगोप एतन्नामा, स्वमित्रैः स्वकीयसुहृद्भिः, आलोच्य विचार्य, निश्चित्य च स्थिरीकृत्य च, वक्तुमिष्टं विवक्षितं स्वाभिप्रेतमिति यावत्, तस्य नृपस्य काष्ठाङ्गारस्य, कर्णपथे श्रवणमार्गे प्रवृत्तं प्राप्तम्, चकार विदधौ। स्वाभिप्रायं तं श्रावयामासेति भावः ॥ २५ ॥

---

१. -षादिजन ब० । २. तदा प्रदानामभिभूः (?) ब० ।

तदनु पुलिन्दसंदोहतो गोविमोक्षणं विधास्यते दास्यते गोपेन्द्रनन्दगोपनन्दिनी समचामीकरपुत्रिकाभिः साकमिति पटुतरं पुटभेदनचत्वरे काष्ठाङ्गारेण कारितां घोषणां निशम्य विशालतरकुतुकः सात्यंधरिस्तद्धोषं निवारयामास ।

सहायताधिष्ठितपार्श्वभागो जीवन्धरो मन्दिरतः प्रतस्थे ।
द्विपैरनेकैः परिवार्यमाणो हिमाद्रिरन्ध्रादिव यूथनाथः ॥ २६ ॥

ततो निजयशःकलशार्णवतरङ्गैरिव चामरयुगलपरिशोभितपार्श्वतया नभःसरणिसञ्चरणयोग्यौ पक्षाविव बिभ्राणैः लपनबिलतलविगलितफेनशकलदन्तुरितपुरोभागतया रयविजितपवनसमानीतमुक्तोपहारानिवाङ्गीकुर्वाणैः स्यदनिरीक्षणक्षणह्रीणान्हरिदश्वहरिताश्वान्गगनकाननदुर्गेषु धावमानानन्वेष्टुमिव गगनसरणिमुत्पतद्भिर्जयोदर्कैः कर्कैः परिष्कृतान्रथानलंकुर्वन्तः, शताङ्गचक्रक्षुण्णक्षितितलोद्भूतधूलिकापालिकां सकलजगदन्धंकरणधुरीणां पताकापटपवनेन धून्वन्तः, देहबद्धा इव वीररसाः, मूर्ता इवोत्साहाः, जयलक्ष्मीनिवासमन्दिरकनकप्राकारायिताङ्गदविभ्राजितभुज-

तदनु पुलिन्देति—तदनु तदनन्तरम्, पुलिन्दसन्दोहतः शबरसमूहात्, गवां धेनूनां विमोक्षणं प्रत्याहरणं तदिति गोविमोक्षणम्, विधास्यतीति विधास्यन् तस्मै करिष्यते 'लृटः सद्वा' इति भविष्यदर्थे लृटः शतृ प्रत्ययः, जनायेति शेषः, सम च ताश्चामीकरपुत्रिकाश्च सुवर्णपुत्तलिकाश्चेति ताभिः, साकं सार्धम्, गोपेन्द्रश्चासौ नन्दगोपश्चेति गोपेन्द्रनन्दगोपस्तस्य नन्दिनी पुत्री, दास्यते वितरिष्यते प्रदत्ता भविष्यतीति भावः, इत्येवं प्रकाराम्, पटुतरं तिग्मतरं यथा स्यात्तथा, पुटभेदनस्य पत्तनस्य चत्वरं चतुष्पथं तस्मिन् 'पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम्' इत्यमरः, काष्ठाङ्गारेण नृपेण, कारितां विधापितास्, घोषणां सूचनाम्, निशम्य श्रुत्वा विशालतरं महत्तरं कुतुकं कौतूहलं यस्य तथाभूतः, सात्यन्धरिर्जीवन्धरः, तद्घोषं तां घोषणाम्, निवारयामास प्रतिषेधयामास ।

सहायतेति—सहायानां मित्राणां समूहः सहायता 'गजसहायाभ्यां चेति वक्तव्यम्' इति समूहार्थे तल् प्रत्ययः, तयाधिष्ठितो युक्तः पार्श्वभागो निकटप्रदेशो यस्य तथाभूतः, जीवंधरः सात्यन्धरिः मन्दिरतो भवनात्, अनेकैर्बहुभिः, द्विपैर्गजैः, परिवार्यमाणः परिवेष्ट्यमानः, यूथनाथो गणपतिः गजसमूहपतिरिति यावत्, हिमाद्रेर्हिमालयस्य रन्ध्रादिव विवरादिव, प्रतस्थे प्रययौ ॥ २६ ॥

ततो निजयश इति—ततः प्रस्थानानन्तरम्, निजयशः स्वकीयकीर्तिरेव कलशार्णवः क्षीरसागरस्तस्य तरङ्गैरिव कल्लोलैरिव, चामरयुगलेन बालव्यजनयुग्मेन परिशोभितं समलङ्कृतं पार्श्वमुभयतटं येषां तेषां भावस्तत्ता तया, नभःसरणौ गगनमार्गे सञ्चरणयोग्यौ प्रयाणार्हौ, पक्षौ गरुतौ, बिभ्राणैर्दधद्भिरिव, लपनबिलतलान्मुखरन्ध्रतलाद्विगलितानि पतितानि यानि फेनशकलानि डिण्डीरभित्तानि तैर्दन्तुरितो व्याप्तः पुरोभागोऽग्रप्रदेशो येषां तेषां भावस्तत्ता तया, रयेण वेगेन विजितः पराभूतो यः पवनो वायुस्तेन समानीताः समर्पिता ये मुक्तानामुपहारा मौक्तिकोपायनानि तान्, अङ्गीकुर्वाणैरिव स्वीकुर्वद्भिरिव, स्यदस्य वेगस्य निरीक्षणक्षणे विलोकनवेलायां ह्रीणा लज्जितास्तान्, अतएव गगनकाननमेव नभोऽटव्येव दुर्गां दुर्गमस्थानानि तेषु, धावमानान् पलायमानान्, हरिदश्वस्य भास्वतो हरिताश्वा हरिद्वर्णहयास्तान् 'भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः' इत्यमरः, अन्वेष्टुमिव मार्गयितुमिव, गगनसरणिं गगनमार्गम्, उत्पतद्भिरुत्प्लवद्भिः, जयोदर्कैर्विजयफलैः, कर्कैः श्वेताश्वैः, परिष्कृतान् सहितान्, रथान् स्यन्दनान्, अलंकुर्वन्तः शोभयन्तः, सकलजगतो निखिललोकस्यान्धंकरणे दृष्ट्यपहरणे धुरीणा निपुणा ताम्, शताङ्गानां रथानां चक्रै रथाङ्गैः क्षुण्णाद् विदारितात् क्षितितलाद् भूतलाद् उद्भूतोत्पन्ना या धूलिकापालिका रेणुसन्ततिस्ताम्, पताकापटपवनेन वैजयन्तीवस्त्रवायुना, धून्वन्तो दूरीकुर्वन्तः देहबद्धाः शरीरधारिणः, वीररसा इव—उत्साहस्थायिभावकरसा इव, मूर्ताः सशरीराः, उत्साहा इव स्फूर्तिसमूहा इव, जयलक्ष्म्या विजयश्रिया अभिवासमन्दिरं निवासभवनं तस्य कनकप्राकारायितं सुवर्णपरिखायमाणं यदङ्गदं केयूरं तेन विभ्राजितः शोभितो भुजदण्डो बाहुदण्डो येषां ते, लक्ष्म्याः श्रिया विहारः क्रीडा तस्य लीलाडोलायितं केलिहिन्दोलिकावदाचरितं यन्मुक्तादाम मौक्तिकं स्रक् तेन विराजितमलंकृतं वक्षःस्थल

वृन्दाः, लक्ष्मीविहारलीलादोलायितमुक्तादामविराजितवक्षःस्थलाः, ते जीवन्धरप्रमुखाः, कार्मुकटङ्कारक्ष्वेलारवमुखरितदिशावकाशाः संयदङ्गणं समाजग्मुः ।

प्रविदारणमाविरास तत्र प्रथमं बाणगणैः परस्परम् ।
अरुषा च रुषा क्षणं विहीनं विशिखादप्यभवच्छिखी यतः ॥२७॥

नखांशुमयमञ्जरीसुरभिलां धनुर्वल्लरीं
समागतशिलीमुखां दधदयं हि जीवन्धरः ।
अनोकह इवाबभौ भुजविशालशाखाञ्चितो
निरन्तरजयेन्दिराविहरणैकसंवासभूः ॥२८॥

कुण्डलीकृतशरासनान्तरे जीवकाननममर्षपाटलम् ।
स्पर्धते परिधिमध्यमास्थितं चन्द्रबिम्बमिह सन्ध्ययारुणम् ॥२९॥

जीवन्धरेण निर्मुक्ताः शरा दीप्रा विरेजिरे ।
विलीनान्समिति व्याधान्द्रष्टुं दीपा इवागताः ॥३०॥

तदनु जिष्णुचापचुम्बिजीवन्धराम्बुधरनिरवग्रहनिर्मुक्तशरधाराभिः कालकूटबलप्रतापानले

मुरःस्थलं येषां ते, ते पूर्वोक्ताः, जीवन्धरः सात्यन्धरिः प्रमुखः प्रधानो येषां तथाभूताः, कार्मुकटङ्कारश्च कोदण्डमौर्वीशब्दविशेषश्च क्ष्वेलारवश्च सिंहनादश्चेति कार्मुकटङ्कारक्ष्वेलारवौ ताभ्यां मुखरिता वाचालिता दिशावकाशाः काष्ठामध्यप्रदेशा यैस्तथाभूताः सन्तः, संयदङ्गणं युद्धाङ्गणम्, समाजग्मुः समाययुः ।

प्रविदारणमिति—तत्र समराङ्गणे, प्रथमं पूर्वम्, परस्परमन्योऽन्यम्, बाणगणैः शरसमूहैः, तत् प्रविदारणं युद्धम्, आविरास प्रकटीबभूव यत् क्षणमल्पकालं यावत्, रुषा क्रोधेन, अरुषा क्रोधाभावेन च विहीनमासीदिति विरोधः, परिहारपक्षे 'अरुषा' इत्यस्य 'व्रणेन' इत्यर्थो ग्राह्यः, 'व्रणोऽस्त्रियामीर्ममरुः' इत्यमरः । किञ्च, यतो यत्र, सार्वविभक्तिकस्तसिल्, विगता शिखा यस्य स विशिखः शिखारहितस्तस्मादपि, शिखास्ति यस्य स शिखी शिखायुक्तः, अभवद्बभूवेति विरोधः, विशिखाद् बाणादपि शिखी वह्निरभवदिति परिहारः । विरोधाभासोऽलङ्कारः ॥ २७ ॥

नखांशुमयेति—नखांशुमय्यो नखरश्मिरूपा या मञ्जर्यः पुष्पस्रजस्ताभिः सुरभिला सुगन्धिता ताम्, समागताः प्राप्ताः शिलीमुखा बाणाः पक्षे भ्रमरा यस्यां ताम्, धनुर्वल्लरीं चापलताम्, दधत् बिभ्रत्, भुजा एव विशालशाखा इति भुजविशालशाखा बाहुदीर्घशाखास्ताभिरञ्चितः शोभितः, निरन्तरं शश्वत् जयेन्दिराया विजयलक्ष्म्या विहरणस्य विहारस्यैकसंवासभूर्मुख्यनिवासभूमिः, अयं जीवन्धरः एष सात्यन्धरिः, अनसः शकटस्याकं गतिं हन्तीत्यनोकहो वृक्षः स इव, आबभौ शुशुभे । रूपकोपमे । पृथ्वीच्छन्दः 'जसौ जस यला वसुग्रहयतिश्च पृथ्वी गुरुः' इति लक्षणात् ॥ २८ ॥

कुण्डलीकृतेति—कुण्डलीकृतं वर्तुलीकृतं यच्छरासनं धनुस्तस्यान्तरे मध्ये स्थितमिति शेषः, अमर्षेण क्रोधेन पाटलं श्वेतरक्तमित्यमर्षपाटलम्, जीवकस्य जीवन्धरस्याननं मुखमिति जीवकाननम्, इह लोके, परिधिमध्यं परिवेषाभ्यन्तरम्, आस्थितं विद्यमानम्, सन्ध्यया सायम् 'सायं सन्ध्या पितृप्रसूः' इत्यमरः, अरुणं रक्तवर्णम्, चन्द्रबिम्बं शशिमण्डलम्, स्पर्धतेऽसूयति । उपमालंकारः । रथोद्धतावृत्तम्, 'रान्नराविह रथोद्धता लगौ' इति लक्षणात् ॥ २९ ॥

जीवन्धरेणेति—जीवन्धरेण विजयासुतेन, निर्मुक्तास्त्यक्ताः, दीप्रा दीप्तिमन्तः, शरा बाणाः, समिति युद्धे, विलीनान् तिरोहितान् व्याधान्, किरातान्, द्रष्टुमवलोकयितुम्, आगता आयाताः, दीपा दीपका इव, विरेजिरे शुशुभिरे । उत्प्रेक्षा ॥ ३० ॥

तदन्विति—तदनु तदनन्तरम्, जिष्णुचापं विजेतृधनुः पक्षे शक्रशरासनं चुम्बति दधातीति जिष्णुचापचुम्बी स चासौ जीवन्धरश्च, स एवाम्बुधरो मेघस्तेन निरवग्रहं निष्प्रतिबन्धं यथा स्यात्तथा निर्मुक्तास्त्यक्ता याः शरधारा बाणपङ्क्तय एव जलधारास्ताभिः, कालकूटस्य शबरराजस्य बलं सैन्यं तस्य

शान्ततां नीते, निशितशस्त्रनिकृत्तकुञ्जरपदकच्छपाः, भल्लावलूनहयमल्लाननपयोजपरिष्कृताः मदवारणकर्णभ्रष्टचामरहंसावतंसिताः, कीलालवाहिन्यः समीकधरायां परःसहस्रमजायन्त।

जित्वा किरातबलमेष यशःप्रसूनै-
राशाविशालनयनाः सुरभीचकार।
क्षीराम्बुदानिव सदा प्रवहत्पयोभिः
सिक्तान्तिकान्पशुगणानहरच्च धीरः ॥३१॥

पुरा खलु यः शम्बरारातिश्चापलालिजीवन्धरश्च जगति विश्रुतो बभूव, सोऽयमधुना शबरारातिश्चापलालिजीवन्धरश्च संवृत्त इति, न बिन्दुमात्रेणापि विशेषः। पूर्वं सारसशरोऽयमधुना सरसशर इत्याकारतो विशेषेऽप्याकारसाम्यमखण्डितमुल्लसत्येवास्येति विचित्रमेतत्। अथ पौराणां हर्षातिरेक एतावानिति गगनतलप्रसारितवैजयन्तीभुजाभिर्बोधयदिव मोदोत्तरमेतत्पुरं प्रविश्य स्वयं विशिखाधारस्यापि विशिखाधेयतामास्कन्दतः सकलवयस्यमण्डलमध्यमध्यासीनस्य जीव-

---

प्रताप एव तेज एवानलो वह्निस्तस्मिन्, शान्ततां शान्तिम्, नीते प्रापिते सति, समीकधरायां युद्धभूमौ, परःसहस्रं सहस्रादप्यधिकाः, कीलालवाहिन्यो रुधिरनद्यः, अजायन्त प्रादुरभूवन्, कथंभूताः कीलालवाहिन्य इत्याह—निशितैस्तीक्ष्णैः शस्त्रैरायुधैः निकृत्तानि छिन्नानि कुञ्जरपदान्येव हस्तिचरणा एव कच्छपाः कूर्मा यासु ताः, भल्लैः कुन्तैरवलूनानि खण्डितानि यानि हयमल्लाननान्यश्वारोहिवीरवदनानि तान्येव पयोजानि पद्मानि तैः परिष्कृताः शोभिताः, मदवारणानां मत्तमतङ्गजानां कर्णेभ्यः श्रवणेभ्यो भ्रष्टा ये चामरा एव प्रकीर्णका एव हंसा मरालास्तैरवतंसिताः शोभिताः।

जित्वेति—एष जीवन्धरः किरातबलं शबरसैन्यम्, जित्वा पराभूय, यशःप्रसूनैः कीर्तिकुसुमैः, आशा एव काष्ठा एव विशालनयना आयताक्ष्यस्ताः, सुरभीचकार सुगन्धयामास। च किञ्च, धीरो वीरः, सः, सदा सर्वदा, प्रवहत्पयोभिः प्रक्षरत्क्षीरैः, सिक्तान्तिकान् उक्षिताभ्यर्णान्, क्षीराम्बुदानिव दुग्धवारिदानिव, पशुगणान् गोसमूहान्, अहरत्प्रत्यावर्तयत्, रूपकोपमे। वसन्ततिलकावृत्तम् 'ज्ञेया वसन्ततिलका तभजा जगौ गः' इति लक्षणात् ॥ ३१ ॥

पुरा खल्विति—पुरा पूर्वम्, खलु निश्चयेन, यः शम्बरारातिर्मनसिजः काम इति यावत् 'शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः' इत्यमरः, चपला एव चापलाश्चञ्चलास्ते च तेऽलयश्च भ्रमराश्चेति चापलालय स्तैर्जीवन्धरः प्रत्यञ्चाधरः, कामकोदण्डस्य भ्रमरमौर्वीकत्वं कविसमयसिद्धम्, इति च, जगति भुवने विश्रुतः प्रख्यातः, बभूव, सोऽयम्, अधुना साम्प्रतम्, शबरारातिर्भिल्लरिपुः, चापलाली धनुःशोभी चासौ जीवन्धरश्च विजयासुतश्चेति चापलालिजीवन्धरश्च, संवृत्तो बभूव इतीत्थम्, न बिन्दुमात्रेणाप्यनुस्वारमात्रेणापि, विशेषो व्यतिरेकः। अयमेव काम इति भावः, पूर्वं प्राक्, अयं जीवन्धरः, सारसं सरसीरुहं शरो बाणो यस्य स काम इति यावत् 'सारसं सरसीरुहम्' इत्यमरः 'अरविन्दमशोकं च चूतं च नवमल्लिका' इत्यभिधानात्कामस्य कमलशरत्वं कविसमयसिद्धम्, अधुना साम्प्रतम्, सरसः सबलः शरो बाणो यस्य स सरसशरः, अस्तीति शेषः, इत्याकारतः संस्थानात् पक्षे आकारवर्णात्, विशेषेऽपि व्यतिरेकेऽपि, अस्य सत्यन्धरसुतस्य, अखण्डितमन्यूनम्, आकारसाम्यं संस्थानसादृश्यम्, उल्लसत्येव शुम्भत्येव, इत्येतद् विचित्रमाश्चर्यकरम्।

अथ पौराणामिति—अथ विजयानन्तरम्, पौराणां नागरिकाणाम्, हर्षातिरेकः प्रमोदाधिक्यम्, एतावानियत्प्रमाणः, इत्येवम्, गगनतले नभस्तले प्रसारिता विस्तारिता वैजयन्त्यः पताका एव भुजा बाहवस्ताभिः बोधयदिव सूचयदिव, मोदोत्तरं हर्षप्रधानम्, एतत्पुरं राजपुराभिधानं नगरम्, प्रविश्य प्रवेशं कृत्वा, विशिखाधारस्यापि रथ्याधारस्यापि सतः, विशिखाधेयतां रथ्याधेयतामास्कन्दतः इति विरोधः, यो विशिखानामाधारः स एव तासामाधेयः कथं भवतीति विरोधः स्पष्टः। परिहारपक्षे स्वयम्, विशिखं हृदयं तस्याधारः समाश्रयस्तथाभूतस्यापि सतः विशिखाया रथ्याया आधेयतामास्कन्दतः, मार्गे गच्छत इति यावत्, सकलं च तद् वयस्यमण्डलञ्चेति सकलवयस्यमण्डलं निखिलमित्रसमूहस्तस्य मध्यम्, अध्यासीनस्याधिष्ठितः, जीवन्धरस्य सात्यन्धरेः शौर्यं च स्थैर्यं च धैर्यञ्चेति शौर्यस्थैर्यधैर्याणि शूरत्वस्थिरत्वधीरत्वानि

न्धयेऽस्य देहसहकारे शौर्यस्थैर्यधैर्यमञ्जरीमञ्जुले कीर्तिसौरभ्याकर्षिताः पौरजानपदनयनपुष्पन्धया निरन्तरमापेतुः ।

नन्दगोप इति विश्रुतमेघः संमदाम्बुनिधिमाशु निपीय ।
वारिपातमकरोत्करपद्मे जीवकस्य शुभलक्षणजुष्टे ॥३२॥

जीवन्धरोऽपि नन्दगोपेन पातितामच्छवारिधारां तत्सहचरीं मन्दस्मितप्रकाशितकुन्दकुड्मलरुचिवीचिस्नापितामिव 'पद्मास्यो योग्यः' इति शुद्धवर्णां वचोधारां पातयन्नेवोरीकुर्वन्, दूरीकृतस्पृहः 'मम पद्मास्यस्य च भावभेदो न तु जीवभेदः' इति मैत्रीविभवं विभावयन्, तत्परिणयमहोत्सवारम्भं सत्रा मित्रामित्रजनानन्ददोषाभ्यां कन्दलयामास ।

शुभे मुहूर्ते स हि नन्दगोपसुताकराब्जग्रहणं चकार ।
वह्निं पुरस्कृत्य विधिं विधाय पद्मास्यनामा परिणीतियोग्यः ॥३३॥

गोविन्दायास्तनुतनुलतां चञ्चलाप्रत्यनीकां
कान्त्या पुष्यत्कनककदलीकन्दलीगर्भगौरीम् ।
हेलोन्मीलत्कुचयुगलसन्मौक्तिकस्रक्प्रभाभिः
स्पष्टाभ्यर्णां स हि बहुमुदा चक्षुषा पश्यति स्म ॥३४॥

तान्येव मञ्जर्यः पुष्पस्रजस्ताभिर्मञ्जुलो मनोहरस्तस्मिन्, देहसहकारे शरीरातिसौरभाम्रे 'आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः' इत्यमरः, कीर्तिसौरभ्येण यशःसौगन्ध्येनाकर्षिता वशीभूताः, पौरजानपदानां नागरिकराष्ट्रवासिजनानां नयनान्येव लोचनान्येव पुष्पंधया भ्रमराः निरन्तरं निष्प्रतिबन्धं यथा स्यात्तथा, आपेतुः पतन्तिस्म, ते तं ददृशुरिति भावः ।

नन्दगोप इति—नन्दगोप इति नाम्ना विश्रुतश्चासौ मेघश्चेति विश्रुतमेघः प्रसिद्धवारिवाहः, आशु झटिति, संमद एवाम्बुनिधिस्तं हर्षसागरम्, निपीय नितरां पीत्वा, शुभलक्षणैः शङ्खचक्रादिशुभसामुद्रिकचिह्नैर्जुष्टं सेवितं तस्मिन्, जीवकस्य जीवन्धरस्य करपद्मे हस्तकमले, वारिपातं जलपातं कन्यादानसंकल्पार्थं जलधारापातमिति भावः अकरोद् विदधौ । स्वागतावृत्तम्—'स्वागतेति रनभाद्गुरुयुग्मम्' इति लक्षणात् ॥ ३२ ॥

जीवन्धरोऽपि—जीवन्धरोऽपि सात्यन्धरिरपि, नन्दगोपेन तन्नाम्ना गोपवरेण, पातितां मोचिताम्, अच्छवारिधारां निर्मलजलधाराम्, तस्या अच्छवारिधारायाः सहचरीं सखीं सदृशीति यावत् ताम्, मन्दस्मितेन मन्दहसितेन प्रकाशिताः प्रकटिता याः कुन्दकुड्मलरुचयो माघ्यमुकुलमरीचयस्तासां वीचिभिः सन्ततिभिः स्नपितामिव प्रक्षालितामिव, 'पद्मास्यो योग्यः पद्मास्याभिधानः सखा योग्यस्त्वत्पुत्र्या उचितो वरः' इत्येवं प्रकाराम्, शुद्धवर्णां शुद्धाक्षराम्, वचोधारां वचनपङ्क्तिम्, पातयन् प्रकटयन्नेव, ऊरीकुर्वन् स्वीकुर्वन्, दूरीकृता स्पृहा येन स त्यक्तनन्दगोपकन्याभिलाषः, मम पद्मास्यस्य च भावभेदः पर्यायभेदोऽस्ति न तु जीवभेदः प्राणभेदोऽस्ति, इत्येवं मैत्रीविभवं सौहार्दसम्पत्तिम्, विभावयन् प्रकटयन्, सन्, मित्रामित्रजनयोः सुहृदसुहृदोरानन्ददोषाभ्यां हर्षखेदाभ्याम्, सत्रा सार्धम्, तस्य पद्मास्यस्य परिणयमहोत्सवो विवाहोल्लासस्तस्यारम्भः प्रक्रमस्तम्, कन्दलयामास वर्धयामास ।

शुभे मुहूर्ते—हि निश्चयेन, परिणीतिर्विवाहस्तस्या योग्योऽहं इति परिणीतियोग्यः, पद्मास्यनामा पद्मास्याभिधानः, स जीवन्धरसुहृद्, शुभे प्रशस्ते, मुहूर्ते समये, विधिं तात्कालिकविधानम्, विधाय कृत्वा, वह्निमग्निम्, पुरस्कृत्याग्रे विधाय, नन्दगोपसुतायाः कराब्जग्रहणं पाणिपद्मग्रहणम्, चकार विदधौ ॥ ३३ ॥

गोविन्दाया इति—हि निश्चयेन, स पद्मास्यः कान्त्या दीप्त्या, चञ्चला सौदामिनी प्रत्यनीकं विपक्षो यस्यास्तां 'तडित्सौदामिनी विद्युच्चञ्चला चपला अपि' इत्यमरः, विद्युत्सदृशीमिति यावत्, पुष्यन्ती विकसन्ती या कनककदली सुवर्णकोषा तस्याः कन्दली तस्या गर्भ इव गौरी पीतवर्णा ताम्, हेलया सहजतयोन्मीलत् प्रकटीभवत् यत्कुचयुगं स्तनद्वन्द्वं तस्मिन् लसन्त्यः शोभमाना या मौक्तिकस्रजो मुक्ता-

यस्याः पादौ मृदुलकमलस्पर्धिशोभाविलासौ
जङ्घे मारत्रिभुवनजये काहलीवद्व्यभाताम् ।
नाभिः पञ्चायुधरसभरीकूपिकेवाविरासीद्-
वक्त्रं राकासितरुचितुलासंगमङ्गीचकार ॥३५॥

इति महाकविहरिचन्द्रविरचिते श्रीमति जीवन्धरचम्पूकाव्ये
गोविन्दालम्भो नाम द्वितीयो लम्भः ।

मालास्तासां प्रभा दीप्तयस्ताभिः, स्पष्टं प्रकाशमानमभ्यर्णं समीपप्रदेशो यस्यास्ताम्, गोविन्दाया नन्दगोपसुतायाः, तन्वी चासौ तनुलता च तां कृशकलेवरवल्लरीम्, चक्षुषा नयनाभ्याम्, जातावेकवचनम्, बहुमुदा प्रचुरानन्देन पश्यति स्म अवलोकयामास । मन्दाक्रान्तावृत्तम् 'मन्दाक्रान्ता जलधिषडगैम्भौं नतौ ताद्गुरु चेत्' इति लक्षणात् ॥ ३४ ॥

यस्याः पादाविति—यस्या गोविन्दायाः, पादौ चरणौ, मृदु च तत्कमलञ्चेति मृदुकमलं कोमलपद्मं तत् स्पर्धेते इति मृदुकमलस्पर्धिनौ, शोभा च विलासश्चेति शोभाविलासौ दीप्तिविभ्रमौ, मृदुकमलस्पर्धिनौ शोभाविलासौ ययोस्तौ, आस्तामिति शेषः । यस्याः, जङ्घे प्रसृते 'जङ्घा तु प्रसृता समे' इत्यमरः, मारस्य मदनस्य त्रिभुवनजयस्त्रिलोकविजयस्तस्मिन् 'मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः' इत्यमरः, काहलीवद् वाद्यविशेषवद्, व्यभाताम् शुशुभाते । नाभिस्तुन्दिः, पञ्चायुधस्य कामस्य रसभरी रसनिष्यन्दस्तस्याः कूपिकेव ह्रस्वनिपानमिव, आविरासीत्प्रादुरभूत् । वक्त्रं वदनम्, राकायाः पौर्णमास्याः सितरुचिश्चन्द्रस्तस्य तुलोपमा तस्या सङ्गं सम्बन्धम् अङ्गीचकार स्वीचक्रे । उपमालङ्कारः । मन्दाक्रान्ताच्छन्दः ॥ ३५ ॥

इतीत्यव्ययं समाप्तौ महाकविना हरिचन्द्रेण विरचिते निर्मिते, श्रीमति शोभासम्पन्ने, जीवन्धरचम्पूकाव्ये एतन्नाम चम्पूनाम सन्दर्भे, गोविन्दाया नन्दगोपनन्दिन्या लम्भः प्राप्तिर्यस्मिन् स, एतन्नामा द्वितीयो लम्भोऽधिकारः समाप्त इति ।

इति महाकविहरिचन्द्रविरचिते श्रीमति 'कौमुदी' व्याख्याधरे जीवन्धरचम्पूकाव्ये
गोविन्दालम्भो नाम द्वितीयो लम्भः ।

तृतीयो लम्भः

अथ दिने दिने प्रवर्धमानानुरागः पद्मास्यनामा राजहंसतरुणस्त्रिवलीलहरीविराजिते नाभि-महावर्तशोभिते गोविन्दानामतरङ्गिण्या उदरह्रदे कंचन कालं रममाणः, काञ्चीविहङ्गविरुतमुख-रिते घननितम्बबिम्बपुलिने कतिपयसमयं स्थितिमापन्नः, करेण मेचकचूचुकलोलम्बचुम्बितवक्षो-रुहकमलकुड्मलं स्पृशन्, आनन्दलहरीभिरभ्युक्षितः, कुचचक्रवाकमञ्जुले सुरभिलश्रीखण्डद्रवपङ्किले कञ्चुलीकोमलशैवलपेशले वक्षःस्थलकमलाकरे विहरमाणश्चिरमिन्द्रियग्रामं तर्पयामास ।

जीवन्धरोऽपि कमनीयकलावधूटीः
कीर्त्यङ्गनां जयरमां च समानवृत्त्या ।
उल्लासयन्सकललोचनभागधेय-
माविभ्रदाकृतिममन्दमुदावतस्थे ॥ १ ॥

तस्मिन्पुरे वैश्यजनस्य नेता श्रीदत्तनामा वसति स्म कश्चित् ।
यस्य स्पृहोहौ धनलाभहेतू प्रासाददेशे रमतां चिराय ॥ २ ॥

अथेति—अथ गोविन्दापरिणयानन्तरम्, दिने दिने प्रतिदिवसम्, प्रवर्धमानः समेधमानोऽनुरागः प्रीतिर्यस्य तथाभूतः, पद्मास्यनामा पद्मास्याभिधानः, राजहंसतरुणो मरालयुवा, त्रिवल्यो नाभेरधस्ता-द्विद्यमानास्तिस्रः रेखा एव लहर्यस्तरङ्गास्ताभिर्विराजिते शोभिते, नाभिरेव तुन्दिरेव महावर्तो दीर्घभ्रमस्तेन शोभिते समुल्लसिते, गोविन्दानामतरङ्गिण्या गोविन्दाख्यस्रवन्त्याः उदरह्रदे उदरजलाशये, कंचन कालं किञ्चित्समयपर्यन्तम् 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया, रममाणः क्रीडन्, काञ्चीविहङ्गानां मेखला-शकुन्तानां विरुतेन कूजनध्वनिना मुखरिते वाचालिते, घनं निबिडं स्थूलमिति यावत् यन्नितम्बबिम्बं कटिप्रान्तभागाभोगः स एव पुलिनं तोयोत्थिततीरप्रदेशस्तस्मिन् 'तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्' इत्यमरः, कतिपयसमयं किञ्चित्कालम्, स्थितिमवस्थानम्, आपन्नः प्राप्तः तत्र स्थित इति यावत्, करेण हस्तेन, मेचकचूचुके एव कृष्णस्तनमुखे एव लोलम्बौ भ्रमरौ ताभ्यां चुम्बितमाश्लिष्टं यत् वक्षोरुहकमलयोः कुचार-विन्दयोः कुड्मलं मुकुलं तत्, स्पृशन् स्पर्शनेन्द्रियविषयीकुर्वन्, आनन्दलहरीभिः प्रमोदतरङ्गैः, अभ्युक्षितो-ऽभिषिक्तः कुचावेव चक्रवाकौ कुचचक्रवाकौ स्तनरथाङ्गौ ताभ्यां मञ्जुले मनोहरे, सुरभिलश्चासौ सुगन्धिश्चासौ श्रीखण्डद्रवश्च मलयजपङ्कश्चेति सुरभिलश्रीखण्डद्रवस्तेन पङ्किले पङ्कयुक्ते, कञ्चुल्येव स्तनवस्त्रमेव कोमलशैवलं मृदुजलनीली तेन पेशले मनोहरे, वक्षःस्थलमेवोरःस्थलमेव कमलाकरः पद्मोपलक्षितसरोवरस्तस्मिन्, विहर-माणो विहारं कुर्वन्, सन्, चिरं दीर्घकालं यावत्, इन्द्रियग्रामं हृषीकसमूहम्, तर्पयामास प्रीणयामास । रूपकालङ्कारः ।

जीवन्धरोऽपि—जीवन्धरोऽपि सात्यन्धरिरपि, कमनीयकला एव ललितवैदग्ध्य एव वधूट्यो युवतयस्ताः, कीर्तिरेव समज्ञैवाङ्गना सीमन्तिनी ताम्, जयरमां च विजयलक्ष्मीं च, समानवृत्त्या दाक्षिण्येन समानानुरागेणेति यावत्, उल्लासयन् हर्षयन्, सकलानां निखिलानां लोचनानि नयनानि तेषां भागधेयं भाग्यम् 'भागरूपनामभ्यो धेयः' इति नामशब्दाद्धेयप्रत्ययः, आकृतिं संस्थानं सौन्दर्यमिति यावत्, आबिभ्रद् आदधत्, अमन्दमुदा प्रकृष्टहर्षेण, अवतस्थेऽवस्थितो बभूव, सुखेन न्युवासेति भावः ॥ १ ॥

तस्मिन्निति—तस्मिन् पुरे पूर्वोक्ते राजपुरनगरे, श्रीदत्तनामा श्रीदत्ताभिधानः, कश्चित्कोऽपि, वैश्यजनस्य वणिग्जनस्य, नेता नायकः, वसति स्म न्यवात्सीत् । यस्य प्रासाददेशे भवनप्रदेशे, धनलाभस्य वित्तप्राप्तेर्हेतू कारणे, स्पृहा च धनेच्छा च, ऊहश्च तत्प्राप्त्यर्हतर्कश्चेति स्पृहोहौ, चिराय दीर्घकालं यावत्, अरमतामक्रीडताम् । 'रम क्रीडायाम्' इत्यस्य परस्मैपदप्रयोगश्चिन्त्यः ॥ २ ॥

कदाचिदसौ रत्नवाणिज्यपरायणो रत्नद्वीपं गन्तुकामः प्रस्थानमाचरन्क्रमेण लङ्घितानेकजनपदनगरग्रामः, स्फुटितशुक्तिमौक्तिकवितानतारकितं मकरमीनकुलीरराशिसमाश्रितमपरमिव गगनतलं निशि निपीतनिशाकरकरनिकरं डिण्डीरखण्डकपटेनोद्वमन्तमिव, क्वचिच्चलाचलकुलाचलैरिव कल्लोलघट्टनमनुभवद्भिस्तिमितिमिङ्गिलैः पुत्रैरिवोपास्यमानम्, क्वचन माणिक्यराशिरश्मिझरीपरीतजलमामिषशङ्कयाभिधावद्भिः पुनः पावकभिया धावमानैर्मीनैराकुलीनम्, कुत्रचिद्देदीप्यमानफणामणिभिस्तरङ्गसंगतैर्भुजङ्गैर्निबिडिततया परिणाहादिगुणेन विजितं विलीनमाकाशमूर्मिहस्तविधृतदीपिकाभिरन्वेषमाणमिव, कुत्रचन विततविद्रुमवनराजिविराजिततया प्रत्यक्षीकृतौर्वानलमिव, क्वचन गङ्गासिन्धुप्रमुखनदीकान्ताः समागताः प्रसारितलहरीबाहाभिराश्लिष्यन्तमिव, पुरः प्रकाशन्तमुदन्वन्तं ददर्श।

यत्राम्भोमनुजास्तटोत्थपवनप्रोद्धूततालीवन-
ध्वानत्रस्तहृदः प्रमर्दितमिलच्छैवालमाला बभुः।
कुम्भीन्द्राश्च महाझषाननबिलं भूमीधरोद्यद्दरी
भ्रान्त्या विश्य पुनर्निवृत्तिमगमंस्तज्ज्वालमालासहाः॥३॥

कदाचिदिति—कदाचिज्जातुचित्, रत्नानां मणीनां वाणिज्ये व्यापारे परायणस्तत्परः, अतएव रत्नद्वीपं द्वीपविशेषम्, गन्तुकामो यातुमनाः, 'तुं काममनसोरपि' इति मलोपः, असौ श्रीदत्तः, प्रस्थानं प्रयाणम्, आचरन् कुर्वन्, क्रमेण क्रमशः लङ्घिता व्यतिक्रान्ता अनेके बहवो जनपदनगरग्रामा राष्ट्रपत्तननिगमा येन तथाभूतः सन्, पुरः पुरस्तात्, प्रकाशन्तं शोभमानम्, उदन्वन्तं सागरम् 'उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः' इत्यमरः, ददर्श विलोकयामास। अथ तमेवोदन्वन्तं वर्णयितुमाह—स्फुटितानि विदीर्णानि यानि शुक्तिमौक्तिकानि मुक्तास्फोटमुक्ताफलानि तेषां वितानेन समूहेन तारकितं सञ्जातनक्षत्रकम्, मकराश्च मीनाश्च कुलीराश्चेति मकरमीनकुलीरा नक्रपाठीनकर्कटाभिधाना जलजन्तुविशेषास्तेषां राशिः समूहस्तेन समाश्रितं सेवितं पक्षे मकरमीनकुलीरा एव राशयो ज्योतिषशास्त्रप्रसिद्धास्तैः समाश्रितम्, अपरमन्यत्, गगनतलमिव नभस्तलमिव, डिण्डीरस्याब्धिकफस्य खण्डः समूहस्तस्य कपटेन दम्भेन, निशि रजन्याम्, निपीतो पवितो यो निशाकरस्य चन्द्रस्य करनिकरः किरणकलापस्तम्, उद्वमन्तमिवोद्गिरन्तमिव, क्वचित्कुत्रचित्, घट्टनमाघातमिति कल्लोलघट्टनम्, अनुभवद्भिः प्राप्नुवद्भिः, चलाचलाश्च ते कुलाचलाश्चेति चलाचलकुलाचलास्तैरतिशयचपल कुलपर्वतैरिव, तिमयश्च पाठीनाश्च तिमिङ्गिलाश्च मत्स्यविशेषाश्चेति तिमितिमिङ्गिलास्तैः, तिमिं गिरतीति विग्रहे मूलविभुजादित्वात्कप्रत्ययः, 'अचि विभाषा' इति लत्वम्, 'गिलेऽगिलस्य' इति मुत्वम्, पुत्रैरिव सुतैरिव, उपास्यमानं सेव्यमानम्, क्वचन कुत्रचित् माणिक्यराशे रत्नसमूहस्य रश्मिझरीभिः किरणसन्ततिभिः परीतं व्याप्तं यज्जलं तोयं तत्, आमिषशङ्कया मांसभ्रान्त्या, अभिधावद्भिः संमुखमागच्छद्भिः, पुनर्भूयः, पावकभिया वैश्वानरभयेन, धावमानैर्वेगेन दूरं गच्छद्भिः, मीनैः शफरैः, आकुलीनमाकीर्णम्, कुत्रचित्कचित्, देदीप्यमाना अतिशयेन प्रकाशमानाः फणामणयो भोगरत्नानि येषां तैः, तरङ्गसंगतैः कल्लोलमिलितैः, भुजङ्गैर्नागैः, निबिडिततया सान्द्रतया, परिणाहादिगुणेन विशालताप्रभृतिगुणेन 'परिणाहो विशालता' इत्यमरः, विजितं पराजितं, सत्, विलीनमन्तर्हितम्, आकाशमम्बरम् ऊर्मय एव तरङ्गा एव हस्ताः करास्तेषु विधृता गृहीता या दीपिकास्ताभिः, अन्वेषमाणमिव गवेषयन्तमिव, कुत्रचित्कस्मिंश्चित्प्रदेशे, विद्रुमवनं प्रवालकाननं 'मूंगा' इति प्रसिद्धकाननम् तस्य राजिः पंक्तिस्तया विराजिततया शोभिततया, प्रत्यक्षीकृतः संमुखं दृश्यमान औौर्वानलो वडवानलो यस्य यस्मिन्वा तमिव क्वचन कुत्रापि, समागताः प्राप्ताः, गङ्गासिन्धू प्रसिद्धनदीविशेषौ प्रमुखे यासु तथाभूता या नद्यः सवन्त्यस्ता एव कान्ता वनितास्ताः, प्रसारिता लहर्य एव तरङ्गा एव बाहा बाहवस्ताभिः, आश्लिष्यन्तमिवालिङ्गन्तमिव।

यत्राम्भोमनुजा इति—यत्रोदन्वति, तटोत्थानि तीरोत्पन्नानि, पवनप्रोद्धूतानि वायुकम्पितानि यानि तालीवनानि ताडीकाननानि तेषां, ध्वानेन शब्देन त्रस्तं भीतं हृन्मनो येषां ते, अम्भोमनुजा जलमनुष्याः, प्रमर्दिताः खण्डिता मिलन्त्योऽभयनिवारणार्थमुपरिधारिताः शैवालमाला शवलीसमूहा येषां

तं वारांनिधिमापीय नयनेन वणिक्पतिः ।
विस्मयाम्बुधिमापेदे क्षारत्वमसहन्निव ॥ ४ ॥

तदनु पोतमारुह्य द्वीपान्तरं गत्वा तत्र विचित्रैरुपायैर्बहूनि द्रविणानि संपाद्य संपदा शम्पायुधमन्तरिक्षाकूपारसञ्चरणक्षमैरावणस्कन्धाधिरूढमनुकुर्वन्निव महायानपात्रमारुह्य सांयात्रिकपतिरसाववारान्तमाढुढौके ।

ततो घनघनारवस्फुटितसर्वदिग्भित्तिकः
पपात तरणौ तदा बहलवर्षबिन्दूत्करः ।
निजप्रतिभटस्फुटप्रचुरमौक्तिकाडम्बरा-
सहिष्णुरिव गोचरो न हि विपत्क्षणः प्राणिनाम् ॥ ५ ॥

सांयात्रिकोऽसौ सकलांस्तरिस्थान्पुरैव शोकाम्बुधिमग्नदेहान् ।
संतारयामास स तत्त्वबोधपोतप्रदानेन परावरज्ञः ॥ ६ ॥

तथाभूताः बभुः शुशुभिरे, कुम्भीन्द्राश्च गजेन्द्राश्च, भूमिधराणां पर्वतानामुपत्यकाः प्रकटीभवन्त्यो या दर्यो गुहास्तासां भ्रान्तिः संदेहस्तया, महाकषाणां दीर्घकायमत्स्यानामाननं मुखमेव बिलं गह्वरं तत्, आविश्य प्रविश्य, तस्य ज्वालमालां तेजःसमूहं न सहन्त इति तज्ज्वालमालासहाः सन्तः, पुनर्भूयः, निवृत्तिं प्रत्यागमनम्, अगमन् प्रापुः । शार्दूलविक्रीडितच्छन्दः ॥ ३ ॥

तं वारांनिधिमिति—वणिक्पतिः श्रीदत्तः, नयनेन चक्षुषा, तं पूर्वोक्तम्, वारांनिधिं सागरम्, आपीय समन्तात्पीत्वा दृष्ट्वेति यावत्, क्षारत्वं लवणताम्, असहन्निव सोढुमसमर्थो भवन्निव, विस्मयाम्बुधिमाश्चर्यसागरम्, आपेदे प्राप । उत्प्रेक्षा ॥ ४ ॥

तदनुपोतमिति—तदनु सागरदर्शनानन्तरम्, सांयात्रिकानां पोतवणिजां पतिः स्वामीति सांयात्रिकपतिः, असौ श्रीदत्तः पोतं नौकाम्, आरुह्याधिष्ठाय, अन्यो द्वीपो द्वीपान्तरस्तम्, गत्वा प्राप्य, तत्र द्वीपान्तरे, विचित्रैर्विविधैः, उपायैः साधनैः बहूनि विपुलानि द्रविणानि धनानि, संपाद्योपार्ज्य, संपदा संपत्त्या अन्तरिक्षमेवाकूपार इत्यन्तरिक्षाकूपारो गगनसागरस्तस्मिन् संचरणे शक्ते क्षमः समर्थो य ऐरावणः सुरगजस्तस्य स्कन्धं ग्रीवोपरि, अधिरूढोऽधिष्ठितस्तम्, शम्पायुधं वज्रायुधम्, इन्द्रमिति यावत्, अनुकुर्वन्निव विडम्बयन्निव, महायानपात्रं महापोतम्, आरुह्याधिष्ठाय, अवारान्तं समुद्रान्तम्, आढुढौके प्राप । 'ढौकृ गतौ' इत्यस्य लिटि रूपम् ।

ततो घनघनारवेति—ततस्तदनन्तरम्, तदा तस्मिन् काले, घनश्चासावारवश्चेति घनारवः प्रचण्डशब्दः घनानां मेघानां यो घनारवस्तेन स्फुटिता विदारिताः सर्वदिग्भित्तयो निखिलकाष्ठान्तप्रदेशा येन सः, वर्षबिन्दूनां वृष्टिसीकराणामुत्करः समूह इति वर्षबिन्दूत्करः, बहलश्चासावधिकश्चासौ वर्षबिन्दूत्करश्चेति बहलवर्षबिन्दूत्करः, निजप्रतिभटः शोभया स्वप्रतिपक्षः, स्फुटः प्रकटितः प्रचुरः प्रभूतश्च यो मौक्तिकानां मुक्ताफलानामाडम्बरः समूहस्तस्यासहिष्णुरसहनशील इव, तरणौ पोते, पपात-अपतत् । हि निश्चयेन विपत्क्षणो विपत्त्यवसरः, प्राणिनां जीवानाम्, गोचरो विषयः, न, नो अस्तीति शेषः । कस्य कदा कापत्तिरापतिष्यतीति प्राणिनो नो जानन्तीति भावः । उत्प्रेक्षार्थान्तरन्यासौ । पृथ्वीच्छन्दः ॥ ५ ॥

सांयात्रिकोऽसाविति—परश्चावरश्चेति परावरौ उत्तमाधमौ, तौ जानातीति परावरज्ञः, असौ सः पूर्वोक्तः, सांयात्रिकः पोतवणिक्, श्रीदत्त इति यावत्, पुरैव तरिनिमज्जनात्प्रागेव, शोक एवाम्बुधिः शोकाम्बुधिः खेदसागरस्तस्मिन्मग्नो देहो विग्रहो येषां तान्, सकलान् समस्तान् तरिस्थान् नौकास्थितान्, जनानिति शेषः, तत्त्वबोधस्तत्त्वज्ञानमेव पोतो यानं तस्य प्रदानं वितरणं तेन संतारयामास संतीर्णांश्चकार । सदुपदेशेन तेषां शोकमपाचकारेति भावः ॥ ६ ॥

---

१. संचरणचणैरावण, ब० ।

शनैः शनैर्नावि नष्टायां दिष्टेनेव सन्निधापितं दृष्टं कूपखण्डमारुह्यात्मानं लब्धप्राणं मन्यमानो नष्टशेवधिरपि संतुष्टहृदयः किंचन द्वीपमासाद्य तत्र याहच्छिकमिव गतं कंचन विद्याधरं प्रति चापलवशेन निजोदन्तं प्रतिपादयामास ।

श्रुत्वाथ तेन च मिषेण स नीयमानो
रूप्याचलं स्मितनिभं धरणीरमण्याः ।
शृङ्गैर्नभोनिकषणोपललीढतुङ्गै-
र्लेखाचलं परिहसन्तमिमं ददर्श ॥ ७ ॥

यत्सानुनीलमणिदीप्तिपरम्पराभिः
पञ्चाननस्य शिशवो बहु विप्रलब्धाः ।
सत्येऽपि कन्दरमुखे परिशङ्कमाना
निश्चित्य गर्जनकृतध्वनिभिर्विशन्ति ॥ ८ ॥

स्वं वीक्ष्य वन्यद्विरदो नितम्बे यस्य बिम्बितम् ।
समेत्य दन्तैस्तं हन्ति मदिनां का विवेकिता ॥ ९ ॥

मृगाधिपा यत्र गजभ्रमेण घनावलिं गर्जनसम्भ्रमेण ।
[1]उत्पत्य वेगान्नखरप्रहारैर्विदार्य कोपेन समुत्सृजन्ति ॥ १० ॥

शनैः शनैरिति—शनैः शनैर्मन्दं मन्दम्, क्रमेणेति यावत्, नावि तरणौ, नष्टायां निमग्नायां सत्याम्, दिष्टेनेव भाग्येनेव, सन्निधापितं समीपं प्रापितम्, दृष्टं विलोकितम्, कूपखण्डं नौकाखण्डम्, आरुह्याधिष्ठाय, आत्मानं स्वम्, लब्धाः प्राप्ताः प्राणा आयुःप्रभृतयो येन तं लब्धप्राणम्, मन्यमानो बुध्यमानः नष्टशेवधिरपि विगतनिधिरपि, संतुष्टं हृदयं यस्य तथाभूतः संतृप्तचेताः, स श्रीदत्तः, किंचन कमपि, द्वीपमन्तरीपम्, आसाद्य प्राप्य, तत्र द्वीपे, यदृच्छया विहरतीति याहच्छिकस्तं स्वैरचारिणम्, गतं प्राप्तम्, कंचन कमपि, विद्याधरं खगम्, प्रति समुद्दिश्येति यावत्, चापलवशेन चञ्चलत्वेन, निजोदन्तं स्वसमाचारम्, प्रतिपादयामास जगाद ।

श्रुत्वाथेति—अथानन्तरम्, तेन अनेन, श्रुत्वा निशम्य तदुदन्तमिति शेषः, मिषेण केनापि व्याजेन, नीयमानो गम्यमानः, स श्रीदत्तः, धरणीरमण्याः पृथिवीपुरन्ध्याः स्मितनिभं मन्दहसितसदृशम्, नभ एव गगनमेव निकषणोपलः शाणोपलस्तेन लीढानि स्पृष्टानि, तथाभूतानि च तानि तुङ्गानि च समुन्नतानि चेति तथाभूतैस्तैः, शृङ्गैः शिखरैः, लेखानां देवानां गिरिस्तं सुमेरुपर्वतमिति यावत्, परिहसन्तं तिरस्कुर्वन्तम्, इमम्, रूप्याचलं रजतगिरिम्, विजयार्धमिति यावत्, ददर्श विलोकयामास ॥ ७ ॥

यत्सानुनीलेति—यस्य रूप्याचलस्य, सानुनीलमणीनां शिखरगतमेचकरत्नानां दीप्तयः किरणास्तासां परम्पराः पङ्क्तयस्ताभिः, बहु भूयोवारान्, विप्रलब्धाः प्रतारिताः, पञ्चाननस्य सिंहस्य, शिशवः शावकाः, सत्येऽपि यथार्थभूतेऽपि कन्दरमुखे गुहाग्रभागे, परिशङ्कमानाः संदिहानाः, सन्तः, गर्जनेन कृता विहिता ध्वनयः प्रतिनादास्तैः, निश्चित्य निर्णीय, विशन्ति प्रवेशं कुर्वन्ति । भ्रान्तिमानलङ्कारः ॥ ८ ॥

स्वं वीक्ष्येति—वने भवो वन्यः, द्वौ रदौ यस्य स द्विरदः, वन्यश्चासौ द्विरदश्चेति वन्यद्विरदः काननकरी, यस्य रूप्याचलस्य, नितम्बे कटके, बिम्बितं प्रतिफलितम्, स्वमात्मानम्, वीक्ष्य विलोक्य, समेत्याभिमुखं गत्वा, दन्तैः रदनैः, तं प्रतिबिम्बितहस्तिनम्, हन्ति ताडयति, मदिनां मदयुक्तानाम्, का किन्नामधेया, विवेकिता कर्तव्याकर्तव्यज्ञानवत्ता, अस्ति, नास्त्येवेति भावः । भ्रान्तिमदर्थान्तरन्यासौ ॥ ९ ॥

मृगाधिपा इति—यत्र पर्वते, मृगाधिपाः सिंहाः, गर्जनसम्भ्रमेण गर्जितभ्रान्त्या, गजभ्रमेण हस्तिसंदेहेन, वेगाज्जवात्, घनावलिं मेघसमूहम्, उत्पत्योद्गम्य, कोपेन क्रोधेन, नखरप्रहारैर्नखाघातैः, विदार्य विदीर्णं विधाय, समुत्सृजन्ति मुञ्चन्ति । भ्रान्तिमान् ॥ १० ॥

---

1. उत्पद्य ब० ।

यश्च किल, क्वचित्खगाङ्गनासङ्घदुकूलभ्रमनिषेवितसितजीमूतपरिवृतः, क्वचन हरिन्मणिमयतटनिःसृतविभाविभावितिग्मरुचिबिम्बे गगनसरसि सरोजिनीहरितपलाशशङ्कां तटचरनभश्चराणामुपजनयन्, कुत्रचिन्महीरुहपरम्परासु कादम्बिनीशङ्कया कलधौततलस्फुटनटनपटुबर्हिप्रतिबिम्बकपटेन स्थलसमुत्फुल्लनीलाब्जमालासंदेहं दधानः, क्वचन सरसि समुद्भूतसारसराजहंसकूजितैर्लताविलसितान्तमकरन्दपानमत्तेन्दिन्दिरमनोहरझङ्कारैरुपवनतलालङ्कारसहकारप्रवालचर्वणगर्वितकलकण्ठकण्ठरवैश्च हृदिशयं निर्निद्राणं कुर्वाणः, कुत्रचन मञ्जुलवञ्जुलनिकुञ्जविहरमाणखगकञ्जनयनाजनरत्यन्तश्रमहारिसमीरकिशोरमनोरमः समदृश्यत ।

दुर्वर्णभूधरे तत्र सर्व[2] स्वागतिकारणम् ।
[1]अभाणीत्खेचरः सोऽयं स्पष्टमेव वणिक्पतेः ॥११॥

श्रेण्यां धरस्यास्य हि दक्षिणस्यां गान्धारदेशस्य ललामभूता ।
पुरी निरालम्बतयान्तरिक्षाच्च्युता सुराणां नगरीव भाति ॥१२॥

यश्च किलेति—यश्च किल विजयार्धगिरिः, क्वचित् कुत्रचित्, खगाङ्गनासङ्घेन विद्याधरवनितासमूहेन दुकूलभ्रमेण क्षौमभ्रान्त्या निषेविता धृता ये सितजीमूता धवलवलाहकास्तैः परिवृतः परिवेष्टितः, क्वचन कुत्रचित्, हरिन्मणिमयानि मरकतमणिप्रचुराणि यानि तटानि तीराणि तेभ्यो निःसृता निर्गता या विभा दीप्तिस्तया विभावितं परिगतं तिग्मरुचिबिम्बं सूर्यमण्डलं यस्मिंस्तस्मिन्, गगनसरसि नभःकासारे, तटेषु चरन्तीति तटचरास्तीरगामिनः ते च ते नभश्चराश्च विद्याधराश्च तेषाम्, सरोजिनीनां कमलिनीनाम्, हरितपलाशानां हरितदलानां शङ्का संशीतिस्ताम्, उपजनयन्नुत्पादयन्, कुत्रचित् क्वचित्, महीरुहाणां वृक्षाणां परम्पराः सन्ततयस्तासु, कादम्बिनीशङ्कया मेघमालाभ्रान्त्या, कलधौततले सुवर्णमयपृथिवीतले स्फुटं स्पष्टं यथा स्यात्तथा नटने नृत्ये पटवो दक्षा ये बर्हिणो मयूरास्तेषां प्रतिबिम्बस्य प्रतिफलनस्य कपटं व्याजं तेन, स्थले भूतले समुत्फुल्ला विकसिता या नीलाब्जमाला नीलकमलपङ्क्तिस्तस्याः संदेहं संशयम्, दधानो बिभ्राणः, क्वचन कस्मिंश्चित् स्थाने, सरसि कासारे, समुद्भूतानि समुत्पन्नानि यानि सारसराजहंसानां गोनर्दमरालविशेषाणां कूजितानि ध्वनयस्तैः, लतानां वल्लरीणां विलसितान्तेषु प्रफुल्लपुष्पेषु मकरन्दस्य मधुनः पानेन मत्ताः क्षीबा य इन्दिन्दिरा भ्रमरास्तेषां मनोहरझङ्कारैश्चेतोरमाव्यक्तशब्दैः, उपवनतलस्योद्यानभूमेरलङ्कारा भूषणोपमा ये सहकारा आम्रास्तेषां प्रवालानां किसलयानां चर्वणेन भक्षितेन गर्विताः प्राप्तदर्पा ये कलकण्ठाः कोकिलास्तेषां कण्ठरवैश्च धमनीधमशब्दैश्च, हृदिशयं कामम्, निर्निद्राणं जागृतम्, कुर्वाणो विदधानः, कुत्रचन क्वचित्, मञ्जुला मनोहरा ये वञ्जुलनिकुञ्जा वेतसलतागृहास्तेषु विहरमाणा भ्रमन्तो ये खगकञ्जनयनाजनाः विद्याधरीसमूहास्तेषां रत्यन्तश्रमस्य सुरतावसानखेदस्य हार्यपनेता यः समीरकिशोरो वायुबालको मन्दपवन इति यावत् तेन मनोरमश्चेतोहरः सुन्दर इति भावः समदृश्यत व्यलोक्यत ।

दुर्वर्णभूधर इति—तत्र पूर्वोक्ते, दुर्वर्णभूधरे रजतगिरौ, सोऽयं खेचरो विद्याधरः, वणिक्पतेर्वैश्यवरस्य गन्धोत्कटस्येति यावत्, सर्वं निखिलम्, स्वागतिकारणं निजागमननिदानम्, स्पष्टमेव स्फुटमेव, अभाणीत् कथयामास ॥ ११ ॥

श्रेण्यामिति—हि निश्चयेन, अस्य धरस्य विजयार्धपर्वतस्य, दक्षिणस्यामपाच्याम्, श्रेण्यां भागे, विजयार्धपर्वतस्य द्वे श्रेण्यौ स्तः—उत्तर-श्रेणी दक्षिण-श्रेणी च, उत्तर-श्रेण्यां षष्टि नगर्यो दक्षिण-श्रेण्यां च पञ्चाशन्नगर्यः सन्तीत्यागमः, गान्धारदेशस्य गान्धार जनपदस्य, ललामभूता विभूषणीभूता, पुरी नगरी, निरालम्बतया निराधारत्वेन, अन्तरिक्षाद् गगनात्, च्युता पतिता, सुराणां देवानां नगरीव पुरीव, भाति शोभते ॥ १२ ॥

१. अभाणीत् ब० । २. -सर्वं ब० ।

यामन्वर्थाभिधेयेन नित्यालोकेति खेचराः ।
वदन्ति नीरदा यस्या गवाक्षद्वारचारिणः ॥१३॥

यत्सालमाला स्फुरदंशुजाला पयोधरप्रोल्लसदम्बरश्रीः ।
वक्षःस्थलीव प्रमदाजनानां मनो जरीहर्ति च निर्जराणाम् ॥१४॥

यद्गोपुराग्रसुत्राममणिपुत्री विराजते ।
धृतसूक्ष्मदुकूलेव शारदाम्बुदमालया ॥१५॥

गरुडवेग इति क्षितिपालकः सकलखेचरसेवितवैभवः ।
इह पुरीमनुशास्ति यथा दिवं सुरपतिः कमनीययशोधनः ॥१६॥

शरीरिणी कान्तिपरम्परेव सदेहबन्धा शशिनः कलेव ।
अचञ्चला विद्युदिवापरेव श्रीधारिणी तस्य चकास्ति पत्नी ॥१७॥

गन्धर्वदत्ता तस्यास्ति तनया विनयोज्ज्वला ।
या मन्मथमहाहर्म्यवलभीमणिदीपिका ॥१८॥

अस्या बाल्ये कुवलयदृशो विग्रहं त्यक्तुकामे
तारुण्ये चागमनरसिके मन्मथद्वारचारे ।

यामन्वर्थेति—यां पुरीम्, खेचरा विद्याधराः, अन्वर्थाभिधेयेन सार्थकनामधेयेन, 'नित्यालोका' इति नित्यः सदातन आलोकः प्रकाशो यस्यां सा, इति, वदन्ति कथयन्ति । नीरदा मेघाः, यस्या नगर्याः, गवाक्षद्वारेषु वातायनप्रवेशमार्गेषु चरन्तीत्येवं शीला इति गवाक्षद्वारचारिणः । सन्तीति शेषः ॥ १३ ॥

यत्सालमालेति—यस्या नित्यालोकपुर्याः सालमाला प्राकारपरम्परा निर्जराणां देवानां पक्षे यूनाम्, मनो हृदयम्, जरीहर्ति पुनःपुनरतिशयेन हरति । कथम्भूता सालमालेत्याह-प्रमदाजनानां नारीनिचयानाम्, वक्षःस्थलीव उरःस्थलीव, अथोभयोः सादृश्यमाह—स्फुरदंशुमाला, स्फुरन्ति देदीप्यमानानि अंशुजालानि खचितरत्ननिचयकिरणसमूहा यस्या सा पक्षे स्फुरन्ति अंशुजालानि-उपरि धारितरत्नमालाकिरणसमूहा यस्यां सा पयोधरैर्मेघैः प्रोल्लसत् शोभमानं यदम्बरं गगनं तस्मिन् श्रीः शोभा समुत्तुङ्गत्वाद्यस्याः सा, पक्षे पयोधरैः स्तनैः प्रोल्लसच्छोभमानं यदम्बरं वस्त्रं तेन श्रीः शोभा यस्याः सा । यथोत्तुङ्गस्तनयुगल-विशोभिता युवतिजनानां वक्षःस्थली जरारहितानां यूनां मनो हरति तथा तत्सालमाला निर्जराणां देवानां मनो हरतीति भावः । श्लिष्टोपमा ॥ १४ ॥

यद्गोपुराग्रेति—यस्या नगर्या गोपुराग्रे प्रधानद्वाराग्रभागे निर्मिता या सुत्राममणिपुत्री नीलमणिपुत्तलिका सा, शरदि भवाः शारदाः, ते च तेऽम्बुदाश्च तेषां माला तया जलदान्तजलदपङ्क्त्या, धृतं पिहितं सूक्ष्मदुकूलं लघुक्षौमं यया सा तथाभूतेव, राजते शोभते, उत्प्रेक्षा ॥ १५ ॥

गरुडवेग इति—सकलाश्च ते खेचराश्चेति सकलखेचरा निखिलविद्याधरास्तैः सेवितं समाराधितं वैभवमैश्वर्यं यस्य सः, कमनीयं मनोहरं यश एव कीर्तिरेव धनं वित्तं यस्य सः गरुडवेग इति प्रसिद्धः, क्षितिपालको राजा, दिवं स्वर्गम्, सुरपतिर्यथा पुरन्दर इव, इह पर्वते, पुरीं नित्यालोकाभिधानां नगरीम्, अनुशास्ति पालयति । उपमा ॥ १६ ॥

शरीरिणीति—तस्य गरुडवेगस्य, शरीरिणी मूर्तिमती, कान्तिपरम्परेव दीप्तिसन्ततिरिव, देहबन्धेन शरीरसंघातेन सहिता सदेहबन्धा, शशिनश्चन्द्रमसः कलेव षोडशभाग इव, अचञ्चला स्थिरा, अपरा भिन्ना, विद्युदिव सौदामिनीव, श्रीधारिणी एतन्नामवती, पत्नी, चकास्ति शोभते ॥ १७ ॥

गन्धर्वदत्तेति—तस्य गरुडवेगस्य, विनयेन नम्रतयोज्ज्वला शोभमाना, गन्धर्वदत्ता-एतन्नामवती, तनया पुत्री, अस्ति विद्यते, या, मन्मथस्य कामस्य महाहर्म्यं महाभवनं तस्य वलभी गोपानसी तस्या मणिदीपिका रत्नदीपिका, अस्ति । रूपकालंकारः ॥ १८ ॥

अस्या बाल्य इति—कुवलयदृशो नीलोत्पललोचनायाः, अस्या गन्धर्वदत्तायाः, बाल्ये शैशवे,

मौग्ध्ये याते चतुरिमरसेऽप्यागते तत्कृशाङ्ग्या
मध्यं सूक्ष्मं जघनवलयं भूधराभं विभाति ॥१९॥
मुखेन्दुर्लोलाक्ष्याः सितरुचिरुचिं निन्दतितरां
भ्रुवौ चापाटोपं सपदि झषकेतोः कलयतः ।
कुचौ मन्दं मन्दं लिकुचतुलनां कन्दलयतः
शनैः पादन्यासो मदकरमरालीं विजयते ॥२०॥

सा राजपुरे साराकारा स्वयमद्वितीयापि वल्लकीविजयिनो यूनो द्वितीया भविष्यतीति दैवज्ञोपज्ञवचनविस्रम्भविजृम्भितचिन्तो महीकान्तः कान्तया सह संमन्त्र्य राजपुरोपवनालङ्कारस्य सागरसेननाम्नो जिनराजस्याधिपरिसरं संजातां युवयोः प्रीतिलतां शनैः पल्लवितामथ फलितां चिकीर्षुस्त्वदागमनाय मां प्राहिणोत् ।

नाम्ना धरोऽहं तव नौविनाशविभ्रान्तिमापद्य महीध्रमेनम् ।
आनीतवानित्यभिधाय सोऽयं खगोऽधरोष्ठं घटयाञ्चकार ॥२१॥
श्रीदत्तोऽपि तदाकर्ण्य बहुधा मुमुदेतराम् ।
नष्टस्यार्थस्य सम्प्राप्तिः कामदोग्ध्री मुदां न किम् ॥२२॥

विग्रहं शरीरम्, त्यक्तुकामे मोक्तुमनसि, सति, मन्मथः कामो, द्वारे प्रवेशमार्गे चरतीति द्वारचारी यस्य तद् मन्मथद्वारचारं तस्मिन्, तारुण्ये च यौवने च, आगमने रसिकं तस्मिन् आगमनप्रीतियुक्ते, सति, मौग्ध्ये मौग्ध्ये, याते गते सति, चतुरिमरसेऽपि चातुर्यस्नेहेऽपि, आगते प्राप्ते सति, सा चासौ कृशाङ्गी चेति तत्कृशाङ्गी तस्यास्तत्कृशाङ्ग्या मध्यमवलग्नं कटिरिति यावत्, सूक्ष्मं कृशम्, जघनवलयं नितम्बमण्डलम्, भूधराभं पर्वततुल्यम्, विभाति शोभते । मन्दाक्रान्ताच्छन्दः ॥१९॥

मुखेन्दुरिति—लोले चपले अक्षिणी नयने यस्यास्तस्याः, मुखेन्दुर्वदनचन्द्रः, सितरुचेश्चन्द्रस्य रुचिः शोभा ताम्, अतिशयेन निन्दतीति निन्दतितराम्, भ्रुवौ भ्रुकुट्यौ, झषकेतोः कामस्य चापाटोपं धनुर्विस्तारम्, सपदि झटिति, कलयतः प्राप्नुतः, कुचौ स्तनौ, मन्दं मन्दं शनैः शनैः, लिकुचतुलनां डहुसादृश्यम् 'लकुचो लिकुचो डहुः' इत्यमरः, पादन्यासश्चरणनिक्षेपः, शनैः क्रमेण, मदकरमरालीं हसहंसीम्, विजयते पराजयते । उपमा । शिखरिणीच्छन्दः ॥ २० ॥

सा राजपुर इति—साराकारा श्रेष्ठाकृतिः सा गन्धर्वदत्ता, स्वयम् अद्वितीयापि प्रथमापि, राजपुरे एतन्नामनगरे, वल्लकीविजयिनो वीणाविजयिनः, यूनस्तरुणस्य, द्वितीया सहचरी—अद्वितीया द्वितीया कथं भवेदिति विरोधः परिहारस्तूक्तः । भविष्यतीति, दैवज्ञेन ज्योतिर्विदा प्रथमं ज्ञातमिति दैवज्ञोपज्ञं तच्च तद् वचनञ्च तस्य विस्रम्भेण विश्वासेन विजृम्भिता वर्धिता चिन्ता यस्य तथाभूतः महीकान्तो नृपः, कान्तया वल्लभया, सह सार्धम्, संमन्त्र्य विमर्शं कृत्वा, राजपुरोपवनस्य राजपुरोद्यानस्यालङ्कार आभरणं तस्य तत्र स्थितस्येति यावत्, सागरसेननाम्नः सागरसेनाभिधानस्य, जिनराजस्य मुनिराजस्य, अधिपरिसरं निकटे, संजातां समुत्पन्नाम्, शनैः क्रमेण, पल्लवितां किसलयिताम्, युवयोर्भवतोः, प्रीतिलतां स्नेहवल्लरीम्, फलितां फलयुक्ताम्, चिकीर्षुः कर्तुमिच्छुः सन्, त्वदागमनाय भवदागमनाय, मां त्वत्पुरो वर्तमानम्, प्राहिणोत् प्रेषयामास ।

नाम्नेति—नाम्ना नामधेयेन 'प्रकृत्यादिभ्य उपसंख्यानम्' इति तृतीया, धरः इतिनामा अहम्, तव भवतः, नावो विनाशो नौविनाशस्तस्य विभ्रान्तिस्तां तरणिध्वंसभ्रमम्, आपाद्योत्पाद्य, एनं महीध्रं विजयार्धपर्वतम्, आनीतवानस्मि प्रापितवानस्मि, त्वामिमिति शेषः, इत्येवम्, अभिधाय निगद्य, सोऽयं खगो विद्याधरः, अधरोष्ठं दन्तच्छदयुगलम्, घटयाञ्चकार निमीलयति स्म तूष्णीम्बभूवेति भावः ॥ २१ ॥

श्रीदत्तोऽपि—श्रीदत्तोऽपि वैश्यवरोऽपि, तद् धरविद्याधरोक्तम्, आकर्ण्य श्रुत्वा, मुमुदेतराम् अतिशयेन प्रसन्नो बभूव, नष्टस्य विगतस्य, अर्थस्य पदार्थस्य, संप्राप्तिर्लाभः, मुदां प्रमोदानाम्, कामदोग्ध्री कामान् दोग्धीति कामदोग्ध्री मनोरथपूरिका, किम् न भवति अपि तु भवत्येव । अर्थान्तरन्यासः ॥ २२ ॥

विद्याधरीकरसरोरुहराजहंस-
युग्मायमानचलचामरवीज्यमानम् ।
राज्यश्रियो नयनयुग्मगलत्कटाक्ष-
धारापरीतमिव खेचरभूमिपालम् ॥२३॥

मदनद्रुममञ्जुमञ्जरीभिः स्फुटलावण्यपयोधिवीचिकाभिः ।
महितं वरवारकामिनीभिर्बहुसौन्दर्यतरङ्गिणीझरीभिः ॥२४॥

खेचरेन्द्रमकुटीतटीलसन्मौक्तिकप्रतिफलत्पदाम्बुजम् ।
हारयष्टिपरिमण्डितोरसं निर्झराञ्चितहिमाद्रिसच्छविम् ॥२५॥

तं ददर्श खगाधीशमकुटारूढशासनम् ।
मोदवार्धेः परं पारमपि सांयात्रिकाधिपः ॥२६॥

तमेनं सभाजिरविराजितमणिमयासनमलङ्कुर्वन्तं मूर्तीकृतमिव सौहार्दं सांयात्रिकं स्मितसंभाषितादिभिः संतर्पयन्, निजनन्दिनीस्वयंवरवृत्तान्तं कर्णामृतं मनसो रसायनं च कारयन्, चकार तद्वशां निजतनयां विदितनयां ध्वजिनीं च कलितादरो विद्याधरपतिः ।

विद्याधरेशस्य निदेशमेत्य सेनां पुरोधाय परीतमानम्[1] ।
सांयात्रिकोऽसौ मुदमाप पूर्वं पश्चात्तयामा निजराजधानीम् ॥२७॥

अथ विद्याधरधरापतिं कलापकेन वर्णयति–विद्याधरीति–मदनेति–खेचरेन्द्रेति–तमिति—विद्याधरीणां खेचरीणां करसरोरुहेषु पाणिपद्मेषु विद्यमानौ राजहंसौ मरालविशेषौ तयोर्युग्मायमानाभ्यां युगलवदाचरद्भ्यां चामराभ्यां बालव्यजनाभ्याम् वीज्यमानं प्रकीर्यमाणम्, अतएव राज्यश्रियो राज्यलक्ष्म्याः, नयनयुग्माल्लोचनयुगलाद् गलन्ती पतन्ती या कटाक्षधारा केकरपङ्क्तिस्तया परीतमिव व्याप्तमिव । मदनद्रुमस्य कामानोकहस्य मञ्जुमञ्जर्यो मनोहरपुष्पस्रजस्ताभिः, स्फुटलावण्यमेव प्रकटसौन्दर्यमेव पयोधिः सागरस्तस्य वीचिका लहर्यस्ताभिः, बहुसौन्दर्यमेव प्रचुरसौन्दर्यमेव तरङ्गिणी नदी तस्या झर्यः स्रोतांसि ताभिः, वरवारकामिनीभिः श्रेष्ठविलासिनीभिः, महितं शोभितम्, खेचरेन्द्राणां विद्याधरराजानां मकुटीतटीषु मौलिप्रान्तेषु लसन्ति शोभमानानि यानि मौक्तिकानि मुक्ताफलानि तेषु प्रतिफलती पदाम्बुजे चरणकमले यस्य तम्, हारयष्टिभिर्मुक्तालताभिः परिमण्डितं शोभितमुरो वक्षो यस्य तम्, निर्झरैः स्रोतोभिरञ्चितः शोभितो यो हिमाद्रिः प्रालेयशैलस्तस्येव सच्छविः शोभनदीप्तिर्यस्य तम् । खगाधीशानां विद्याधरराजानां मकुटेषु मौलिष्वारूढमधिष्ठितं शासनमाज्ञा यस्य तम्, तं पूर्वोक्तम्, खेचरभूमिपालं विद्याधरराजं गरुडवेगमिति यावत्, सांयात्रिकाधिपः पोतवणिक्श्रेष्ठः श्रीदत्तः, ददर्श विलोकयामास, मोदवार्धेर्हर्षसागरस्य, परं द्वितीयम्, पारं तटम्, अपि ददर्शेति पूर्वेणान्वयः अथवा 'आप प्राप्तवान्' इति पाठ ॥२६॥

तमेनमिति—सभाजिरे सभाङ्गणे विराजितं शोभितं यन्मणिमयं रत्नमयमासनं विष्टरं तद्, अलङ्कुर्वन्तं शोभयन्तम्, मूर्तीकृतं सदेहीकृतम्, सौहार्दमिव मैत्र्यमिव, एनं तं सांयात्रिकं पोतवणिजम्, स्मितसंभाषितादिभिर्मन्दहसितसंभाषणप्रभृतिभिः, संतर्पयन् प्रीणयन्, निजनन्दिन्याः स्वपुत्र्याः स्वयंवरवृत्तान्तं स्वयंवरोदन्तस्तम्, कर्णामृतं श्रुतिसुधाम्, मनसो हृदयस्य, रसायनं पुष्टिप्रदौषधं च कारयन् विदधन्, कलितादर आदरसम्पन्नः, विद्याधरपतिर्गरुडवेगः, निजतनयां स्वपुत्रीम्, विदितो नयो यया तां ज्ञातनीतिम्, ध्वजिनीं च सेनां च, तद्वशां तदायत्ताम्, चकार विदधे ।

विद्याधरेशस्येति—असौ सांयात्रिकः पोतवणिक्, विद्याधरेशस्य खेचरेन्द्रस्य परीतं व्याप्तं मानं सम्मानं यस्मिंस्तम्, निदेशमाज्ञाम्, एत्य प्राप्य, सेनां पृतनाम्, पुरोधायाग्रे कृत्वा, पूर्वं प्राक्, मुदं हर्षम्, आप प्राप्तवान्, पश्चात्तदनु, तया सुदा, खेचरेन्द्रपुत्र्या, पृतनया च, अमा सह, निजराजधानीं स्वावासनगरीम्, आप प्राप्तवान् ॥ २७ ॥

१. परीतमानाम् ब० ।

तदनु विविधरत्नचयविनिर्मितम्, राजपुरलक्ष्मीमुखावलोकनार्थं परिकल्पितमणिमुकुरायमाणम्, गगनविसृत्वरैर्मरकतपद्मरागालोकैर्घनघनाघनरहितेऽपि नभःस्थले सुरचापशङ्कामादधानम्, कुङ्कुमरसप्रचुरपयःसंसेकशीतलम्, तत्र तत्र विकीर्णकुसुमकुलसुरभिलम्, वीणाविजयिनो जनिष्यमाणकीर्तिलताबीजराजिमिव मुक्तामयरङ्गवल्लीमाबिभ्राणम्, स्वयंवरमण्डपं परिकल्प्य, राजानुमतिपूर्वकं तदुदन्तं कटकेषु घोषयामास ।

तदेतदाकर्ण्य महीक्षितस्ते स्ववाहिनीभिस्तलदिक्प्रदेशाः ।
पुरीं पताकाभिरिवाह्वयन्तीं नदा इवाब्धिं शतशः समापुः ॥२८॥

मञ्चेषु तत्र घनवज्रमयेषु भूपाः
क्षीरोदवीचिनिकरेष्विव चन्द्रबिम्बाः ।
रूप्याद्रितुङ्गशिखरेष्विव पञ्चवक्त्रा
भान्ति स्म पञ्चशरवञ्चनचारुरूपाः[1] ॥२९॥

ततः सकलनेत्रकुरङ्गाणां वागुरायमाणतनुलता, मूर्तेव मदनसाम्राज्यपदवी, राजधानीव शृङ्गारमहिपालस्य, वेला लावण्यसुधापयोनिधिवीचीनाम्, सर्वस्वमिव नवयौवनस्य, सञ्जीवन-

तदन्विति—तदनु तदनन्तरम्, विविधानां नैकप्रकाराणां रत्नानां मणीनां चयेन समूहेन विनिर्मितं रचितम्, राजपुरलक्ष्म्या राजपुरश्रिया मुखावलोकार्थं वदनदर्शनार्थम्, परिकल्पितो रचितो यो मणिमुकुरो रत्नादर्शस्तद्वदाचरन्तम्, गगने नभसि विसृत्वराः प्रसरणशीलास्तैः, मरकतपद्मरागालोकैर्हरितलोहितमणिप्रकाशैः, घनो निबिडो यो घनाघनो मेघस्तेन रहितं शून्यं तस्मिन्नपि, नभःस्थले गगनप्रदेशे, सुरचापशङ्कां शक्रशरासनसंशीतिम्, आदधानं कुर्वन्तम्, कुङ्कुमरसेन काश्मीरद्रवेण प्रचुरं प्रभूतं यत्पयो नीरं तस्य संसेकेन समुक्षणेन शीतलः शिशिरस्तम्, तत्र तत्र स्थलेषु, विकीर्णं प्रक्षिप्तं यत्कुसुमकुलं पुष्पसमूहस्तेन सुरभिलः सुगन्धितस्तम्, वीणाविजयिनो वल्लकीविजयिनः, जनिष्यमाणा समुत्पत्स्यमाना या कीर्तिलता यशोवल्लरी तस्या बीजराजिमिव बीजपङ्क्तिमिव, मुक्तामयी चासौ रङ्गवल्ली चेति मुक्तामयरङ्गवल्ली ताम् मौक्तिकलताम्, आबिभ्राणं दधानम्, स्वयंवरमण्डपं स्वयंवरस्थानम्, परिकल्प्य रचयित्वा, राजानुमतिपूर्वकं राजाज्ञापुरस्सरम्, तस्य स्वयंवरस्योदन्तो वृत्तान्तस्तम्, कटकेषु शिबिरेषु, घोषयामास प्रख्यापयामास ।

तदेतदाकर्ण्येति—शतशः शतसंख्याकाः, ते महीक्षितो राजानः, तदेतदाख्यानम्, आकर्ण्य श्रुत्वा, स्ववाहिनीभिः स्वकीयसेनाभिस्तता व्याप्ता दिक्प्रदेशाः काष्ठापान्ता यैस्तथाभूताः सन्तः, पताकाभिर्वैजयन्तीभिः, आह्वयन्तीमिवाकारयन्तीमिव, पुरीं नगरीम्, नदा द्विरेफाः 'नदी नदो द्विरेफश्च' इति धनंजयः, अब्धिमिव सागरमिव, समापुः समायातवन्तः, नदपक्षे स्ववाहिनीभिः स्वसहायकनदीभिः, तता व्याप्ता दिक्प्रदेशा यैस्तथाभूता इति विशेषो ज्ञातव्यः ॥ २८ ॥

मञ्चेष्विति—तत्र स्वयंवरमण्डपे, घनवज्रमयेषु सान्द्रहीरकनिर्मितेषु, मञ्चेषु आसनविशेषेषु, आसीना इति शेषः, पञ्चशरस्य कामस्य वञ्चनं प्रतारणं चारु सुन्दरं रूपं सौन्दर्यं येषां ते तथाभूताः, भूपा नृपाः, क्षीरोदस्य क्षीरसागरस्य वीचीनां भङ्गानां निकराः समूहास्तेषु, चन्द्रबिम्बा इव विधुप्रतिमा इव, रूप्याद्रेर्विजयार्धस्य तुङ्गानि समुन्नतानि यानि शृङ्गाणि शिखराणि तेषु, पञ्चवक्त्रा इव सिंहा इव, भान्ति स्म शुशुभिरे । मालोपमा । वसन्ततिलकावृत्तम् ॥ २९ ॥

तत इति—ततस्तदनन्तरम्, गन्धर्वदत्ता गरुडवेगविद्याधरतनया, याप्ययानं शिबिकावाहनम्, आरुह्याधिरुह्य, स्वयंवरमण्डपं स्वयंवरणस्थानम्, अवततार समागतवती । अथ कथम्भूता गन्धर्वदत्तेत्याह—सकलानां निखिलजनानां नेत्राण्येव नयनान्येव कुरङ्गा हरिणास्तेषाम्, वागुरायमाणा पाशायमाना तनुलता शरीरवल्ली यस्याः सा, मूर्ता सदेहा मदनसाम्राज्यपदवीव कामराज्यपदवीव, शृङ्गारमेव महीपालस्तस्याः

1 चारुरूपा० ब० ।

मिव सौभाग्यस्य, मूर्त्यन्तरमिव लक्ष्म्याः, अमृतवर्तिरिव भूपतिदृशाम्, विशालनयनविलासविजितनीलोत्पला गन्धर्वदत्ता याप्ययानमारुह्य स्वयंवरमण्डपमवततार ।

ततः करसरोरुहप्रसृतकान्तिपारम्परी-
प्रक्लृप्तनवपल्लवभ्रमसमागतालिस्वरैः ।
परीतवरवल्लकीमृदुलतानगीतादिभि-
र्व्यजेष्ट खगसुन्दरी सकलदेशपृथ्वीपतीन् ॥३०॥

खगेशतनयाकराञ्चितविपञ्चिकामाधुरी-
रसं श्रवणभाजनैः सकलगीतविद्याविदः ।
निपीय वनितारदच्छदमिहाधरं मेनिरे
सुधामपि सुरोद्धृतां मधुपपानयोग्यं मधु ॥३१॥

तदनु प्रत्यक्षपञ्चशरः पञ्चशतमित्रजनपरिवृतो जीवन्धरः, स्वयंवरसभाजिरं समागत्य, वीणाकलाकुशलान्प्राज्ञाग्रेसरान्गुणदोषपरीक्षायां विधाय[1], अभिधाय च नियोगिजनानीतासु त्रिचतुरासु वीणासु केशरोमलवादिकं दोषम्, अतिसंतोषपरवशया कन्यया समर्पितां निजकरालङ्कारभूतां सुघोषां नाम वीणां परिजग्राह ।

रसभूपालस्य राजधानीव नृपावासनगरीव, लावण्यमेव सौन्दर्यमेव सुधापयोनिधिः पीयूषपारावारस्तस्य वीचयस्तरङ्गास्तासाम्, वेला तटोच्छ्रासः, 'पाली वेला तटोच्छ्रासः' इति धनंजयः, नवयौवनस्य नूतनतारुण्यस्य, सर्वस्वमिव सारभूतधनमिव, सौभाग्यस्य वल्लभप्रियतायाः सञ्जीवनमिव प्राणप्रदमिव, लक्ष्म्याः श्रियाः मूर्त्यन्तरमिव द्वितीयप्रतिमेव, भूपतिदृशां नरेन्द्रनयनानाम्, अमृतवर्तिरिव सुधाशलाकेव, विशालनयनयोरायतलोचनयोर्विलासेन शोभातिशयेन विजिते पराभूते नीलोत्पले नीलकमले यया सा ।

ततः करसरोरुहेति—ततस्तदनन्तरम्, खगसुन्दरी गन्धर्वदत्ता, करसरोरुहाभ्यां पाणिपद्माभ्यां प्रसृता निःसृत्य बहिर्व्याप्ता या कान्तिपारम्परी दीप्तिश्रेणिस्तया प्रक्लृप्तेन रचितेन नवपल्लवभ्रमेण प्रत्यग्रकिसलयसंदेहेन समागताः सम्प्राप्ता येऽलयो भ्रमरास्तेषां स्वरैर्गुञ्जनशब्दैः, परीता व्याप्ता या वरवल्लकी श्रेष्ठवीणास्तस्या मृदुलेन कोमलेन तानेन स्वरावरोहारोहक्रमेणोपलक्षिता ये गीतादयः संगीतप्रभृतयस्तैः, सकलदेशपृथ्वीपतीन् निखिलजनपदजगतीपतीन्, व्यजेष्ट विजितवती । 'विपराभ्यां जेः' इत्यात्मनेपदम् । पृथ्वीवृत्तम् ॥ ३० ॥

खगेशतनयेति—गीतविद्यां विदन्तीति गीतविद्याविदः सकलाश्च ते गीतविद्याविदश्चेति सकलगीतविद्याविदः समस्तसंगीतज्ञजनाः, खगेशतनयाकरे गन्धर्वदत्ताहस्तेऽञ्चिता शोभिता या विपञ्चिका वीणा तस्या माधुरी रसमाधुर्यनिःस्यन्दम्, श्रवणभाजनैः कर्णपात्रैः, निपीय नितरां पीत्वा, इहलोके, वनितारदच्छदं ललनोष्ठम्, अधरमधमम् पक्षेऽधरसंज्ञितम्, सुधामपि पीयूषमपि, सुरात्या मदिराया उद्धृतां निष्कासितां पक्षे सुरैर्देवैरुद्धृता ताम्, मधु पुष्पासवम् . मधुपानां मधुपायिनां नीचानामिति यावत् पानयोग्यं पानार्हम्, पक्षे मधुपानां भ्रमराणां पानयोग्यम् . मेनिरे मन्यन्ते स्म । रूपकश्लेषव्यतिरेकाः । पृथ्वीच्छन्दः ॥३१॥

तदन्विति—तदनु तदनन्तरम्, प्रत्यक्षश्चासौ पञ्चशरश्चेति प्रत्यक्षपञ्चशरो दृग्गोचरकामः, पञ्चशतं ये मित्रजनाः सुहृत्समूहास्तैः परिवृतः परिवेष्टितः, जीवन्धरः सात्यन्धरिः, स्वयंवरसभाजिरं स्वयंवरपरिषदङ्गणम्, समागत्य सम्प्राप्य, वीणाकलायां विपञ्चीकलायां कुशला निपुणास्तान्, प्राज्ञाग्रेसरान् विद्वच्छ्रेष्ठान्, गुणदोषपरीक्षायां गुणावगुणनिरीक्षायाम्, विधाय कृत्वा, नियोगिजनैः सेवकजनैरानीताः प्रापितास्तासु, तिस्रश्चतस्रो वेति त्रिचतुरास्तासु, वीणासु परिवादिनीषु, केशरोमलवादिकं केशरोमलवप्रभृतिकम्, दूषणानि संगीतशास्त्रे प्रसिद्धानि, अभिधाय च निगद्य च, अतिसंतोषस्य परवशा तया हर्षातिशयाधीनया,

1. विधाय च ब० ।

आदाय तामयमथो करकौशलानि
तस्यां खगेशतनया निजचित्तमस्मिन् ।
संगीतधीरपरिषच्च शिरःप्रकम्पं
तेने कृताग्रमुखराजगणोऽपि लज्जाम् ॥३२॥

कुमारवरवल्लकीगुणरवेण सर्वे मृगा
विहाय मृदु शाद्वलं विदधिरे क्षणात्स्तब्धताम् ।
स्वरश्च जिनशारदाश्रवसि शीर्षकम्पापतद्-
वदान्यतरुपल्लवे पदमहो विधत्ते स्म सः ॥ ३३ ॥

तावत्सा गन्धर्वदत्ता पराजयमेव जयं मन्यमाना व्रीलातरलनयनप्रसृतकटाक्षदुग्धधारां दिशि दिशि किरन्ती वेत्रवतीकरकलितां मालिकामादाय जीवकस्य वक्षस्यामुमोच ।

सौभाग्याम्बुधिवीचिकेव विलसद्वक्षःस्थलीसैकते
शंसन्ती सुकृतेन्दुनन्दुदयं जीवन्धरस्वामिनः ।
मालासावचकादुरःस्थलवसल्लक्ष्मीकटाक्षावली
प्रक्षिप्ता विजयाय भाविसमरे मालेव वीरश्रिया ॥ ३४ ॥

कन्यया गन्धर्वदत्तया, समर्पितां प्रदत्ताम्, निजकरालङ्कारभूतां स्वहस्ताभरणभूताम्, सुघोषामेतन्नामवतीम्, वीणां घोषवतीम्, परिजग्राह गृहीतवान् ।

आदायेति—अथो तदनन्तरम्, अयं जीवन्धरः, तां वीणाम्, आदाय गृहीत्वा, तस्यां वीणायाम्, करकौशलानि हस्तचातुर्याणि, खगेशतनया गन्धर्वदत्ता, अस्मिन् जीवन्धरे, निजचित्तं स्वकीयमनः, संगीतधीराणां संगीतविदुषां परिषत्सभा च, शिरःप्रकम्पं मूर्धान्दोलनम्, कृताग्रः कालाङ्गारो मुखं प्रधानो यस्येति कृताग्रमुखः स चासौ राजगणश्च नृपसमूहश्चेति तथा, सोऽपि, लज्जां त्रपाम्, तेने विस्तारयामास ॥३२॥

कुमारवरवल्लकीति—कुमारस्य जीवन्धरस्य या वरवल्लकी श्रेष्ठवीणा तस्या गुणस्तन्त्री तस्य रवः शब्दस्तेन, सर्वे निखिलाः, मृगाः कुरङ्गाः, मृदु कोमलम्, शाद्वलं शष्पम्, हरितघासमिति यावत्, विहाय त्यक्त्वा, क्षणादल्पेनैव कालेन, स्तब्धतां निश्चलताम्, विदधिरे चक्रिरे, वीणारावं श्रुत्वा हरिणा भोजनाद्विरम्य निश्चला बभूवुरिति भावः । सः प्रसिद्धः, स्वरश्च वीणाशब्दश्च, शीर्षकम्पेन मूर्धान्दोलनेनापतन्तः स्खलन्तो वदान्यतरुपल्लवाः कल्पवृक्षकिसलया यस्मात्तस्मिन्, जिनशारदाश्रवसि जिनसरस्वतीकर्णे, पदं स्थानम्, विधत्ते स्म कुरुते स्म । इत्यहो आश्चर्यम् । सरस्वत्यपि तद्वीणाशब्दं शुश्रावेति विस्मयस्थानम् । पृथ्वीवृत्तम् ॥ ३३ ॥

तावदिति—तावत् तावता कालेन, सा गन्धर्वदत्ता विद्याधरतनूजा, पराजयमेव पराभवमेव, जयं विजयम्, मन्यमाना बुध्यमाना, व्रीलया लज्जया तरले चञ्चले ये नयने ताभ्यां प्रसृता निःसृत्य बहिर्विसृता ये कटाक्षाः केकरास्त एव दुग्धधारा क्षीरप्रवाहस्ताम्, दिशि दिशि प्रतिकाष्ठम्, किरन्ती विक्षिपन्ती, वेत्रवतीकरकलितां प्रतीहारीहस्तस्थिताम्, मालिकां स्रजम्, आदाय गृहीत्वा, जीवकस्य विजयासुतस्य, वक्षसि भुजान्तरे, आमुमोचामुक्तवती ।

सौभाग्याम्बुधिवीचिकेवेति—असौ माला सा स्रक्, जीवन्धरस्वामिनः सत्यन्धरनृपसुतस्य, वक्षःस्थल्येव सैकतमिति वक्षःस्थलीसैकतं विलसच्छोभमानं यद् वक्षःस्थलीसैकतमुरःस्थलसिकतामयं तस्मिन्, सुकृतमेव पुण्यमेवेन्दुश्चन्द्रस्तस्य नन्दन् विलसन्य उदय उद्गमस्तम्, शंसन्ती सूचयन्ती, सौभाग्यमेव वल्लभाप्रियत्वमेवाम्बुधिः सागरस्तस्य वीचिकेव लहरीव, उरःस्थले वक्षःप्रदेशे वसन्ती निवसन्ती या लक्ष्मी राज्यश्रीस्तस्याः कटाक्षाणां केकराणां यावली पङ्क्तिस्तद्वत्, भाविसमरे भविष्यद्युद्धे, विजयाय, विजयलाभाय, वीरश्रिया वीरलक्ष्म्या, क्षिप्ता न्यस्ता, मालेव स्रगिव, अचकात्—अशोभत । 'चकासृ दीप्तौ' इत्यस्य लङि रूपम् । उत्प्रेक्षा । शार्दूलविक्रीडितवृत्तम् ॥ ३४ ॥

१ सा भाग्याम्बुधि ब० ।

वीणा गन्धर्वदत्ताया मधुरा चित्तहारिणी ।
कुलोचिता बभूवेयं कुमारप्राप्तिदूतिका ॥ ३५ ॥

अथ जलदजलध्योर्नादशङ्कां वितन्वन्
मुखरितसकलाशाचक्रवालान्तरालः ।
निखिलपुरवधूटीचित्तहारी विशेषा-
त्समभवदिह मन्द्रस्तूर्यमूर्च्छद्विरावः ॥ ३६ ॥

तदा दिनदीपायितेन काष्ठाङ्गारेण कुप्यक्रयविक्रययोग्यो वैश्यसुतः कथं स्त्रीरत्नयोग्य इति सन्धुक्षिताः क्षितिपतयो गतमतयः सर्वाभिसारेण चमूं पुरोधाय विमूढमनसः संयुगमारभन्त ।

इह खलु कुमारोऽयं विद्याधरैः स्वबलावृतै-
र्जयगिरिरिति ख्याते मत्तद्विपे विनिविष्टवान् ।
प्रतिभटघटाटोपं भिन्दन्नुदारपराक्रमो
दिशि दिशि सपत्नांस्तांस्लीनांश्चकार निकारतः ॥ ३७ ॥

रत्नस्तम्भविजृम्भितामलरुचा व्याप्ताखिलाशान्तरा-
मेकत्रोदितकोटिसूर्यपटलीसंदीप्तिशङ्कावहाम् ।
शालां तत्र च पद्मरागखचितां वेदीं व्यधात्तत्क्षणं
सर्वेषां हृदयस्थरागलहरीं मूर्तामिवासौ वणिक् ॥३८॥

वीणा गन्धर्वदत्ताया इति—मधुरा प्रियस्वरा, चित्तहारिणी मनोहारिणी, कुलोचिता कुलयोग्या, गन्धर्वदत्तायाः खेचरसुतायाः, इयं जीवन्धरकरगता, वीणा परिवादिनी, कुमारस्य जीवन्धरस्य प्राप्तौ लाभे दूतिका संदेशवाहिनीव, बभूव-अजायत ॥ ३५ ॥

अथ जलदजलध्योरिति—अथानन्तरम्, इह स्वयंवरमण्डपे, जलदश्च जलधिश्चेति जलदजलधी तयोर्मेघसागरयोः, नादस्य गर्जितस्य शङ्का संदेहस्ताम्, वितन्वन् प्रसारयन्, मुखरितं वाचालितं, सकलाशा-चक्रवालस्य निखिलदिक्समूहस्यान्तरालं मध्यावकाशो येन सः, निखिलानां समस्तानां पुरवधूटीनां नगर-युवतीनां चित्तं मनो हरतीत्येवं शीलः, मन्द्रो गभीरः, तूर्याणां वादित्रविशेषाणां मूर्च्छन्वर्धमानो विरावो विशिष्टशब्दः विशेषादाधिक्येन, समभवत्-अजायत । मालिनीवृत्तम् 'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ॥ ३६ ॥

तदेति—तदा तस्मिन् काले, दिने दिवसे दीप इवाचरतीति दिनदीपायितस्तेन, निष्प्रभेणेति यावत्, काष्ठाङ्गारेण कृतघ्नेन, कुप्यानां भाण्डानां क्रयविक्रययोर्योग्योऽर्हः, वैश्यसुत ऊरुजपुत्रः, कथं केन प्रकारेण, स्त्रीरत्नयोग्यः श्रेष्ठललनाप्राप्त्यर्हः, भवेदिति शेषः, इत्येवम्, सन्धुक्षिताः समुत्तेजिताः, गतमतयो मूर्खाः, विमूढं हिताहितविचाररहितं मनो हृदयं येषां ते, क्षितिपतयो राजानः, सर्वाभिसारेण सर्वारम्भेण, चमूं सेनाम्, पुरोधायाग्रे कृत्वा, संयुगं समरम्, आरभन्त-आरेभिरे ।

इह खल्विति—इह लोके, खलु निश्चयेन, स्वबलावृतैः स्वकीयपृतनापरीतैः, विद्याधरैः खेचरैः, उपलक्षितः, जयगिरिरिति 'जयगिरिः' इति नाम्ना, ख्याते प्रसिद्धे, मत्तद्विपे गन्धगजे, विनिविष्टवानध्यारूढः, प्रतिभटानां शत्रूणां घटायाः गजगणस्याटोपं विस्तारम्, भिन्दन् खण्डयन्, उदारो महान् पराक्रमो विक्रमो यस्य सः, अयं कुमारो जीवन्धरः, तान् सम्मुखायातान्, सपत्नान् शत्रून् 'रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः' इत्यमरः, दिशि दिशि प्रतिकाष्ठम्, निकारतो दुःखात् लीनानन्तर्हितान्, चकार विदधे । सर्वे रिपवः पराजिता इति भावः । हरिणीच्छन्दः ॥ ३७ ॥

रत्नस्तम्भेति—असौ वणिक् गन्धोत्कटवैश्यः, तत्र राजपुरनगरे, रत्नस्तम्भानां मणिमयस्तम्भानां विजृम्भिता वृद्धिगता यामलरुक् स्वच्छदीप्तिस्तया, व्याप्तमाच्छादितमखिलाशानां निखिलकाष्ठानामन्तरमव-काशो यस्यां ताम्, एकत्रैकस्मिन् स्थान उदितोद्गता या कोटिसूर्याणां कोटिप्रमितदिवाकराणां पटली समूह-

तदनन्तरं विद्याधराधिपतिर्गरुडवेगनामा समागत्य वधूवरस्य सुरदम्पतीसन्निभस्य स्फटिकमणिपट्टके विनिवेशितस्य करनखरकान्तिद्विगुणितधावल्याभिर्भुजवंशविगलन्मुक्ताझरी-सम्भावनासम्पादिकाभिर्बाहुभुजगफणामाणिक्यायितमणिमयकुम्भविगलत्पयोधराभिरभिषेक-मङ्गलं निर्वर्तयामास ।

क्षीराब्धिडिण्डीरचयायमानं श्लक्ष्णं दुकूलं वसनं वसानौ ।
तौ प्राङ्मुखं भूषणगेहमध्ये निवेशितौ वज्रविकीर्णपट्टे ॥ ३९ ॥

अनयोः कान्तवपुषि भूषणानां च भूषणे ।
आकल्पकल्पना नूनं मङ्गलैकफला भवेत् ॥ ४० ॥

यद्वा भूषणवृन्दस्य शोभासंपादकाङ्गके ।
तयोर्नैपथ्यक्लृप्तिस्तु दृष्टिदोषाय हानये ॥ ४१ ॥

सीमन्तं परिकल्प्य खञ्जनदृशो वक्त्रप्रभानिम्नगा-
मार्गाभं सुममालिकां च विदधे तत्फेनपुञ्जायिताम् ।
आस्ये नीलललाटिकां सहचरीवक्त्रेन्दुलक्ष्मायिता-
मद्र्णाग्ञ्जनमाननाक्रमकृतोः सीमन्तरेखामिव ॥४२॥

स्तम्याः सन्दोसिः सम्लेजस्तस्याः शङ्कावहां सन्देहोत्पादिकाम्, शालं विवाहमण्डपम्, सुरैर्वा निखिला-नाम्, मृतां शरीरधारिणीम्, हृदयस्थरागलहरीमिव चित्तस्थितप्रीतिपरम्परामिव, पद्मरागखचितां लोहितक-मणिनिस्यूताम्, वेदीञ्च वितर्दिकाञ्च, लाघवं तत्कालम्, व्यधात्-चकार । शार्दूलविक्रीडितच्छन्दः ॥३८॥

तदनन्तरमिति—तदनन्तरं तत्पश्चात्, गरुडवेगनामा गरुडवेगाभिधानः, विद्याधराणां खेचराणामधि-पतिः स्वामीति विद्याधराधिपतिः, समागत्य विजयार्धादागत्य, जाया च पतिश्चेति दम्पती 'जायाया जम्भावो दम्भावश्च वा निपात्यते' इति निपातनाज्जायाशब्दस्य स्थाने दम्भावः, सुराणां देवानां दम्पती मिथुनं तयोः सन्निभस्तस्य, स्फटिकमणिपट्टके सितोपलफलके, विनिवेशितस्याधिष्ठापितस्य, वधूवरस्य जायापत्योः, करनखराणां हस्तनखानां कान्त्या दीप्त्या द्विगुणितं द्विगुणीभूतं धावल्यं शैत्यं यासां ताभिः, भुजवंशाभ्यां बाहुवेणुभ्यां विगलन्ती निःसृत्य पतन्ती या मुक्ताझरी, मौक्तिकसन्ततिस्तस्याः सम्भावना समुत्प्रेक्षा तस्याः सम्पादिकाः कारिकास्ताभिः, बाहुभुजङ्गानां फणा भोगास्तासां माणिक्यायिता रत्नवदाचरन्तो ये मणिमय-कुम्भा रत्ननिर्मितकलशास्तेभ्यो विगलन्त्यः पतन्त्यो याः पयोधारा जलधारास्ताभिः, अभिषेकमङ्गलं स्नान-मङ्गलम्, निर्वर्तयामास रचयामास ।

क्षीराब्धीति—क्षीराब्धेर्दुग्धसागरस्य डिण्डीरचय इव फेनसमूह इवाचरतीति क्षीराब्धिडिण्डीरचयाय-मानम्, श्लक्ष्णं सूक्ष्मम्, दुकूलं वसनं, क्षौमं वस्त्रम्, वसाते इति वसानौ दधानौ तौ जायापती, भूषण-गेहमध्ये प्रातिहार्यगृहाभ्यन्तरे, वज्रविकीर्णपट्टे हीरकखचितफलके, प्राङ्मुखं पूर्ववदनं यथा स्यात्तथा, निवेशितौ स्थापितौ ॥ ३९ ॥

अनयोरिति—अनयोर्गन्धर्वदत्ताजीवन्धरयोः, भूषणानाञ्चाभरणानामपि, भूषणं शोभाधायकं, कान्तवपुषि कमनीयकलेवरे, आकल्पानां भूषणानां कल्पना निक्षेपः, नूनं निश्चयेन, मङ्गलमेवैकमद्वितीयं फलं प्रयोजनं यस्यास्तथाभूता, भवेत् स्यात् । सुन्दरे वपुषि किमाभरणैरिति भावः ॥ ४० ॥

यद्वेति—यद्वा पक्षान्तरे, अथवेति यावत्, तयोर्जायापत्योः, भूषणवृन्दस्याभरणसमूहस्य, शोभा-सम्पादकञ्च तदङ्गकञ्चेति शोभासम्पादकाङ्गकं तस्मिन्, सौन्दर्याधायकशरीरे, नैपथ्यक्लृप्तिराभरणरचना, दृष्टिदोषस्य दृग्दोषस्य, हानये निरासाय, भवेदिति पूर्वोक्तक्रियया सम्बन्धः । तु पादपूरणे ॥ ४१ ॥

सीमन्तमिति—सहचरी प्रसाधनसखी, खञ्जनदृशः खञ्जरीटलोचनायाः, गन्धर्वदत्ताया इति यावत्, वक्त्रप्रभा मुखदीप्तिरेव निम्नगा नदी तस्या मार्गस्य वर्त्मन इवाभा दीप्तिर्यस्य तम् । सीमन्तं केशवेशम्, 'शकन्ध्वादिषु पररूपं वाच्यम्' इति पररूपम्, परिकल्प्य विरच्य, तस्या वक्त्रप्रभानिम्नगायाः फेनपुञ्ज इव

सैरन्ध्रीजनकरकल्पिता तस्याः कपोलतलमकरी, मकरकेतोः पताकेयमिति समागता साक्षान्मन्मथवैजयन्तीमकरीव, गण्डमण्डललावण्यसरोवरे निपततां युवनेत्रपततां बन्धनाय वेधसा विरचितः पाश इव, व्यराजत।

तस्याः कपोलललितौ मृगनाभिक्लृप्त-
पत्रच्छलेन कचवृन्दतमःकिशोरौ।
द्राग्बाधितुं रवियुगं किल कर्णशोभि
ताटङ्कयुग्ममधिकं रुरुचे मृगाक्ष्याः ॥४३॥

जगत्त्रयजयायास्या बलातः पुष्पधन्वनः।
सबाणतूणवद्रेजे पुष्पचारु कचव्रजम् ॥ ४४ ॥

तस्याः शरीरातनुचापयष्टेर्मौर्वीव रेजे फणितुल्यवेणी।
सखीप्रक्लृप्ता मुखपद्मगन्धलोभागता भृङ्गपरम्परेव ॥४५॥

एवमलङ्कृताभ्यां ताभ्यां यथास्थानं जनेन विनिवेशिताभ्यां परिष्कृता मणिदीपमङ्गल-द्रव्य[1]शोभिता मणिवेदिका सुरदम्पतीसङ्गता रत्नसानुतटीव व्यरोचत।

डिण्डीरपिण्ड इवाचरतीति तथा, सुममालिकां च पुष्पस्रजञ्च, आस्ये मुखे, वक्त्रमेवेन्दुर्वक्त्रेन्दुर्मुखचन्द्रस्तस्य लक्ष्मेव चिह्नमिवाचरतीति तथा नीलललाटिकां नीलमणिललाटाभरणम्, आक्रमणमाक्रमः, आनन आक्रम आननाक्रमस्तं कुरुत इत्याननाक्रमकृतौ तयोः मुखाक्रमणकारिणोः स्वविशालतयेति यावत्, अक्ष्णोर्नयनयोः, सीम्नोऽवधेरन्तः सीमान्तस्तस्य रेखा लेखा तामिव, इतोऽग्रे भवतोः प्रसरणं निषिद्धमिति सीमानिश्चयार्थमिव, अञ्जनं कज्जलम्, विदधे चकार। उपमोत्प्रेक्षे ॥ ४२ ॥

सैरन्ध्रीति—सैरन्ध्रीजनस्य प्रसाधिकाजनस्य करेण हस्तेन कल्पिता रचिता, तस्या गन्धर्वदत्तायाः, कपोलतले गण्डतले मकरी कस्तूर्यादिना रचिता मकराकृतिविशेषः इयं कस्या, मकरकेतोः कामस्य, पताका केतुः, इति हेतुना, समागता समायाता, साक्षात्प्रत्यक्षम्, मन्मथस्य मदनस्य वैजयन्तीमकरीव ध्वजगत-मकरीव, गण्डमण्डलस्य कपोलचक्रवालस्य लावण्यमेव सरोवरः कासारस्तस्मिन्, निपततां स्खलताम्, युवनेत्राण्येव पतन्तस्तेषां तरुणलोचनपक्षिणाम्, बन्धनाय बन्धनार्थम्, वेधसा ब्रह्मणा, विरचितः कृतः, पाश इवानाय इव, व्यराजत व्यशोभत। उत्प्रेक्षा।

तस्या इति—मृगस्येवाक्षिणी यस्यास्तस्याः कुरङ्गलोचनाया गन्धर्वदत्तायाः, कर्णयोः शोभत इत्येवं शीलं कर्णशोभि श्रवणयोः शोभमानम्, ताटङ्कयुग्मं कर्णाभरणयुगलम्, मृगनाभिना कस्तूर्या क्लृप्तं रचितं यत्पत्रं पत्राकृतिरचनाविशेषस्तस्य च्छलेन व्याजेन, तस्या गन्धर्वदत्तायाः कपोलयोर्गण्डयोः, फलितौ प्रति-बिम्बितौ, कचवृन्दतमःकिशोरौ केशसमूहान्धकारबालकौ, द्राग् झटिति, बाधितुं नाशयितुम्, रवियुगं किल सूर्ययुग्ममिव, अधिकं सातिशयम्, रुरुचे शुशुभे। उत्प्रेक्षा ॥ ४३ ॥

जगत्त्रयेति—अस्याः खेचरसुतायाः, पुष्पैश्चारु पुष्पचारु कुसुमकमनीयम्, कचव्रजं केशसमूहः, जगत्त्रयजयाय भुवनत्रयविजयार्थम्, बलातश्चलतः, पुष्पधन्वनः कामस्य, सबाणतूणवत् ससायकतूणीरमिव, रेजे शुशुभे ॥ ४४ ॥

तस्या इति—तस्या गन्धर्वदत्तायाः, सख्या सहचर्या प्रक्लृप्ता रचितेति सखीप्रक्लृप्ता सहचरी-रचिता, फणितुल्या नागसदृशी चासौ वेणी च कबरी चेति फणितुल्यवेणी, अतनोः कामस्य चापयष्टिर्धनु-र्यष्टिरित्यतनुचापयष्टिः, शरीरमेव वर्ष्मैवातनुचापयष्टिरिति शरीरातनुचापयष्टिस्तस्याः, मौर्वीव ज्येव, मुखमेव पद्मं मुखपद्मं वक्त्रवारिजं तस्य गन्धस्य सुरभेर्लोभेन तृष्णयागता प्राप्तेति तथा, भृङ्गपरम्परेव भ्रमर-श्रेणिरिव, रेजे शुशुभे। उत्प्रेक्षा ॥४५॥

एवमिति—एवमनेन प्रकारेण, जनेन प्रसाधिकावर्गेण, अलङ्कृताभ्यां शोभिताभ्याम्, यथास्थानं

१ द्रव्यादि ब०।

वधूवरमिदं तुल्यवयोरूपपरिष्कृतम् ।
सिद्धस्नानाम्भसा पूतमलंचक्रे महासनम् ॥४६॥

तावत्कोणताडितनिस्साणप्रमुखवादित्ररवबाचालितदिक्तटे मारसतीपदनूपुररवानुकारिमधुरगानचतुरवाराङ्गनानर्तनविलसिते वन्दिजनसन्दोहमुखारविन्दमकरन्दायितविरुदपदसन्दानिते शुभंयुगुणगुम्फिते मुहूर्ते विद्याधरेश्वरः करेण शयकान्तिपल्लवैरिवाशोकपल्लवतल्लजैः परिष्कृतमुखभागं कनककरकं बभार ।

राज्ञा कराम्भोजविकासनाय सम्प्राप्तसूराभसुवर्णकुम्भतः ।
न्यपाति धारा कुरुवीरहस्ते दीर्घं भवन्ताविह जीवतामिति ॥४७॥
जग्राह पाणौ कुरुवंशदीपो जीवन्धरः खेचरनन्दिनीं ताम् ।
निमीलिताक्षश्च बभूव सौख्यं स्पर्शाहितं द्रष्टुमिवान्तरङ्गे ॥४८॥
गन्धर्वदत्ता तत्पाणिस्पर्शेन समजायत ।
वधूरिन्दुकरस्पर्शाच्चन्द्रकान्तशिला यथा ॥४९॥

योग्यस्थानेषु, विनिवेशिताभ्यामधिष्ठापिताभ्याम्, ताभ्यां गन्धर्वदत्ताजीवन्धराभ्याम्, परिष्कृता सहिता शोभितेति यावत्, मणिदीपाश्च रत्नदीपाश्च मङ्गलद्रव्याणि च शुभपदार्थाश्चेति मणिदीपमङ्गलद्रव्याणि तैः शोभिता समलङ्कृता, मणिवेदिका रत्नवितर्दिका, सुरदम्पतीभ्यां देवदेवीभ्यां संगता सहिता, रत्नसानोः सुमेरोस्तटीव पार्श्वस्थलीव, व्यरोचत व्यशोभत । उपमा ।

वधूवरमिदमिति—वयश्च रूपश्चेति वयोरूपे, तुल्ये च ते वयोरूपे चेति तुल्यवयोरूपं सदृशावस्थासौन्दर्ये ताभ्यां परिष्कृतं सहितम्, इदं पूर्वोक्तम्, वधूश्च वरश्चानयोः समाहार इति वधूवरं जायापती, सिद्धस्नानस्य जिनाभिषेकस्याम्भो जलं तेन, पूतं पवित्रम्, महासनं महाविष्टरम्, अलंचक्रे शोभयामास, तस्योपर्युपविवेशेति भावः ॥४६॥

तावदिति—तावत् तावता कालेन, कोणेन वादनदण्डेन ताडितान्याहतानि निस्साणप्रमुखानि निस्साणप्रधानानि यानि वादित्राणि वाद्यानि तेषां रवेण शब्देन वाचालितानि मुखरितानि दिक्तटानि काष्ठातीराणि यस्मिंस्तस्मिन्, मारसत्या रतेः पदनूपुराणां चरणमञ्जीरकाणां रवानुकारि शब्दानुकरणशीलं यन्मधुरगानं मनोहरसंगीतं तस्मिन् चतुरा दक्षा या वाराङ्गना वेश्यास्तासां नर्तनेन नृत्येन विलसितः शोभितस्तस्मिन्, वन्दिजनसंदोहस्य मागधजनसमूहस्य मुखारविन्दमकरन्दायितानि वदनवारिजकौसुमायितानि यानि विरुदपदानि स्तुतिपदानि तैः सन्दानितो व्याप्तस्तस्मिन्, शुभं श्रेयोऽस्त्येषामिति शुभंयवस्ते च ते गुणाश्चेति शुभंयुगुणास्तैर्गुम्फितः सहितस्तस्मिन्, मुहूर्ते समये विद्याधरेश्वरो गरुडवेगः, करेण हस्तेन, शयस्य हस्तस्य कान्तिपल्लवा दीप्तिकिसलयास्तैरिव, अशोकस्य वञ्जुलस्य पल्लवतल्लजाः श्रेष्ठकिसलयास्तैः, परिष्कृतश्शोभितो मुखभागोऽग्रप्रदेशो यस्य तम्, कनककरकं सुवर्णभृङ्गारकम्, बभार दधार ।

राज्ञेति—राज्ञा गरुडवेगनृपेण, कराम्भोजयोः पाणिपद्मयोर्विकासनं विहर्षणं तस्मै, संप्राप्तः समायातो यः सूरः सूर्यस्तस्येवाभा यस्येति सम्प्राप्तसूराभः स चासौ सुवर्णकुम्भश्च काञ्चनकलशश्च तस्मात्, इह लोके, भवन्तौ जायापती, दीर्घं चिरकालपर्यन्तम्, जीवतां जीवितौ भवताम् इति हेतोः, कुरुवीरस्य जीवन्धरस्य हस्तः पाणिस्तस्मिन्, धारा जलस्रोतः, न्यपाति निपातिता ॥४७॥

जग्राहेति—कुरुवंशस्य दीप इति कुरुवंशदीपः स्ववंशप्रकाशकः, जीवन्धरो विजयानन्दनः, तां वीणया विजिताम्, खेचरनन्दिनीं विद्याधरपुत्रीम् । पाणौ हस्ते, जग्राह स्वीचकार, स्पर्शेनामर्शेनाहितं संमुत्पादितमिति स्पर्शाहितम्, सौख्यं सुखम्, अन्तरङ्गे चेतसि, द्रष्टुमिवावलोकयितुमिव, निमीलिते अक्षिणी यस्य तथाभूतः कुड्मलितलोचनश्च, बभूव आसीत् । उत्प्रेक्षा ॥४८॥

गन्धर्वदत्तेति—गन्धर्वदत्ता तन्नामवती, वधूर्जाया, तस्य जीवन्धरस्य पाणिर्हस्तस्तस्य स्पर्श-

तदा वधूटीमवलोक्य सोऽयं ननन्द मन्देतरविस्मयेन ।
निजप्रभापूरतरङ्गमध्ये वक्षोजतुम्बीफलतः प्लवन्तीम् ॥५०॥

सरोजयुग्मं बहुधा तपःस्थितं बभूव तस्याश्चरणद्वयं ध्रुवम् ।
न चेत्कथं तत्र च हंसकाविमौ समेत्य हृद्यं तनुतां कलस्वनम् ॥५१॥

विभान्ति तस्या नखराः पदांशुरक्ताननाः किंच विरिञ्चिक्लृप्ताः ।
अन्याङ्गनावक्त्रविलोकनाय विनिर्मलाः सन्मणिदर्पणा वा ॥५२॥

आपाटलैर्नखैरस्या जिग्ये कुरवकच्छविः ।
अशोकपल्लवो नूनमङ्घ्रिपङ्कजरोचिषा ॥५३॥

जङ्घायुगं खेचरकन्यकाया अवैमि पञ्चायुधतूणयुग्मम् ।
यद्वा निशानाय च वज्रशाणोपलं शराणां कुसुमायुधस्य ॥५४॥

मनोजगेहस्य तदङ्गकस्य वक्षोजवप्रेण विराजितस्य ।
ऊरुद्वयं स्तम्भनिभं विरेजे प्रतप्तचामीकरचारुरूपम् ॥५५॥

स्तेन, इन्दुकरस्पर्शात् चन्द्रकिरणसंपर्कात्, चन्द्रकान्तशिला यथा शशिकान्तमणिशिलेव, समजायत बभूव । नायककरस्पर्शेन प्रस्वेदवती बभूवेति भावः ॥४९॥

तदेति—तदा पाणिग्रहणवेलायाम्, निजप्रभापूरस्य स्वकान्तिप्रवाहस्य तरङ्गा भङ्गास्तेषां मध्ये, वक्षोजौ स्तनावेव तुम्बीफले अलाबूफले ताभ्याम्, प्लवन्तीं तरन्तीम्, वधूटीं युवतिम्, अवलोक्य दृष्ट्वा, सोऽयं जीवन्धरः, मन्देतरविस्मयेन विपुलाश्चर्येण, ननन्द समृद्धियुक्तो बभूव । 'टुनदि समृद्धौ' इत्यस्य लिटि रूपम् ॥ ५० ॥

सरोजयुग्ममिति—बहुधा बहुप्रकारेण, आतपे घर्मे स्थितं विद्यमानम्, पक्षे तपःसु तपश्चरणेषु स्थितं विद्यमानम्, सरोजयुग्मं कमलयुगलम्, ध्रुवं निश्चयेन, तस्या गन्धर्वदत्तायाः, चरणद्वयं पादद्वन्द्वम्, बभूवाजायत, तपःस्थितस्य किं दुर्लभमिति भावः । न चेत्? एवं न स्यात्तर्हि, इमौ हंसकौ नूपुरौ पक्षे मञ्जीरके, तत्र चरणयुग्मे, समेत्य संगत्य, हृद्यं मनोहरम्, कलस्वनमव्यक्तमधुरशब्दम्, कथं केन कारणेन, तनुतां विस्तारयताम् । तपस्थितमित्यत्र 'खर्परे शरि वा विसर्गलोपो वक्तव्यः' इति वार्तिकेन वैकल्पिको विसर्गलोपः । श्लेषानुप्राणितोऽत्र [illegible] ॥ ५१ ॥

विभान्तीति—किञ्च, अन्यच्च, पदयोश्चरणयोरंशुभिः किरणै रक्तं लोहितमाननमग्रभागो येषां ते, तस्या वध्वाः, नखरा नखाः अन्याश्च ता अङ्गनाश्चेत्यन्याङ्गना इतरवनितास्तासां वक्त्रस्य मुखस्य विलोकनं दर्शनं तस्मै, विरिञ्चिना ब्रह्मणा क्लृप्ता रचिताः विनिर्मलाः स्वच्छतराः, सन्मणिदर्पणा वा सुरत्नादर्शा इव, विभान्ति शोभन्ते । 'वा स्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये' इत्यमरः ॥ ५२ ॥

आपाटलैरिति—अस्या गन्धर्वदत्तायाः आपाटलैः श्वेतरक्तैः नखैर्नखरैः, कुरवकस्य पुष्पविशेषस्य छविः कान्तिः, जिग्ये जिता । अङ्घ्रिपङ्कजयोश्चरणकमलयो रोचिः कान्तिस्तेन, अशोकपल्लवः कङ्केलिकिसलयः, नूनमित्यत्रधारणे, जिग्ये जितः ॥ ५३ ॥

जङ्घायुगमिति—खेचरकन्यकाया विद्याधरपुत्र्याः, जङ्घायुगं प्रसृतायुगलम्, पञ्चायुधस्य कामस्य तूणयोरिषुध्योर्युग्मं द्वयमिति पञ्चायुधतूणयुग्मम्, अवैमि जानामि, यद्वाथवा, कुसुमायुधस्य कामस्य, शराणां बाणानाम्, निशानाय तीक्ष्णीकरणाय, च, वज्रशाणोपलं भिदुरनिकषपाषाणम्, अवैमीति क्रियया सम्बन्धः ॥ ५४ ॥

मनोजगेहस्येति—प्रतप्तस्य निष्टप्तस्य चामीकरस्येव सुवर्णस्येव चारु मनोहरं रूपं यस्य तत्, ऊरुद्वयं सक्थियुगलम्, वक्षोजवप्रेण स्तनधूलिकुट्टिमेन 'वप्रः स्याद् धूलिकुट्टिमम्' इति धनंजयः, विराजितस्य शोभितस्य, तदङ्गकस्य तच्छरीरस्य, मनोजगेहस्य कामनिकेतनस्य, स्तम्भनिभं स्तम्भसदृशम्, विरेजे शुशुभे ॥ ५५ ॥

अस्याश्च नितम्बतलं दुकूलस्वच्छजलविलसितसैकतमिव कामाब्धिनिमज्जत्तरुणतरणाय यौवनाग्निनिष्टप्तहैमकलशयुगलमिव कन्दर्पवास्त्रचक्रयानमिव शृङ्गारमहीपतिक्रीडाशैलवलयमिव व्यराजत ।

एतस्याः किल रोमराजिः, चन्दनव्याप्तवक्षोरुहभूमिधरमारोहतो दर्पकस्य मरकतसोपानपङ्क्तिरिव, सौन्दर्यतरङ्गिणीविततसेतुरिव, नाभिवापिकामज्जनोत्सुकस्य शम्बररिपुद्विपस्य गण्डमण्डलादुद्गच्छन्ती चञ्चरीकमालेव, दुर्वहस्तनभारवहनचिन्तया तानवमुपगतेन मध्येन समाश्रितालम्बनयष्टिरिव, नाभीवल्मीकमुखोद्गता कालभुजगीव, रुरुचे ।

रोमराजिलतागुच्छौ कुचावस्या मृगीदृशः ।
चकर्षतुः कुमारस्य नयनच्छलषट्पदम् ॥ ५६ ॥
पयोधरोन्नतिस्तस्याः पुपोषाङ्गजकेकिनम् ।
हारविद्युल्लतोपेता नीलाम्बरविजृम्भिता ॥ ५७ ॥
स्तनौ सुमेषो रसपूर्णकुम्भौ विमुद्रितौ चूचुकसज्जतुभ्याम् ।
तस्या विधात्रा विनिपातभीत्या तौ कीलितावायसशङ्कुना किम् ॥ ५८ ॥

अस्याश्चेति—अस्याश्च गन्धर्वदत्तायाश्च, नितम्बतलं कटिपश्चाद्भागः, दुकूलं क्षौममेव स्वच्छजलं निर्मलनीरं तेन विलसितं शोभितं यत्सैकतं सिकतामयं तद्वत्, कामाब्धौ कन्दर्पपयोधौ निमज्जन्तो ये तरुणा युवानस्तेषां तरणं प्लवनं तस्मै, यौवनाग्निना तारुण्यानलेन निष्टप्तं सन्तप्तं यद् हैमकलशयुगलं सौवर्णकुम्भयुगं तद्वत्, वस्त्रेण परिवृतं वास्त्रं वास्त्रञ्च तच्चक्रयानञ्चेति वास्त्रचक्रयानं कन्दर्पस्य कामस्य वास्त्रचक्रयानं वस्त्रपरिवृतचक्रवाहनमिति तथा तद्वत्, शृङ्गार आद्यरस एव महीपती राजा तस्य क्रीडाशैलस्य केलिपर्वतस्य वलयमिव मण्डलमिव, व्यराजत व्यशोभत ।

एतस्या इति—एतस्याः खेचरसुतायाः किलेति वार्तायाम्, रोमराजिर्लोमपङ्क्तिः, चन्दनेन व्याप्तश्चन्दनव्याप्तो मलयजपरिवृतः, स चासौ वक्षोरुहभूमिधरश्च कुचपर्वतश्चेति तम्, आरोहत उत्पतत: दर्पकस्य कन्दर्पस्य 'कंदर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मृतः' इत्यमरः । मरकतसोपानपङ्क्तिरिव हरिन्मणिमयनिश्रेणिपरम्परेव सौन्दर्यमेव लावण्यमेव तरङ्गिणी स्रवन्ती तस्या विततसेतुरिव विस्तृतपुलिनमिव, नाभिरेव वापिका नाभिवापिका तुन्दीदीर्घिका तस्यां मज्जनेऽवगाहने उत्सुकस्तत्परस्तस्य, शम्बररिपोर्मनसिजस्य द्विपो गजस्तस्य, गण्डमण्डलात् कटप्रदेशात् 'गण्डः कटः' इत्यमरः । उद्गच्छन्ती समुत्पतन्ती, चञ्चरीकमालेव षट्पदश्रेणिरिव, दुःखेनोह्यत इति दुर्वहो दुर्भरः स चासौ स्तनभारश्च कुचभारश्चेति दुर्वहस्तनभारस्तस्य वहनस्य धारणस्य चिन्ता तया, तानवं कार्श्यम्, उपगतेन प्राप्तेन, मध्येनावलग्नेन कटिप्रान्तेनेति यावत्, समाश्रिता गृहीता आलम्बनयष्टिश्चाश्रयदण्डश्चेति समाश्रितालम्बनयष्टिस्तद्वत्, नाभीवल्मीकस्य तुन्दीवामलूरस्य मुखादग्रभागादुद्गतोद्भूता, कालभुजगीव कृष्णपन्नगीव, रुरुचे शुशुभे । उत्प्रेक्षा ।

रोमराजिलतागुच्छाविति—मृगीदृशः कुरङ्गलोचनायाः, अस्या गन्धर्वदत्तायाः, रोमराजिरेव लोमपङ्क्तिरेव लता वल्ली तस्या गुच्छौ स्तवकौ, कुचौ पयोधरौ 'स्तनः पयोधरः कुचो वक्षोज इति वर्णितः' इति धनञ्जयः । कुमारस्य जीवन्धरस्य, नयनस्य छलं व्याजं यस्य नयनच्छलः स चासौ षट्पदश्च भ्रमरश्च तम्, चकर्षतुराकृष्टं चक्रतुः । रूपकालङ्कारः ॥ ५६ ॥

पयोधरोन्नतिरिति—हार एव मुक्तादामैव विद्युल्लता तडिद्वल्लरी तयोपेता सहिता, नीलाम्बरं नीलगगनमेव नीलाम्बरं नीलवस्त्रं तस्मिन् विजृम्भिता वृद्धिङ्गता, तस्या गन्धर्वदत्तायाः, पयोधरोन्नतिः पयोधरयोः स्तनयोः पक्षे पयोधराणां मेघानामुन्नतिरिति पयोधरोन्नतिः, अङ्गज एव केकी तम् कामकलापिनम्, पुपोष पुष्टं चकार । श्लेषानुप्राणितो रूपकालंकारः ॥ ५७ ॥

स्तनाविति—तस्या गन्धर्वदत्तायाः, तौ प्रसिद्धौ, स्तनौ कुचौ, चूचुकसज्जतुभ्यामग्रभागोत्तमलाक्षाभ्याम्, विमुद्रितौ सम्यगावरुध्य मुद्रया चिह्नितौ, सुमेषोः पुष्पेषोः कामस्येति यावत्, रसेन पूर्णौ रसपूर्णौ तौ च तौ कुम्भौ च कलशौ चेति रसपूर्णकुम्भौ विधात्रा ब्रह्मणा, विनिपातस्य भीतिस्तया उन्मुद्रणभयेन, आयसशङ्कुना लोहकीलकेन, कीलितौ खचितौ, किमिति वितर्के । उत्प्रेक्षा ॥ ५८ ॥

सुरापगाशोभितहेमपद्मिनीमृणालतुल्यौ सुदृशो महाभुजौ ।
भुजङ्गबन्धार्थमजेन निर्मितौ विशालपाशाविव तौ व्यराजताम् ॥ ५९ ॥

सुतनुतनुलताया विस्तृते बाहुशाखे
मृदुलमसृणशोभे स्वाङ्गुलिश्रीप्रवाले ।
नखरुचिरलतान्ते मञ्जुगुञ्जद्विलोल-
न्मरकतवलयालिव्यापृते ते व्यभाताम् ॥ ६० ॥

शिरोधरे खञ्जनलोचनायाः कम्बुप्रतीपे किल पञ्चबाणः ।
जगत्त्रयं निर्जितमेतयेति रेखात्रयं मङ्क्षु चकार वीरः ॥ ६१ ॥

जगदुरधरं तस्याः केचित्तु वक्त्रसुधाकरा-
न्तिमविलसितं सन्ध्यारागं परे नवपल्लवम् ।
कतिचन मुखाभाम्भोराशिप्रवालममी वयं
रदततिमणीरक्षालाक्षात्तमञ्जुलमुद्रिकाम् ॥ ६२ ॥

वाणी तस्याः पिककुलकलारावनिन्दाधुरीणा
पीयूषाणां वितरति ह्रियं गोस्तनीं न्यक्करोति ।
पुण्ड्रेक्षूणां रसघनसितां खण्डितामातनोति
साध्वीं माध्वीमधरयति च प्राज्यमाधुर्यपूरा ॥६३॥

सुरापगेति—सुरापगायां गङ्गायां शोभिता विराजिता या हेमपद्मिन्यः सुवर्णसरोजिन्यस्तासां मृणालानि बिसानि तैस्तुल्यौ सदृशौ, सुदृशः सुलोचनायाः, तौ प्रसिद्धौ, महाभुजौ सुदीर्घबाहू, भुजङ्गानां कामुकानां बन्धार्थं बन्धनाय, अजेन ब्रह्मणा, निर्मितौ रचितौ, विशालपाशाविव दीर्घजाले इव व्यराजताम्—व्यशोभेताम् । उत्प्रेक्षा ॥ ५९ ॥

सुतनुतनुलताया इति—मृदुला कोमला मसृणा स्निग्धा च शोभा दीप्तिर्ययोस्ते, स्वाङ्गुलीनां निजहस्तशाखानां श्रियः शोभा एव प्रवालाः किसलया ययोस्ते, नखान्येव नखराण्येव रुचिरलतान्तानि सुन्दरपुष्पाणि ययोस्ते, मञ्जु मनोहरं यथा स्यात्तथा गुञ्जन्ति शब्दं कुर्वन्ति विलोलानि चपलानि च यानि मरकतवलयानि हरिन्मणिमयकटकास्तान्येवालयो भ्रमरास्तै व्यापृते, विस्तृते सुदीर्घे, सुतनुतनुलताया गन्धर्वदत्ताशरीरवल्लर्याः ते प्रसिद्धे, बाहुशाखे भुजशाखे, व्यभाताम् व्यराजताम् । रूपकालङ्कारः ॥६०॥

शिरोधर इति—खञ्जनलोचनायाः खञ्जरीटदृशः, गन्धर्वदत्तायाः कम्बुप्रतीपे शङ्खसन्निभे, शिरोधरे कण्ठे 'शिरोधरा गलो ग्रीवा कण्ठश्च धमनीभ्रमः' इति धनंजयः, वीरः सुभटः, पञ्चबाणः कामः, एतयानया, जगत्त्रयं लोकत्रितयम्, निर्जितं निःशेषेण पराजितम्, स्वसौन्दर्यातिशयेनेति यावत्, इत्येवं सूचनार्थमिव, मङ्क्षु शीघ्रम्, रेखात्रयं चिह्नत्रयम्, चकार विदधे, किलेति वार्तायाम् । उत्प्रेक्षा ॥ ६१ ॥

जगदुरधरमिति—केचित्तु केचन तु कवयः तस्या गन्धर्वदत्तायाः, अधरं दशनच्छदम्, वक्त्रं मुखमेव सुधाकरश्चन्द्रस्तस्यान्तिके समीपे विलसितः शोभितस्तम्, संध्यारागं पितृप्रसूलौहित्यमानम्, परेऽन्ये, नवश्चासौ पल्लवश्च तं नूतनकिसलयम्, कतिचन केचन, मुखाभा वदनकान्तिरेवाम्भोराशिः सागरस्तस्य प्रवालो विद्रुमस्तम्, जगदुः कथयाञ्चक्रुः, अमी एते, वयम्, रदततयो दन्तपङ्क्तय एव मणयो रत्नानि तेषां रक्षायै लाक्षया अनुबिद्धा या मञ्जुलमुद्रिका सुभगावरोधिका ताम्, जगाम इति शेषः । रूपकालङ्कारः । हरिणीवृत्तम् ॥ ६२ ॥

वाणी तस्या इति—तस्या गन्धर्वदत्तायाः, प्राज्यं प्रकृष्टं यन्माधुर्यं माधुरी तत्पूरयतीति प्राज्यमाधुर्यपूरा, प्रकृष्टमाधुर्यानिभृता, पिककुलस्य कोकिलकलापस्य यः, कलारावो मनोहरशब्दस्तस्य निन्दायां गर्हायां धुरीणा निपुणा, वाणी भारती, पीयूषाणां सुधानाम्, ह्रियं त्रपाम् 'मन्दाक्षं ह्रीस्त्रपा व्रीडा' इत्यमरः, वितरति ददाति अनयतीत्यर्थः, गोस्तनीं द्राक्षाम्, न्यक्करोति तिरस्करोति, पुण्ड्रेक्षूणां पुण्ड्रकाख्येक्षूणाम्, रसेन घना रसघना रसनिबिडा सा चासौ सिता च शर्करा चेति रसघनसिता ताम्, खण्डितां विभक्तामेव,

नासा तदीया मुखचन्द्रबिम्बाद्विनिर्गलन्नव्यसुधोरुधारा ।
घनत्वमाप्तेव रदालिमुक्तामणीतुलायष्टिरिव व्यलासीत् ॥६४॥

वदनसदने तस्यास्तिष्ठञ्जगद्विजयी स्मरः
सपदि कुटिलभ्रूबाणासे दृशौ विशिखौ व्यधात् ।
सकलतरुणश्रेणीमर्मच्छिदाहितरक्तता-
मधिमुखमिते चैतेऽभातां पयोजसलक्षणे ॥६५॥

अनङ्गपक्षिबन्धाय पाशौ किं वेधसा कृतौ ।
तत्कर्णावुत्पलव्याजाज्जनदृक्पक्षिरक्षिणौ ॥६६॥

तदाननवसुव्रजं निशि हरन्निशानायको
वियत्सरणिकानने विरचयन्गतिं वेगतः ।
दिवा क्वचन लीनतामुपगतोऽयमालक्ष्यते
न चेत्स वसुहारकः कथमयं कलङ्कोऽन्ततः ॥६७॥

मुखेन्दुरुचिवारिधेर्विततशैवलो वा घना-
घनालिरिव चन्द्रिरं मुखमितस्ततः संगता ।
मनोजदहनोद्भवन्निबिडधूमधारोऽथवा
मुखाब्जमधुपोत्करः किमथवा कृशाङ्ग्याः कचः ॥६८॥

आतनोति विदधाति, माध्वीं श्रेष्ठाम्, माध्वीं मधुरमदिरां च, अधरयति तिरस्करोति । उपमा, मन्दाक्रान्ताच्छन्दः ॥ ६३ ॥

नासा तदीयेति—तदीया तत्सम्बन्धिनी, नासा घ्राणम्, घनत्वं निबिडत्वम्, आप्ता प्राप्ता, मुखमेव चन्द्रबिम्बं तस्माद् वदनशशिमण्डलात्, विनिर्गलन्ती निष्पतन्ती नव्या नूतना च या सुधायाः पीयूषस्योरुधारा दीर्घसन्ततिस्तद्वदिति विनिर्गलन्नव्यसुधोरुधारेव, यद्वा, रदालयो दन्तपङ्क्तय एव मुक्तामण्यो मुक्ताफलरत्नानि तेषां तुलायष्टिरिव तोलनदण्ड इव, व्यलासीत्-शुशुभे । उत्प्रेक्षा ॥ ६४ ॥

वदनसदन इति—तस्या गन्धर्वदत्तायाः, वदनमेव सदनं तस्मिन् मुखमन्दिरे, तिष्ठन् निवसन्, जगद्विजयी त्रिभुवनजित्वरः, स्मरः कामः, सपदि क्षिप्रम्, कुटिलभ्रुवावेव वक्रभ्रुकुट्यावेव बाणासश्चापस्तस्मिन्, दृशौ नयने, विशिखौ बाणौ, व्यधात्-चकार, अतएव, मुख इत्यधिमुखमध्यप्रभागम्, पयोजसलक्षणे कमलतुल्ये, एते दृशौ, सकलतरुणश्रेण्या निखिलयुवसमूहस्य मर्मच्छिदया मर्मस्थानविघातेनाहिता प्रापिता या रक्तता लोहितता ताम्, इते च प्राप्ते च, अभाताम् शुशुभाते । रूपकोत्प्रेक्षे । हरिणीच्छन्दः ॥६५॥

अनङ्गेति—उत्पलानां नीलारविन्दानां व्याजं छलं तस्मात्, जनदृशो नरनयनान्येव पक्षिणो विहङ्गमास्तान् रक्षतो निघ्नत इत्येवं शीलौ, तस्या गन्धर्वदत्ताया, कर्णौ श्रवणे, जनदृश एव पक्षिणस्तेषां बन्धोऽवग्रहणं तस्मै, वेधसा ब्रह्मणा, कृतौ विहितौ, किं पाशौ किं बन्धने, आस्तामिति शेषः । रूपकोत्प्रेक्षे ॥६६॥

तदाननवसुव्रजमिति—तस्या गन्धर्वदत्ताया आननं मुखमिति तदाननं तस्य वसुव्रज एव किरणकलाप एव वसुव्रजो धनसमूहस्तम् 'वसुर्मयूखाग्निधनाधिपेषु' इति वैजयन्ती, हरन् चोरयन्, अयमेषः, निशानायकश्चन्द्रः, निशि रजन्याम्, वियत्सरणिराकाशमार्ग एव काननं वनं तस्मिन् , वेगतो रंहसा, गतिं गमनम्, विरचयन् कुर्वन्, दिवा दिवसे, क्वचन कुत्रापि, लीनतामन्तर्हिततताम्, उपगतः प्राप्तः, आलक्ष्यते दृश्यते, चेद्यदि, स निशानायकः, वसुहारको धनापहर्ता, न नो अस्ति, तर्हि, अन्ततो मध्ये, अयं दृश्यमानः कलङ्कः पापचिह्नम्, पक्षे लाञ्छनम्, कथं केन कारणेन, अस्तीति शेषः । अन्योऽपि कश्चित्तस्करश्चित्कस्यापि धनजातं चोरयित्वा रात्रौ वेगेन काननमार्गं समुल्लङ्घ्य कुत्रापि सुरक्षितस्थाने तिरोभवति तद्वच्चन्द्रोऽपीति भावः । श्लेषरूपकानुप्राणितोत्प्रेक्षा । पृथ्वीच्छन्दः ॥ ६७ ॥

मुखेन्दुरुचिवारिधेरिति—मुखेन्दोर्वदनविधो रुचिरेव कान्तिरेव वारिधिः सागरस्तस्य, वितत-

किन्नरी किमसुरी किमु नारी मन्मथस्य किमु हेमलता किम् ।
चञ्चला किमुत तारकाथवा सा ध्रुवं नयनभाग्यरेखिका ॥६९॥

क्रमेण विवर्धितरागां सन्ध्याललनामिव सुधासूतिरेष जीवन्धरस्वामी गन्धर्वदत्तामाश्लिष्य मारवीरनिक्षिप्तनाराचनवमल्लिकाकोरकायमाणरोमाञ्चप्रपञ्चकञ्चुकिताङ्गः, सुरतनाटकनान्दीपदानीव चाटुवचनानि प्रयुञ्जानः उत्तरीयापनयनत्रपमाणायाः कोमलभुजस्वस्तिकापिहितकुचकुड्मलतया वीक्षणमार्गं रुन्धत्यास्तस्या वक्षोरुहपूर्वाचलशृङ्गे कथंचिल्लब्धोदयेन निजलोचनचन्द्रेणाभिवर्धितकामार्णवसलिलपूरैः श्रोणिक्षोणीमण्डलं प्लावयन्, संलापपल्लवितकुतुकामप्यभिधातुमनीशाम्, प्रियवदनचन्द्रोपकण्ठे नयनचकोरविहरणाय स्पृहयालुमपि लज्जया सम्मुखीभवितुमपारयन्तीम्, कुसुममृदुलदयिताङ्गस्पर्शनलोलुपामपि कम्पमानामेनाम्, भ्रूकुटीकपोलचुबुकरदनवसननयनचूचुकादिपदे परिचुम्बन्, स्वेदसलिलसञ्जातमार्दवैः कररुहैः कठिनतरकुचकलशतटे पदानि

शैवलो विस्तृतजलनीली, वा अथवा, इतस्ततः—यतः कुतोऽपि, मुखं वक्त्रम्, चन्दिरं चन्द्रमसम्, संगता प्राप्ता, घना निबिडा, घनालिरिव मेघपङ्क्तिरिव, अथवा-यद्वा, मनोजदहनात्कन्दर्पपावकादुद्गवन्नुत्तिष्ठन् निबिडो विकटो धूमभारो धूम्रसमूहः, अथवा, मुखाब्जे वदनवारिजे विद्यमानो मधुपोत्करो भ्रमरसमूहः, अथवा किम्, कृशाङ्ग्यास्तन्वङ्ग्या गन्धर्वदत्ताया इति यावत्, कचः केशः, आसीदिति शेषः । रूपकानुप्राणितः संशयालङ्कारः । पृथ्वीच्छन्दः ॥ ६८ ॥

किन्नरीति—सा गन्धर्वदत्ता, किं किन्नरी किन्नराङ्गना, किमु असुरी—असुराङ्गना, किमु मन्मथस्य कामस्य नारी कामिनी रतिरिति यावत्, किम् हेमलता सुवर्णवल्लरी, किम् चञ्चला सौदामिनी, 'तडित्सौदामिनीविद्युच्चञ्चला चपला अपि' इत्यमरः । उत आहोस्वित्, तारका तारा, अथवा ध्रुवं निश्चयेन नयनयोर्भाग्यरेखिकेति नयनभाग्यरेखिका लोचनभागधेयलेखा, आसीदिति शेषः, संशयालङ्कारः, । स्वागता रथोद्धतयोर्मिश्रणादुपजातिः ॥ ६९ ॥

क्रमेणेति—क्रमेण क्रमशः, विवर्धितो वृद्धिङ्गतो रागोऽरुणिमा पक्षे प्रीतिर्यस्यास्ताम्, सन्ध्याललनां पितृप्रसूप्रियाम्, सुधासूतिरिव शशीव, 'शशी विधुः सुधासूतिः' इति धनंजयः, एष जीवन्धरस्वामी सत्यन्धरतनयः, गन्धर्वदत्तां गरुडवेगसुताम्, आश्लिष्य समालिङ्ग्य, मारवीरेण मदनसुभटेन निक्षिप्ता निक्षिप्ता या नाराचरूपा बाणरूपा नवमल्लिका नूतनमालत्यस्तासां कोरकायमाणाः कुड्मलायमाना ये रोमाञ्चा रोमहर्षणानि तेषां प्रपञ्चेन समूहेन कञ्चुकितं व्याप्तमङ्गं शरीरं यस्य तथाभूतः सन्, सुरतं संभोग एव नाटकं रूपकं तस्य नान्दीपदानीव नान्दीवचनानीव चाटुवचनानि प्रियवाक्यानि, प्रयुञ्जानः प्रयुक्तानि कुर्वाणः, 'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते । देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता' इति नान्दीलक्षणम् । उत्तरीयस्योपरि वस्त्रस्यापनयनेन दूरीकरणेन त्रपमाणाया लज्जमानायाः, कोमलभुजयोर्मृदुलबाह्वोः स्वस्तिकया स्वस्तिकाकृत्या पिहिते तिरोहिते कुचकुड्मले स्तनमुकुलके यस्यास्तस्या भावस्तया, वीक्षणमार्गं नयनमार्गम्, रुन्धत्या आवृण्वत्याः, तस्या गन्धर्वदत्तायाः, वक्षोरुहः स्तन एव पूर्वाचल उदयशैलस्तस्य शृङ्गे शिखरे, कथञ्चित्केनापि प्रकारेण, लब्ध उदयो येन तेन प्राप्तोद्गमेन, निजलोचनं स्वनयनमेव चन्द्रो विधुस्तेन, अभिवर्धितानि वृद्धिंगतानि यानि कामार्णवसलिलानि कन्दर्पपारावारजलानि तेषां पूरैः प्रवाहैः, श्रोणिक्षोणीमण्डलं नितम्बमहीवलयम्, प्लावयन् प्लुतं कारयन् सन्, संलापे वार्तालापे पल्लवितं वृद्धिंगतं कुतुकं कौतूहलं यस्यास्तथाभूतामपि, अभिधातुं निगदितुम्, अनीशामसमर्थाम्, प्रियस्य वल्लभस्य वदनमेव मुखमेव चन्द्रः शशी तस्योपकण्ठे समीपे, नयने एव चकोरौ नयनचकोरौ लोचनजीवंजीवौ तयोर्विहरणं भ्रमणं तस्मै, स्पृहयालुमपि स्पृहायुक्तामपि, लज्जया ह्रिया, सम्मुखीभवितुं पुरस्तात्स्थातुम्, अपारयन्तीमसमर्थायमानाम्, कुसुममिव मृदुलं कुसुममृदुलं पुष्पकोमलं, तच्च तद्दयिताङ्गञ्चेति कुसुममृदुलदयिताङ्गं तस्य स्पर्शनमामर्शनं तस्मिन् लोलुपा लुब्धा तां तथाभूतामपि, कम्पमानां त्रस्यन्तीम्, एनां प्रियाम्, भ्रुकुटी च भ्रुवौ च, कपोलौ च गण्डौ च, चुबुकश्च हनुश्च, रदनवसनं च दन्तच्छदश्च, नयनं च लोचनं च, चूचुकं च स्तनाग्रभागश्चेति भ्रुकुटीकपोलचुबुकरदनवसननयनचूचुकं तदादौ यस्य तत्, तच्च तत्पदं चेति तस्मिन्, परिचुम्बन्

विचुम्बन्, नखम्पचोष्मलवक्षोरुहशिखरादपकर्ष्य पञ्चशाखपङ्कजं निम्ने नाभिसरसि निदधानः, मदनकदनारम्भसंसूचककाञ्चीकलापकलकलपटुपटहारवपरिशोभितं नीवीबन्धनभेदनं कुर्वाणः, मदनमत्तदन्तावलालानस्तम्भायमानमूरुस्तम्भं मारमदेभमोचनायेव परिमृशन्, अधिकतरमरमत ।

जायापती तौ जगतां स्तुत्यौ निस्तुलसम्पदा ।
आसामासतुरानन्दनिधेः पारे गिरामपि ॥७०॥

इति महाकविहरिचन्द्रविरचिते जीवन्धरचम्पूकाव्ये गन्धर्वदत्तालम्भो
नाम तृतीयो लम्भः ।

परिचुम्बितां कुर्वन्, स्वेदसलिलेन घर्मोदकेन संजातं समुत्पन्नं मार्दवं कोमलत्वं येषां तैः, कररुहैर्नखैः, कठिनतरं परुषतरं यत्कुचकलशतटं स्तनकुम्भतीरं, पदानि चिह्नानि नखक्षतानीति यावत्, विदधानः कुर्वाणः, नखम्पचावूष्मलौ च यौ वक्षोरुहौ तयोः शिखरं तस्मात्, नखम्पचोष्णताशालिकुचाग्रभागात्, पञ्चशाखपङ्कजं करकमलम्, अपकर्ष्यावतार्य, निम्ने गभीरे, नाभिसरसि तुन्दिकाकासारे, निधत्त इति निदधानो निक्षिपन्, मदनकदनस्य कामयुद्धस्य सुरतस्येति यावत्, आरम्भः प्रारम्भस्तस्य संसूचको विनिवेदको यः काञ्चीकलापस्य मेखलामण्डलस्य कलकलोऽव्यक्तशब्दविशेषः, स एव पटुपटहानां श्रेष्ठवाद्यानामारवः शब्दस्तेन परिशोभितं समलङ्कृतम्, नीवीबन्धनस्य अधोवस्त्रग्रन्थेर्भेदनमुद्घाटनम्, कुर्वाणो विदधानः, मदन एव काम एव मत्तदन्तावलो गन्धगजस्तस्यालानस्तम्भ इव बन्धस्तम्भ इवाचरतीति तथाभूतम्, ऊरुस्तम्भं सक्थिस्तम्भम्, मारमदेभस्य मदनमत्तमतङ्गजस्य मोचनं स्वतन्त्रीकरणं तस्मायिव, परिमृशन् सन्, अधिकतरं सातिशयं यथा स्यात्तथा, अरमत रमणञ्चकार ।

जायापतीति—निस्तुलसम्पदा निरुपमसम्पत्त्या, जगतां लोकानाम्, स्तुत्यौ स्तुत्यर्हौ, तौ पूर्वोक्तौ, जायापती दम्पती, आनन्द एव निधिस्तस्य हर्षशेवधेः, गिरामपि वाचामपि पारे परतटे, अगोचर इति यावत्, आसामासतुः स्थितौ बभूवतुः 'दयायासश्च' इत्याम्प्रत्ययः ॥ ७० ॥

इति महाकविहरिचन्द्रविरचिते कौमुदीव्याख्याधरे जीवन्धरचम्पूकाव्ये
गन्धर्वदत्तालम्भो नाम तृतीयो लम्भः ।

चतुर्थो लम्भः

[अथ[1] जीवन्धरो वीरो रेमे गन्धर्वदत्तया।
सम भोगं यथायोग्यं संसारविषयोद्भवम् ॥ १ ॥
ततः समागतः कालः वसन्तसमयाभिधः।
वनं वृक्षलताव्याप्तं जननेत्रसुखावहम् ॥ २ ॥]

माकन्दद्रुममञ्जरीमधुझरीसंसक्तमाध्वीलिहां
झङ्कारैः पिकमञ्जुगानकलितैर्मारोत्सवाशंसिनः।
प्राप्ताः केचन वासराः कुरवकप्रोन्मीलितैः कोरकै-
र्दन्ताभैर्विहसन्मुखा विरहिणां मर्मच्छिदाकर्मठाः ॥ १ ॥

तदानीं जगज्जयोद्युक्तपञ्चबाणप्रयाणसूचकमाञ्जिष्ठदूष्यनिलयनिकाशपल्लवितशोकपेशलं सुवर्णशृङ्खलसंनद्धवनदेवताञ्चितपेटिकायमानरसालपल्लवसमासीनकोकिलकुलं तरुणजनहृदयविदारणदारुणकुसुमबाणनखरायमाणकिंशुककुसुमसङ्कुलं मदननरपालकनकदण्डायितकेसरकुसुमभासुरं

[अथेति—अथ विवाहानन्तरं वीरः शूरो जीवन्धरः सात्यन्धरिः, गन्धर्वदत्तया वीणाविजयलब्धया खेचरसुतया, समं सार्धं, संसारविषयोद्भवं संसारविषयसमुत्पन्नं यथायोग्यं यथार्हं भोगं पञ्चेन्द्रियं विषयम्, अनुभवन्निति शेषः। रेमे रमते स्म ॥ १ ॥

तत इति—ततस्तदनन्तरं, वसन्तसमयाभिधो वसन्तकालनामधेयः, कालः समयः समागतः सम्प्राप्तः। वनं च काननं च, वृक्षलताव्याप्तं तरुप्रततिव्याप्तं, जननेत्रसुखावहं लोकलोचनाह्लाददायकम् अभूदिति शेषः ॥ २ ॥]

माकन्देति—पिकानां कोकिलानां मञ्जुगानेन मनोहरसंगीतेन कलिताः सहितास्तैः, माकन्दद्रुमाणामाम्रानोकहानां मञ्जर्यः पुष्पस्रजस्तासां मधुझर्यो मकरन्दप्रवाहास्तासु संसक्ता निलीना ये माध्वीलिहो भ्रमरास्तेषाम्, झङ्कारैरव्यक्तशब्दविशेषैः, मारोत्सवं कामोल्लासमाशंसन्ति सूचयन्तीत्येवं शीलाः, कुरवकेषु वृक्षविशेषेषु प्रोन्मीलितैर्विकसितैः, दन्ताभैर्दशनसदृशैः, कोरकैः कुड्मलैः, विहसत् हास्यसहितं मुखं येषां ते, विरहिणां वियोगिनाम्, मर्मच्छिदायां मर्मस्थानविदारणे कर्मठा दक्षाः, केचन केऽपि, वासन्तिका इति यावत्, वासरा दिवसाः, प्राप्ताः समागताः। शार्दूलविक्रीडितच्छन्दः ॥ १ ॥

तदानीमिति—तदानीं तस्मिन् काले, वनं विपिनम्, ईदृग् अजायत बभूव, कीदृगित्याह—जगज्जयाय लोकविजयायोद्युक्तस्तत्परो यः पञ्चबाणः कामस्तस्य प्रयाणं प्रस्थानं तस्य सूचका निवेदका ये माञ्जिष्ठा मञ्जिष्ठेन वर्णेन रक्ता दूष्यनिलयाः पटगृहाणि तेषां निकाशाः सदृशा ये पल्लविताशोकाः किसलयितकङ्केलयस्तैः पेशलं सुभगम्, सुवर्णशृङ्खलैः कनकशृङ्खलैः संनद्धाः समन्ताद्बद्धा वनदेवतानां वनाधिष्ठातृदेवीनां या अञ्चितपेटिकाः सुन्दरमञ्जूषास्तद्वदाचरन्तो ये रसाला आम्रवृक्षास्तेषां पल्लवेषु किसलयेषु समासीनं समुपविष्टं कोकिलकुलं परपुष्टसमूहो यस्मिंस्तत्, तरुणजनस्य युवसमूहस्य हृदयं चित्तं तस्य विदारणे द्वैधीकरणे दारुणानि कठोराणि यानि कुसुमबाणस्य कामस्य नखराणि नखानि तद्वदाचरन्ति यानि किंशुककुसुमानि पलाशपुष्पाणि तैः सङ्कुलं व्याप्तम्, मदननरपालस्य कामभूपालस्य कनकदण्डायितानि सुवर्णदण्डसन्निभानि यानि केसरकुसुमानि बकुलपुष्पाणि तैर्भासुरं शोभमानम्, विलीना अन्तर्गताः शिलीमुखा बाणा यस्य

१. एतच्छ्लोकद्वयं मुद्रितपुस्तके नास्ति। २. घन ब०।

विलीनशिलीमुखजराभीरुशरधिसरूपपाटलपटलं वियोगिजनस्वान्तनितान्तकृन्तनकुन्तायितकैतकदन्तुरितं वनमजायत ।

मार्गे मार्गे माधवीमानिनीभिः सूनार्चाभिर्मानितो वातपोतः ।
भृङ्गस्त्रीणां गीतसक्तं कुरङ्गमारुह्यासावाववौ मन्दमन्दम् ॥ २ ॥
पुरान्निरीयुः प्रमदाजनेन पौराः समस्ता नरपालमुख्याः ।
क्रीडां विधातुं द्विविधे वनेऽपि मधौ दुरन्ते विरहिव्रजस्य ॥ ३ ॥
तुङ्गं शताङ्गमारूढः स्वामी सहचरैः सह ।
पौरस्त्रीनयनानन्दमातन्वन्निरगात्पुरात् ॥ ४ ॥

ततो जनकोलाहलोद्भ्रान्तशकुन्तवृन्दतया माधवागमनकौतुकेनोत्क्षिप्तवैजयन्तीमिव सञ्चरच्चञ्चरीकधोरणीहरिन्मणिमयतोरणमालाविराजितां पल्लवकवलनतत्परपयोजबान्धवस्यन्दनगन्धर्ववदनविलनिपतितफेनशकलसंभाव्यकलिकाविलसितोन्नतमहीरुहराजितामभिसारिकामिवोच्चैः स्तनशिखरशोभितपत्रविचित्रामनेकविटपसंस्पृष्टपयोधरतटां चारामवीथीमासाद्य पौराः पुष्पापचयं

तथाभूतो यो जराभीरोः कामस्य शरधिरिषुधिस्तस्य सरूपं सदृशं पाटलपटलं स्थलकमलसमूहो यस्मिंस्तत्, वियोगिजनस्य विरहिमर्त्यस्य स्वान्तं चित्तं तस्य नितान्तमत्यन्तं यत्कृन्तनं छेदनं तस्मिन् कुन्तायितानि भल्लायितानि यानि कैतकानि केतकीपुष्पाणि तैर्दन्तुरितं व्याप्तम् ।

मार्गे मार्गे इति—मार्गे मार्गे प्रतिमार्गम्, माधव्य एव मानिन्यस्ताभिर्वासन्तीलतनाभिः 'अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवीलता' इत्यमरः, सूनैरर्चाः सूनार्चाः पुष्पपूजास्ताभिः पुष्पवृष्टिभिरिति यावत्, मानितः समादृतः असौ वातपोतः पवनबालको मन्थरसमीर इति यावत्, भृङ्गस्त्रीणां भ्रमरीणाम्, गीते सक्तो गीतसक्तस्तं गानावलीनम्, कुरङ्गं हरिणम्, आरुह्याधिष्ठाय, मन्दमन्दं यथा स्यात्तथा, आववौ वाति स्म 'वा गतिगन्धनयोः' इत्यस्य लिटि रूपम् । भृङ्गस्त्रीणां गीतावसक्तत्वात्कुरङ्गो मन्दं मन्दं यात्यतस्तत्रारूढो वातपोतोऽपि मन्दं मन्दं याति स्मेति स्वतःसिद्धमेतत् ॥ २ ॥

पुरान्निरीयुरिति—विरहिणां वियोगिनां व्रजः समूहस्तस्य, दुरन्ते दुःखस्वरूपे, मधौ वसन्ते, द्विविधेऽपि द्विप्रकारेऽपि, वने कानने सलिले च 'वनं नपुंसकं नीरे निवासालयकानने' इति मेदिनी, क्रीडां केलिम्, विधातुं कर्तुम्, नरपालो नृपतिर्मुख्यः प्रधानो येषु ते, समस्ता निखिलाः, पुरे भवाः पौरा नागरिकाः प्रमदाजनेन वनिताजनेन सार्धमिति शेषः, पुरान्नगरात्, निरीयुर्निर्जग्मुः ॥ ३ ॥

तुङ्गं शताङ्गमिति—तुङ्गं समुन्नतम्, शताङ्गं रथम्, आरूढोऽधिष्ठितः, स्वामी जीवन्धरः, पौरस्त्रीणां नारीणां नयनानां लोचनानामानन्दं हर्षम्, आतन्वन् विस्तारयन्, सन् सहचरैर्मित्रैः, सह साकम्, पुरात् नगरात्, निरगान्निर्जगाम, 'इण् गतौ' इत्यस्य लुङि रूपम् 'इणो गा लुङि' इति धातोर्गादेशः, गातिस्थेति—सिचो लोपः ॥ ४ ॥

तत इति—ततस्तदनन्तरम्, आरामवीथीमुपवनपद्धतिम्, आसाद्य प्राप्य, पौरा नागराः, पुष्पाणामवचयः पुष्पावचयस्तं कुसुमत्रोटनम्, कर्तुं विधातुम्, आरभन्त तत्परा बभूवुः, अथ कथम्भूतामारामवीथीमिति वर्णयति—जनानां लोकानां कोलाहलेन कलकलशब्देनोद्भ्रान्तं समुत्पतितं शकुन्तवृन्दं पक्षिसमूहो यस्यास्तस्या भावस्तत्ता तया, माधवस्य वसन्तस्यागमनमापतनं तस्मिन् कौतुकं कुतुकं समुल्लास इति यावत्, तेन, उत्क्षिप्तोपरि धारिता वैजयन्ती पताका यया तथाभूतामिव, सञ्चरतां भ्रमतां चञ्चरीकाणां भ्रमराणां धोरण्यः पङ्क्तय एव हरिन्मणिमयतोरणमाला मरकतमणिनिर्मितवन्दनस्रजस्ताभिर्विराजिता शोभिता ताम्, पल्लवानां किसलयानां कवलने भक्षणे तत्परा उद्युक्ता ये पयोजबान्धवस्यन्दनस्य सूर्यरथस्य गन्धर्वा हयास्तेषां वदनबिलेभ्यो मुखगुहाभ्यो निपतितैः स्खलितैः फेनशकलैः डिण्डीरखण्डैः सम्भाव्याः समुत्प्रेक्ष्या याः कलिकाः कुड्मलानि ताभिर्विलसिता विशोभिता य उन्नतमहीरुहाः समुत्तुङ्गवृक्षास्तै राजिता शोभिता ताम्, अभिसारिकामिव कुलटामिव, उभयोः सादृश्यमाह—उच्चैर्यौवनातिरेकेण समुत्थितयोः स्तनयोः कुचयोः शिखरेऽग्रभागे, शोभितानि विकसितानि यानि पत्राणि कुङ्कुमकस्तूर्यादिरचितरचनाविशे-

कर्तुमारभन्त । तत्र निजकान्तां कोपकलुषितस्वान्तामाध्याय कश्चिदाह ।

प्रसारय दृशं पुरः क्षणमिदं वनं विन्दतां
स्थलोत्पलकुलानि वै कलय तन्वि मन्दस्मितम् ।
पतन्तु कुसुमोच्चया दिशि दिशि प्रहृष्टालयः
स्फुटीकुरु गिरं पिकः सपदि मौनमाढौकताम् ॥ ५ ॥

परिफुल्लनवपल्लवतल्लजाधरपुटां विकचकुसुममन्दहासां चञ्चरीकचूचुकमेचकितगुलुच्छ-स्तनयुगलां वासन्तीलतामन्यामिव लताङ्गीं पश्यन्तमात्मानं प्रति कुपितां प्रेयसीं परिसान्त्वयितुकामः कश्चिदेवमब्रवीत् ।

सञ्चारिणी खलु लता त्वमनङ्गलक्ष्मी-
रम्लानपल्लवकरा प्रमदालिजुष्टा ।
यस्या गुलुच्छयुगलं कठिनं विशाल-
शाखे शिरीषसुकुमारतमे मृगाक्षि ॥ ६ ॥

उपरिजतरुजार्थं वामहस्तेन काचिद्-
विधृतसुरभिशाखा सव्यहस्ताग्रकाञ्ची ।
अमलकनकगौरी निर्गलन्नीविबन्धा
नयनसुखमनन्तं कस्य वा द्राङ्न तेने ॥ ७ ॥

पात्रैर्विचित्राद्भुता ताम्, पक्षे उच्चैस्तनेषु समुन्नतेषु शिखरेष्वग्रभागेषु शोभितैर्विलसितैः पत्रैर्दलैर्विचित्रा-मद्भुताम्, अनेकैर्बहुभिर्विटपैर्भुजङ्गैः संस्पृष्टे संमर्दिते पयोधरतटे स्तनतटे यस्यास्तामभिसारिकाम्, पक्षेऽनेकविटपैर्बहुशाखाभिः संस्पृष्टमामृष्टं पयोधरतटं मेघतीरं यया ताम् । श्लिष्टोपमा । तत्रारामर्द्धाध्याम्, कोपेन क्रोधेन कलुषितं मलिनं स्वान्तं चित्तं यस्यास्ताम्, निजकान्तां स्ववल्लभाम्, आध्याय विचार्य, कश्चित्कोऽपि युवा, आह कथयति ।

प्रसारयेति—हे तन्वि हे कृशाङ्गि ! पुरोऽग्रे दृशं दृष्टिम्, प्रसारय क्रोधजन्यनिमीलनं त्यक्त्वा प्रसृतां कुरु, येन, इदमेतत्, वनं गहनम्, वै निश्चयेन, क्षणं क्षणकालं यावत्, स्थलोत्पलानां स्थलारविन्दानां कुलानि समूहान्, विन्दतां लभताम्, मन्दस्मितं मन्दहसितम्, कलय धारय, येन दिशि दिशि प्रतिकाष्ठम्, प्रहृष्टाः प्रसन्ना अलयो भ्रमरा यैस्ते तथाभूताः, कुसुमोच्चयाः पुष्पसमूहाः, पतन्तु वर्षन्तु, गिरं वाणीम्, स्फुटीकुरु प्रकटय, येन, पिको वनप्रियः, सपदि झटिति, मौनं लज्जाजन्यं तूष्णीम्भावम्, आढौकताम् प्राप्नोतु । पृथ्वीच्छन्दः ॥५॥

परिफुल्लेति—परिफुल्लाः समुल्लसिता ये नवपल्लवतल्लजाः प्रत्यग्रकिसलयश्रेष्ठास्त एवाधरपुटं दन्तच्छदपुटं यस्यास्ताम्, विकचानि प्रफुल्लानि कुसुमानि पुष्पाण्येव मन्दहासो मन्दस्मितं यस्यास्ताम्, चञ्चरीकचूचुकाभ्यां भ्रमरस्तनाग्राभ्यां मेचकितं मलिनं गुलुच्छस्तनयुगलं स्तवककुचद्वन्द्वं यस्यास्ताम्, वासन्तीलतां माधवीवल्लीम् अन्यां द्वितीयाम्, लताङ्गीमिव ललनामिव, पश्यन्तमवलोकयन्तम्, आत्मानं स्वम्, प्रतिकुपितां कोपयुक्ताम्, प्रेयसीं प्रियाम्, परिसान्त्वयितुकामः शमयितुमनाः, कश्चित्कोऽपि युवा, एवमनेन प्रकारेण, अब्रवीत्-जगाद ।

सञ्चारिणीति—हे मृगाक्षि हे मृगलोचने ! खलु निश्चयेन, अनङ्गलक्ष्मीः कामश्रीः, त्वम्, सञ्चारिणी सञ्चरणशीला, लता वल्लरी, असीति शेषः, कथम्भूता त्वमिति चेत् ? अम्लानावशुष्कौ पल्लवौ किसलयाविव करौ हस्तौ यस्याः सा, प्रमदालिभिः प्रहृष्टसखीभिरेव प्रमदालिभिः प्रमत्तभ्रमरैर्जुष्टा सेविता. यस्यास्तव, कठिनं कठोरम्, कुचद्वन्द्वमिति शेषः, गुलुच्छयुगलं स्तवकयुगम्, शिरीषादपि कर्पासादपि सुकुमारतमे मृदुलतमे बाहू इति शेषः, विशालशाखे सुदीर्घलते स्त इति शेषः । वसन्ततिलकावृत्तम् ॥ ६ ॥

उपरिजतरुजार्थम्—उपरिजमूर्ध्वोत्पन्नं यत्तरुजं पुष्पं तस्मायिदमित्युपरिजतरुजार्थम् वामहस्तेन

१. उदञ्चय ब० । २. ममन्दं ब० ।

काचिद्वराङ्गी कमितुः पुरस्तादुदस्तबाहोः कुसुमोद्यतस्य ।
मूलं नखाङ्काञ्चितमंशुकेन तिरोदधे मङ्क्षु करान्तरेण ॥ ८ ॥

अन्तर्वणं करसरोरुहकान्तिभिन्नं
पत्रव्रजं सपदि पल्लवशङ्कयान्या ।
संस्पर्शमार्दवकलाविरहाद्विसृज्य
गुच्छभ्रमेण नखकान्तिमहो चकर्ष ॥ ९ ॥

वपुषि कनकगौरे चम्पकानां स्रगेषा
वितरति परभागं नेति कश्चित्प्रियायाः ।
उरसि बकुलमालामाबबन्धाम्बुजाक्ष्याः
स्तनकलशसमीपे चालयन्पाणिपद्मम् ॥१०॥

वक्षःस्थलेष्वत्र चकोरचक्षुषां प्रियैः प्रक्लृप्ताः सुममालिका बभुः ।
अन्तःप्रवेशोद्यतशम्बरद्विषः सूनाततास्तोरणमालिका इव ॥११॥

एवं वनविहारपरेषु पौरेषु, तत्र सप्ततन्तुमारभमाणैर्द्विजैर्हविःस्पर्शनजनितकोपनैर्हन्यमान-

सव्यकरेण, विधृता गृहीता सुरभिशाखा चम्पकशाखा यया सा 'सुरभिः शल्लकी मातृभिन्मुरागोपु योषिति । चम्पके च वसन्ते च तथा जातीफले पुमान्' इति मेदिनी, अपसव्यहस्तेन दक्षिणकरेणाग्रा गृहीता काञ्ची मेखला यया सा, अमलकनकमिव निर्मलकाञ्चनमिव गौरी पीतवर्णा, निर्गलन् स्रंसमानो नीविबन्धोऽधोवस्त्र-ग्रन्थिबन्धनं यस्याः सा, काचित्कापि, कामिनी कस्य वा दर्शकस्य, द्राग् झटिति, अनन्तमपरिमितम्, नयनसुखं लोचनानन्दम्, न तेने न विस्तारयामास, अपितु सर्वस्यापीति भावः ॥ मालिनीच्छन्दः ॥७॥

काचिदिति—काचित्कापि, वराङ्गी ललना, कमितुः पत्युः पुरस्तादग्रे, कुसुमाय पुष्पायोद्यतः समुत्थापितस्तस्य, उदस्तबाहोरुत्क्षिप्तभुजस्य, नखाङ्काञ्चितं नखक्षतसहितम्, मूलं कक्षम्, मङ्क्षु क्षिप्रम्, करान्तरेण हस्तान्तरेण अंशुकेन वस्त्रेण, तिरोदधे तिरोहितं चकार । स्वभावोक्तिः ॥८॥

अन्तर्वणमिति—अन्तर्वणं वनमध्ये 'प्रनिरन्तःशरेक्षुप्लक्षाम्र'—इति णत्वम् । अन्या काचित् कामिनी, संस्पर्शे स्पर्शने मार्दवकलाया कोमलताविज्ञानस्य विरहादभावात्, करसरोरुहस्य पाणिपद्मस्य कान्त्या दीप्त्या भिन्नं मिश्रं भिन्नवर्णमिति यावत्, पत्रव्रजं पत्रसमूहम्, सपदि शीघ्रम्, पल्लवशङ्कया किसलय-भ्रान्त्या, विसृज्य त्यक्त्वा, गुच्छभ्रमेण स्तवकसन्देहेन, नखकान्तिं नखरदीप्तिम्, चकर्ष कर्षतिस्मेत्यहो आश्चर्यम् । भ्रान्तिमान् । वसन्ततिलकावृत्तम् ॥९॥

वपुषीति—कश्चित्कोऽपि युवा, प्रियायाः प्रेयस्याः, कनकमिव सुवर्णमिव गौरं पीतं तस्मिन्, 'गौरः श्वेतेऽरुणे पीते विशुद्धे चाभिधेयवत्' इति मेदिनी, वपुषि शरीरे, एषा चम्पकानां षट्पदातिथीनाम्, स्रक् माला, परभागं शोभातिशयम्, न वितरति न ददाति, पीते शरीरे चम्पकानां पीता माला न शोभत इति भावः, इति हेतोः, अम्बुजाक्ष्याः कमललोचनायाः उरसि वक्षसि, स्तनकलशसमीपे कुचकुम्भाभ्यर्णे, पाणिपद्मं करकमलम्, चालयन् संचारयन्, बकुलमालां केसरस्रजम्, आबबन्ध बध्नाति स्म । कुचस्पर्शलोभा-द्बकुलमालामाबध्नाति स्मेति भावः । मालिनीच्छन्दः । काव्यलिङ्गम् ॥१०॥

वक्षःस्थलेष्विति—अत्रारामवीथ्याम्, प्रियैर्वल्लभैः, चकोरचक्षुषां जीवंजीवलोचनानाम्, वक्षः-स्थलेषु वाक्षःस्थलप्रदेशेषु, प्रक्लृप्ता रचिताः, सुममालिकाः पुष्पस्रजः, अन्तःप्रवेशे हृदयाभ्यन्तरप्रवेश उद्यतस्तत्परो यः शम्बरद्विट् कामस्तस्य, सूनैः पुष्पैराततास्ता व्याप्ताः, तोरणमालिका इव वन्दनस्रज इव, बभुः शुशुभिरे । उत्प्रेक्षा । इन्द्रवंशावंशस्थयोः संमिश्रणादुपजातिवृत्तम् ॥११॥

एवमिति—एवमनेन प्रकारेण, पौरेषु नागरिकजनेषु, वने विहारो वनविहारस्तस्मिन्परास्तेषु कान्तारभ्रमणासक्तेषु सत्सु, तत्र वने, सप्ततन्तुं मखम् 'सप्ततन्तुर्मखः क्रतुः' इत्यमरः, आरभमाणैः प्रारब्धं कुर्वद्भिः, हविषो होमद्रव्यस्य स्पर्शनेनामर्शेन जनितं समुत्पन्नं कोपनं क्रोधो येषां तैः, द्विजैर्विप्रैः 'दन्तविप्राण्डजा

मन्तरुत्कूलितदुःखाम्बुधिघोषमिव प्राणमहीपालस्य प्रयाणसंसूचकभेरीभाङ्कारमिवाक्रन्दनारावमातन्वानमन्तरुज्ज्वलितदुःखाग्निज्वालामिव शोणितधारामुद्गिरन्तं सारमेयमवलोक्य, अपारकरुणाकरो जीवन्धरो बहुप्रयत्नैरपि प्रत्युज्जीवयितुमशक्नुवानः परलोकसमर्थापनपरतन्त्रं पञ्चमन्त्रमुपादिक्षत् ।

श्रवसा परमं मन्त्रं मनसा हन्त मा स्पृशन् ।
कुक्कुरो विजहौ प्राणान्दुःखलेशविवर्जितः ॥१२॥

चन्द्रोदयाह्वयगिरौ विमलोपपाद-
शय्यातले रुचिरवैक्रियिकाख्यदेहे ।
स्रग्वी सदंशुकधरो नवयौवनश्रीः
प्रादुर्बभूव स सुदर्शननामयक्षः ॥१३॥

राकाचन्दिरदत्तदास्यममलं यस्यास्यपङ्केरुहं
नेत्रे वीतनिमेषकेऽकलयतां निष्कम्पमीनश्रियम् ।
पाणी कल्पकपल्लवप्रतिघृणी माणिक्यभूषोज्ज्वला[1]
मूर्तिः पुष्पितकल्पपादपलतास्फूर्तिस्तदाजृम्भत ॥१४॥

द्विजाः' इत्यमरः, हन्यमानं मार्यमाणम्, अन्तरभ्यन्तर उत्कूलितः कूलमुत्क्रान्त्य वृद्धिंगतो दुःखाम्बुधिरसातसागरस्तस्य घोषः शब्दस्तमिव, प्राणमहीपालस्य जीवितजगतीपतेः, प्रयाणसंसूचकः प्रस्थाननिवेदको यो भेरीभाङ्कारस्तमिव, आक्रन्दनारावं रोदनध्वनिम्, आतन्वानं विस्तारयन्तम्, अन्तरभ्यन्तर उज्ज्वलितः प्रदीप्तो यो दुःखाग्निर्व्यथावैश्वानरस्तस्य ज्वालार्चिस्तामिव, शोणितधारां रुधिरसन्ततिम्, उद्गिरन्तं वमन्तम्, सारमेयं सरमासुतं कुक्कुरमिति यावत्, अवलोक्य दृष्ट्वा, अपारकरुणाकरोऽनन्तदयासागरः, जीवन्धरः सत्यन्धरसुतः, बहुप्रयत्नैरपि भूरिप्रयासैरपि, प्रत्युज्जीवयितुं प्रत्युज्जीवितं कर्तुम्, अशक्नुवानोऽसमर्थः सन्, परलोकस्य स्वर्गादेः समर्थापने प्रापणे परतन्त्रं समर्थम्, पञ्चमन्त्रं नमस्कारमन्त्रम्, उपदिदेश, 'शल इगुपधादनिटः क्सः' इति क्सः । पञ्चमन्त्रोऽयं यथा 'णमो हरहंताणं णमो सिद्धाणं णमो आइरियाणं । णमो उवज्झायाणं णमो लोए सव्वसाहूणम्' ।

श्रवसेति—कुक्कुरो मण्डलः, परमं सर्वोत्कृष्टम्, मन्त्रं पञ्चनमस्कारमन्त्रम्, श्रवसा कर्णेन स्पृशन् स्पृष्टं कुर्वन्, मनसा चेतसा मा स्पृशन् नो स्पृशन्, दुःखस्य लेशेन विवर्जितो दुःखलेशविवर्जितः असातांशपरिमुक्तः सन्, प्राणान्–आयुःप्रभृतीन्, विजहौ तत्याज, 'ओहाक् त्यागे' इत्यस्य लिटि रूपम् । हन्तेति हर्षे । यद्यसौ मनसापि मन्त्रं स्पृशेत्तर्हि सर्वदुःखेन परिवर्जितो भवेदिति तत्त्वम् ॥ १२ ॥

चन्द्रोदयाह्वयगिराविति—स कुक्कुरः, चन्द्रोदयाह्वयगिरौ चन्द्रोदयनामपर्वते, विमलञ्च तदुपपादशय्यातलञ्चेति विमलोपपादशय्यातलं तस्मिन् निर्मलोपपादशयनतले, देवनारकाणां हि जन्म स्वावासेषु निश्चितेषु शयनविशेषेषु भवति । ते च शयनविशेषा 'उपपादशय्या' इति नाम्ना प्रकीर्त्यन्ते, देवनारका अगर्भजन्मानो भवन्तीति तत्त्वम् । रुचिरो मनोहरश्चासौ वैक्रियिकाख्यदेहश्च वैक्रियिकनामशरीरश्च तस्मिन्, स्रग्वी मालाधरः 'अस्मायामेधास्रजो विनिः' इति विनिप्रत्ययः । सदंशुकधरः सद्वस्त्रधारकः, नवयौवनश्रीर्नूतनतारुण्यलक्ष्मीकः, सुदर्शननामयक्षः सुदर्शनाभिधानव्यन्तरविशेषः, प्रादुर्बभूव समुत्पन्नो बभूव । यक्षोऽष्टविधव्यन्तरदेवान्यतमः । तथाहि–'व्यन्तराः किन्नरकिम्पुरुषमहोरगगन्धर्वयक्षराक्षसभूतपिशाचाः' इति ॥ १३ ॥

राकाचन्दिरेति—यस्य सुदर्शनयक्षस्य, तदा प्रादुर्भूतिसमय एव, अमलं निष्कलङ्कम्, आस्यमेव पङ्केरुहमित्यास्यपङ्केरुहं मुखकमलम्, राकाचन्दिराय पूर्णिमारजनीशाय दत्तं दास्यं येन तत् तथाभूतम्, अभूदिति शेषः । वीतं गतं निमेषकं पक्ष्मस्पन्दनं ययोस्ते, नेत्रे नयने, निष्कम्पयोर्निश्चलयोर्मीनयोः श्रीः शोभा ताम्, अकलयताम्–अबिभृताम्, पाणी हस्तौ, कल्पपल्लवयोः सुरतरुकिसलययोः प्रतिघृणी प्रतिद्वन्द्विनौ, आस्तामिति शेषः, माणिक्यानां रत्नानां भूषा आभरणानि ताभिरुज्ज्वला निर्मला, मूर्तिः शरीरम्, पुष्पिता चासौ कल्पपादपलता चेति पुष्पितकल्पपादपलता कुसुमितकल्पानोकहवल्ली तस्याः स्फूर्तिरिव स्फूर्तिः

[1] भूषोज्ज्वला ब० ।

ततः कल्पतरुषु प्रमोदबाष्पबिन्दूनिव प्रसूननिकरानवकिरत्सु, दुन्दुभिस्वनितेषु दिगन्तरालविजृम्भितेषु, मन्दारवनकुटुम्बिगन्धवहस्तनन्धये मन्दसञ्चारमन्थरे, रविकोटिसदृक्षेषु यक्षेषु समन्तात्प्रणामदक्षेषु, मञ्जुमञ्जीररवमुखरितदिगन्तरासु सुराङ्गनासु मधुरगानकलाविलसितनर्तनकुशलासु, सुप्तोत्थित इवायं दिशि दिशि दृशं व्यापारयन्, विस्मयसंमदपूरयोः संगमे निमग्नः, तत्क्षणजनितावधिज्ञानतरणिमवलम्ब्य प्रबुद्धजीवकोपदिष्टमन्त्रप्रभावविलसितदेवभूयः, तत्र जयेत्यादिशब्दमुखरमुखैर्निलिम्पैः सप्रश्रयमेत्य किरीटमणिघृणिराजिनीराजितचरणनीरेजैर्विज्ञापितं मङ्गलमज्जनजिनेन्द्रपूजादिकं यथानियोगमातन्वन्, जीवन्धरस्वामिवरिवस्यापरायणः परिवारैः सह तदुपकण्ठमाटिटीके।

तवार्य मन्त्रप्रभवा ममेदृशी विभूतिरित्यादिनुतिं समाचरन्।
विधाय पूजामिह जीवकस्य वै प्रादान्मुदा दिव्यविभूषणान्यसौ ॥१५॥

[[1]स्मर्तव्योऽस्मि महाभाग व्यसनोत्सवयोस्त्वया।
कर्तव्योऽहं कृतार्थश्चेत्युक्त्वा देवस्तिरोऽभवत् ॥]

शोभा यस्य तथाभूता, अजृम्भत ववृधे, पूर्णतारुण्यवर्ती बभूवेति भावः। उपमाशार्दूलविक्रीडितच्छन्दः ॥१४॥

तत इति—ततस्तदनन्तरम्, कल्पतरुषु देवानोकहेषु, प्रमोदबाष्पबिन्दूनिव हर्षाश्रुसीकरानिव, प्रसूननिकरान् पुष्पसमूहान्, अवकिरत्सु वर्षत्सु, दुन्दुभीनां भेरीणां स्वनितानि शब्दास्तेषु, दिगन्तरालेषु काष्ठामध्येषु विजृम्भितानि प्रसृतानि तेषु, मन्दारवनमेव कल्पानोकहकाननमेव कुटुम्बी गृहस्थस्तस्य गन्धवह एव वायुरेव स्तनन्धयो बालकस्तस्मिन्, मन्दसञ्चारेण शनैःशनैर्गमनेन मन्थरो मन्दस्तथाभूते, रविकोटिभिर्बहुभिः सूर्यैः सदृक्षाः सदृशास्तेषु, यक्षेषु व्यन्तरामरविशेषेषु, समन्तात्परितः, प्रणामे नमस्करणे दक्षाः समर्थास्तेषु, मञ्जुना मनोहरेण मञ्जीररवेण नूपुरनिनादेन मुखरितानि वाचालितानि दिगन्तराणि काष्ठामध्यानि याभिस्तासु, सुराङ्गनासु देवीषु, मधुरगानकलया सुन्दरसंगीतवैदग्ध्या विलसितं शोभितं यन्नर्तनं नृत्यं तस्मिन् कुशला निष्णातास्तासु सतीषु, अत्र सर्वत्र 'यस्य च भावे भावलक्षणम्' इत्यनेन सप्तमी, आदौ सुप्तः पश्चादुत्थित इति सुप्तोत्थितः शयनानन्तरमुत्थितः स इव, दिशि दिशि प्रतिदिशम्, वीप्सार्थे द्वित्वम्, दृशं लोचनम्, व्यापारयन् संचारयन्, विस्मयश्चाश्चर्यं च संमदपूरश्च हर्षसमूहश्चेति तौ तयोः, संगमे संमेलने, निमग्नो ब्रुडितः, तत्क्षणं तत्कालं जनितं समुत्पन्नं यदवधिज्ञानमेव अवधिबोध एव तरणिः सूर्यस्तम्, अवलम्ब्य समाश्रित्य तत्प्रयोगेणेति यावत्, जीवकेन जीवन्धरेणोपदिष्टः श्रावितो यो मन्त्रः पञ्चनमस्कारमन्त्रस्तस्य प्रभावेण माहात्म्येन विलसितं प्राप्तं यद् देवभूयं देवत्वम् तत्, प्रबुद्धं ज्ञातं जीवकोपदिष्टमन्त्रप्रभावविलसितदेवभूयं येन तथाभूतः, अयं कुक्कुरचरो यक्षः, अत्र स्वावासे, जयेत्यादिशब्दैर्मुखराणि वाचालितानि मुखानि वदनानि येषां तैः, निलिम्पैर्देवैः सप्रश्रयं सविनयम्, एत्यागत्य किरीटमणीनां मौलिरत्नानां घृणिराजिभिः किरणपङ्क्तिभिर्नीराजिते कृतारात्रिके चरणनीरेजे पादारविन्दे यैस्तथाभूतैः सद्भिः, विज्ञापितं निवेदितम्, मङ्गलमज्जनं मङ्गलस्नानं जिनेन्द्रपूजा जिनसपर्या चादौ यस्मिंस्तत्, कार्यम्, नियोगमनतिक्रम्येति यथानियोगं यथानियमम्, आतन्वन् कुर्वन्, जीवन्धरस्वामिनो वरिवस्यायां पूजायां परायणस्तत्परः सन्, परिवारैः परिजनैः, सह सार्धम्, तदुपकण्ठं जीवन्धरपार्श्वम्, आटिटीके—आजगाम। 'टीकृ गतौ' इत्यस्याङ्पूर्वस्य लिटि रूपम्।

तवार्य मन्त्रप्रभवेति—हे आर्य! हे पूज्य! मम मण्डलचरस्य, ईदृशी भवन्नयनगोचरा, विभूतिरैश्वर्यम्, तव भवतः, मन्त्रः पञ्चनमस्कारात्मकः प्रभवः कारणं यस्यास्तथाभूता, अस्तीति शेषः, इत्यादिनुतिमित्येवमादिकस्तुतिम्, समाचरन्कुर्वन्, असौ यक्षः, इह राजपुरनगरोपवने, जीवकस्य जीवन्धरस्य, पूजां सपर्याम्, विधाय कृत्वा, मुदा हर्षेण, दिवि भवानि दिव्यानि तानि च तानि विभूषणानि चेति दिव्यविभूषणानि स्वर्गीयाभरणानि तानि, प्रादाद् दत्तवान्, वै पादपूरणे निश्चये वा। वंशस्थेन्द्रवंशयोरुपमिश्रणादुपजातिवृत्तम् ॥ १५ ॥

[स्मर्तव्योऽस्मीति—हे महाभाग हे महेच्छ! अहमेव मण्डलचरो जीवस्त्वया भवता व्यसनोत्सवयोः

[1] एष श्लोको मुद्रितपुस्तके नास्ति।

अथ ललाटन्तपतपनबिम्बे गगनकाननमध्यपुञ्जीभूतदवहुताशनसकाशे, सशावकमृगपूगेन सह मूलतलमाश्रिते नमेरुतरुच्छाये, सरोराजहंसेषु नलिनमुत्सृज्य पत्रच्छायामाश्रितेषु दीर्घिकाजलेषु शफरोद्वर्तनैरार्कसंतापादिव क्वथत्सु, शिखण्डिषु नृत्तलीलाविरहेऽपि बर्हभारं छत्रीकृत्य केकिनीः सेवमानेषु, मधुकरेषु गजगण्डतलात्कर्णपालीमाश्रितेषु, कुसुमावचयश्रान्ताभिः कान्ताभिः सह व्यात्युक्षिकां कर्तुकामा भर्तारः शनैः शनैर्नवापगामाजग्मुः ।

नवापगेयं नलिनेक्षणानां द्विजारवैर्द्राक्कुशलानुयोगम् ।
विधाय डिण्डीरमनोज्ञहासा चलोर्मिहस्तैर्दिशति स्म पाद्यम् ॥१६॥

तावद्यौवनदिनमणिप्रकाशपरिवर्धितामोदवक्षोरुहचक्रवाकयुगलासु कान्तिकल्लोलनिर्लोलासु मञ्जुगुञ्जत्कलहंसकास्वपरास्विव तरङ्गिणीषु पुरतरुणीषु दयितैः समं सरितमवगाह्य जलक्रीडामतन्वतीषु—

कश्चिदम्भसि विकूणितेक्षणं हेमयन्त्रविगलज्जलैर्मुहुः ।
कामिनीमुखमसिञ्चदञ्जसा चन्द्रबिम्बमिव द्रष्टुमागतम् ॥१७॥

दुःखसुखयोः, स्मर्तव्यः स्मरणीयः अस्मि । अहं कृतार्थः कृतकृत्यः, कर्तव्यो विधातव्यः । इत्युक्त्वा देवो यक्षः, तिरोऽभवत् अन्तर्दधे ।]

अथ ललाटन्तपतपनबिम्ब इति—अथानन्तरम्, ललाटं भालं तपतीति ललाटन्तपं तच्च तत्तपनबिम्बञ्च सूर्यबिम्बञ्चेति तस्मिन्, गगनकाननस्यान्तरिक्षारण्यस्य मध्ये पुञ्जीभूतो राशीभूतो यो दवहुताशनो वनानलस्तस्य सकाशं सदृशं तस्मिन् सति, नमेरुतरोश्छायावृक्षस्य छायानातप इति नमेरुतरुच्छायम् तस्मिन् 'छाया बाहुल्ये' इति क्लीबत्वम्, सशावकानां शिशुसहितानां मृगाणां हरिणाणां पूगः समूहस्तेन, सह सार्धम्, मूलतलमधस्तलम् आश्रिते प्राप्ते सति, सरसि विद्यमाना राजहंसा इति सरोराजहंसास्तेषु, कासारसितच्छदविशेषेषु, नलिनं कमलम्, उत्सृज्य त्यक्त्वा, पत्रच्छायां दलानातपम्, आश्रितेषु प्राप्तेषु सत्सु, दीर्घिकाणां वापिकानां जलानि तोयानि तेषु, शफराणां तिमीनामुद्वर्तनानि समुच्छलनानि तैः, आर्कसन्तापात् सूर्यकृतसन्तापात्, क्वथत्सु पच्यमानेषु सत्सु, शिखण्डिषु मयूरेषु, नृत्तलीलाविरहेऽपि नृत्यक्रीडाऽभावेऽपि, बर्हभारं पिच्छसमूहम्, छत्रीकृत्यातपत्रीकृत्य, केकिनीर्मयूरीः, सेवमानेषु समुपचरत्सु सत्सु, मधुकरेषु भ्रमरेषु, गजानां करिणां गण्डतलात्कटप्रदेशात्, कर्णपालीं श्रवणतटम्, आश्रितेषु प्राप्तेषु सत्सु, कुसुमावचयेन पुष्पत्रोटनेन श्रान्ताः खिन्नास्ताभिः, कान्ताभिः कामिनीभिः, सह सार्धम्, व्यात्युक्षिकां जलकेलिम्, कर्तुकामा विधातुमुत्सुकाः, भर्तारः स्वामिनः, शनैःशनैर्मन्दं मन्दम्, नवापगां प्रत्यग्रतरङ्गिणीम्, आजग्मुराययुः ।

नवापगेयमिति—इयमेषा, नवापगा नूतननदी, द्विजानां पक्षिणामारवाः शब्दास्तैः, द्राक् झटिति, नलिनेक्षणानां कमललोचनानाम् नारीणामिति यावत्, कुशलानुयोगं क्षेमप्रश्नम्, विधाय कृत्वा, डिण्डीर एव फेन एव मनोज्ञहासो मनोहरहासो यस्यास्तथाभूता सती, चलोर्मय एव चपलतरङ्गा एव हस्ताः करास्तैः, पाद्यं पादोदकम्, दिशति स्म दत्तवती ॥१६॥

तावद्यौवनेति—तावत् तावता कालेन, यौवनमेव तारुण्यमेव दिनमणिः सूर्यस्तस्य प्रकाशेनालोकेन परिवर्धितामोदं समेधितहर्षं वक्षोरुहचक्रवाकयुगलं कुचकोकयुग्मं यासु तासु, कान्तयो दीप्तय एव कल्लोलास्तरङ्गास्तैर्निर्लोलाश्चञ्चलास्तासु, मञ्जु मनोज्ञं यथा स्यात्तथा गुञ्जन्ति शब्दं कुर्वन्ति यानि मञ्जीरकाणि तुलाकोटयस्तान्येव कलहंसाः कादम्बा यासु तासु, अपरासु द्वितीयासु, तरङ्गिणीषु नदीषु, इव यथा, पुरतरुणीषु नगरनारीषु, दयितैर्वल्लभैः, समं सार्धम्, सरितं स्रवन्तीम्, अवगाह्य प्रविश्य, जलेन जले वा क्रीडा जलक्रीडा तां जलकेलिम्, आतन्वतीषु विस्तारयन्तीषु सतीषु—

कश्चिदम्भसीति—कश्चित्कोऽपि नायकः, अम्भसि सलिले, विकूणितेक्षणं संकोचितनयनम्, द्रष्टुमवलोकयितुम्, जलक्रीडामिति यावत्, आगतमायातम्, अञ्जसा साक्षात्, चन्द्रबिम्बमिव शशिमण्डलमिव, कामिनीमुखं वनितावदनम्, हेमयन्त्रात्सुवर्णयन्त्राद्विगलन्ति पतन्ति यानि जलानि तोयानि तैः, मुहुरनेकवारम्, असिञ्चत् सिषेच । रथोद्धतावृत्तम् 'रान्नराविह रथोद्धता लगौ' इति लक्षणात् ॥१७॥

काचन चपलजडापहृतदुकूलपट्टे रुचिविजितस्फटिकपट्टे घनजघनफलके नखक्षतिव्याजेन मकरकेतनस्य जगज्जयप्रशस्तिवर्णावलिमिव बिभ्राणा, करनिपीडनोद्गीर्णरक्तिमधारामिव विद्रुमयन्त्रनिर्गलत्पयोधारां शयकान्तिसंक्रान्तरक्तवर्णतया कुङ्कुमरसानुकारिणीं प्रियलपनतले सहर्षं ववर्ष ।

सुदतीकुचकुड्मलाग्रमारात्तरुणः कश्चिदसिञ्चदम्बुभिः ।
हृदयस्थलजातरागकल्पद्रुमवृद्ध्यै किमु कामुकः परम् ॥१८॥
अन्या काचिद्वल्लभं वञ्चयित्वा सख्या साकं वारिमग्ना मुहूर्तम् ।
तस्या गात्रामोदलोभाद्भ्रमद्भिर्भृङ्गैर्ज्ञाता सामुनालिङ्गिता च ॥१९॥
सरोजिनीमध्यविराजमाना काचिन्मृगाक्षी कमनीयरूपा ।
वक्षोजकोशा मृदुबाहुनाला नालक्षि वक्त्रायतफुल्लपद्मा ॥२०॥
च्युतैः प्रसूनैर्घनकेशबन्धान्मृगीदृशां तारकिते जलेऽस्मिन् ।
निरीक्ष्यमाणं तरुणैश्चकोरैः कस्याश्चिदास्यं शशभृद्बभूव ॥२१॥

एवं जलक्रीडापरायणेषु पुरतरुणेषु, तटिनीतटालङ्कारभूतयोः कुबेरमित्रकुबेरदत्तनामजलधि-

काचनेति—चपलं चञ्चलं पक्षे चञ्चलः कृतज्वर इति यावत्, यत् जडं डलयोरभेदाज्जलं नीरं पक्षे जडो धूर्तो नायकस्तेनापहृतं दूरीकृतं दुकूलपट्टं यस्मात्तस्मिन्, रुच्या कान्त्या विजितः पराजितः स्फटिकपट्टः सितोपलफलको येन तस्मिन्, घनश्चासौ जघनफलकश्च नितम्बपट्टश्चेति घनजघनफलकस्तस्मिन्, नखक्षतिव्याजेन नखराघातदम्भेन, मकरकेतनस्य कामस्य, जगतां जयो जगज्जयस्त्रिभुवनविजयस्तस्य प्रशस्तिः कीर्त्यङ्कनम्, तस्या वर्णावलिरक्षरपङ्क्तिस्तामिव, बिभ्राणा दधाना, काचन कामिनी, करयोः पाण्योर्निपीडनेन संमर्दनातिशयेनोद्गीर्णा प्रकटिता या रक्तिमधारा रुधिरसन्ततिस्तामिव, शययोर्हस्तयोः कान्त्या दीप्त्या संक्रान्तो विपरिवर्तितो रक्तवर्णो लोहितवर्णो यस्यास्तस्या भावस्तत्ता तया, कुङ्कुमरसं काश्मीरद्रवमनुकरोतीत्येवं शीला ताम्, विद्रुमयन्त्रात्प्रवालनिर्मितयन्त्रान्निर्गलन्ती चासौ पयोधारा चेति विद्रुमयन्त्रनिर्गलत्पयोधारा ताम्, प्रियलपनतले वल्लभवदनतले, सहर्षं सप्रमोदम्, ववर्ष वर्षति स्म ।

सुदतीति—तरुणो युवा, कश्चित्कोऽपि, कामुकः प्रियः 'प्रियः कामी च कामुकः' इति धनंजयः, आरात् समीपे 'आराद्दूरसमीपयोः' इत्यमरः, शोभना दन्ता यस्याः सा सुदती स्वकीयवल्लभा तस्याः कुचकुड्मलयोः स्तनमुकुलकयोरग्रं पुरःप्रदेशम्, हृदयस्थले मनःप्रदेशे जातः समुत्पन्नो यो रागः एव प्रीतिरेव कल्पद्रुमः कल्पवृक्षस्तस्य वृद्ध्यै वर्धनाय, किमु-इति वितर्के, अम्बुभिः सलिलैः, परमत्यन्तम्, असिञ्चत् सिषेच ॥१८॥

अन्या काचिदिति—अन्या-इतरा, काचित्कापि, वल्लभा, वल्लभं प्रियम्, वञ्चयित्वा प्रतार्य, मुहूर्तं घटिकाद्वयं यावत्, सख्या सहचर्या, साकं सार्धम्, वारिणि जले मग्ना ब्रुडितेति वारिमग्ना, अभूदिति शेषः, सा च वल्लभा, अमुना वल्लभेन, तस्या वारिमग्नायाः, गात्रामोदलोभाच्छरीरसुगन्धिलोभात्, भ्रमद्भिः पार्श्वं पर्यटद्भिः भृङ्गैरलिभिः, ज्ञाता बुद्धा, आलिङ्गिता समाश्लिष्टा च । शालिनीवृत्तम् ॥१९॥

सरोजिनीमध्येति—सरोजिनीनां कमलिनीनां मध्येऽभ्यन्तरे विराजमाना शोभमाना, कमनीयं मनोज्ञं रूपं सौन्दर्यं यस्याः सा, वक्षोजौ स्तनौ कोशाविव कमलकुड्मलाविव यस्याः सा, वक्त्रं वदनमायतफुल्लपद्ममिव विशालविकसितारविन्दमिव यस्याः सा, काचित् कापि, मृगाक्षी मृगनयनी, नालक्षि नो दृष्टा, सरोजिनी सादृश्यात्पृथक् नाभिज्ञातेति भावः । उपजातिवृत्तम् ॥२०॥

च्युतैरिति—मृग्या इव दृशौ नयने यासां तासां मृगलोचनानाम्, घनश्चासौ निबिडश्चासौ केशबन्धश्च कचबन्धश्चेति घनकेशबन्धस्तस्मात्, च्युतैः पतितैः, प्रसूनैः कुसुमैः, तारकिते संजाततारके व्याप्त इति यावत्, अस्मिन् जले नवापगानीरे, तरुणैर्युवभिः, चकोरैर्जीवंजीवैः, निरीक्ष्यमाणमवलोक्यमानम्, कस्याश्चित्कस्या अपि नायिकायाः, आस्यं मुखम्, शशभृच्चन्द्रः, बभूव आसीत् ॥२१॥

एवं जलक्रीडापरायणेष्विति—एवमनेन प्रकारेण, पुरतरुणेषु नगरनिर्जरेषु, जलक्रीडायां वारिकेल्यां परायणास्तत्परास्तेषु सत्सु, तटिन्या नवापगायास्तटस्य तीरस्यालङ्कारभूते भूषणीभूते तयोः कुबेरमित्रकुबेर-

सम्भूतयोर्गुणमालासुरमञ्जरीनामधेययोः कन्यारत्नयोः, चन्द्रोदयसूर्योदयाभिधपरस्परपटवासचूर्णोत्कर्षस्पर्धया पराजिता नद्यापगाजलस्नाता मा भूदिति कृतसंगरयोः, कुट्टिन्यौ, चूर्णमादाय, तत्र तत्र विचार्य, क्रमेण जीवन्धरनिकटमागत्य, चन्द्रोदयसूर्योदययोर्मध्ये कः श्लाघ्य इति प्रच्छाञ्चक्रतुः ।

स्वामी च चन्द्रोदयचूर्णमूचे श्लाघ्यं तदन्यद्घनकालयोग्यम् ।
आद्यं किरन्व्योम्नि समावृतालिं निर्दिश्य च प्रत्ययमाततान ॥२२॥
ततः कुमारं कुरुवंशवीरं नत्वा च नुत्वा विनिवृत्य चेट्यौ ।
स्वस्वामिनीसन्निधिमेत्य वेगाद्विज्ञापयामासतुरेवमेव ॥२३॥
उभयोश्चूर्णयोरात्तगन्धभावे समेऽपि च ।
जीवकेन विनिर्दिष्टे शुशोच सुरमञ्जरी ॥२४॥
उल्लासयामास मुखाम्बुजातं चन्द्रोदयोऽयं गुणमालिकायाः ।
सूर्योदयो द्राक्सुरमञ्जरीश्रीवक्त्राब्जशोषं व्यतनोद्विचित्रम् ॥२५॥

ततः पराभवजनितदुरासदेर्ष्याकलुषितचेतना सुरमञ्जरी सख्या गुणमालया बहुधा प्रार्थिताप्यकृतस्नानैव निवृत्य जीवकादपरं नरं न पश्यामीति निश्चस्य कृतसन्धाबन्धा रोषान्धा कन्यागारं प्रविवेश ।

दत्तौ नामनी ययोस्तथाभूतौ जलधीसागरौ तयोः सम्भूते समुत्पन्ने तयोः, गुणमालासुरमञ्जर्यौ नामधेये नामनी ययोस्तयोः, चन्द्रोदयसूर्योदयावभिधे ययोस्तौ तथाभूतौ यौ परस्परपटवासचूर्णौ तयोरुत्कर्षे प्रकर्षतायां स्पर्धासूया तया, पराजिता विजिता, आवयोरिति शेषः, नद्यापगाया नवनद्या जले नीरे स्नाता कृतस्नाना, मा भूत् न स्यात् , इत्येवं कृतसंगरयोः कृतप्रतिज्ञयोः, कन्यारत्नयोः पतिंवराश्रेष्ठयोः 'जातौ जातौ यदुत्कृष्टं तद्रत्नमिहोच्यते' इति रत्नलक्षणम्, कुट्टिन्यौ दास्यौ, चूर्णं पटवासद्रव्यम्, आदाय गृहीत्वा, तत्र तत्र तत्तत्स्थानेषु, विचार्य विचारं कारयित्वा, क्रमेण क्रमशः, जीवन्धरनिकटं जीवकसमीपम्, आगम्य, चन्द्रोदयसूर्योदययोरेतन्नाम्नोः, चूर्णयोः, मध्ये, कश्चूर्णः, श्लाघ्यः प्रशंसनीयः, इति पृच्छाञ्चक्रतुः पप्रच्छतुः ।

स्वामी चेति—स्वामी च जीवन्धरश्च, चन्द्रोदयचूर्णं गुणमालाचूर्णम्, श्लाघ्यमुत्तमम्, तदन्यत् तद्भिन्नत्, घनकालयोग्यं प्रावृट्समयार्हम्, ऊचे जगाद । आद्यं प्रथमं चूर्णम्, व्योम्नि गगने, किरन् प्रक्षिपन्, समावृताः समाकृष्टा अलयो भ्रमरा येन तं तथाभूतम्, निर्दिश्य प्रदर्श्य, प्रत्ययं विश्वासम्, आततान च विस्तारयामास च ॥२२॥

ततः कुमारमिति—ततस्तदनन्तरम्, चेट्यौ दास्यौ, कुरुवंशवीरं कुरुवंशसुभटम्, कुमारं जीवन्धरम्, नत्वा नमस्कृत्य, नुत्वा च स्तुत्वा च, विनिवृत्य परावृत्य, स्वस्वामिनीसन्निधिं गुणमालासुरमञ्जरीसमीपम्, वेगाज्जवेन, एत्यागत्य, एवमेव पूर्वोक्तप्रकारेणैव, विज्ञापयामासतुः कथयामासतुः ॥२३॥

उभयोरिति—उभयोर्गुणमालासुरमञ्जर्योः, आत्तगन्धभावे गृहीतसौगन्ध्ये, समेऽपि सदृशेऽपि च सति, सुरमञ्जरी कुबेरदत्ततनया, जीवकेन जीवन्धरेण, विनिर्दिष्टे कथिते, शुशोच शोकञ्चकार ॥२४॥

उल्लासयामासेति—अयमेषः, चन्द्रोदयो निशाकरोद्गमः पक्षे तन्नामा चूर्णः, गुणमालिकायाः कुबेरमित्रसुतायाः, मुखाम्बुजातं वदनवारिजम्, उल्लासयामास प्रहृष्टं चकार, सूर्योदयो दिवाकरोदयः पक्षे तन्नामा चूर्णः, द्राक् झटिति, श्रियोपलक्षितं वक्त्राब्जं श्रीवक्त्राब्जं सुरमञ्जर्याः श्रीवक्त्राब्जमिति सुरमञ्जरीश्रीवक्त्राब्जं तस्य शोषः शोषणं तम्, व्यतनोच्चकार, इति विचित्रमद्भुतम्, परिहारस्तूक्तः । विरोधाभासोऽलङ्कारः ॥ इन्द्रवज्रावृत्तम् 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति लक्षणात् ॥२५॥

ततः पराभवेति—ततस्तदनन्तरम्, पराभवेन पराजयेन जनिता समुत्पन्ना या दुरासदा दुष्प्राप्या विकटेति यावत्, ईर्ष्या मत्सरता तया कलुषितं मलिनं चेतनं चित्तं यस्याः सा, सुरमञ्जरी, सख्या वयस्यया, गुणमालया, बहुधा विविधप्रकारेण, प्रार्थिताप्यभ्यर्थितापि, न कृतं स्नानं यया तथाभूतैवाविहितमज्जनैव, निवृत्य नद्यापगातीरात्प्रत्यावृत्य, जीवकात् सत्यन्धरसुतात्, अपरं भिन्नम्, नरं पुरुषम्, न पश्यामि

वयस्याविप्रयोगेन गुणमाला शुशोच सा ।
चन्द्रिकाया वियोगेन प्रातरुत्पलिनी यथा ॥२६॥

तावत्सक्थिजवप्रणुन्नपवनाटोपोत्कटोत्पाटितैः
शाखानां वलयैर्निरभ्रगगनेऽप्यभ्रभ्रमं भावयन् ।
हाहाकारपराञ्जनान्विरचयन् राज्ञो मदान्धो गजो
वेगाज्जङ्गमशैलराजगरिमा पौरव्रजं प्राविशत् ॥ २७ ॥

करटोद्यन्मदाम्भोभिः सृजन्कल्लोलिनीयुगम् ।
अधावन्मत्तकुम्भीन्द्रो गुणमालारथं प्रति ॥ २८ ॥

तदा परिजनेषु परिणतकरेणुराजभयेन दूरदूरमपसर्पत्सु, कस्मिंश्चिद्धात्रीजने समसुखदुःखतया मां हत्वा सा हन्यतामिति गुणमालायाः पुरतः स्थिते, हतेति शब्दमुखरेषु समीपवर्तिषु जनेषु, करुणापरिणाहितहृदयो जीवन्धरः समुपेत्य, केसरीव सिंहनादप्रतिध्वनितदिक्तटो हेलयैव सिन्धुरं भीकरमपि सूकरं विधाय तदीयस्कन्धमलङ्कुर्वन्, कुम्भस्थलसाम्यविलुलोकिषयेव कुम्भस्थले करं, तस्याः स्तनकलशे दृष्टिं, मनसि तत्प्रस्तावं च वितस्तार ।

नावलोकयामि, इत्येवम्, निश्वस्य निश्वासमादाय, कृतो विहितः सन्धायाः प्रतिज्ञाया भन्धो यया सा, रोषेण क्रोधेनान्धा विवेकरहिता, सती, कन्यागारं कन्यागृहम्, प्रविवेश प्रविष्टवती ।

वयस्याविप्रयोगेनेति—सा पूर्वोक्ता गुणमाला, वयस्याया आल्या विप्रयोगो विरहस्तेन, चन्द्रिकाया ज्योत्स्नायाः वियोगेन विरहेण, प्रातरुत्पलिनी यथा प्रभातपद्मिनीव, शुशोच शोकमकार्षीत् ॥ २६ ॥

अथ गजोपद्रवं वर्णयितुमाह—तावत् तावता कालेन, सक्थ्नामूरूणां जवेन वेगेन प्रणुन्नः प्रेरितो यः पवनाटोपो वायुविस्तारस्तेनोत्कटं विकटं यथा स्यात्तथोत्पाटितानि निर्मूलितानि तैः, शाखानां वलयैः शाखासमूहैः, निरभ्रगगनेऽपि निर्मेघाकाशेऽपि, अभ्राणां मेघानां भ्रमः संशयस्तम्, भावयन् उत्पादयन्, जनांल्लोकान्, हाहाकारे हाहाशब्दे परास्तत्परास्तान्, विरचयन् कुर्वन्, जङ्गमशैलराजस्य गच्छत्पर्वतेश्वरस्येव गरिमा गौरवं यस्य सः, तथाभूतः, मदेन दानेनान्धो विगतदृष्टिः, राज्ञः काष्ठाङ्गारस्य, गजो हस्ती, पौरव्रजं नागरिकसमूहं, प्राविशत् प्रविवेश । शार्दूलविक्रीडितं छन्दः ॥ २७ ॥

करटेति—मदा एवाम्भांसीति मदाम्भांसि करटाभ्यां गण्डाभ्यामुद्यन्ति निःसरन्ति यानि मदाम्भांसि दानजलानि तैः, कल्लोलिनीयुगं नदीद्वयम्, सृजन् रचयन्, मत्तकुम्भीन्द्रो गन्धगजेन्द्रः, गुणमालारथं प्रति गुणमालास्यन्दनमुद्दिश्य, अधावत् वेगेन जगाम ॥ २८ ॥

तदेति—तदा गजाक्रमणकाले, परिजनेषु परिवारपुरुषेषु, परिणतस्य कृततिर्यग्दन्तप्रहारस्य करेणुराजस्य गजेन्द्रस्य भयं त्रासस्तेन, दूरदूरमतिदूरम्, अपसर्पत्सु गच्छत्सु सत्सु, कस्मिंश्चित्कस्मिन्नपि, धात्रीजने—उपमातृजने, समे सुखदुःखे यस्यास्तस्या भावस्तत्ता तया, मां धात्रीम्, हत्वा मारयित्वा, सा गुणमाला, हन्यतां मार्यताम्, इत्येतदभिप्रायेण, गुणमालायाः, पुरतोऽग्रे, स्थिते विद्यमाने सति, समीपवर्तिषु निकटस्थेषु नरेषु, पुरुषेषु, हता मृता, इत्येवम् शब्दैर्ध्वनिभिर्मुखरा वाचालास्तेषु तथाभूतेषु सत्सु, करुणयानुकम्पया परिणाहितं विस्तारितं हृदयं चित्तं यस्य सः जीवन्धरो विजयासूनुः, समुपेत्य समागत्य, केसरीव सिंह इव, सिंहनादेन क्ष्वेलारवेण प्रतिध्वनितानि प्रतिनादितानि दिक्तटानि येन तथाभूतः सन्, हेलयैव, क्रीडयैव, भीकरमपि भयोत्पादकमपि, सिन्धुरं हस्तिनम्, सूकरं वराहं निर्बलमिति यावत्, विधाय कृत्वा, तदीयस्कन्धं तत्सम्बन्धिग्रीवापृष्ठम्, अलङ्कुर्वन् शोभयन् तत्र स्थितः सन्निति यावत्, कुम्भस्थलेन गण्डस्थलेन यत् साम्यं सादृश्यं तस्य विलुलोकिषा दिदृक्षा तयेव, कुम्भस्थले गण्डस्थले, करं हस्तम्, तस्या गुणमालायाः, स्तनकलशे कुचकुम्भे, दृष्टिं नयनम्, मनसि चेतसि, तस्याः प्रस्तावस्तं गुणमालावसरम् च, वितस्तार विस्तारयामास ।

१. प्रणुन्न– मु० ।

मदकलकलभस्य यानतुल्या गतिरिह यूथपयूथिकाभकेश्याः ।
मृदुकरनिभमूरुयुग्ममस्याः कुचयुगमातनुते च कुम्भसाम्यम् ॥ २९ ॥

इति मनसि चिन्तयन्नेव पञ्चशरप्रहारपरवशो गजराजमालानमानीय, सहचरैः सह रथमलङ्कुर्वन्, गजविज्ञानप्रशंसापरैः पौरैः स्तूयमानो निजमन्दिरान्तरं प्रविवेश ।

साक्षात्पञ्चशरं कुमारमतुलं निध्याय रुद्ध्वान्तरं[1]
कामार्ता गुणमालिका च सदनं गत्वा चिरं विह्वला ।
ध्यायन्ती मनसा तमेव सततं सन्तापशुष्यन्मुखी
पृष्टाप्यत्र सखीजनैर्बहुतरं नैवोत्तरं सा ददे ॥ ३० ॥

बलवदस्वस्था गुणमाला कन्दर्पनिन्दामेवमकरोत्—
कुसुमायुध पञ्च ते कलम्बा नियता लक्ष्यजनस्त्वनेककः ।
इति चेदहमेकिका कथं वा गमितानन्तशरैश्च पञ्चताम् ॥ ३१ ॥

मदकलेति—यूथपो गणनाथो गजश्रेष्ठ इति यावत्, तस्य या यूथिका वैशिष्ट्यार्थमधिमस्तकं धारिता मागधी 'जुही' इति प्रसिद्धा पुष्पसन्ततिः तद्वाभास्तत्तुल्याः केशाः कचाः यस्यास्तस्याः, अस्या गुणमालायाः, गतिर्गमनम्, इह लोके, मदकलश्चासौ मदोत्कटश्चासौ कलभश्च करी चेति मदकलकलभस्तस्य, 'मदोत्कटस्तु मदकलः' इत्यमरः । यानेन गमनेन तुल्या सदृशीति यानतुल्या, ऊरुयुग्मं सक्थियुगलम्, मृदुकरनिभं कोमलशुण्डादण्डसदृशम्, अस्तीति शेषः । कुचयुगं च स्तनयुग्मं च, कुम्भसाम्यं गण्डस्थलसादृश्यम्, आतनुते विस्तारयति । पुष्पिताग्रावृत्तम् 'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा' इति लक्षणात् ॥ २९ ॥

इति मनसीति—इति पूर्वोक्तप्रकारेण, मनसि चेतसि, चिन्तयन्नेव विचारयन्नेव, पञ्चशरस्य कामस्य प्रहारेणाघातेन परवशः परायत्तः, जीवन्धरः, गजराजं करीन्द्रम्, आलानं बन्धनस्तम्भम्, आनीय प्रापय्य, सहचरैः सखिभिः, सह सार्धम्, रथं स्यन्दनम्, अलङ्कुर्वन् शोभयन्, गजविज्ञानस्य हस्तिविज्ञानस्य प्रशंसायां श्लाघायां परास्तत्परास्तैः, पौरैर्नागरैः, स्तूयमानो नूयमानः सन्, निजमन्दिरान्तरं स्वसदनाभ्यन्तरम्, प्रविवेश प्रविष्टवान् ।

साक्षादिति—अतुलमनुपमम्, कुमारं जीवन्धरम्, साक्षात्प्रत्यक्षम्, पञ्चशरं कामम्, निध्याय नितरां ध्यात्वा तं प्रत्यक्षकामं मन्वेति यावत्, अन्तरं हृदये रुद्ध्वा स्थापयित्वा, कामेन मदनव्यथयार्ता पीडितेति कामार्ता, गुणमालिका च कुबेरमित्रतनया च, सदनं गृहम्, गत्वा व्रजित्वा, चिरं चिरकालपर्यन्तम्, विह्वला विक्लिता अभवदिति शेषः । अत्र सदने, मनसा चेतसा, सततं सर्वदा, तमेव जीवन्धरमेव, ध्यायन्ती चिन्तयन्ती, सन्तापेन मदनजतापेन शुष्यन्नीरसीभवन्मुखं वक्त्रं यस्यास्तथाभूता, सा गुणमालिका, सखीजनैः सहचरीसमूहैः, बहुतरमनेकवारम्, पृष्टाप्यनुयोजितापि, उत्तरं प्रत्युत्तरम्, नैव ददे न दत्तवती ॥३०॥

बलवदस्वस्थेति—बलवदस्वस्था-अतिशयेनास्वस्था, गुणमाला, एवं वक्ष्यमाणप्रकारेण, कन्दर्पस्य कामस्य निन्दामपवादम्, अकरोद् व्यधात् ।

कुसुमायुधेति—कुसुममेव पुष्पमेवायुधं शस्त्रं यस्य तत्सम्बुद्धौ हे कुसुमायुध हे मदन ! ते भवतः, कलम्बाः बाणाः नियता नियतसंख्याकाः पञ्चेति यावत्, लक्ष्यजनस्तु शरव्यजनस्तु, अनेकको विविधः अस्तीति शेषः, इतीत्थम्, चेद्यदि, तर्हि, एकिका एकाकिनी, अहं गुणमाला, अनन्तशरैश्च संख्यातीतबाणैश्च, पञ्चतां पञ्चसंख्यात्वम् मृत्युं च मृतप्रायदशामिति यावत्, कथं वा केन प्रकारेण वा, गमिता प्रापिता । तव नियतकलम्बा अनन्ताः कथं जाता, अहमेकिका च तैः पञ्चतां कथं प्रापितेति विरोधः, परिहारस्तूक्तः । 'पञ्चता मृत्युमात्रेऽपि पञ्चभावेऽपि पञ्चता' इति विश्वलोचनः ॥३१॥

[1] रुद्धान्तरं मु० ।

इति बहुधा प्रलपन्ती, तीव्रतरमदनसन्तापमसहमाना क्षणं घनसारदीर्घिकापरिसरे क्षणमुपवनतटमञ्जुलनिकुञ्जे क्षणमास्तृतकुसुमतल्पे क्षणं मृदुलप्रवालशय्यातले क्षणं सुकुमारहंसतूलशयने क्षणं नवकदलीकानने कालं क्षिपन्ती, क्रमेण पत्रिकां विलिख्य, कञ्चन क्रीडाशुकं जीवन्धराय प्राहैषीत् ।

जीवन्धरोऽपि बहुधा विरहाग्निलीढ-
मङ्गं दधन्निजगृहोपवने निषण्णः ।
चित्रे विलिख्य कमनीयतमं तदङ्गं
निःश्वस्य विश्वमहितः सुचिरं लुलोके ॥ ३२ ॥

तावदागत्य चाटुवचनचतुरेण कीरेण प्रसंगात्समर्पितं पत्रं फलितमनोरथसुरतपत्रमिवादाय तत्क्षणमेव द्रष्टुकामोऽप्यानन्दबाष्पनिरुद्धनयनमार्गतया विघ्नितो मोदपरीवाहं कथं कथमपि नियम्य जीवन्धरो वाचयति स्म ।

मदीयहृदयाभिधं[1] मदनकाण्डकाण्डोद्यतं[2]
नवं कुसुमकन्दुकं[3] वनतटे त्वया चोरितम्[4] ।
विमोहकलितोत्पलं रुचिररागसत्पल्लवं
[5]तदद्य हि वितीर्यतां विजितकामरूपोज्ज्वल ॥ ३३ ॥

इति बहुधेति—इतीत्थम्, बहुधा नानाप्रकारेण, प्रलपन्ती निरर्थकं कथयन्ती, 'प्रलापोऽनर्थकं वचः' इत्यमरः । अतिशयेन तीव्रस्तीव्रतरः स चासौ मदनसन्तापश्चेति तीव्रतरमदनसन्तापस्तं तीक्ष्णतरकामतापम्, असहमाना सोढुमशक्नुवती, क्षणं क्षणकालं यावत्, घनसारस्य कर्पूरस्य दीर्घिका वापिका तस्याः परिसरो निकटप्रदेशस्तस्मिन्, क्षणम्, उपवनतटे विद्यमानं यन्मञ्जुलनिकुञ्जं तस्मिन् उद्यानतटकमनीयलतागृहे, क्षणम्, आस्तृतं विस्तारितं यत्कुसुमानां पुष्पाणां तल्पं शयनं तस्मिन्, क्षणम्, मृदुलाश्च ते कोमलाश्च ते प्रवालाश्च किसलयाश्चेति मृदुलप्रवालास्तेषां शय्यातलं शयनपृष्ठं तस्मिन्, क्षणम्, सुकुमारमतिमृदुलं यद्धंसतूलशयनं तस्मिन्, क्षणम्, नवं च तत् कदलीकाननञ्चेति नवकदलीकाननं तस्मिन् प्रत्यग्रमोचारामे, कालमनेहसम्, क्षिपन्ती गमयन्ती, क्रमेण क्रमशः, पत्रिकां संदेशपत्रीम्, विलिख्याङ्कयित्वा, कञ्चन कमपि, क्रीडाशुकं केलिकीरम्, जीवन्धराय जीवकाय, प्राहैषीत्प्रेषयामास । 'हि गतौ वृद्धौ च' इत्यस्य लुङि रूपम् । 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः ।

जीवन्धरोऽपीति—विश्वैर्महितो विश्वमहितः सर्वपूजितः, जीवन्धरोऽपि जीवकोऽपि, बहुधा बहुप्रकारेण, विरहाग्निना विप्रलम्भानलेन लीढं व्याप्तमिति विरहाग्निलीढम्, अङ्गं शरीरम्, दधत् बिभ्रत्, निजगृहस्य स्वभवनस्योपवने वाटिकायाम्, निषण्ण उपविष्टः सन्, कमनीयतममतिमनोहरम्, तस्या अङ्गं तदङ्गं गुणमालाशरीरम्, चित्रे आलेख्ये, विलिख्य लिखित्वा, निःश्वस्य साक्षात्प्राप्त्यभावजन्यदुःखेन दीर्घं श्वासमादाय, सुचिरं सुदीर्घकालेन, लुलोकेऽद्राक्षीत् । वसन्ततिलकावृत्तम् ॥३२॥

तावदागत्येति—तावत् तावता कालेन, आगत्य समेत्य, चाटुवचने मधुरालापे चतुरो विदग्धस्तेन, कीरेण शुकेन, प्रसङ्गादवसरात्, समर्पितं प्रदत्तम्, पत्रं संदेशकर्गलम्, मनोरथ एव सुरतरुरिति मनोरथसुरतरुः, फलितश्चासौ मनोरथसुरतरुश्चेति फलितमनोरथसुरतरुः तस्य पत्रमिव, फलितवाञ्छितकल्पानोकहकिसलयमिव, आदाय गृहीत्वा, द्रष्टुकामोऽप्यवलोकयितुमना अपि, आनन्दबाष्पेण हर्षाश्रुणा निरुद्धोऽवरुद्धो नयनमार्गो यस्य तस्य भावस्तत्ता तया, विघ्नितः प्राप्तान्तरायः, जीवन्धरो जीवकः, कथं कथमपि केन केनापिप्रकारेण, मोदपरीवाहं प्रहर्षपरम्पराम्, नियम्य, निरुध्य, वाचयतिस्म वाचयामास ।

मदीयेति—विजितः पराजितः कामो येन तथाभूतेन रूपेण सौन्दर्येणोज्ज्वलो विमलस्तत्सम्बुद्धौ हे विजितकामरूपोज्ज्वल ! वनतटे काननतीरे, त्वया भवता, मदनस्य कामस्य काण्डो बाण एव काण्डो दण्डस्तेनोद्यतमुच्छालितम्, 'काण्डोऽस्त्री वर्गबाणार्थनालावसरवारिषु । दण्डे प्रकाण्डे रहसि स्तम्बे कुत्सितकुत्सयोः'

1. भिधो, ब० । 2. यतो ब० । 3 कन्दुको ब० । 4. चोरितः ब० । 5 स एष हि ब० ।

आनन्दबाष्पसंरुद्धकन्धरो गद्गदं पठन् ।
तदेवं विलिलेखाशु पत्रं तां प्रति मोदतः ॥ ३४ ॥

मम नयनमराली प्राप्य ते वक्त्रपद्मं
तदनु च कुचकोशप्रान्तमागत्य हृष्टा ।
विहरति रसपूर्णे नाभिकासारमध्ये
यदि भवति वितीर्णा सा त्वया तं ददामि ॥ ३५ ॥

तावदन्तरुज्ज्वलितमनसिजाग्निधूमनिकरेणेव निश्वासेन नीलमणीकृतनासामौक्तिका, क्षामक्षामाङ्गतया वलयीकृतकनकोर्मिका, मुखसुधाकरकौमुदीलिप्ततयेव परिपाण्डरतनुवल्ली, भावनाप्रकर्षवशेन दिशि दिशि परिस्फुरन्तं जीवन्धरमालोक्य प्रत्युत्थानाय कृतप्रयत्नापि मृणालकोमलैरङ्गैरपारयन्ती, प्रेषितशुकागमनविलम्बासहतया त्रस्तैकहायनकुरङ्गीवापाङ्गतरङ्गान्दिशि दिशि किरन्ती गुणमाला, समागतं जात्या कृत्येन च पत्रिणं शुकमुद्वीक्ष्य, एह्येहि न सहे विलम्बमिति समालपन्ती, सन्निहितं तं तत्समयजातप्रमोदोच्छूनाङ्गतया स्फुटितकञ्चुकेन भुजयुगलेनादाय च पत्रं निरन्तर-

इति विश्वलोचनः, मदीयहृदयाभिधं मच्चित्तनामधेयम्, नवं नूतनम्, कुसुमकन्दुकं पुष्पमयगेन्दुकम्, चोरितमपहृतम्, अद्यास्मिन् दिवसे, विमोहेन विभ्रमेण कलितोत्पलं धृतोत्पलम्, रुचिरेण मनोज्ञेन रागेण प्रेम्णा सपल्लवं विद्यमानकिसलयम्, तत् पूर्वोक्तं कुसुमकन्दुकम्, हि निश्चयेन, वितीर्यतां प्रदीयताम्, रूपकालङ्कारः । पृथ्वीच्छन्दः ॥३३॥

आनन्दबाष्पेति—*आनन्दबाष्पेण हर्षाश्रुणा संरुद्धो निरुद्धः कन्धरो गलो यस्य तथाभूतः, जीवन्धरः,* गद्गदं भिन्नस्वरं यथा स्यात्तथा, तत्पत्रम्, पठन् वाचयन्, तां प्रति गुणमालामुद्दिश्य, मोदतः संमदात्, आशु क्षिप्रम्, एवं वक्ष्यमाणप्रकारम्, पत्रं संदेशकर्गलम्, विलिलेख लिखितवान् ॥३४॥

मम नयनमरालीति—मम जीवन्धरस्य, नयनमराली लोचनहंसी, ते भवत्याः, वक्त्रपद्मं मुखकमलम्, प्राप्य लब्ध्वा, तदनु च मुखकमलप्राप्त्यनन्तरम्, कुचकोशप्रान्तं स्तनकुड्मलोपान्तम्, आगत्य समेत्य, हृष्टा प्रसन्ना सती, रसपूर्णे स्नेहसलिलपूर्णे, नाभिरेव कासारो नाभिकासारस्तुन्दिसरोवरस्तस्य मध्येऽभ्यन्तरे, विहरति विहारं करोति, क्रीडतीति यावत्, सा मम नयनमराली, त्वया भवत्या, वितीर्णा प्रदत्ता, भवति जायते, यदि चेत्, तर्हि तं त्वदीयहृदयाभिधं कुसुमकन्दुकम्, ददामि वितरामि । रूपकालङ्कारः । मालिनीच्छन्दः ॥ ३५ ॥

तावदन्तरीति—तावत् तावता कालेन, अन्तर्मध्येहृदयम्, उज्ज्वलितो ज्वालायुक्तो यो मनसिज एव काम एवाग्निर्वैश्वानरस्तस्य धूमनिकरेणेव धूम्रसमूहेनेव, निःश्वासेन श्वासोच्छ्वासपवनेन, नीलमणीकृतं नासामौक्तिकं यया सा श्यामलीकृतनासिकामुक्ताफला, क्षामक्षाममतिशयेन कृशमङ्गं शरीरं यस्यास्तस्या भावस्तत्ता तया, वलयीकृता हस्ताभरणीकृतोर्मिकाङ्गुलीयकं यया सा, मुखमेव वक्त्रमेव सुधाकरस्तस्य कौमुद्या ज्योत्स्नया लिप्ततयेव, व्याप्ततयेव, परिपाण्डुरा धवलपीता तनुवल्ली शरीरलता यस्याः सा, भावनायाः संस्कारस्य प्रकर्ष आधिक्यं तस्य वशात्तेन, दिशि दिशि प्रतिकाष्ठम्, परिस्फुरन्तं देदीप्यमानम्, जीवन्धरं जीवकम्, आलोक्य दृष्ट्वा, प्रत्युत्थानाय प्रत्युद्गमनाय, कृतप्रयत्नापि विहितायासापि, मृणालकोमलैर्बिसमृदुलैः, अङ्गैरवयवैः, अपारयन्ती समर्था न भवन्ती, प्रेषितः प्रहितो यः शुकः कीरस्तस्यागमने प्रत्यावर्तने विलम्बं कालक्षेपं न सहते तस्या भावस्तया, त्रस्ता चासौ भीता चासावेकहायनकुरङ्गी चैकवर्षहरिणी चेति त्रस्तैकहायनकुरङ्गी तद्वत्, अपाङ्गतरङ्गान् कटाक्षभङ्गान्, दिशि दिशि प्रत्याशम्, किरन्ती प्रक्षिपन्ती, गुणमाला, समागतं समायातं, जात्या ज्ञात्या, कृत्येन च कार्येण च, पत्रिणं पक्षिणं पत्रे पत्रयुक्तम्, शुकं हरितच्छदम्, उद्वीक्ष्य उदवलोक्य, एह्येहि आगच्छ-आगच्छ, विलम्बं कालक्षेपम्, न सहे न सोढुं शक्नोमि, इत्येवं समालपन्ती समालापं कुर्वन्ती, सन्निहितं निकटवर्तिनम्, तं कीरम्, तत्समयजातेन तत्कालोत्पन्नेन प्रमोदेन

१. वाष्पा ब० । २. पाण्डुर ब० ।

निपतितैरपाङ्गैः सर्वत्र मणिलिप्त इव विचित्रे पत्रे रमणीयाक्षरमणीनपश्यन्ती, प्रीतिलतापुष्पायमाण-मन्दहासधवलीकृते तस्मिन्विलिखितं पद्यं वाचयन्ती वाचामगोचरमानन्दमभजत ।

तदिदं वृत्तमवेत्य कन्यकायाः पितराविङ्गितचेष्टितादिभिश्च ।
मुमुदाते स्म वरो हि योग्यभाग्यप्रथितो दुर्लभ एव बोभवीति ॥ ३६ ॥

तदनु गन्धोत्कटान्तिकं नीताभ्यां काभ्याञ्चिदामुष्यायणाभ्यामिमं वृत्तान्तं श्रवणपुटेनाघ्राया-श्चर्यवृत्तिरयं मनस्यामोदमातन्वन् रसनयानुमतिवचनमकरन्दधारामुद्गिरति स्म ।

शुभंयुगुणसम्पन्ने मुहूर्ते गुणमालिकाम् ।
पुत्रीं कुबेरमित्रस्य परिणिन्येऽथ जीवकः ॥ ३७ ॥

तदा परिणयोचितभूषावेषोज्ज्वलः साक्षात्कन्दर्प इव सन्तर्पितसकलमनुजनयनः कुरुवंशवीरो जीवन्धरः सम्मदविस्तारितलोचनाभ्यां नयमालानन्दिनीमपि विनयमालानन्दिनीं गुणमालां विलोकयामास ।

हर्षेणोच्छूनं स्थूलमङ्गं देहो यस्यास्तस्या भावस्तत्ता तया, स्फुटितं भुजयुगलस्य पीनतया भिन्नं कञ्चुकं कूर्पासकं यस्य तेन, भुजयुगलेन प्रवेष्टद्वयेन 'भुजबाहू प्रवेष्टो दोः' इत्यमरः, आदाय गृहीत्वा, च पत्रं जीवन्धरप्रेषितं संदेशकाव्यम्, निरन्तरं निर्व्यवधानं यथा स्यात्तथा निपतितैरुपरि प्राप्तैः, अपाङ्गैः कटाक्षैः, सर्वत्र सर्वप्रदेशेषु, मणिलिप्त इव मेलानन्दव्याप्त इव, विचित्रेऽद्भुतप्रकारे, पत्रे सन्देशकाव्ये, रमणीयाक्षराण्येव सुन्दरवर्णा एव मणयो रत्नानि तान्, अपश्यन्ती अनवलोकयन्ती, प्रीतिलतायाः स्नेहप्रततेः पुष्पायमाणेन कुसुमायमानेन मन्दहासेन धवलीकृते शुक्लीकृते, तस्मिन् पत्रे, विलिखितमङ्कितम्, पद्यं सन्देशश्लोकम्, 'मम नयनमराली' इत्यादिकम्, पठन्ती, वाचां गिराम्, अगोचरमविषयम्, आनन्दं हर्षम्, अभजत प्राप्तवती ।

तदिदमिति—माता च पिता चेति पितरौ मातापितरौ 'मातापितरौ पितरौ मातरपितरौ स्वसू जनयितारौ' इत्यमरः, इङ्गितं हृद्गतो विकारः, चेष्टितं शारीरिकचेष्टा, ते आदी येषां तैः, कन्यकायाः पतिंवरायाः इदं तत्पूर्वोक्तम्, वृत्तमुदन्तम्, अवेत्य ज्ञात्वा, मुमुदाते स्म प्रसन्नौ बभूवतुः, हि यतः, योग्यभाग्येन समी-चीनादृष्टेन प्रथितः प्रसिद्धः, वरो वरेण्यः, दुर्लभ एव दुष्प्राप्य एव, बोभवीति अतिशयेन भवति, 'धातो-रेकाचो हलादेः क्रियासमभिहारे यङ्' इति यङ्, 'यङोऽचि च' इति यङो लुक् ॥ ३६ ॥

तदन्विति—तदनु तदनन्तरम, गन्धोत्कटस्य वणिग्वरस्यान्तिकं निकटम्, नीताभ्यां प्रेषिताभ्याम्, काभ्यांचित् आमुष्यायणाभ्यां गुणमालासम्बन्धिभ्याम्, पुरुषाभ्यामिति यावत्, इमं पूर्वोक्तम्, वृत्तान्तं समाचारम्, श्रवणपुटेन कर्णपुटेन, आघ्राय गृहीत्वा, आश्चर्यवृत्तिर्विस्मितमनाः अयं गन्धोत्कटः, मनसि स्वान्ते, आमोदं हर्षम्, आतन्वन् विस्तारयन्, रसनया जिह्वया, अनुमतिवचनमेव स्वीकृतिवाण्येव मक-रन्दधारा पुष्पासवश्रेणिस्ताम्, उद्गिरति स्म प्रकटयति स्म ॥

शुभंयुगुणसम्पन्न इति—अथोभयपक्षगतप्रमुखजनस्वीकृत्यनन्तरम्, जीवको जीवन्धरः, शुभमस्ति येषां ते शुभंयवः 'अहंशुभमोर्युस्' इति मत्वर्थे युस्प्रत्ययः, शुभंयवश्च ते गुणाश्चेति शुभंयुगुणा मङ्गलगुणा-स्तैः सम्पन्ने सहिते, मुहूर्ते समये, कुबेरमित्रस्य तन्नाम्नो वणिग्वरस्य, पुत्रीं तनयाम्, गुणमालिकाम्, परिणिन्ये परिणीतवान्, उद्वोढेति भावः ॥ ३७ ॥

तदेति—तदा परिणयनकाले, परिणयोचिताभ्यां विवाहयोग्याभ्यां भूषावेषाभ्यामलङ्करणनेपथ्याभ्या-मुज्ज्वलः शोभमानः, साक्षात्कन्दर्प इव, प्रत्यक्षकाम इव, सन्तर्पितानि प्रीतानि सकलमनुजानां निखिलनराणां नयनानि लोचनानि येन सः, कुरुवंशवीरः कुरुवंशसुभटः, जीवन्धरो जीवकः, सम्मदेन हर्षेण विस्तारिते वर्धिते ये लोचने नयने ताभ्याम्, नयमालया नीतिपरम्परया नन्दयतीत्येवं शीला तामपि सतीम्, न तथा-भूतामिति विनयमालानन्दिनीमिति विरोधः, पक्षे विनयस्य नम्रताया माला पङ्क्तिस्तया नन्दिनीं नन्दन-शीलामिति, गुणमालां कुबेरमित्रपुत्रीम्, विलोकयामास ददर्श ।

कुसुमातिशायि सुकुमारमङ्गकं दधती नभःस्थलनिकाशमध्यमम् ।
कुसुमेषुकार्मुकलतेव भाति या त्रिवली तदङ्गुलिसुसन्धिरेखिका ॥ ३८ ॥

यस्याः सुधासमरसाधरपल्लवाग्रे
मन्दस्मितैः कुसुमितैः कुरुवंशकेतोः ।
नेत्राम्बुजे तु फलिते हृदयं रसस्य
धारामसूत सपदीति विचित्रमेतत् ॥ ३९ ॥

तामेनामुपयम्यायं कुरुसन्तानकुञ्जरः ।
चिक्रीडाधित्यकाभागे चिरं मोदमहीभृतः ॥ ४० ॥

इति महाकविहरिचन्द्रविरचिते श्रीमति जीवन्धरचम्पूकाव्ये
गुणमालालम्भो नाम चतुर्थो लम्भः

कुसुमातिशायीति—कुसुमं पुष्पमतिशेत इत्येवं शीलमिति कुसुमातिशायि, सुकुमारमतिमृदुलम्, नभःस्थलनिकाशं गगनोपमानं शून्यमतिकृशमिति यावत्, मध्यममवलग्नं यस्य तत् 'मध्यमं चावलग्नं च मध्योऽस्त्री' इत्यमरः, अङ्गकं शरीरम्, दधती बिभ्रती, त्रिवल्यो नाभेरधस्ताद्विद्यमानास्तिस्रः रेखा एव तदङ्गुलीनां कामकरशाखानां सुसन्धिरेखिकाः सङ्गमलेखिका यस्यां तथाभूता, या गुणमाला, कुसुमेषोर्मदनस्य कार्मुकलतेव चापवल्लरीव, भाति शोभते । उपमालङ्कारः । मञ्जुभाषिणीवृत्तम् 'सजसा जगौ भवति मञ्जुभाषिणी' इति लक्षणात् ॥ ३८ ॥

यस्या इति—यस्या गुणमालायाः, सुधासमः पीयूषतुल्यो रसो यस्य, स चासावधरपल्लवश्च तस्याग्रे, कुसुमितैः पुष्पवदाचरितैः, मन्दस्मितैर्मन्दहसितैः, कुरुवंशकेतोर्जीवन्धरस्य, नेत्राम्बुजे नयनकमले फलिते सञ्जातफले बभूवतुरिति शेषः । हृदयं तु चित्तं तु, सपदि शीघ्रम्, रसस्य फलसारस्य धारां सन्ततिम्, असूत जनयामास, इत्येतत्, विचित्रमाश्चर्यम्, अस्तीति शेषः । ये फलिते तयोरेव रसधारोत्पत्तिरुपपद्यते, अत्र तु स्थानभेदादाश्चर्यमिति भावः । गुणमालाया अधरबिम्बे मन्दस्मितं दृष्ट्वा जीवन्धरस्य नेत्रे सफले जाते, हृदयञ्च तस्य शृङ्गाररसाप्लुतं बभूवेति परिहारः । अलङ्कृतिरलङ्कारः । वसन्ततिलकावृत्तम् ॥ ३९ ॥

तामेनामिति—अयमेषः, कुरुसन्तानकुञ्जरो जीवन्धरगजः, एनां ताम् गुणमालाम्, उपयम्य विवाह्य, मोदमहीभृतः सम्मदशैलस्य 'मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः' इत्यमरः, अधित्यकाभागे उपरि भागे 'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरः, चिरं चिरकालपर्यन्तम्, चिक्रीड क्रीडति स्म । रूपकालङ्कारः ॥ ४० ॥

इति महाकविहरिचन्द्रविरचिते श्रीमति कौमुदीव्याख्याधरे जीवन्धरचम्पूकाव्ये
गुणमालालम्भो नाम चतुर्थो लम्भः

पञ्चमो लम्भः

शत्रुजीवककवलीकरणेषु दक्षजीवककवलं मनसैव ।
आलिहन्नथ करी तृणरूपं प्रागिव स्वकवलं विजहौ सः ॥ १ ॥

कुण्डलेन हृतः सोऽयं कुण्डलीकृतदुर्मदः ।
रोषं सोर्मिकमातेने कटकाश्रितकुञ्जरः ॥ २ ॥

तदेतन्निशम्य विशांपतिर्विशालक्रोधानलं वनौकःसङ्घविजयेन सञ्जातं वल्लकीविजयेन पल्लवितमनङ्गमालासङ्गेन सन्दीपितं शुण्डालपतिशिरोमण्डलकुण्डलताडनेन जाज्वल्यमानं कुमारनिकारेण शिशमयिषुः काष्ठाङ्गारः, संगरे भङ्गुरं कुमारं हस्तग्राहं गृह्णीध्वमिति मथनप्रमुखान्नियोज्य, संयोज्य च गजरथतुरगपादातशबलेन बलेन सह प्राहैषीत् ।

बलं पुरोधाय रथाधिरूढः प्रचण्डवृत्तिर्मथनश्चचाल ।
ज्ञात्वा कुमारोऽपि सहायजुष्टो रथी युयुत्सू रिपुमानशे तम् ॥ ३ ॥

शत्रुजीवेति—अथ जीवन्धरकृतताडनानन्तरम्, स पूर्वोक्तः, करी हस्ती, शत्रुजीवानामरातिप्राणानां कवलीकरणेषु ग्रासीकरणेषु, दक्षः समर्थो यो जीवको जीवन्धरस्तस्य बलं शक्त्यतिशयम्, अथ च कस्यात्मनो बलं कवलं, दक्षजीवस्य पराक्रमपटुजीवन्धरस्य कवलमात्मबलमेव कवलं ग्रासम्, मनसैव चेतसैव, आलिहन् आस्वादयन् सन् , प्रागिव पूर्वमिव, तृणरूपं घासात्मकम्, स्वकवलं स्वग्रासम्, विजहौ तत्याज, 'ओहाक् त्यागे' इत्यस्य लिटि रूपम् । स्वागताच्छन्दः ॥ १ ॥

कुण्डलेनेति—कुण्डलीकृता नम्रीकृता दुर्मदा दुर्मानिनो येन सः, सोऽयं पूर्वोक्तः, कटकाश्रितश्चासौ कुञ्जरश्चेति कटकाश्रितकुञ्जरः सेनागतो राजधानीगतो वा हस्ती 'कटकोऽस्त्री राजधान्यां सानौ सेनानितम्बयोः । वलये सिन्धुलवणे दन्तिदन्तविभूषणे' इति विश्वलोचनः, कुण्डलेन वलयेन हस्तकटकेनेति यावत् 'कुण्डलं कर्णभूषायां पाशेऽपि वलयेऽपि च' इति मेदिनी, हतस्ताडितः सन् , सोर्मिकं सतरङ्गम्, उत्तरोत्तरवर्धमानमिति यावत्, रोषं क्रोधम्, आतेने विस्तारयामास ॥ २ ॥

तदेतदिति—तदेतत् कुञ्जराहारवर्जनवृत्तम्, निशम्य श्रुत्वा, विशाम्पतिः प्रजापतिः, वनं काननमोकः स्थानं येषां ते वनौकसः शबरास्तेषां सङ्घः समूहस्तस्य विजयः पराजयस्तेन, सञ्जातं समुत्पन्नम्, वल्लक्यां वीणायां विजय उत्कर्षप्राप्तिस्तेन, पल्लवितं वृद्धिङ्गतम्, अनङ्गमालासङ्गेन तन्नामाङ्गनासमागमेन, सन्दीपितं सन्धुक्षितम्, शुण्डालपतेर्गजेन्द्रस्य शिरोमण्डलं मूर्धमण्डलं तस्य कुण्डलेन हस्तकटकेन ताडनं पीडनं तेन, जाज्वल्यमानमतिशयेन प्रज्वलन्तम्, विशालश्चासौ क्रोधानलश्चेति विशालक्रोधानलस्तम् प्रभूतकोपपावकम्, कुमारस्य निकारो विप्रकारस्तेन 'निकारो विप्रकारः स्यात्' इत्यमरः, शिशमयिषुः शमयितुमिच्छुः, काष्ठाङ्गारः कृतघ्नशिरोमणिः, सङ्गरे युद्धे, भङ्गुरमविनाशिनम्, कुमारं जीवन्धरम्, हस्तेन गृहीत्वेति हस्तग्राहं करग्राहम् 'हस्ते वर्तिग्रहोः' इति णमुल् , गृह्णीध्वं गृहीतं कुरुध्वम्, इत्येवम्, मथनप्रमुखान् मथनप्रधानान् , नियोज्य नियुक्तान् विधाय निदेशं दत्त्वेति यावत् , गजाश्च रथाश्च तुरगाश्च पादातञ्चेति गजरथतुरगपादातं वारणशताङ्गहयपत्तिसमूहस्तेन शबलेन कर्बुरेण, बलेन सैन्येन, सह सार्धम् प्राहैषीत् प्रजिघाय ।

बलमिति—रथाधिरूढः स्यन्दनमधिष्ठितः, प्रचण्डातितीक्ष्णा वृत्तिर्व्यवहृतिर्यस्य तथाभूतः, मथनः काष्ठाङ्गारश्यालकः, बलं सैन्यम्, पुरोधायाग्रे कृत्वा, चचाल, चलति स्म । सहायैर्मित्रैर्जुष्टः सेवित इति सहायजुष्टः, रथी रथाधिष्ठितः, कुमारोऽपि सात्यन्धरिरपि, ज्ञात्वा मथनाभियानं बुद्ध्वा, योद्धुमिच्छुर्युयुत्सुः सन्, तं मथनम्, आनशे प्राप 'अशू व्याप्तौ संघाते च' इत्यस्य लिटि रूपम्, 'अश्नोतेश्च' इति नुट् ॥ ३ ॥

गजा जगर्जुः पटहाः प्रणेदुर्जिहेषुरश्वाश्च तदा रणाग्रे ।
कुमारबाहासुखसुप्तिकायाः प्रबोधनायेव जयेन्दिरायाः ॥ ४ ॥

कराञ्चितशरासनादविरलं गलद्भिः शरै-
र्लुलाव कुरुकुञ्जरो रिपुशिरांसि चापैरमा ।
बिभेद गजयूथपान् सुभटधैर्यवृत्त्या समं
ववर्ष शरसन्तति समभिभोद्गतैर्मौक्तिकैः ॥ ५ ॥

ततश्च हतशेषेषु सैनिकेषु तदीयप्रक्ष्वेडनाध्यापकादधीतवेगेषु तदभ्यासायेव दिशि दिशि पलायमानेषु विच्छिन्नशरासनरथादिपरिकरतया कम्पमानमवलोक्य कुरुवीरो गभीरतरमेवमवादीत् ।

भवादृशे भुजोऽयं मे न बाणं मोक्तुमीहते ।
गच्छ गच्छ भयेनालं ब्रूहि राज्ञे कथामिमाम् ॥ ६ ॥
जेतुमस्मान् मृधारम्भे[1] नेतुं कीर्तिं दिगन्तरम् ।
भवान्तरे च चतुरं मन्यते यः स दुर्मतिः ॥ ७ ॥

तावदिदं वृत्तमाकर्ण्य कोपसंज्वलितनयनाङ्गारेण काष्ठाङ्गारेण पुनरपि सर्वाभिसारेण प्रेषितां

गजा इति—तदा तस्मिन्काले, रणाग्रे समराग्रे, कुमारस्य जीवन्धरस्य बाहायां भुजे सुखसुप्तिः सुखशयनं यस्यास्तस्याः जयेन्दिराया विजयलक्ष्म्याः, प्रबोधनायेव जागरणायेव, गजा हस्तिनः, जगर्जुर्गर्जन्ति स्म, पटहाः ढक्काः, प्रणेदुः प्रणदन्ति स्म, अश्वाश्च हयाश्च, जिहेषुर्हेषन्ते स्म, अत्र परस्मैपदप्रयोगोऽपाणिनीयः । 'बाहो बाहुरिति स्मृतः' इति देशिकोशः, 'स्त्रियां तु भुजा बाहा' इति च । उत्प्रेक्षा ॥४॥

कराञ्चितशरासनादिति—कुरुकुञ्जरः कुरुश्रेष्ठो जीवन्धर इति यावत्, कराञ्चितं हस्तशोभितञ्च तच्छरासनं धनुश्चेति तस्मात्, अविरलं निरन्तरायम्, गलद्भिः पतद्भिः, शरैर्बाणैः, चापैः रिपुकोदण्डैः, अमा सह, रिपूणां शत्रूणां शिरांसि मस्तकानि, लुलाव चिच्छेद, सुभटानां योद्धृणां धैर्यवृत्तिर्धीरतावृत्तिस्तया, समं सह, गजयूथपान् गजगणनाथान् 'गणनाथस्तु यूथपः' इत्यमरः, बिभेद भिनत्ति स्म, इभोद्गतैर्गजसमुच्छलितैः, मौक्तिकैर्मुक्ताफलैः, समं सार्धम्, शरसन्तति बाणसमूहम्, ववर्ष वर्षति स्म । सहोक्तिरलङ्कारः, पृथ्वीच्छन्दः ॥५॥

ततश्चेति—ततश्च तदनन्तरञ्च, हतशेषेषु मृतावशिष्टेषु, सैनिकेषु सैन्येषु, तस्यायं तदीयः स चासौ प्रक्ष्वेडनश्च नाराचश्चेति तदीयप्रक्ष्वेडनः स एवाध्यापक उपाध्यायस्तस्मात्, 'प्रक्ष्वेडनास्तु नाराचाः' इत्यमरः, नाराचो लोहमयो बाण इति यावत् । अधीतः शिक्षितो वेगो रयो यैस्तेषु, तदभ्यासायेव तद्गुणनिकार्थमिव 'योग्या गुणनिकाभ्यासः' इति धनञ्जयः, दिशि दिशि प्रतिकाष्ठम्, पलायमानेषु धावमानेषु सत्सु, विच्छिन्नो व्युच्छेदं गतः शरासनरथादिपरिकरो धनुःस्यन्दनप्रभृतिसामग्री यस्य तस्य भावस्तया, कम्पमानं भयचञ्चलम्, मथनं कृतान्तस्यालम्, अवलोक्य दृष्ट्वा, कुरुवीरो जीवन्धरः, गभीरतरमतिशयेन गभीरं यथा स्यात्तथा, एवं वक्ष्यमाणप्रकारेण, अवादीत् कथयाञ्चकार ।

भवादृश इति—मे मम, अयमेषः भुजो बाहुः, भवादृशे त्वत्सदृशे, बाणं शरम्, मोक्तुं त्यक्तुम्, नेहते न चेष्टते, तद् गच्छ गच्छ याहि याहि, भयेन भीत्या, अलं व्यर्थम्, राज्ञे काष्ठाङ्गाराय, इमामेताम्, कथां वार्ताम्, ब्रूहि कथय ॥६॥

जेतुमिति—यः कोऽपि भवान्तरे संसारमध्ये, मृधारम्भे समरारम्भे, अस्मान् गन्धोत्कटसुतान् जेतुं पराभवितुम्, कीर्तिं यशश्च, दिगन्तरं काष्ठान्तरम्, चतुरं विदग्धं स्वमिति शेषः, मन्यते जानाति, स दुर्मतिर्दुर्बुद्धिः, अस्तीति शेषः ॥७॥

तावदिदमिति—तावत् तावता कालेन, इदमेतत्, वृत्तं समाचारम्, आकर्ण्य श्रुत्वा, कोपेन संज्वलितमरुणीभूतं नयनमेव नेत्रमेवाङ्गारो यस्य तेन, काष्ठाङ्गारेण राजाधेन, पुनरपि भूयोऽपि, सर्वाभि-

---

१. मुधारम्भे ब० ।

चमूमवलोक्य करुणार्द्रमानसः कुरुकुलोत्तंसः क्षुद्रप्राणिवधेन किमिति युयुत्सामपास्य सकलापाया-पनयदक्षस्य सुदर्शनयक्षस्य सस्मार ।

यक्षाधिपः पृतनया सह तं समेत्य
शान्तिं निनाय नरपालबलानि सद्यः ।
जीवन्धरं जयगिरिप्रथितं करीन्द्रं
कौतूहलं च हृदयं कृतकृत्यतां स्वम् ॥ ८ ॥

दन्तावलोऽयं कटदानधारासौरभ्यलोभागतभृङ्गसङ्घैः ।
जीवन्धरश्रीपदपद्मसङ्गाद् रराज पापैरिव मुच्यमानः ॥ ९ ॥

तदनु सुरवारणमारूढः, पार्श्वद्वयविधूयमानाभ्यां मुखकमलभ्रान्तिसमागतहंसमिथुनशङ्कावहा-भ्यामनुरक्तयक्षाधिपराज्यलक्ष्मीप्रहितकटाक्षच्छटाभ्यामिवोर्ध्वप्रसृतदन्तयुगलनिर्गलत्कान्तिकल्लोला-भ्यामिव कमलशशाङ्कयोर्विजयेन मुखमभितः सेवमानाभ्यामिव कीर्तिशावकाभ्यां भुजदण्डवास्त-व्यजयलक्ष्मीमन्दहासरुचिपूराभ्यामिव क्षीराब्धिडिण्डीरचयाभ्यामिव चामराभ्यां विभ्राजितः, यशोविजिततया सेवार्थमागतेन परितोलम्बमानमुक्ताफलच्छलतारामण्डलमण्डितचन्द्रबिम्बेनेव कीर्तिक्षीरवाराशिफेनपुञ्जेनेव मुखचन्द्रभ्रमसमागतपरिवेषेणेव सुरकराम्बुरुहविधृतकनकदण्डरुचिर-

सारेण सर्वारम्भेण, प्रेषितां प्रहिताम्, चमूं सेनाम्, अवलोक्य दृष्ट्वा, करुणयानुकम्पयार्द्रं क्लिन्नं मानसं चित्तं यस्य सः, कुरुकुलोत्तंसः कुरुवंशालङ्कारः, जीवन्धर इति यावत्, क्षुद्राणां प्राणिनां वधस्तेन दुर्बलजनसंहारेण, किं किं प्रयोजनम्, इति विचार्य, योद्धुमिच्छा युयुत्सा ताम्, अपास्य त्यक्त्वा, सकलाश्च तेऽपायाश्चेति सकलापाया निखिलविघ्नानि तेषामपनयने दूरीकरणे दक्षः समर्थस्तस्य, सुदर्शनयक्षस्य कुक्कुरचरव्यन्तरस्य, सस्मार स्मरणञ्चकार । 'अधीगर्थदयेशां कर्मणि' इति षष्ठी ।

यक्षाधिप इति—यक्षाणामधिपो यक्षाधिपः सुदर्शनः, पृतनया सेनया, सह सार्धम्, तं जीवन्धरम्, समेत्यागत्य, सद्यो झटिति, नरपालस्य बलानि नरपालबलानि राजसैन्यानि, शान्तिं विवशताम्, निनाय प्रापयामास, जीवन्धरं सात्यन्धरिम्, जयगिरिरिति नाम्ना प्रथितः प्रसिद्धस्तं जयगिरिप्रथितम्, करीन्द्रं गजेन्द्रम्, निनाय, हृदयं चित्तं, सर्वेषामिति शेषः, कौतूहलं कुतुकम्, निनाय, स्वञ्च आत्मानञ्च, कृतकृत्यतां विहितप्रत्युपकारताम्, निनाय । वसन्ततिलकावृत्तम् ॥८॥

दन्तावलोऽयमिति—अयं सुदर्शनसमर्पितः, दन्तावलो गजः, कटयोर्गण्डयोर्या दानधारा मदसन्तति-स्तस्याः सौरभ्यं सौगन्ध्यं तस्य लोभेन तृष्णया आगताः प्राप्ता ये भृङ्गसङ्घा भ्रमरसमूहास्तैः, जीवन्धरस्य सात्यन्धरेः श्रिया शोभयोपलक्षिते पदपद्मे चरणकमले तयोः सङ्गः संसर्गस्तस्मात्, पापैः कल्मषैः, मुच्यमान-स्त्यज्यमान इव, रराज शुशुभे । उत्प्रेक्षालङ्कारः ॥ ९ ॥

तदन्विति—तदनु तदनन्तरम्, सुरवारणं देवगजम्, आरूढोऽधिष्ठितः, पार्श्वद्वये तटयुगले विधूय-मानाभ्यां कम्प्यमानाभ्याम्, मुखे वदने कमलस्य पद्मस्य भ्रान्त्या सन्देहेन समागतं समायातं यद्धंसमिथुनं मरालदम्पती तस्य शङ्कावहाभ्यां सन्देहधारकाभ्याम्, अनुरक्ता प्राप्तानुरागा या यक्षाधिपराज्यलक्ष्मीः सुदर्शन-राज्यश्रीस्तया प्रहिताः प्रेरिता ये कटाक्षाः केकरास्तेषां छटाभ्यामिव श्रेणिभ्यामिव, ऊर्ध्वप्रसृतमुपरि विस्तृतं यद्दन्तावलदन्तयुगलं द्विरदरदनयुग्मं तस्मान्निर्गलन्त्या निःसरन्त्याः कान्तेर्दीप्तेः कल्लोलौ तरङ्गौ ताभ्यामिव, कमलशशाङ्कयोः पद्मचन्द्रयोः, विजयेन पराभवेन, मुखमभितो वक्त्रस्योभयपार्श्वयोः, सेवमानाभ्यां शुश्रूषां कुर्वाणाभ्याम्, कीर्तिशावकाभ्यामिव यशोबालकाभ्यामिव, भुजदण्डयोर्बाहुदण्डयोर्वास्तव्या निवासिनी या जयलक्ष्मीर्विजयश्रीस्तस्या मन्दहास्यरुचेः स्मितकान्तेः पूराभ्यामिव प्रवाहाभ्यामिव, क्षीराब्धेः क्षीरसागरस्य डिण्डीरोऽब्धिकफस्तस्य चयाभ्यामिव समूहाभ्यामिव, चामराभ्यां बालव्यजनाभ्याम्, विभ्राजितः शोभितः, यशसा कीर्त्या विजिततया पराभूतत्वेन, सेवार्थं शुश्रूषार्थम्, आगतेन प्राप्तेन, परितो लम्बमानं समन्ताल्ल-म्बमानं मुक्ताफलच्छलं मौक्तिकव्याजं तारामण्डलं नक्षत्रसमूहस्तेन मण्डितं शोभितं यच्चन्द्रबिम्बं विधुमण्डलं तेनेव, कीर्तिरेव वाः एव क्षीरवाराशिः पयःसागरस्तस्य फेनपुञ्जेनेव डिण्डीरसमूहेनेव, मुखे वदने चन्द्रभ्रमेण

धवलातपत्रेण विराजितः, सकलदिविजकुड्मलीकृताञ्जलिकञ्जपुञ्जमध्यराजहंसायमानः, शिखावलकुलनृत्यकलाविलाससम्पादकैर्गभीरतरतूर्यनिनादैर्वाचालितदशदिक्तटः, निरन्तरदन्दह्यमानकालागुरुधूमरेखया धवलातपत्रे शशिशङ्कासमागतविधुन्तुदसम्भाव्यमानया सुरभितसविधप्रदेशः, निरन्तरनिःसरत्पदनखकान्तिभिर्निजाक्रमणभिन्नकुम्भस्थलविगलन्मौक्तिकनिचयशङ्कामङ्कुरयन्, एकदोदितकोटिसूर्यैरिव विमानारूढैर्यक्षैः परितःस्तूयमानवैभवः, नटन्तीः सौदामिनीलता इव त्रिदशवनिता निःसरदपाङ्गसुधातरङ्गिणीमध्ये भुजोल्लासितलास्यलीलावशेन प्लवन्तीरिव समाकलयन्, शनैः शनैर्वृन्दारकवन्दिसन्दोहपापठ्यमानविरुदावलिमुखरीकृतकन्दरतया प्रतिध्वानवशेन स्वयमपि स्तुतिमाचरन्तमिव चन्द्रोदयनामानं भूमिधरमेत्य, तत्र विचित्ररत्नमयमण्डपमध्ये सरभससन्नाहैरमृतान्धःसमूहैः समानीतं मूर्तमिव सकलानुरागं पद्मरागमयं सिंहविष्टरमलञ्चकार ।

प्रणेदुः पटहास्तत्र प्रतिध्वानितकन्दराः ।
गायन्त्यो मञ्जु किन्नर्यो ननृतुश्च समन्ततः ॥ १० ॥

ततः कलशवारिधिं प्रति चचाल यक्षाधिपः
सुरैः करसरोरुहाञ्चितसुवर्णकुम्भैः सह ।

शशिसन्देहेन समागतः समायातो यः परिवेषः परिधिस्तेनेव, सुरकराम्बुरुहेण देवपाणिपद्मेन विधृतं सन्धारितं कनकदण्डरुचिरं सुवर्णदण्डसुभगं च यद् धवलातपत्रं श्वेतच्छत्रं तेन, विराजितः शोभितः, सकलदिविजानां समस्तदेवानां कुड्मलीकृतो योऽञ्जलिकञ्जपुञ्जो हस्तबन्धकमलसमूहस्तस्य मध्ये राजहंस इवाचरतीति राजहंसायमानो मरालायमानः, शिखावलकुलस्य मयूरसमूहस्य यो नृत्यकलाविलासस्ताण्डवकलाविभ्रमस्तस्य सम्पादका विधायकास्तैः, गभीरतराश्च ते तूर्यनिनादाश्चेति तैस्तारतरवादित्रशब्दैः, वाचालिता मुखरिता दशदिक्तटा दशाशान्तराणि येन सः, धवलातपत्रे शुक्लच्छत्रे, शशिशङ्कया चन्द्रभ्रान्त्या समागतः सम्प्राप्तो यो विधुंतुदो राहुस्तेन सम्भाव्यमाना समुत्प्रेक्ष्यमाणा तया, निरन्तरमनवरतं दन्दह्यमानः पुनःपुनरतिशयेन वा दह्यमानो यः कालागुरुः कृष्णागुरुस्तस्य धूमरेखा धूम्रश्रेणिस्तया, सुरभितः सुगन्धितः सविधप्रदेशो निकटप्रदेशो यस्य सः, निरन्तरं सततं निःसरन्त्यो निर्गलन्त्यो याः पदनखकान्तयश्चरणनखरदीप्तयस्ताभिः, निजाक्रमणेन स्वाधिष्ठानेन भिन्नं विदारितं यत्कुम्भस्थलं गण्डस्थलं तस्माद्विगलन्पतन् यो मौक्तिकनिचयो मुक्ताफलसमूहस्तस्य शङ्कां सन्देहम्, अङ्कुरयन्नुत्पादयन्, एकदा युगपद् उदिता उद्गता ये कोटिसूर्याः कोटिसंख्याप्रमितदिवाकरास्तैरिव, विमानारूढैर्व्योमयानाधिष्ठितैः, यक्षैर्व्यन्तरामरविशेषैः, परितः समन्तात्, स्तूयमानं श्लाघ्यमानं वैभवमैश्वर्यं यस्य सः, नटन्तीर्नृत्यं कुर्वन्तीः सौदामिनीलता इव विद्युल्लतारिव, त्रिदशवनिता देवाङ्गनाः, निःसरन्ती निर्गलन्ती येऽपाङ्गाः कटाक्षास्त एव सुधातरङ्गिणी पीयूषसरित् तस्या मध्ये, भुजाभ्यां बाहुभ्यामुल्लासिता प्रकटिता या लास्यलीला नृत्यकेलिस्तस्या वशेन, प्लवन्तीरिव तरन्तीरिव, समाकलयन्पश्यन्, शनैः शनैः मन्दं मन्दं क्रमश इति यावत्, वृन्दारका देवा एव वन्दिसन्दोहाः स्तुतिपाठकसमूहास्तैः पापठ्यमाना पुनःपुनरतिशयेन वा पठ्यमाना या विरुदावलिः कीर्तिगाथा तया मुखरीकृतकन्दरतया वाचालितगह्वरतया, प्रतिध्वानवशेन प्रतिध्वनिवशेन, स्वयमपि स्वतोऽपि, स्तुतिं स्तवनम्, आचरन्तमिव कुर्वन्तमिव, चन्द्रोदयनामानं चन्द्रोदयाभिधानम्, भूमिधरं पर्वतम्, एत्य प्राप्य, तत्र चन्द्रोदयपर्वते, विचित्रो विलक्षणो यो रत्नमयमण्डपो मणिमयास्थानं तस्य मध्ये, सरभसः सवेगः सन्नाह उद्योगो येषां तैः, अमृतं पीयूषमन्धो भोजनं येषां तेऽमृतान्धसस्तेषां समूहास्तैः, समानीतं प्रापितम्, मूर्तं सदेहम्, सकलानुरागमिव सर्वप्रीतिपुञ्जमिव, पद्मरागमयं लोहितकमणिनिर्मितम्, सिंहविष्टरं सिंहासनम्, अलञ्चकार भूषयामास ।

प्रणेदुरिति—तत्र मण्डपे, प्रतिध्वानिताः प्रतिनादिताः कन्दरा गुहा यैस्ते, पटहा आनकाः प्रणेदुः प्रणदन्ति स्म, मञ्जु मनोहरं यथा स्यात्तथा, गायन्त्यो गानं कुर्वन्त्यः, किन्नर्यः किन्नरस्त्रियः, समन्ताद् विष्वग्, ननृतुश्च नृत्यन्ति स्म च ॥१०॥

ततः कलशवारिधिमिति—ततस्तदनन्तरम्, यक्षाधिपः सुदर्शनः, करसरोरुहेषु पाणिपद्मेष्वञ्चिताः

सतां पथि समावहन्वितलसान्ध्यमेघभ्रमं
किरीटमणिकान्तिभिः सुरपचापसम्भावनाम् ॥ ११ ॥
एते देवाः पूर्वमागत्य लक्ष्मीं धेनुं चिन्तारत्नमन्यांश्च हृत्वा ।
आशापाशादागतास्ते पुनश्चेत्येवं दुग्धाम्भोधिरार्तं ररास ॥ १२ ॥

ततश्च, कुरुवीरं धैर्यगुणेन स्पर्धमानश्चन्द्रोदयगिरिस्तदीयपादस्पर्शेन कृतार्थतामाससाद, अहमपि गाम्भीर्ययशोभ्यां स्पर्धमानस्तदीयसर्वाङ्गस्पर्शेन कृतकृत्यतामनुभवामि, इति चलाचलवीचिबाहुभिर्नृत्यत इव फेनकूटेन, घोषकपटेन चाट्टहासमातन्वानस्येव, दुग्धसागरस्य पयोभिः पूरितान्कनककलशान्बिभ्राणास्ते यक्षाध्यक्षमुखाः, सत्वरमागत्याभिषेकमङ्गलं कर्तुमारभन्त ।

यक्षेशमुख्यकरलम्बितहेमकुम्भ-
पङ्क्तेः पपात कुरुकुञ्जरमूर्ध्नि तोयम् ।
सन्ध्याभ्रसङ्घविगलद्विमलाम्बुवर्षं
प्रालेयशैलशिखराग्र इवातिसान्द्रम् ॥ १३ ॥

समापिते साध्वभिषेकमङ्गले निलिम्पकान्तानयनान्तवारिभिः ।
परीतमूर्तिः पुनराबभावसौ पयोऽधिपूरैरिव सिच्यमानः ॥ १४ ॥

शोभिताः सुवर्णकुम्भाः काञ्चनकलशा येषां तैः, सुरैर्देवैः, सह सार्धम्, सतां नक्षत्राणाम्, पथि मार्गे गगन इति यावत्, वितलानां व्याप्तानां सान्ध्यमेघानां पितृप्रसूवारिदानां भ्रमं सन्देहम्, किरीटमणिकान्तिभिर्मौलिरत्नदीप्तिभिः, सुरचापस्य शक्रशरासनस्य सम्भावना समुत्प्रेक्षा ताम् च, समावहन् उत्पादयन्, कलशवारिधिं क्षीरसागरम्, प्रति, चचाल चलति स्म । पृथ्वीच्छन्दः ॥११॥

एते देवा इति—एते दृश्यमाना इमे, देवाः सुराः, पूर्वं पुरा, आगत्य समेत्य, लक्ष्मीं श्रियम्, धेनुं सुरगवीम्, चिन्तारत्नं चिन्तामणिम्, अन्यांश्च कल्पवृक्षादीन्, हृत्वा समादाय, गता इति शेषः । ते देवाः, आशापाशात् तृष्णाबन्धात्, पुनर्भूयः, आगताः प्राप्ताः, इत्येवम् इति प्रकारेण, दुग्धाम्भोधिः क्षीरसागरः आर्तं पीडितं यथा स्यात्तथा, ररास शब्दञ्चकार । उत्प्रेक्षा । शालिनीच्छन्दः 'शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः' इति लक्षणात् ॥१२॥

ततश्चेति—ततश्च तदनन्तरञ्च, धैर्यमेव गुणस्तेन स्थैर्यगुणेन, कुरुवीरं जीवन्धरम्, स्पर्धमानः स्पर्धां कुर्वाणः, चन्द्रोदयगिरिश्चन्द्रोदयाभिधानपर्वतः, तदीयपादस्य कुरुवीरचरणस्य स्पर्शः स्पर्शनं तेन कृतार्थतां कृतकृत्यताम्, आससाद प्राप, अहमपि दुग्धसागरोऽपि, गाम्भीर्यञ्च यशश्चेति गाम्भीर्ययशसी ताभ्याम् अगाधत्वकीर्तिभ्याम्, स्पर्धमानोऽसूयन्, तदीयस्य कुरुवीरीयस्य सर्वाङ्गस्य सर्वशरीरस्य स्पर्शः सम्बन्धस्तेन कृतकृत्यताम्, कृतार्थताम्, अनुभवामि, इति हेतोः, चलाचला अतिशयेन चला वीचय एव तरङ्गा एव बाहवस्तैः, फेनकूटेन डिण्डीरपिण्डेन, नृत्यत इव नृत्यं कुर्वत इव, घोषकपटेन गर्जितव्याजेन, अट्टहास सशब्दोच्चहासम्, आतन्वानस्येव विस्तारयत इव, दुग्धसागरस्य क्षीरपाथोधेः, पयोभिर्जलैः, पूरितान् भृतान्, कलशान् कुम्भान्, बिभ्राणा दधानाः, यक्षाध्यक्षमुखाः सुदर्शनप्रधानाः, देवाः, सत्वरं शीघ्रम्, आगत्य समेत्य, अभिषेकमङ्गलं मङ्गलस्नानम्, कर्तुं विधातुम्, आरभन्त उपचक्रमिरे ।

यक्षेशेति—प्रालेयशैलस्य हिमाचलस्य शिखराग्रं शृङ्गाग्रं तस्मिन्, अतिसान्द्रम् अतिनिबिडम्, सन्ध्याभ्रसङ्घात्सन्ध्याकालिकवारिदव्यूहात् विगलत्पतत् विमलमम्बुवर्षं निर्मलनीरवृष्टिरिव, कुरुकुञ्जरमूर्ध्नि जीवन्धरोत्तमाङ्गे, यक्षेशः सुदर्शनो मुख्यः प्रधानो येषां ते यक्षेशमुख्यास्तेषां पङ्क्तिस्तस्याः, तोयं जलम्, पपात पतति स्म । वसन्ततिलकाछन्दः ॥१३॥

समापित इति—अभिषेकमङ्गले स्नपनकल्याणके, साधु सम्यग् यथा स्यात्तथा, समापिते निष्ठापिते सति, निलिम्पकान्तानां निर्जरनारीणां नयनान्ता एव कटाक्षा एव वारीणि जलानि तैः, परीता व्याप्ता मूर्तिः शरीरं यस्य तथाभूतः, असौ जीवन्धरः, पुनर्भूयः, पयोऽधिपूरैः पयसां दुग्धानामधिपूरैर्भूरि प्रवाहैः अथवा

ततो दिव्याम्बरधरो मणिभूषणमण्डितः ।
रेजे जीवन्धरस्वामी सचापशरदभ्रवत् ॥ १५ ॥
यक्षाधिपार्पितं कल्पवृक्षाञ्चितफलादिकम् ।
जग्राह जीवकस्वामी निग्रहचतुरो द्विषाम् ॥ १६ ॥

ततः क्रमेण यक्षाध्यक्षेणोपदिष्टं कामरूपविधानगानविषहानशक्तियुक्तं चिरन्तं मन्त्ररत्नं बहुमन्यमानः, 'एकहायनमात्रेण राज्यलक्ष्मीकटाक्षान्प्रवेक्ष्यसि' इति तद्वचनेन सन्तुष्टः, सन्ततं प्रश्रयवशंवदैर्यक्षैः सम्भाव्यमानः कुरुवीरः, कदाचिद्देशान्तरदिदृक्षामिङ्गितैर्यक्षाध्यक्षं ज्ञापयामास ।

मनीषितं तस्य कुरूत्तमस्य ज्ञात्वा मनीषी स हि यक्षराजः ।
मार्गस्य भङ्गीं स्फुटतोऽभिधाय सम्प्रापयामास तदद्रिसीमाम् ॥ १७ ॥

तदनु कुरुवंशकेसरी केसरीव तत्र तत्र निर्भय एव विहरन्, क्वचिदतिविततानोकहकुलविलसितमसूर्यपश्यं तरक्षुमृगाधिष्ठानम्, क्वचन तरुषण्डे कादम्बिनीभ्रान्त्या दूरोन्नमितकेकागर्भकण्ठं प्रबलपुरोवातसन्ताडितशिखण्डं नीलकण्ठम्, कुत्रचिन्महागुल्मान्तरकुडुम्बिशबरकदम्बकम्, कुत्र च

पयोऽब्धिपूरैः क्षीरसागरप्रवाहैः सिच्यमान इव समुक्ष्यमाण इव, आबभौ शुशुभे । उत्प्रेक्षालङ्कारः । उपेन्द्रवज्रावृत्तम् ॥१४॥

तत इति—ततस्तदनन्तरम्, दिव्याम्बरधरः स्वर्गीयवस्त्रधारकः, मणिभूषणै रत्नालङ्कारैर्मण्डितः शोभितः, जीवन्धरस्वामी सात्यन्धरिः, सचापशरदभ्रवत् सशक्रशरासनशरम्मेघ इव, रेजे शुशुभे । उपमालङ्कारः ॥१५॥

यक्षाधिपार्पितमिति—द्विषां शत्रूणाम्, निग्रहे दमने चतुरो दक्ष इति निग्रहचतुरः जीवकस्वामी जीवन्धरः, यक्षाधिपेन सुदर्शनेनार्पितं प्रदत्तमिति यक्षाधिपार्पितम्, कल्पवृक्षेषु सुरतरुष्वञ्चितं शोभितं यत्फलादिकं फलप्रभृतिकं तत्, जग्राह गृह्णाति स्म ॥१६॥

ततः क्रमेणेति—ततस्तदनन्तरम्, क्रमेण क्रमशः, यक्षाध्यक्षेण सुदर्शनेन, उपदिष्टं निर्दिष्टम्, कामरूपविधानं च, गानं च, विषहानञ्चेति कामरूपविधानगानविषहानानि तेषां शक्तिः सामर्थ्यं तया युक्तं सहितम्, चिरन्तं प्राचीनम्, मन्त्ररत्नं मन्त्रश्रेष्ठम्, बहु मन्यमानः समादरेण स्वीकुर्वाणः, 'एकहायनमात्रेण एकवर्षमात्रेण, राजलक्ष्म्या नृपतिश्रियाः कटाक्षा अपाङ्गास्तान् प्रवेक्ष्यसि प्राप्स्यसि', इत्येवम्, तद्वचनेन, तत्कथनेन, सन्तुष्टः सम्प्रीतः, सन्ततं निरन्तरम्, प्रश्रयवंशवदैर्विनयानुकूलैः, यक्षैर्व्यन्तरामरैः, सम्भाव्यमानः सत्क्रियमाणः, कुरुवीरो जीवन्धरः, कदाचिज्जातुचित्, इङ्गितैश्चेष्टितैः, यक्षाध्यक्षं सुदर्शनम्, देशान्तराणां जनपदान्तराणां दिदृक्षां द्रष्टुमिच्छाम्, ज्ञापयामास कथयामास ।

मनीषितमिति—हि निश्चयेन, मनीषी बुद्धिमान्, स पूर्वोक्तः, यक्षराजः सुदर्शनः, तस्य पूर्वोक्तस्य, कुरूत्तमस्य जीवन्धरस्य, मनीषितमभिलषितम्, ज्ञात्वा बुद्ध्वा, मार्गस्य वर्त्मनः, भङ्गीं परम्पराम्, स्फुटतः स्पष्टप्रकारेण, अभिधाय निगद्य, तदद्रिसीमाम् तत्पर्वतावधिम्, सम्प्रापयामास लम्भयामास, तमिति शेषः ॥१७॥

तदन्विति—तदनु तदनन्तरम्, कुरुवंशकेसरी कुरुकुलसिंहः, जीवन्धर इति यावत्, केसरीव सिंह इव, तत्र तत्र तेषु तेषु प्रदेशेषु, निर्भय एव भीतिरहित एव, विहरन् विहारं कुर्वन्, क्वचित्कुत्रचित्, अतिविततमतिविस्तृतं यदनोकहकुलं वृक्षसमूहस्तेन विलसितं शोभितम्, न सूर्यं पश्यतीत्यसूर्यपश्यं सघनत्वात्सूर्यदर्शनरहितम्, तरक्षवश्च मृगादनाश्च मृगाश्च हरिणाश्चेति तरक्षुमृगास्तेषामधिष्ठानं निवासस्थानम्, क्वचन कुत्रापि, तरुषण्डे वृक्षसमूहे, कादम्बिन्या मेघमालाया भ्रान्तिस्सन्देहस्तया, दूरेणोन्नमितो दूरोन्नमितः केका मयूरवाणी गर्भे मध्ये यस्य स केकागर्भः, केकागर्भश्चासौ कण्ठश्चेति केकागर्भकण्ठः, दूरोन्नमितः केकागर्भकण्ठो यस्य तम्, प्रबलेन दृढेन पुरोवातेन सम्मुखागतवायुना सन्ताडितः समाहतः शिखण्डो बर्हं यस्य तम्, नीलकण्ठं मयूरम्, कुत्रचित्क्वचित्, महागुल्मान्तरेषु दीर्घस्तम्बमध्येषु कुडुम्बयते वसतीति महागुल्मा-

नीपपादपस्कन्धनिषण्णशुण्डादण्डं करिणीसहायं शुण्डालमण्डलम्, कुत्रचित्स्तनन्धयशिशुसंरुद्धां हरिणीं भुग्नग्रीवमवलोकयन्तं धावमानहरिणम्, कुत्रचन दशनान्तरस्थिततृणकवलच्छेदशब्दं नियम्य व्याजिह्माङ्गैः कुरङ्गैः श्रूयमाणगानकलाप्रवीणं किरातस्त्रैणम्, क्वचन गर्जनतर्जितस्तम्बेरमनिचयं मृगेन्द्रचयम्, कुत्रचिद् भूधराकारमजगरनिकरं पश्यन्, क्रमेणातिलङ्घितविपिनपथः, क्वचिदरण्ये समुद्गतधूमपरीताभ्रङ्कषभूमिरुहतया सजलजलधरश्यामलं तरुनिकरमिव कुर्वन्तं प्लोषचटचटात्कारेणाट्टहासमिवातन्वानमतिवेगसमाक्रान्तकाननं दवदहनं ददर्श ।

> असूर्यम्पश्येषु प्रचुरतरुषण्डान्तरतल-
>
> प्रदेशेष्वत्यन्तं यदुषितमभूदन्धतमसा ।
>
> तदग्नित्रासेनोद्यतमिव तदा धूमपटलं
>
> तमालस्तोमाभं गगनतलमालिङ्ग्य ववृधे ॥ १८ ॥

> दवानलोद्गता धूम्या महती गगनश्रिया ।
>
> धृतनीलपटीवासौ बभौ व्याप्तदिगन्तरा ॥ १९ ॥

तदानीं दवहुताशनपरीतं विपिनम्, अनलवृद्धिलिङ्गैः विस्फुलिङ्गैरुडुनिकरमिव, देदीप्यमान-

---

न्तरकुटुम्बि, तच्च तत्कबरकदम्बकञ्च भिल्लसमूहश्चेति तत् । कुत्र च क्वापि, नीपपादपानां कदम्बवृक्षाणां स्कन्धेषु प्रकाण्डेषु निषण्णः स्थापितः शुण्डादण्डः करदण्डो यस्य तत् । करिणीनां हस्तिनीनां सहायस्तत्, हस्तिनीसहितमिति यावत्, शुण्डालमण्डलं हस्तिसमूहम्, कुत्रचित् क्वचित्, स्तनंधयैः स्तन्यपायिभिः शिशुभिः शावकैः संरुद्धा बाधितगमना ताम्, हरिणीं मृगीम्, भुग्ना वक्रीकृता ग्रीवा कण्ठो यस्मिन्कर्मणि तद्यथा स्यात्तथा, अवलोकयन्तं पश्यन्तम्, धावमानश्चासौ हरिणश्चेति तं पलायमानमृगम्, कुत्रचन क्वापि, दशनान्तरे दन्तमध्ये स्थितस्य विद्यमानस्य तृणकवलस्य शष्पग्रासस्य च्छेदशब्दः खण्डनध्वनिस्तम्, नियम्य निरुध्य, व्याजिह्माङ्गैरायतशरीरैः, कुरङ्गैर्हरिणैः, श्रूयमाणाकर्ण्यमाना या गानकला गायनचातुरी तस्यां प्रवीणं निपुणम्, किरातस्त्रैणं शबरस्त्रीसमूहम्, क्वचन क्वापि, गर्जनेन स्वशब्देन तर्जितो भर्त्सितः स्तम्बेरमनिचयो हस्तिसमूहो येन तम्, मृगेन्द्रचयं सिंहसमूहम्, कुत्रचित्क्वचित्, भूधराकारं पर्वताकृतिम्, अजगरनिकरं शयुसमूहम् 'अजगरे शयुर्वाहस इत्युभौ' इत्यमरः, पश्यन् विलोकयन्, क्रमेण क्रमशः, अतिलङ्घितविपिनपथो व्यतिक्रान्तारण्यमार्गः सन्, क्वचित्कुत्रचित्, अरण्ये वने, समुद्गतेन समुत्पतितेन धूमेन धूम्रेण परीता व्याप्ता अभ्रङ्कषभूमिरुहा उत्तुङ्गपादपा येन तस्य भावस्तत्ता तया, तरुनिकरं वृक्षसमूहम्, सजलजलधरैर्जलभृतपयोधरैः श्यामलमिव मलिनमिव, कुर्वन्तं विदधानम्, प्लोषेण दाहेन चटचटात्कारश्चटचटशब्दविशेषस्तेन, अट्टहासं महाट्टहास्यम्, आतन्वानमिव विस्तारयन्तमिव, अतिवेगेन प्रबलरयेण समाक्रान्तं काननं वनं येन तम्, दवदहनं वनानलम्, ददर्श विलोकयामास ।

असूर्यम्पश्येष्विति—यत्, अन्धतमसं गाढतिमिरम्, 'अवसमन्धेभ्यस्तमसः' इत्यच्, सूर्यं न पश्यन्तीत्यसूर्यम्पश्यास्तेषु सूर्यप्रकाशरहितेषु, प्रचुरतरुषण्डस्य प्रभूतवृक्षसमूहस्यान्तरतलप्रदेशा मध्यतलस्थानानि तेषु, अत्यन्तं प्रचुरं यथा स्यात्तथा, उषितं कृतनिवासम्, अभूद् बभूव, तदा तस्मिन्काले, अग्नित्रासेन वह्निभयेन, उद्यतं समुत्पतितम्, तदिव अन्धतमसमिव, तमालस्तोमाभं कालस्कन्धसमूहसदृशम्, धूमपटलं धूम्रसमूहः, गगनतलं नभःस्थलम्, आलिङ्ग्य समाश्लिष्य, ववृधे वृद्धिंगतो बभूव । उत्प्रेक्षा । शिखरिणीवृत्तम् ।

दवानलोद्गतेति—व्याप्तमाच्छादितं दिगन्तरं काष्ठान्तरालं यया सा, दवानलाद्वनाग्नेरुद्गता समुत्पतिता, महती विशाला, असौ धूमानां समूहो धूम्या धूम्रश्रेणिः, गगनश्रिया नभोलक्ष्म्या, धृतनीलपटीव धृतश्यामलशाटिकेव, बभौ शुशुभे । रूपकोत्प्रेक्षे ॥ १९ ॥

तदानीमिति—तदानीं तस्मिन् काले, दवहुताशनेन वनवह्निना परीतं व्याप्तम्, विपिनं गहनम्, अनलवृद्धेरग्निवृद्धेर्लिङ्गानि चिह्नानि तैः, विस्फुलिङ्गैरग्निकणैः, उदितः समुद्गत उडुनिकरो नक्षत्रसमूहो

कीलाकलापैः सन्ध्यारागरञ्जितमिव, धूमस्तोमेन ध्वान्तदन्तुरितमिव, ज्वलज्ज्वलनेन सन्ध्यारक्तचन्द्रबिम्बचुम्बितं नभस्तलमिव, व्यराजत।

तदा हरिणमण्डलं हुतवहाक्रमत्रासतो
विलोलनयनाञ्चलैर्विजितबालनीलोत्पलैः।
दवानलविनाशनप्रथितवेगकूलङ्कषां
कलिन्दगिरिनन्दिनीं कलयति स्म कल्लोलिनीम्॥ २०॥

तदनु धूमस्तोमचुङ्कारेण ज्वालाकलापफटफटात्कारेण शबरजनहाहाकारेण तन्मध्यनिरुद्धसत्त्वयूथार्तविरावेण च बधिरीकृतदिशावशावल्लभे हुताशसन्त्रासधावमानवनदेवताशिथिलकबरीनिकरपरिशीलितसाम्यया धूम्ययान्धीकृतसकललोके वैश्वानरे विजृम्भिते, भाविमेघपटलशम्पागर्जितानि धूमस्तोमज्वालादहनचटचटात्कारैः परिहसदिव काननमराजत।

अनेकपकुलं तत्र दह्यमानं दवाग्निना।
त्रातुमैच्छद्दयापूरजलधिः कुरुकुञ्जरः॥ २१॥

तस्याकूतमवेत्य यक्षपतिना वेगेन सङ्कल्पिता
जीमूता वियदङ्गणे परिणता धूमप्रकारा इव।

यस्मिंस्तद्वत् देदीप्यमाना आज्वल्यमानाश्च ते कीलाकलापाश्च ज्वालासमूहाश्चेति तैः, सन्ध्यारागेण पितृप्रसूकालिकारुणिम्ना रञ्जितमिव लोहितीकृतमिव, धूमस्तोमेन नमःसमूहेन, ध्वान्तदन्तुरितमिव तिमिरव्याप्तमिव, ज्वलज्ज्वलनेन ज्वलद्वह्निना,, सन्ध्यारक्तं सन्ध्यालोहितं यच्चन्द्रबिम्बमिन्दुमण्डलं तेन चुम्बितं सहितम्, नभस्तलमिव गगनतलमिव, व्यराजत व्यशोभत।

तदा हरिणमण्डलमिति—तदा तस्मिन् काले, हरिणमण्डलं कुरङ्गसमूहः, हुतवहस्य दावानलस्याक्रम आक्रमणं तस्मात् त्रासो भयं तस्मात्, विजितानि शोभया पराजितानि बालनीलोत्पलानि नवनीलनलिनानि यैस्तैः, दवानलेन वनवह्निना यद्विनाशनं नाशस्तेन प्रथितो वृद्धिङ्गतो यो वेगो रयस्तेन कूलङ्कषा तटघर्षिणी ताम्, कलिन्दगिरिनन्दिनीं यमुनाम्, कल्लोलिनीं सरितम्, कलयति स्म समुत्पादयामास। दवानलदाहाद्भीता हरिणसमूहः स्वस्य नीलनीलैर्नयनाञ्चलैः काननं श्यामलञ्चकारेति भावः, पृथ्वीवृत्तम्॥ २०॥

तदन्विति—तदनु तदनन्तरम्, धूमस्तोमस्य धूम्रसमूहस्य चुङ्कारेणाव्यक्तशब्दविशेषेण, ज्वालाकलापस्यार्चिःसमूहस्य फटफटात्कारेणाव्यक्तशब्दविशेषेण, शबरजनस्य भिल्लजनस्य हाहाकारेण दुःखसूचकशब्दविशेषेण, तन्मध्ये दावानलमध्ये निरुद्धं संरुद्धगमनं यत्सत्त्वयूथं प्राणिसमूहस्तस्यार्तविरावेण दुःखशब्देन च, बधिरीकृताः श्रवणशक्तिशून्यीकृता दिशावशावल्लभाः काष्ठाकरिणो येन तस्मिन्, हुताशसंत्रासेन पावकभयेन धावमानाः पलायमाना या वनदेवताः काननाधिष्ठातृदेव्यस्तासां शिथिलः स्रंसमानो यः कबरीनिकरः केशपाशसमूहस्तेन परिशीलितमनुभूतं साम्यं सादृश्यं यया तया, धूमानां समूहो धूम्या तया धूमसमूहेन, अन्धीकृता विलोकनसामर्थ्यशून्यीकृताः सकललोका निखिलजना येन तस्मिन्, वैश्वानरे वह्नौ, विजृम्भिते वृद्धिङ्गते सति, धूमस्तोमश्च धूम्रसमूहस्य, ज्वालाश्चार्चींषि च दहनचटचटात्काराश्च पावकाव्यक्तशब्दविशेषाश्चेति धूमस्तोमज्वालादहनचटचटात्कारास्तैः, भाविमेघपटलञ्च शम्पा च गर्जितञ्चेति भाविमेघपटलशम्पागर्जितानि भविष्यद्वारिदसमूहसौदामिनीस्तनितानि, परिहसदिव विडम्बयदिव, काननं वनम्, अराजत शुशुभे।

अनेकपकुलमिति—दयापूरस्य कारुण्यप्रवाहस्य जलधिः सागरः कुरुकुञ्जरो जीवन्धरः, तत्र कानने, दवाग्निना वनानलेन, दह्यमानं प्लुष्यमाणम्, अनेकपकुलं हस्तिसमूहम्, त्रातुं रक्षितुम्, ऐच्छत् वाञ्छति स्म॥२१॥

तस्याकूतमिति—तस्य जीवन्धरस्य आकूतमभिप्रायम्, अवेत्य ज्ञात्वा, यक्षपतिना सुदर्शनेन, वेगेन रयेण शीघ्रमिति यावत्। सङ्कल्पिता रचिताः वियदङ्गणे नभश्चत्वरे, परिणताः परिणामं प्राप्ताः, धूमप्रकारा

उद्यद्गर्जितपाटिताखिलमहादिग्भित्तयस्तत्क्षणं
वर्षं हर्षितजीवका विदधिरे कल्पान्तमेघायिताः ॥ २२ ॥

यक्षेन्द्रकल्पितघनाघनमण्डलं त-
च्चक्रेऽभिषेचनमरण्यगजव्रजस्य ।
वारांनिधेर्विमलशीतपयःप्रवाहै-
र्यक्षाधिराज इव कौरवकुञ्जरस्य ॥२३॥

तथा हि—

सौदामिनीसुभगनर्तकरीवितान-
मभ्रं शिखावलकुलं पटुवन्दिवर्गः ।
मेघारवः सकलवाद्यरवस्तरूणां
गुच्छाः समीरचलिताः किल चामराणि ॥२४॥

तदनु परिरक्षितानि शुण्डालमण्डलानि तरुषण्डानि च विटपसंसक्तबिन्दूत्करनिपतनव्याजेनानन्दबाष्पमुकुलान्युत्सृजन्ति विलोकमानः, सन्तोषेण तस्माद्वनान्निर्गत्य, तत्र तत्र मानुषरूपिण्या धर्मरक्षिण्या यक्षिण्या परिचर्यमाणः, तीर्थस्थानानि पूजयन्, क्रमेण कुरुमल्लः पल्लवदेशमानशे ।

सञ्चरंस्तत्र सन्तोषात्पञ्चबाणः कुरूत्तमः ।
धावमानानभिमुखं ददर्श पथि कांश्चन ॥२५॥

इव धूम्रशाला इव स्थिताः, उद्यद्गर्जितेन समुत्पद्यस्तनितेन पाटिताः खण्डिता अखिलाः समस्ता महादिग्भित्तयो महाकाष्ठाकुड्या यैस्ते, हर्षिताः प्रसादिता जीवा दावानलपतिताः प्राणिनो यैस्त इति हर्षितजीवकाः, हर्षितो जीवको जीवन्धरो यैस्त इति वा, कल्पान्तमेघा इव प्रलयवारिदा इवाचरिता इति कल्पान्तमेघायिताः, जीमूता मेघाः, तत्क्षणं तत्कालम्, वर्षं वृष्टिम्, विदधिरे चक्रिरे । शार्दूलविक्रीडितं वृत्तम् ॥२२॥

यक्षेन्द्रेति—तत् पूर्वोक्तम्, यक्षेन्द्रेण सुदर्शनेन कल्पितं निर्मापितं यद् घनाघनमण्डलं मेघसमूहस्तत्, वारांनिधेः सागरस्य, विमलशीतपयःप्रवाहैर्निर्मलशिशिरसलिलपूरैः, कौरवकुञ्जरस्य जीवन्धरस्य, यक्षाधिराज इव सुदर्शन इव, अरण्यगजव्रजस्य काननकरिकलापस्य, अभिषेचनं परितः स्नपनम्, चक्रे विदधे । उपमा । वसन्ततिलकावृत्तम् ॥२३॥

तथाहि—तदेव स्पष्टीकुरुते ।

सौदामिनीति—सौदामिनी तडित्, सुभगनर्तकी मनोज्ञलासिका, अभ्रं गगनं मेघो वा, वितानमुल्लोचः, शिखावलकुलं मयूरसमूहः पटुवन्दिवर्गो विदग्धमागधगणः, मेघारवो घनाघननादः, सकलवाद्यरवो निखिलवादित्रसमूहः, तरूणां वृक्षाणाम्, समीरचलिताः पवनप्रकम्पिताः गुच्छाः स्तबकाः, चामराणि बालव्यजनानि, बभूवुरिति शेषः, किलेति वार्तायाम् ॥२४॥

तदन्विति—तदनु वर्षानन्तरम्, परिरक्षितानि परित्रातानि, शुण्डालमण्डलानि हस्तिसमूहान्, विटपसंसक्ताः शाखालग्ना ये बिन्दूत्कराः पृषतसमूहास्तेषां व्याजेन दम्भेन, आनन्दबाष्पमुकुलानि हर्षाश्रुकुड्मलानि, उत्सृजन्ति त्यजन्ति, तरुषण्डानि च वृक्षसमूहांश्च, विलोकमानः पश्यन्, सन्तोषेण हर्षेण, तस्मात् दवानलाधिष्ठितपूर्वात्, वनात् काननात्, निर्गत्य बहिरागत्य, तत्र तत्र तेषु तेषु स्थानेषु, मानुषरूपिण्या मनुष्याकारधारिण्या, धर्मरक्षिण्या जिनशासनरक्षिकया, यक्षिण्या व्यन्तरदेव्या, परिचर्यमाणः समुपास्यमानः, तीर्थस्थानानि पुण्यक्षेत्राणि, पूजयन् वन्दमानः, कुरुमल्लो जीवन्धरः, क्रमेण क्रमशः, पल्लवदेशं पल्लवाभिधानजनपदम्, आनशे प्राप ।

सञ्चरन्निति—तत्र पल्लवजनपदे, सन्तोषात्प्रमोदात्, सञ्चरन् विहरन्, पञ्चबाणः कामदेवः, कुरूत्तमो जीवन्धरः, पथि मार्गे, अभिमुखं सम्मुखम्, धावमानान् वेगेन गच्छतः, कांश्चन कानपि जनान्, ददर्श विलोकयामास ॥२५॥

तेऽपि तं कुरुवरं प्रभोज्ज्वलं वीक्ष्य विस्मयनिमग्नमानसाः ।
प्राप्य तस्य सविधं प्रमोदतः प्रश्रयेण मधुरां गिरमाहुः ॥२६॥

कुवलयाह्लादसन्दायकोऽपि निखिलमहीभृन्महितपादोऽपि भवानदोषाकरतया न सुधाकरः, पद्मोल्लासनपटुरपि सन्मार्गाश्रितोऽपि सद्विरोधाभावेन न प्रभाकरः, सुमनोवृन्दवन्दितोऽपि क्ष्माभृदनुकूलतया न पुरन्दरः, कुशाग्रनिकाशमतिरपि मौढ्यविरहेण न सुरगुरुः ।

इत्यादिस्तुतिविस्तारान्परिपप्रच्छ ताञ्जनान् ।
कत्याः के यूयमित्येवं कुरुवीरः कुतूहलात् ॥२७॥

इति जीवन्धरेण पृष्टास्तेऽप्येवमवोचन्त—

अत्रास्ति चन्द्राभपुरी प्रसिद्धा यथार्थनाम्नी घनवज्रसौधैः ।
अभ्रंलिहैरम्बुजसम्भवस्य निर्माणनैपुण्यविलाससीमा ॥२८॥

यस्यां निशायां मदिरेक्षणानां कपोलदेशे प्रतिबिम्बदम्भात् ।
मुखाब्जकान्तेरपहारसक्तः समागतश्चन्द्र इवावभासे ॥२९॥

यत्सालरत्नकान्तीनां पटलेनेव तर्जितः ।
भानुर्ध्वजपटच्छन्नो भाति प्रविरलातपः ॥३०॥

तेऽपीति—तेऽपि धावमाना जना अपि, प्रभोज्ज्वलं दीप्त्युत्कटम्, तं कुरुवरं जीवन्धरम्, वीक्ष्य दृष्ट्वा, विस्मयेऽद्भुते निमग्नं ब्रुडितं मानसं चित्तं येषां तथाभूताः सन्तः, प्रमोदतो हर्षात्, तस्य कुरुवरस्य, सविधमभ्यर्णम्, प्राप्य लब्ध्वा, प्रश्रयेण विनयेन, मधुरां मनोहारिणीम्, गिरं वाणीम्, आहुरूचुः । स्वागतारथोद्धतयोर्मेलनादुपजातिवृत्तम् ॥२६॥

कुवलयाह्लादेति—भवांस्त्वम्, कुवलयाह्लादस्य नीलकमलानन्दस्य पक्षे महीमण्डलानन्दस्य सन्दायकोऽपि प्रदायकोऽपि, निखिलमहीभृद्भिः समग्रपर्वतैः पक्षे समग्रनृपतिभिः महितपादोऽपि पूजितकिरणोऽपि पक्षे पूजितचरणोऽपि, अदोषाकरतया अरजनीकरतया पक्षेऽनवगुणखनितया, न सुधाकरश्चन्द्रः, पद्मानां कमलानां पक्षे पद्मायाः कमलाया उल्लासने विकासने विहर्षणे च पटुरपि दक्षोऽपि, सतां नक्षत्राणां पक्षे साधूनां मार्गः पन्थाः, गगनं समीचीनमार्गश्च तेनाश्रितोऽपि सेवितोऽपि, सद्विरोधाभावेन नक्षत्रविरोधाभावेन पक्षे सज्जनविद्वेषाभावेन, न प्रभाकरः सूर्यः, सुमनोवृन्दवन्दितोऽपि देवसमूहवन्दितोऽपि पक्षे विद्वत्समूहवन्दितोऽपि, क्ष्माभृदनुकूलतया पर्वतानुकूलत्वेन पक्षे नृपानुकूलत्वेन, न पुरन्दरः पुरुहूतः, कुशाग्रनिकाशमतिरपि दर्भाग्रसदृशबुद्धिरपि तीक्ष्णबुद्धियुक्तोऽपीति यावत्, मौढ्यानां शिष्याणां पक्षे मौढ्यस्य मूर्खत्वस्य विरहेणाभावेन, न सुरगुरुर्बृहस्पतिः, अस्तीति शेषः, श्लेषमूलकविरोधाभासोऽलङ्कारः ।

इत्यादीति—इत्यादिश्चासौ स्तुतिश्चेतीत्यादिस्तुतिस्तां विस्तारयन्तीतीत्यादिस्तुतिविस्तारास्तान् पूर्वोक्तप्रकारकस्तवनविस्तारकान्, तानभिमुखं धावमानान् जनान् पुरुषान्, कुरुवीरः सात्यन्धरिः, यूयं भवन्तः के किन्नामानः कस्याः क्वभवाश्च, स्थेति शेषः, इत्येवमित्थम्, कुतूहलात्कुतुकात्, परिपप्रच्छ पृच्छति स्म ॥२७॥

इति जीवन्धरेणेति—इत्येवं प्रकारेण जीवन्धरेण सत्यन्धरसूनुना, पृष्टा अनुयुक्ताः, ते जना अपि, एवं वक्ष्यमाणप्रकारेण, अवोचन्त कथयामासुः ।

अत्रास्तीति—अत्र देशे, अम्बुजसम्भवस्य वेधसः, निर्माणे रचनायां यो नैपुण्यविलासश्चातुर्यचमत्कारस्तस्य सीमावधिः, अभ्रंलिहैर्गगनचुम्बिभिः, घनानि निबिडानि वज्राणि हीरकाणि येषु ते घनवज्राः, ते च ते सौधाश्च राजभवनानि चेति घनवज्रसौधास्तैः, यथार्थं सार्थकं नाम नामधेयं यस्यास्तथाभूता प्रसिद्धा प्रख्याता, चन्द्राभपुरी तन्नाम्नी, नगरी, अस्ति विद्यते ॥२८॥

यस्यामिति—यस्यां चन्द्राभपुर्याम्, निशायां रजन्याम्, मदिरेक्षणानां सुलोचनानाम्, कपोलदेशे गण्डप्रान्ते, प्रतिबिम्बस्य प्रतिकृतेर्दम्भो व्याजस्तस्मात्, समागत उपस्थितः, चन्द्रो विधुः, मुखाब्जकान्तेर्वदनारविन्ददीप्तेः, अपहारे चौर्ये सक्तो लग्न इत्यपहारसक्तः स इव, आवभासे शुशुभे । उत्प्रेक्षा ॥२९॥

यत्सालेति—ध्वजानां वैजयन्तीनां पटेन वस्त्रेण, छन्नो व्याप्तः, भानुः सूर्यः, यस्याः सालो वप्रस्तस्य

तां पालयत्यमरराजसमानकीर्तिः
शौर्याकरो धनपतिप्रथितो महीशः ।
श्रीमानहीनवपुरप्यभुजङ्गलीलो
मित्रानुरागसहितोऽपि कलाधरेच्छः ॥ ३१ ॥

श्रीराजकशिरोरत्नकान्तिबालातपाञ्चितम् ।
यस्य पादाम्बुजं भाति नखचन्द्रिकयोज्ज्वलम् ॥ ३२ ॥

तिलोत्तमेति विख्याता तस्य कान्ता मनोरमा ।
विरामभूमिः कान्तीनामनूनगुणभूषणा ॥ ३३ ॥
कान्त्या विजितपद्मास्ति तयोः पद्मेति नन्दिनी ।
शिरीषसुकुमाराङ्गी कठिनस्तनकुड्मला ॥ ३४ ॥

कदाचिदेषा त्रिभुवनललामवल्ली विहाराय वनमागता तत्र-तत्र सखीभिः सह विहरन्ती रोमराजिलतया वेण्या च मामियं निराकरोतीति कृतविद्वेषेणेवाशीविषेण दष्टा विदितवृत्तान्तेन

तस्य रत्नानि, तेषां कान्तयस्तासां यदीयप्राकारमणिदीप्तीनाम्, पटलेन समूहेन, तर्जित इव भर्त्सित इव, प्रविरलोऽल्प आतपो घर्मो यस्य तथाभूतः, भाति शोभते । उत्प्रेक्षा ॥३०॥

तां पालयतीति—तां चन्द्राभपुरीम्, अमरराजेन देवेन्द्रेण समाना सदृशी कीर्तिर्यशो यस्य सः, शौर्यस्य पराक्रमस्याकरः खनिः, श्रीमान् लक्ष्मीयुक्तः, अहीनां नागानामिनः स्वामीत्यहीनो नागराजस्तस्य वपुरिव वपुः शरीरं यस्य तथाभूतोऽपि सन्, अविद्यमाना भुजङ्गस्य नागस्य लीला शोभा यस्येति विरोधः, पक्षे न हीनमहीनम्, अहीनं वपुर्यस्य तथाभूतोऽपि समुत्कृष्टशरीरोऽपि सन्, नास्ति भुजङ्गस्येव विटस्येव लीला क्रीडा यस्य सः, मित्रे सूर्येऽनुरागो मित्रानुरागस्तेन सहितोऽपि युक्तोऽपि, कलाधरे चन्द्रमसीच्छा वाञ्छा यस्य तथाभूत इति विरोधः, पक्षे मित्रेषु सुहृत्स्वनुरागः प्रेम तेन सहितोऽपि युक्तोऽपि कलाधरेषु वैदग्ध्यधारकेषु इच्छानुरागातिशयो यस्य तथाभूतः, धनपतिरिति प्रथितः प्रख्यातो धनपतिप्रथितः, महीशो नृपः, पालयति रक्षति । श्लेषमूलकविरोधाभासोऽलङ्कारः । वसन्ततिलकावृत्तम् ॥३१॥

श्रीराजकेति—श्रीराजकस्य लक्ष्मीललितनृपालसमूहस्य शिरोरत्नानि मौलिमणयस्तेषां कान्तिरेव दीप्तिरेव बालातपः प्रातःकालिकघर्मस्तेनाञ्चितं शोभितम्, यस्य धनपतेः, पादाम्बुजं चरणकमलम्, नख-चन्द्रिकया नखरज्योत्स्नया, उज्ज्वलं प्रदीप्तं सत्, भाति शोभते ॥३२॥

तिलोत्तमेति—तस्य धनपतिमहीपतेः, मनोरमा मनोहारिणी, कान्तीनां दीप्तीनाम्, विरामभूमि-र्विश्राममही, अनूना उत्कृष्टा गुणा दयादाक्षिण्यादय एव भूषणान्याभरणानि यस्याः सा, 'तिलोत्तमा,' इति विख्याता प्रसिद्धा, कान्ता प्रेयसी, अस्तीति शेषः ॥३३॥

कान्त्येति—तयोर्धनपतितिलोत्तमयोः, कान्त्या शोभया, विजितानि पराभूतानि पद्मानि कमलानि यया सा, शिरीष इव कपीतन इव सुकुमारं मृदुलमङ्गं शरीरं यस्याः सा 'शिरीषस्तु कपीतनः' इत्यमरः, कठिनौ कठोरस्पर्शौ स्तनकुड्मलौ वक्षोजमुकुलकौ यस्याः सा, पद्मेति 'पद्मा' इति नाम्नी, नन्दिनी पुत्री, अस्ति विद्यते ॥३४॥

कदाचिदिति—कदाचिज्जातुचित्, त्रिभुवनललामवल्ली त्रिलोक्याभरणलता, एषा पद्मा, विहाराय क्रीडायै, वनमुद्यानम्, आगता प्राप्ता, तत्र तत्र तेषु तेषु प्रदेशेषु, सखीभिर्वयस्याभिः, सह साकम्, विहरन्ती विहारं कुर्वन्ती क्रीडन्ती वा, इयं पद्मा, रोमराजिलतया लोमलेखावल्ल्या, वेण्या च कबर्या च, मामाशीविषम्, निराकरोति तिरस्करोति, इति हेतुना, कृतो विहितो विद्वेषो वैरं येन तथाभूतेनेव, आशीविषेण नागेन, दष्टा दंशनविषयी कृता, विदितो वृत्तान्तो येन तेन विश्वाससमाचारेण, महती चिन्ता यस्य तेन दीर्घचिन्तावता, भूकान्तेन महीपतिना, कारितो विधापिताम्, इमां कन्याम्, निर्विषीकुर्वते निर्गरलीकुर्वते, अनायेति शेषः,

महाचिन्तेन भूकान्तेन कारितामिमां निर्विषीकुर्वते दास्यते सार्धराज्या कन्यकेति घोषणां निशम्य समागतैर्विषवैद्यैश्चिकित्सितापि नोल्लाघतामाससाद ।

पद्मापि गौरी नरपालपुत्री मध्येन हीनापि सुमध्यमा सा ।
भुजङ्गदष्टा क्षत कन्यकापि विभाति सौख्यादिव मीलिताक्षी ॥ ३५ ॥

भवतां विषविज्ञानमस्ति चेन्निस्तुलप्रभम् ।
निर्विषीक्रियतामद्य कन्यारत्नं धरापतेः ॥ ३६ ॥

इति तेषां वचनमाकर्ण्य किंचिदस्तीति प्रत्युत्तरेण तान्कलकलेन केकिन इव जलधरो जीवन्धरः सम्मोदयन्, तैरनुगम्यमानो राजभवनमासाद्य नगरमोहनाङ्गीं सगरमोहनाङ्गीं वयसा विषेण च श्यामाङ्गतया मालतीलतासर्वसाम्यमनुभवन्तीं म्लानाम्बुजसन्निभभालां निष्पिष्टबालमृणालसंमितभुजयुगलां श्वसितकम्पितघनस्तनकुड्मलां नरपालबालामवलोक्य पञ्चशरप्रहारवञ्चितेन मनसा यक्षराजस्य स्मरन्नभिमन्त्रयामास ।

तावन्मोहेन मुक्ता नरपतिदुहिता चन्द्रिकेव ग्रहेण
. धूमेनाग्नेः शिखेवाचलघनतमसा मुच्यमानेव राका ।

अर्धराज्येन सहिता सार्धराज्या, कन्यका पुत्री, दास्यते प्रदत्ता भविष्यति, इत्येवम्प्रकाराम्, घोषणामुच्चैर्घुष्टम् 'उच्चैर्घुष्टं तु घोषणा' इत्यमरः, निशम्य श्रुत्वा, समागतैः समायातैः, विषवैद्यैर्नरेन्द्रैः, चिकित्सितापि कृतभैषज्यापि, उल्लाघतां नीरोगताम्, नाससाद न प्राप ।

पद्मापीति—पद्मापि लक्ष्मीरपि गौरी कात्यायनीति विरोधः, पक्षे पद्मापि पद्मेत्यभिधानापि गौरी गौरवर्णा, मध्येनावलग्नेन हीनापि रहितापि सुमध्यमा सुन्दरावलग्नवतीति विरोधः, पक्षे मध्येन हीनापि कृशमध्यापि, अथवा मध्येन अधमेन हीनापि सुमध्यमा, 'मध्यं न्याय्येऽवकाशे च मध्यं मध्यस्थिते त्रिषु । लग्नकेऽप्यधमे मध्यमक्रियामवलग्नके' इति विश्वलोचनः, कन्यकाप्यजातपाणिग्रहापि भुजङ्गेन विटेन दष्टा कृतदन्तक्षतेति विरोधः, पक्षे भुजङ्गेन नागेन दष्टा दंशनविषर्याकुला, 'भुजङ्गो भुजगो पिङ्गे' इति विश्वलोचनः, सा पूर्वोक्ता, नरपालपुत्री राजपुत्री, सौख्यादिवानन्दातिरेकादिव, मीलिताक्षी निमीलितनयना, विभाति शोभते । विरोधाभासोऽलङ्कारः ॥३५॥

भवतामिति—चेद्यदि, भवतां श्रीमताम्, निस्तुलप्रभमनुपमम्, विषविज्ञानं गरलापहारबोधः, अस्ति विद्यते, तर्हि, धरापतेः पृथ्वीपालस्य, कन्यारत्नं पुत्रीश्रेष्ठा, अद्यास्मिन् दिवसे, निर्विषीक्रियताम्, गरलशून्यीक्रियताम् ॥३६॥

इति तेषामिति—इति पूर्वोक्तप्रकारम्, तेषां जनानाम्, वचनं वाणीम्, आकर्ण्य श्रुत्वा, किञ्चित्किमपि, अस्ति विद्यते, इति प्रत्युत्तरेण इति प्रतिवचनेन, कलकलेन गर्जनेन, केकिनो मयूरान्, जलधर इव मेघ इव, तान् जनान्, सम्मोदयन् हर्षयन्, जीवन्धरो विजयासूनुः, तैः पुरुषैः, अनुगम्यमानोऽनुव्रज्यमानः, सन्, राजभवनं नरेन्द्रमन्दिरम्, आसाद्य प्राप्य, गरेण विषेण मोहनाङ्गी मूर्च्छितशरीरा न भवतीति नगरमोहनाङ्गी तां तथाभूतामपि गरेण सहिता सगरा सविषा, सगरा चासौ मोहनाङ्गी चेति सगरमोहनाङ्गी तामिति विरोधः । पक्षे नगरमोहनं पौरजनमोहोत्पादकमङ्गं शरीरं यस्यास्तामिति, वयसा दशया, विषेण च गरलेन च, श्यामाङ्गतया यौवनोपलक्षितशरीरतया पक्षे नीलशरीरतया च, मालतीलताया मल्लीवल्ल्याः सर्वसाम्यं सर्वसादृश्यम्, अनुभवन्तीं प्राप्नुवानाम्, म्लानाम्बुजसंनिभो म्लानकमलकल्पो भालो निटिलो यस्यास्ताम्, निष्पिष्टं निर्मर्दितं यद्बालमृणालं मृदुबिसं तेन सम्मितं भुजयुगलं बाहुयुगं यस्यास्ताम्, श्वसितेन श्वासेन कम्पितौ वेपितौ घनस्तनकुड्मलौ पीनवक्षोजमुकुलौ यस्यास्ताम्, नरपालबालां राजदुहितरम्, अवलोक्य दृष्ट्वा, पञ्चशरप्रहारेण कामाघातेन वञ्चितं प्रतारितं तेन, मनसा चेतसा, यक्षराजस्य सुदर्शनस्य, स्मरन् स्मरणं कुर्वन् 'अधीगर्थदयेशां कर्मणि' इति षष्ठी, अभिमन्त्रयामास मन्त्रप्रयोगञ्चकार ।

तावन्मोहेनेति—तावत् तावता कालेन, ग्रहेण राहुणा, मुक्ता त्यक्ता, चन्द्रिकेव ज्योत्स्नेव, धूमेन

आकाशस्येव लक्ष्मीरसितजलमुचा शैवलेनेव गङ्गा
सेयं विद्युन्निकाशा सविधगतजनानन्दिनी द्रागुदस्थात् ॥ ३७ ॥

पित्रोरानन्दिनी सेऽयं चन्द्रिकेव चकोरयोः ।
जीवन्धरस्य नयने सुखयामास सादरम् ॥ ३८ ॥

तावदानन्दमकरन्दोद्गारिमनःसरोजेन क्षोणीपालकेन सविधमानीय कृतनुतिवचनेन मणिमयासनमधिरोपितः स्वामी जीवन्धरः सप्रश्रयं सम्भावितस्तत्क्षणमेव रूपलक्षणादिना राजवंश्योऽयमिति संजज्ञे ।

आहूय कार्तान्तिकमुख्यवृन्दं क्षोणीपतिः संसदि निश्चिकाय ।
शुभं मुहूर्तं स समादिशच्च विवाहसन्नाहविजृम्भणाय ॥ ३९ ॥

तदनु मणितोरणपताकाकलशदर्पणादिभिरलङ्कृतासु नगररथ्यासु परिकल्पिते विविधरत्नस्तम्भचकचकितपरिणयमण्डपे तत्र विचित्रतया विरचितायां मङ्गलद्रव्यसङ्गतायां मणिवेदिकायां क्षितिपतिरुपयममङ्गलं विधातुमारेभे ।

धूम्रेण मुक्ता, अग्नेरनलस्य, शिखेव ज्वालेव, अचलघनतमसा सुस्थिरनिबिडध्वान्तेन, मुच्यमाना त्यज्यमाना, राकेव पौर्णमासीव, असितजलमुचा कृष्णवारिदेन, मुच्यमाना, आकाशस्य गगनस्य, लक्ष्मीरिव श्रीरिव, शैवलेन जलनील्या, मुच्यमाना, गङ्गेव भागीरथीव, मोहेन मूर्च्छया, मुक्ता त्यक्ता, विद्युन्निकाशा तडित्सदृशी, इयं सा पूर्वोक्ता, नरपतिदुहिता राजपुत्री, सविधगतजनान् निकटस्थपुरुषान् आनन्दयतीत्येवं शीलेति सविधगतजनानन्दिनी सती, द्राग् झटिति, उदस्थादुत्तिष्ठति स्म, शयनादिति शेषः । मालोपमा, शार्दूलविक्रीडितं छन्दः ॥ ३७ ॥

पित्रोरिति—चकोरयोर्जीवञ्जीवयोः, चन्द्रिकेव कौमुदीव, पित्रोर्जननीजनकयोः, आनन्दिनी समाह्लादिनी, इयं सा प्रसिद्धा पद्मा, सादरं ससन्मानं यथा स्यात्तथा, जीवन्धरस्य सात्यन्धरेः, नयने लोचने, सुखयामास समाह्लादयामास । उपमा ॥ ३८ ॥

तावदिति—तावत् तत्क्षणम्, आनन्दो हर्ष एव मकरन्दः पुष्परसस्तस्योद्गारि प्रकटयितृ मनःसरोजं चेतोऽरविन्दं यस्य तेन, कृतं विहितं नुतिवचनं स्तुतिवचनं येन तेन, क्षोणीपालकेन नृपेण, सविधं समीपम्, आनीय प्रापय्य, मणिमयासनं रत्नविष्टरम्, अधिरोपितोऽधिष्ठापितः, सप्रश्रयं सविनयम्, सम्भावितः सन्मानितः स्वामी जीवन्धरः सात्यन्धरिः, अयमेषः, राजवंश्यः क्षत्रियकुलोत्पन्नः, इत्येवम्, रूपलक्षणादिना सौन्दर्यलिङ्गादिना, तत्क्षणमेव तत्कालमेव, संजज्ञे ज्ञातः । कर्मणि प्रयोगः ।

आहूयेति—स पूर्वोक्तः, क्षोणीपतिर्धनपतिमहीपालः कार्तान्तिकेषु ज्योतिर्वित्सु मुख्याः प्रधानास्तेषां वृन्दं समूहम्, आहूय समाकार्य, संसदि सभायाम्, शुभमुत्तमम्, मुहूर्तं कालम्, निश्चिकाय निरचैषीत् 'विभाषा चेः' इत्यभ्यासात्परस्य कुत्वम्, विवाहस्य पाणिग्रहणस्य सन्नाहः सामग्र्यादिसज्जीकरणं तस्य विजृम्भणं वर्धनं तस्मै, समादिशच्च समाज्ञातवांश्च, भृत्यानिति शेष ॥ ३९ ॥

तदन्विति—तदनु तदनन्तरम्, मणितोरणानि च रत्नतोरणानि च पताकाश्च केतवश्च, कलशाश्च मङ्गलघटाश्च, दर्पणाश्च मुकुराश्चेति मणितोरणपताकाकलशदर्पणास्त आदौ येषां तैः, अलङ्कृतासु शोभितासु, नगररथ्यासु पुरप्रधानवीथीषु सतीषु, परिकल्पिते निर्मिते, विविधरत्नस्तम्भानां नैकविधमणिमयस्तम्भानां चक्रेण समूहेन चकितः शोभितो यो परिणयमण्डपो विवाहमण्डपस्तस्मिन्, विचित्रतया समन्नुतरीत्या, विरचितायां निर्मितायाम्, मङ्गलद्रव्यैः काञ्चनकलशादर्शताम्बूलादिमङ्गलपदार्थैः सङ्गता सहिता तस्याम्, तत्र प्रसिद्धायाम्, मणिवेदिकायां रत्नमयवितर्दिकायाम्, क्षितिपतिर्नृपः, उपयममङ्गलं विवाहमङ्गलम्, विधातुं कर्तुम्, आरेभे समारब्धवान् ।

नरपालसुतां स्नातां प्रसाधनगृहाङ्गणे ।
प्रसाधयितुमारेभे प्रहर्षेण सखीजनः ॥ ४० ॥

कलशजलधिवेलालोलडिण्डीरखण्डा-
यितमृदुवसनेनावेष्टिता राजपुत्री ।
शरदमलघनालीशोभितेवेन्दुरेखा
सुरतरुनववल्ली पुष्पितेवाबभासे ॥ ४१ ॥

पादाम्बुजोल्लसितहीरकनूपुरश्री-
राविर्बभूव नखचन्द्रिरसेवनाय ।
तारावलिः पदसमीपगतेव तस्या-
स्तारुण्यवीरुध इवापतिता सुमालिः ॥ ४२ ॥

तस्या गुरुजघनशोभितरशना मदनराजधानी कनकप्राकारावलिरिव मारमहानिधिनिधानवेष्टितभुजगीव मीनकेतनोपवनवृतिसुरतरुवल्लीव व्यराजत ।

हारः किं वा सकलनयनाहार एवाम्बुजाक्ष्या
यद्वा वक्षोरुहगिरिपतन्निर्झरस्यैष पूरः ।
किं वा तस्याः स्तनमुकुलयोः कोमलश्रीमृणालो
भाति स्मैवं विशयवशतः स्त्रीजनैः प्रेक्ष्यमाणः ॥ ४३ ॥

नासामणिर्वक्त्रपयोजमध्यविभासुरोऽयं जलबिन्दुरेव ।
आहोस्विदस्या नवमौक्तिकं किं नासाल्यवंशाद्गलितं गरिष्ठम् ॥ ४४ ॥

नरपालसुतामिति—सखीजनो वयस्यसमूहः, स्नातां कृतमङ्गलस्नानाम्, नरपालसुतां नृपतिपुत्रीम्, पद्मामिति यावत्, प्रसाधनगृहस्याभरणादिधारणनिकेतनस्याङ्गणे चत्वरे, प्रहर्षेण सम्मदातिशयेन, प्रसाधयितुमलङ्कर्तुम्, आरेभे प्रारब्ध ॥ ४० ॥

कलशेति—कलशजलधेः क्षीरसागरस्य वेलायां तटे लोलश्चपलो यो डिण्डीरखण्डः फेनशकलस्तद्वदाचरितं यन्मृदुवसनं कोमलवस्त्रं तेन, आवेष्टिता परिवृता, राजपुत्री पद्मा, शरदो जलदान्तस्यामलघनाल्या सितवारिदपङ्क्त्या शोभिता समुद्भासितेति शरदमलघनालीशोभिता, इन्दुरेखेव, चन्द्ररेखेव, पुष्पिता कुसुमिता, सुरतरुनववल्लीव कल्पवृक्षनूतनलतेव, आबभासे शुशुभे, । मालोपमा, मालिनीवृत्तम् ॥ ४१ ॥

पादाम्बुजेति—तस्याः पद्मायाः, पदाम्बुजयोश्चरणकमलयोरुल्लसिता शोभिता या हीरकनूपुराणां हीरकमञ्जीरकाणां श्रीः शोभा सा, नखचन्द्रिरसेवनाय नखरेन्दुसमाराधनाय, पदसमीपगता चरणाभ्यर्णप्राप्ता, तारावलिरिव नक्षत्रपङ्क्तिरिव, यद्वा, तारुण्यवीरुधो यौवनलतायाः, आपतिता समन्तात्पतिता, सुमालिरिव पुष्पश्रेणिरिव, आविर्बभूव प्रकटिताभूत् । रूपकोत्प्रेक्षे । वसन्ततिलकावृत्तम् ॥ ४२ ॥

तस्या इति—तस्या राजपुत्र्याः, गुरुजघने स्थूलनितम्बे शोभिता समुद्भासिता या रशना मेखला सा मदनराजधान्याः कामराजधान्याः कनकप्राकारावलिरिव सुवर्णसालपङ्क्तिरिव मारस्य मन्मथस्य महानिधिनिधाने महानिधिकोशे वेष्टिता परितः स्थिता या भुजगी नागी तद्वत् । मीनकेतनस्य प्रद्युम्नस्य यदुपवनमुद्यानं तस्य या वृतिरावरणं तस्याः सुरतरुवल्लीव कल्पानोकहलतेव, व्यराजत व्यशोभत । उत्प्रेक्षा ।

हार इति—अम्बुजाक्ष्याः कमललोचनायाः, पद्माया इति यावत्, हारो मौक्तिकदाम, किं वा किमु, सकलनयनानां निखिलजनलोचनानामाहारः पारणाद्रव्यम्, एव, यद्वा अथवा, वक्षोरुहगिरेः कुचशैलात्पतनध्वंसमानो यो निर्झरो वारिप्रवाहस्तस्य, एषोऽयम्, पूर ओघः, किं वा यद्वा, तस्याः पद्मायाः, स्तनमुकुलयोः कुचकुड्मलयोः, कोमलश्रीमृणालः सुकुमारश्रीबिसम्, अस्तीति शेषः, एवमनेन प्रकारेण, विशयवशतः सन्देहवशतः, स्त्रीजनैर्वनितावृन्दैः, प्रेक्ष्यमाणो विलोक्यमानः सन्, भाति स्म शोभते स्म । संशयोत्प्रेक्षे, मन्दाक्रान्ताच्छन्दः ॥४३॥

नासामणिरिति—अस्या नृपालपुत्र्याः, नासामणिर्घ्राणरत्नम्, अयमेषः, वक्त्रपयोजमध्ये सुख-

किं काममन्त्रबीजालिः किं वा तद्विरुदावलिः ।
किञ्चित्कुचाब्जभृङ्गालिर्मकरी संशयं व्यधात् ॥४५॥

एवमलङ्कृतां[1] मदनमोहनमन्त्रदेवतामिव साक्षादागतां विषमबाणकेलीमिव[2] तरुणीं रमणीजनचूडामणिं सखीजनः कामदेवस्य वेदिकामध्यविलसितमणिपट्टिकामध्यासीनस्य परिसरं शनैः शनैः प्रापयामास । तदनु सकलतूर्यस्वनितेषु मुखरितदिगन्तरेषु[3], मन्त्रविदां वचनेषु व्याजृम्भमाणेषु, वेदिकामभितो मङ्गलमणिदीपेषु देदीप्यमानेषु, पूज्यमानेषु हव्यवाहेषु जाज्वल्यमानेषु, परिणयमङ्गलदर्शनकुतूहलविवृत[4]नयनेषु पुरन्ध्रीजनेषु, जनितसम्मर्दनेषु परिषत्परिकरेषु, पार्थिवेषु निजभुजाङ्गदपरस्परसङ्घर्षविगलत्कनकशकलव्याजेन बाहुप्रतापकणानिव किरत्सु, प्राप्ते च शुभे मुहूर्ते, जीवंधरस्वामी धनपतिनरपतिना वारिधारापुरःसरं प्रतिपादितां तिलोत्तमासुतां पद्मां पाणौ परिजग्राह ।

प्राप्यार्धराज्यं कुरुवंशकेतुः कन्दर्पसाम्राज्यरमां च पद्माम् ।
प्रमोदकल्लोलपरम्पराणामाघातहृष्यद्धृदयाम्बुजोऽभूत् ॥४६॥

इति महाकविहरिचन्द्रविरचिते श्रीमति जीवन्धरचम्पूकाव्ये पद्मालम्भो नाम पञ्चमो लम्भः ।

कमलाभ्यन्तरे विभासुरः शोभमानः, जलबिन्दुरेव सलिलसीकर एव, आहोस्विदथवा, नासाख्यवंशाद् घ्राणाभिधानवेणोः, गलितं पतितम्, गरिष्ठं श्रेष्ठम्, किं नवमौक्तिकं नूतनमुक्ताफलम्, आसीदिति शेषः ॥४४॥

किं काममन्त्रेति—मकरी कुचकुड्मलेषु कस्तूर्यादिना लिखिता मकराकृतिः, किं कामस्य मदनस्य मन्त्रबीजानां मन्त्राक्षराणामालिः पङ्क्तिः, किं वा, तस्य कामस्य विरुदावलिर्यशःप्रशस्तिः, किं स्विदथवा, कुचाब्जयोः स्तनसरोजयोर्विद्यमाना भृङ्गालिर्भ्रमरपङ्क्तिः, आसीत्, इत्येवम्, संशयं सन्देहम्, व्यधाच्चकार ॥४५॥

एवमिति—एवमनेन प्रकारेण, अलङ्कृतां भूषिताम्, मदनस्य स्मरस्य मोहनमन्त्रदेवता वशीकरणमन्त्राधिष्ठातृदेवी तामिव, साक्षादागतां प्रत्यक्षमुपयाताम्, विषमबाणकेलीमिव कन्दर्पक्रीडामिव, तरुणीं नवयौवनोद्भासिनीम्, रमणीजनचूडामणिं वनितावृन्दशिरोरत्नम्, पद्मामिति यावत्, सखीजनः सहचरीसमूहः, वेदिकामध्ये वितर्दिकामध्ये विलसिता शोभिता या मणिपट्टिका रत्नपीठिका ताम्, अध्यासीनस्याधितिष्ठतः, कामदेवस्य मदनस्य कामदेवपदवीधरस्य जीवन्धरस्येति यावत्, परिसरं समीपम्, शनैः शनैर्मन्दं मन्दम्, प्रापयामास समानिनाय । तदनु तदनन्तरम्, सकलतूर्याणां निखिलवादित्राणां स्वनितानि शब्दास्तेषु, मुखरितं वाचालितं दिगन्तरं काष्ठान्तरालं यैस्तेषु, मन्त्रविदां मन्त्रज्ञानाम्, वचनेषु शब्देषु, व्याजृम्भमाणेषु वर्धमानेषु, वेदिकामभितो वितर्दिकां परितः, मङ्गलमणिदीपेषु मङ्गलोद्देशकरत्नप्रदीपेषु, देदीप्यमानेषु नितरां प्रकाशमानेषु, पूज्यमानेष्वर्च्यमानेषु हव्यवाहेषु पावकेषु, जाज्वल्यमानेषु सातिशयं ज्वलत्सु, पुरन्ध्रीजनेषु वनितासमूहेषु, परिणयमङ्गलस्य विवाहमङ्गलस्य दर्शनकुतूहलेन विलोकनकौतुकेन विवृतानि विस्फारितानि नयनानि लोचनानि येषां तथाभूतेषु, परिषत्परिकरेषु सभापरिजनेषु जनितं समुत्पादितं संमर्दनं व्यामर्दो यैस्तेषु, पार्थिवेषु नृपेषु, निजभुजाङ्गदानां स्वकीयबाहुकेयूराणां परस्परसङ्घर्षेण मिथः संघट्टनेन विगलन्ति पतन्ति यानि कनकशकलानि सुवर्णखण्डानि तेषां व्याजेन दम्भेन, बाहुप्रतापकणान् भुजतेजोंऽशान्, किरत्स्विव प्रक्षिपत्स्विव सत्सु, शुभे कल्याणप्रदे, मुहूर्ते समये, प्राप्ते च समागते च सति, जीवन्धरस्वामी सत्यन्धराङ्गजः, धनपतिनरपतिना धनपत्यभिधानभूपालेन, वारिधारापुरस्सरं जलधारासहितं यथा स्यात्तथा, प्रतिपादितां दत्ताम्, तिलोत्तमायाः सुता तां तिलोत्तमापुत्रीम्, पद्मामेतन्नाम्नीम्, पाणौ करे, जग्राह स्वीचकार, तस्याः पाणिग्रहणं चकारेति भावः ।

प्राप्येति—कुरुवंशकेतुर्जीवन्धरः, अर्धञ्च तद् राज्यञ्चेत्यर्धराज्यं राज्यार्धम्, कन्दर्पस्य कामस्य साम्राज्यरमा साम्राज्यलक्ष्मीस्ताम्, पद्माञ्च धनपतिसुताञ्च, प्राप्य, प्रमोदकल्लोलपरम्पराणामानन्दतरङ्गश्रेणीनाम्, आघातेन संघट्टनेन हृष्यद्विकसद् हृदयाम्बुजं चित्तारविन्दं यस्य तथाभूतः, अभूद् बभूव ॥ ४६ ॥

इति महाकविहरिचन्द्रविरचिते श्रीमति 'कौमुदी' व्याख्याधरे जीवन्धरचम्पूकाव्ये
पद्मालम्भो नाम पञ्चमो लम्भः ।

---

१ मदनतां ब० । २ केलीकरिणीमिव तरुणीजन -ब० । ३ दिगन्तेषु ब० । ४ विस्मृत ब० ।

षष्ठो लम्भः

पद्मां पयोधरभरानतगात्रवल्लीं
पद्माननां कुरुवरो रमयंश्चिराय ।
तद्भ्रातृभिर्गुणमणीकुलरोहणैस्तै-
र्द्वात्रिंशता प्रतिदिनं परिपूज्यते स्म ॥ १ ॥

कदाचित्कुरुवीरस्य सकलभूतसन्तापनाशनं निखिललोकदेदीप्यमानं भुजप्रतापमभिवीक्ष्य लज्जयेव संहृतनिजप्रतापे, स्वैराभिसारनिरोधजनितक्रोधानां बन्धकीनामारक्तकटाक्षच्छटाभिरिव संहृतनिजकरे समानीतपद्मिनीहृदयानुरागपरम्पराभिरिव कुङ्कुमसच्छायमण्डले दिनकरे चरमशिखरिशेखरकनककलशशङ्काकरे, सायन्तनसुगन्धिशीतलमन्दपवनलोलितललितलताङ्गुलितयाह्वयद्भिरिव वनविटपिभ्यो व्याकुलारावव्याजेन प्रत्युत्तरमभिधाय धावनव्यासक्तेषु विहङ्गेषु, सहस्रपत्रेषु सहस्रकरकिरणान्क्रमेण निमीलदेकैकदलैर्गणयत्स्विव मुकुलीभवत्सु, सिन्दूरच्छविबन्धुरे सन्ध्यारागे वरुणदिशि विजृम्भिते, आविर्भवत्तिमिरनिकरबीजेष्विव बम्भरेषु पद्माकरं विहाय कुमुदाकरमाक्रमत्सु, ध्वान्तकदम्बमुदजृम्भत ।

पद्मामिति—पयोधरभरेण वक्षोजभरेणानता समानम्रा गात्रवल्ली शरीरलता यस्यास्ताम्, पद्माननां कमलमुखीम्, पद्मामेतन्नाम्नीं स्वभार्याम्, चिराय चिरकालेन, रमयन् क्रीडयन्, कुरुवरो जीवन्धरः, गुणा एव मणयो रत्नानि तेषां कुलं समूहस्तस्य रोहणा विदूरगिरयस्तैः, रोहणगिरौ रत्नानि समुत्पद्यन्त इति प्रसिद्धिः, तैः प्रसिद्धैः द्वात्रिंशता द्वात्रिंशत्संख्याकैः, तस्या भ्रातरस्तैः तदीयसहोदरैः, प्रतिदिनं प्रत्यहम्, परिपूज्यते स्म । कर्मणि प्रयोगः । वसन्ततिलकावृत्तम् ॥ १ ॥

कदाचिदिति—कदाचिज्जातुचित्, कुरुवीरस्य जीवन्धरस्य, सकलभूतानां निखिलप्राणिनां संतापनाशनं सन्तापापहारकम्, निखिललोके समग्रसंसारे देदीप्यमानं पुनःपुनरतिशयेन वा प्रकाशमानम्, भुजप्रतापं बाहुतेजः, अभिवीक्ष्य विलोक्य, लज्जयेव त्रपयेव, संहृतः संकोचितो निजप्रतापः स्वतेजो येन तथाभूते, स्वैराभिसारस्य स्वच्छन्दाभिगमनस्य निरोधेन निवारणेन जनितः समुत्पन्नः क्रोधो कोपो यासां तासाम्, बन्धकीनां कुलटानाम्, आरक्ता लोहितवर्णा याः कटाक्षच्छटा अपाङ्गपङ्क्तयस्ताभिरिव, संहृताः संकोचिता निजकराः स्वकिरणा यस्य तस्मिन्, समानीतः समादाय सहानीतः पद्मिनीनां यो हृदयानुरागोऽन्तःप्रीतिस्तस्य परम्पराः सन्ततयस्ताभिरिव, कुङ्कुमसच्छायं काश्मीरकल्पं मण्डलं बिम्बं यस्य तस्मिन्, दिनकरे सूर्ये, चरमशिखरिणोऽस्ताचलस्य शेखरे शृङ्गे कनककलशस्य काञ्चनकुम्भस्य शङ्काकरः सन्देहोत्पादकस्तथाभूते सति, सायन्तनः सायंकालिकः सुगन्धिः सुरभिः, शीतलः शिशिरो मन्दो मन्थरश्च यः पवनो वायुस्तेन लोलिताश्चालिता ललिता मनोहरा लता एव शाखा एवाङ्गुल्यः करशाखा येषां तेषां भावस्तत्ता तया, आह्वयन्त इवाकारयन्त इव, वनविटपिभ्यः काननतरुभ्यः, व्याकुलश्चासावारावश्चेति व्याकुलारावो व्यग्रतापूर्णशब्दस्तेषां व्याजेन दम्भेन, प्रत्युत्तरं 'वयमागच्छामः' इति प्रतिजल्पम्, अभिधाय निगद्य, धावने वेगेनाभियाने व्यासक्ता आसक्तिर्येषां तेषु, विहङ्गेषु पक्षिषु सत्सु, सहस्रपत्रेषु कमलेषु, क्रमेण क्रमशः, निमीलन्ति सङ्कोचन्ति यानि एकैकदलानि एकैकपत्राणि तैः, सहस्रकरस्य सूर्यस्य किरणा मयूखास्तान्, गणयत्स्विव संख्यानं कुर्वत्स्विव, मुकुलीभवत्सु निमीलत्सु, सत्सु, सिन्दूरच्छविरिव नागसम्भवकान्तिरिव बन्धुरो मनोहरस्तस्मिन्, सन्ध्यारागे पितृप्रसूलौहित्ये, वरुणदिशि पश्चिमकाष्ठायाम्, विजृम्भिते वृद्धिङ्गते सति, आविर्भवन्प्रकटीभवन्यस्तिमिरनिकरो ध्वान्तसमूहस्तस्य बीजेष्विव, बम्भरेषु भ्रमरेषु, पद्माकरं कमलाकरं,

लोकदीपे रवौ लोकगृहमाभास्य निर्वृते ।
तत्कज्जलमिवानीलं तमोवृन्दमजायत ॥ २ ॥
संदष्टं बिसमुत्सृज्य चक्रद्वन्द्वेन मूर्च्छता ।
परिवृत्तमुखाब्जेन तूर्णं विजघटे तदा ॥ ३ ॥

दिनमणिविरहेण व्याकुलाङ्गी नभःश्री-
स्तिमिरनिकरदम्भात्तूर्णमाकीर्णकेशा ।
उडुमणिगणलक्ष्यादश्रुबिन्दून्दधाना
रमणविपदि रेजे रोदनं तन्वतीव ॥४॥
तमःशबरसंरुद्धां यामिनीं निजवल्लभाम् ।
वीक्ष्य कोपादिवाताम्रः शशी पूर्वाद्रिमानशे ॥५॥

तदनु निशाकरं पुरन्दरदिशाविशालनयनामुखचुम्बनचतुरमालोक्येव पुरतरुणेषु कान्तामुखचुम्बनपरेषु, शशधरकरस्पर्शनविद्रुतशशिकान्ततलमालक्ष्येव युवतीषु दयितकरस्पर्शमात्रेण द्रवन्तीषु, तत्क्षणमुद्वेलजलनिधिमुद्वीक्ष्येव समुल्लसदुल्लोलकल्लोले कामार्णवे, सरसीसमुद्भूतसरोजेष्विव कुलटाजनलपनतटेषु मुकुलितेषु, क्रमेण नृपमन्दिरे निद्राणे निखिलजने, केनाप्यनुपलक्षितः कुरुवीरः पुरान्निश्चक्राम ।

विहाय त्यक्त्वा, कुमुदाकरं कैरवकासारम्, आक्रामत्सु समागच्छत्सु सत्सु, ध्वान्तकदम्बं तिमिरसमूहः उदजृम्भत ववृधे ।

लोकदीप इति—लोकस्य जगतो दीपः प्रदीपस्तस्मिन्, रवौ सूर्ये, लोक एव गृहं लोकगृहं तत्, आभास्य प्रकाश्य, निर्वृते निर्गते सति, तत्कज्जलमिव तदीयाञ्जनमिव, आनीलमीषत्कृष्णम्, तमोवृन्दं ध्वान्तसमूहः, अजायत समुत्पादि । रूपकोत्प्रेक्षे ॥ २ ॥

संदष्टमिति—संदष्टं दन्तान्तर्धारितम्, बिसं मृणालम्, उत्सृज्य त्यक्त्वा, मूर्च्छता विचेतनीभवता, परिवृत्तं विमुखीभूतं मुखाब्जं वदनकमलं यस्य तथाभूतेन, चक्रद्वन्द्वेन रथाङ्गयुगलेन, तदा सायम्, तूर्णं शीघ्रम्, विजघटे विघटितम् ॥ ३ ॥

दिनमणिविरहेणेति—दिनमणेः सूर्यस्य विरहो विप्रलम्भस्तेन, व्याकुलं व्यग्रम् अथ च विभिः पक्षिभिराकुलमाकीर्णम्, अङ्गं शरीरं यस्याः सा, तिमिरनिकरस्य ध्वान्तसमूहस्य दम्भाद् व्याजात्, तूर्णं क्षिप्रम्, आकीर्णाः समन्ताद्विक्षिप्ताः केशाः कचा यस्याः सा, उडुषु मणिगणा इवेत्युडुमणिगणास्तेषां लक्ष्याद् व्याजात्, अश्रुबिन्दून् बाष्पसीकरान्, दधाना धरन्ती नभःश्रीर्गगनलक्ष्मीः, रमणविपदि वल्लभविपत्तौ, रोदनमाक्रन्दनम्, तन्वतीव विस्तारयन्तीव, रेजे शुशुभे । उत्प्रेक्षालङ्कारः । मालिनीच्छन्दः ॥ ४॥

तमःशबरसंरुद्धामिति—शशी विधुः, निजवल्लभां स्वप्रेयसीम्, यामिनीं रजनीम्, तम एव ध्वान्तमेव शबरो निषादस्तेन संरुद्धां निरुद्धगमनाम्, वीक्ष्य दृष्ट्वा, कोपादिव क्रोधादिव, आताम्र आरक्तवर्णः सन्, पूर्वाद्रिं पूर्वशैलम्, आनशे व्याप, तत्राधिरूढो बभूवेति भावः । उत्प्रेक्षा ॥ ५ ॥

तदन्विति—तदनु तदनन्तरम्, निशाकरं चन्द्रमसम्, पुरन्दरदिशैव प्राच्येव विशालनयना दीर्घाक्षी तस्या मुखस्य वदनस्य चुम्बने चतुरं विदग्धम्, आलोक्येव दृष्ट्वेव, पुरतरुणेषु नगरयुवसु, कान्तामुखानां वनितावदनानां चुम्बनेषु परास्तत्परास्तेषु सत्सु, शशधरकरस्य चन्द्रकिरणस्य स्पर्शनेन संसर्गेण विद्रुतं कृतजलविमोचनं यच्छशिकान्ततलं चन्द्रकान्तोपलतलं तत्, आलक्ष्येव विलोक्येव, युवतीषु तरुणीषु, दयितस्य पत्युः करस्पर्शमात्रेण हस्तस्पर्शमात्रेण, द्रवन्तीषु द्रवीभूतासु सतीषु, तत्क्षणं तत्कालम्, उद्वेलश्चासौ जलनिधिश्च तं वेलोल्लङ्घनसागरम्, उद्वीक्ष्येव विलोक्येव, कामार्णवे मदनसिन्धौ, समुल्लसन्तः समुच्छलन्त उल्लोलाश्चपलतराः कल्लोलास्तरङ्गा यस्य तथाभूते सति, कुलटाजनलपनतटेषु स्वैरिणीजनवक्त्रतटेषु सरसीसमुद्भूतसरोजेष्विव कासारोत्पन्नकमलेष्विव, मुकुलितेषु निमीलितेषु, सत्सु, क्रमेण क्रमशः, नृपमन्दिरे

गव्यूतिकाः काश्चिदतीत्य दूरं गतस्य सत्यन्धरभूपसूनोः ।
शङ्कावधूट्या हृदयाद्गतायाः सहायतां प्राप निशा किलैषा ॥६॥

पत्न्यापि कान्तविरहाम्बुधिमध्यभागे
सन्तापबाडवहुताशनकीललीढे ।
कन्दर्पनक्रकलिते कलकण्ठगान-
कोलाहले खलु ममज्ज चिरादपारे ॥७॥

लोकपालजनाः केचिच्चतुर्दिक्षु गवेषिणः ।
प्राज्ञा अपि कुमारस्य नाज्ञासिषुरिहागतिम् ॥ ८ ॥

तत्र तत्र तीर्थस्थानानि याजंयाजं सत्वरं गत्वरः कुरुवीरः, क्वचन वासःसमासक्ततापसकुल-कृष्यमाणतरुत्वङ्मर्मरारावमुखरम्, क्वचित्पाषण्डिषण्डकरमण्डितकमण्डलुमुखनैर्झरजलपूरणजनित-कलकलशब्दशोभितम्, कुत्रचिद्बालकत्रुटितोज्झितमौञ्जीमेखलाविकीर्णम्, कुत्रचन कुमारिकापूर्य-माणबालवृक्षालवालम्, क्वचन काषायवसनसेचनलोहितायमानसरोजलम्, क्वचन संसिक्तवल्कल-शिखानिर्गलत्पयोधारारेखाङ्कितम्, क्वचन चमूरुचर्मनिर्मितासनासीनजपपरजनसङ्कुलम्, कुत्रचित्-

---

नरेन्द्रनिकेतने, निखिलजने समस्तलोके, निद्राणे गृहीतस्वापे सति, केनापि जनेन अनुपलक्षितोऽनवलोकितः, कुरुवीरो जीवन्धरः, पुरान्नगरात्, निश्चक्राम निर्जगाम ।

गव्यूतिका इति—काश्चिद् गव्यूतिकाः कतिचित् क्रोशान्, अतीत्य समुल्लङ्घ्य, दूरं विप्रकृष्टम्, गतस्य यातस्य, सत्यन्धरभूपसूनोः, सत्यन्धरधराधीशपुत्रस्य जीवन्धरस्येति यावत्, हृदयाच्चेतसः, गतायाः प्रयातायाः, शङ्कावधूट्याः भीतितरुण्याः, सहायतां मित्रतां सहगामितामिति यावत्, एषा निशा इयं रजनी, प्राप लब्धवती, किलेति वाक्यालङ्कारे । जीवन्धरस्य हृदयाद् राजपुरुषोपरोधभीतिर्गता रात्रिश्च समाप्तेति भावः ॥ ६ ॥

पत्न्यापीति—पत्न्यापि जीवन्धरजायापि, संताप एव दुःखमेव बाडवहुताशनकीला वडवानलज्वाला-स्तैर्लीढो व्याप्तस्तस्मिन्, कन्दर्प एव काम एव नक्रो मकरस्तेन कलितः सहितस्तस्मिन्, कलकण्ठगानमेव कमनीयकण्ठध्वनिरेव कोलाहलो गर्जितं यस्मिंस्तस्मिन्, अपारेऽनवसाने, कान्तविरह एव वल्लभविप्रलम्भ एवाम्बुधिमध्यभागः सागरमध्यप्रदेशस्तस्मिन्, खलु निश्चयेन, चिरात् दीर्घकालाय, ममज्ज निमग्ना । रूपकालङ्कारः । वसन्ततिलकावृत्तम् ॥ ७ ॥

लोकपालजना इति—चतुर्दिक्षु चतुःकाष्ठासु, गवेषिणोऽन्वेषिणः, केचित्केऽपि, लोकपालजना राज-पुरुषाः, प्राज्ञा अपि मेधाविनोऽपि सन्तः, कुमारस्य जीवन्धरस्य, इह वने, आगतिमागमनम्, न अज्ञासिषुर्न जानन्ति स्म ॥ ८ ॥

तत्र तत्रेति—तत्र तत्र तेषु तेषु स्थानेषु, तीर्थस्थानानि तीर्थक्षेत्राणि, याजं याजं यष्ट्वा यष्ट्वा, सत्वरं शीघ्रम्, गत्वरो गमनशीलः, कुरुवीरो जीवन्धरः, तपोवनं तापसारण्यम्, ददर्श विलोकयामास, अथवा तदेव तपोवनं विशेषयति—क्वचन कुत्रचित्, वासःसु वस्त्रेषु समासक्ता लीना ये तापसाः साधवस्तेषां कुलं समूहस्तेन कृष्यमाणा यास्तरुत्वचो वृक्षवल्कलास्तासां मर्मरारावेण मर्मरशब्देन मुखरं वाचालम्, क्वचि-त्कुत्रचित्, पाषण्डिषण्डस्य साधुसमूहस्य करमण्डिता हस्तशोभिता ये कमण्डलवः कुण्डयस्तेषां मुखेष्वग्र-भागेषु नैर्झरजलपूरणेन स्रोतःसम्बन्धिसलिलसंभरणेन जनितः समुत्पन्नो यः कलकलशब्दोऽव्यक्तध्वनि-विशेषस्तेन शोभितं समुद्भासितम्, कुत्रचित्क्वचन, बालककुलस्य शिशुसमूहस्य त्रुटितोज्झिता खण्डितत्यक्ता या मौञ्जीमेखला दर्भरशनास्ताभिर्विकीर्णं व्याप्तम्, कुत्रचन क्वचित्, कुमारिकाभिस्तापसबालिकाभिः पूर्यमाणा भ्रियमाणा बालवृक्षाणां लघुतरूणामालवाला आवापा यस्मिंस्तत्, क्वचन कुत्रचित्, कषायेण रक्तं काषायं तच्च तद्वसनं चेति काषायवसनं तस्य सेचनं समुक्षणं तेन लोहितायमानं रक्तीभवत् सरोजलं कासारतोयं यस्मिंस्तत्, क्वचन कुत्रापि, संसिक्ताः समुक्षिता ये वल्कला वृक्षत्वचस्तेषां शिखाभ्योऽग्रभागेभ्यो निर्गलन्त्यः

स्नानकालसंसक्तशैवालच्छटायमानजटापटलधारितया परितो देदीप्यमानपावकप्रसृतधूमरेखालिङ्गितैरिवोर्ध्वप्रसारितभुजदण्डैः पञ्चाग्निमध्यतपःप्रचण्डैस्तापसैर्मण्डितम्, क्वचन तत्पत्नीजनक्रियमाणनीवारपाकम्, क्वचित्तत्पुत्रच्छिद्यमानार्द्रसमित्समाकुलम्, तपोवनं ददर्श ।

असत्तपो वीक्ष्य कुरुप्रवीरः कृपानटीताण्डवरङ्गचित्तः ।
अबोधयत्ताञ्जिनधर्मसारमुपेक्षते कः पततो निकूपे ॥ ९ ॥
तण्डुलस्य विरहे जलानलाद्यागमेऽपि सफलो न हि पाकः ।
तत्त्वबोधविगमे तथा तनोर्दण्डनेन सफला न तपस्या ॥ १० ॥
मुधा जटाजूटयुता हि यूयं निटालदेशे तपनेन तप्ताः ।
बुधास्तपो हिंसनजुष्टमेतत्कर्तुं सदा नार्हथ निष्फलत्वात् ॥ ११ ॥
जटालानां जलान्ते वो जटालग्ना हि जन्तवः ।
पश्यताग्नौ च्युताः पश्चान्नश्यन्ति बहवः क्षणात् ॥ १२ ॥
तस्मादिदं क्लिष्टतपो विहाय नैर्ग्रन्थ्यरूपं परमं भजेत ।
यस्मिन्सदा सन्निहिता जिनाङ्घ्रिभक्त्यान्विते शाश्वतमुक्तिलक्ष्मीः ॥१३॥

पतन्त्यो याः पयोधारा जलधारास्तासां रेखाभिर्लेखाभिरङ्कितं शोभितम्, क्वचन कुत्रचित्, चमूरुचर्मणा शार्दूलत्वचा निर्मितानि रचितानि यान्यासनानि तेष्वासीनाः समुपविष्टा ये जपपरजना ध्यानावसक्तपुरुषास्तैः संकुलं व्याप्तम्, कुत्रचित् क्वचित्, स्नानकालेऽभिषेकसमये संसक्ताः संलग्ना ये शैवाला जलनीलीलतास्तेषां छटायमानं समूह इवाचरद् यद् जटापटलं जटासमूहस्तस्य धारितया धारकत्वेन, परितः समन्तात्, देदीप्यमानाज्ज्वल्यमानात्पावकादनलात्प्रसृता विसृता या धूमरेखा धूम्रलेखास्ताभिरालिङ्गितैरिव समाश्लिष्टैरिव ऊर्ध्वप्रसारिता उन्नमिता भुजदण्डा बाहुदण्डा यैस्तैः, पञ्चाग्नीनां मध्ये यत्तपस्तेन प्रचण्डास्तीक्ष्णास्तैः, तापसैस्तपस्विभिः, मण्डितं शोभितम्, क्वचन कुत्रचित्, तेषां तापसानां पत्नीजनैर्वनितासमूहैः क्रियमाणो विधीयमानो नीवारपाको वन्यव्रीहिपचनं यस्मिंस्तत्, क्वचित् क्वचन, तत्पुत्रैस्तापसतनयैश्छिद्यमानाभिर्भिद्यमानाभिरार्द्रसमिद्भिरार्द्रेन्धनैः समाकुलं व्याप्तम्, तपोवनं ददर्शेति क्रियासम्बन्धः ।

असत्तप इति—कृपानट्या दयानर्तक्या यत्ताण्डवं नटनं तस्य रङ्गो नृत्यभूमिश्चित्तं मानसं यस्य तथाभूतः, कुरुप्रवीरो जीवन्धरः असन्मिथ्याभूतम्, तपस्तपश्चरणम्, वीक्ष्य दृष्ट्वा, तान् तापसान्, जिनधर्मस्य सारस्तं जिनेन्द्रधर्मसर्वस्वम्, अबोधयद् अवगमयामास, निकूपे प्रहौ, पततः स्खलतो जनान्, कः किन्नामा दयालुः, उपेक्षते उपेक्षितान् कुरुते, अपि तु न कोऽपीत्यर्थः । अर्थान्तरन्यासः ॥ ९ ॥

तण्डुलस्येति—तण्डुलस्याक्षतानाम्, विरहेऽभावे, जलानलादीनां तोयाग्निप्रभृतीनामागमः समुपलम्भस्तस्मिन्, सत्यपि, यथा येन प्रकारेण, पाक ओदनपचनक्रिया, सफलः सार्थकः, न हि भवति न खलु जायते तथा तेन प्रकारेण तत्त्वबोधविगमे तत्त्वज्ञानाभावे, तनोः शरीरस्य, दण्डनेन नियन्त्रणेन, तपस्या तपश्चर्या, सफला सार्थका, न नो भवतीति शेषः । स्वागतारथोद्धतयोः सम्मिश्रणादुपजातिवृत्तम् ॥१०॥

मुधेति—जटाजूटयुताः प्रवृद्धपरुषकेशसमूहयुक्ताः, निटालदेशे भालप्रदेशे, तपनेन सूर्येण, तप्ता उष्णाकुलाः, यूयं भवन्तः, हि निश्चयेन, मुधा व्यर्थाः, स्थेति शेषः । हे बुधा विद्वान्सः, सदा सर्वदा इहलोके परलोके चेति यावत्, निष्फलत्वात् निरर्थकत्वात्, हिंसनजुष्टं हिंसोपेतम्, एतत् साम्प्रतं क्रियमाणम्, तपस्तपश्चरणम्, कर्तुं विधातुम्, नार्हथ न योग्याः स्थ । उपजातिवृत्तम् ॥११॥

जटालानामिति—हि निश्चयेन, जलान्ते जलमध्ये, जटालानां जटायुक्तानाम्, वो युष्माकम्, जटालग्नाः प्रवृद्धपरुषकेशसमूहनिबद्धाः, बहवो भूयांसः जन्तवो जीवाः, अग्नौ वह्नौ, च्युताः पतिताः, पश्चात् अनन्तरम्, क्षणाद्चिरम्, नश्यन्ति म्रियन्ते, इति पश्यत विलोकयत ॥१२॥

तस्मादिदमिति—तस्मात्कारणात्, इदं क्रियमाणम्, क्लिष्टतपः केवलदुःखकरतपश्चरणम्, विहाय त्यक्त्वा, परमं श्रेष्ठम्, नैर्ग्रन्थ्यरूपं दिगम्बरमुद्राम्, भजेत सेवेत । जिनाङ्घ्रिभक्त्या जिनेन्द्रचरणानुरागाति

इत्यादिप्रकारेण मुक्त्यङ्गनासंगमचाटुवचनायमानेन संसारविशङ्कटकवाटविघटितपटुकुञ्चिकाभूतेन धर्मघण्टापथप्रतीहारप्रवेशप्रतीहारायितेन निजगम्भीरवचनगुणेन संभावितानसन्मार्गलङ्घनजङ्घालान्सन्मार्गाक्रमणप्रवणान्कतिपयतापसानवलोक्य स्तोकेतरसंतोषसंवलितमानसः कुरुकुलोत्तंसः, तद्वनान्निर्गत्य, निसर्गरुचिरं नगरप्रमुखै रोचितमपि नरोचितं सर्वोत्तरमपि नाम्ना दक्षिणं देशमासाद्य, क्षेमपुरोपवनमध्यमाभास्यमानं घनमण्डलमध्यशोशुभ्यमानरविबिम्बसमानमत्युन्नतप्रमाणमपि भगवतो विमानमवालोकत ।

> अभ्रंलिहाग्रै रविदीप्रकूटैः सहस्रसंख्यैर्नवरत्ननद्धैः ।
> संलक्ष्यते यः फणिराडिवोद्यन्पातालल्लोकात्फणरत्नजुष्टः ॥ १४ ॥
> यत्कूटलग्ना स्फुटतारकालिः सुमावलिश्चामरलोकवृष्ट्या ।
> विभिद्यते षट्चरणैर्विलोलैर्गन्धान्वितैर्मङ्कृतमञ्जुगानैः ॥ १५ ॥
> मन्दमारुतविधूतकेतनो यः सुरासुरगणं समन्ततः ।
> आह्वयन्निव विभाति सन्ततं वन्दनाय विततेन बाहुना ॥ १६ ॥

शयेन, अन्विते सहिते, यस्मिन् नैर्ग्रन्थ्यरूपे, शाश्वतमुक्तिलक्ष्मीरविनश्वरमोक्षश्रीः, सदा सर्वदा, सन्निहिता निकटस्था, वर्तत इति शेषः । इन्द्रवज्रावृत्तम् ॥१३॥

इत्यादिप्रकारेणेति—इत्यादिप्रकारेण पूर्वोक्तप्रकारेण, मुक्त्यङ्गनाया निर्वृतिललनायाः सङ्गमे समागमे चाटुवचनायते प्रियवचनमिवाचरतीति मुक्त्यङ्गनासङ्गमचाटुवचनायमानस्तेन, संसार आजवञ्जव एव विशङ्कटकवाटौ विशालकपाटौ तयोर्विघटिते समुद्घाटने पटुकुञ्चिकाभूतेन दक्षकुञ्चिकास्वरूपेण, 'कवाटश्च कपाटश्च त्रिषु स्यादररं न ना' इति वाचस्पतिः, धर्मस्य घण्टापथो राजमार्ग इति धर्मघण्टापथस्तस्य प्रतीहारो द्वारं तस्मिन् प्रवेशोऽन्तर्यानं तस्मिन् प्रतीहारायितेन द्वारपालवदाचरता 'दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः' इति चाणक्यः, निजगम्भीरवचनगुणेन स्वकीयप्रगल्भवचनमाहात्म्येन, सम्भावितान् सम्मानितान्, असन्मार्गस्य मिथ्यामार्गस्य लङ्घनेऽतिक्रमणे जङ्घाला अतिजवास्तान् 'जङ्घालोऽतिजवस्तुल्यौ' इत्यमरः, सन्मार्गस्य सत्पथस्याक्रमणे प्रवेशे प्रवणा निपुणास्तान् कतिपयतापसान् कतिचित्तपस्विनः, अवलोक्य दृष्ट्वा, स्तोकेतरेण भूयसा सन्तोषेण सुखेन सम्वलितं सहितं मानसं चित्तं यस्य सः, कुरुकुलोत्तंसः कुरुवंशाभरणं जीवन्धर इति यावत्, तद्वनात्तत्काननात्, निर्गत्य बहिरागत्य, निसर्गरुचिरं स्वभावसुन्दरम्, नगरप्रमुखैः प्रधाननगरैः, रोचितमपि शोभितमपि, न रोचितं न शोभितमिति विरोधः पक्षे नराणां मनुष्याणामुचितो निवासयोग्यस्तमिति परिहारः, सर्वेभ्यो निखिलेभ्य उत्तर उत्तरदिक्स्थ इति सर्वोत्तरस्तथाभूतमपि, नाम्ना नामधेयेन दक्षिणं दक्षिणदिक्स्थमिति विरोधः पक्षे सर्वोत्तरमित्यस्य सर्वोत्कृष्टमित्यर्थः, देशं जनपदम्, आसाद्य प्राप्य, क्षेमपुरस्य तन्नामनगरस्योपवनमध्येऽधिक्रीडोद्यानं वाभास्यमानमतिशयेन शोभमानम्, घनमण्डलमध्ये मेघसमूहमध्ये शोशुभ्यमानमतिशयेन भ्राजमानं यद् रविबिम्बं सूर्यमण्डलं तेन समानं सदृशम्, अत्युन्नतं प्रमाणं यस्य तथाभूतमपि श्रेष्ठतरप्रमाणसहितमपि, भगवतो जिनेन्द्रस्य, विमानं मानरहितमिति विरोधः, पक्षे विशिष्टगृहम् 'विमानो व्योमयाने च सार्वभौमगृहेऽपि च' इति मेदिनी, अवालोकत ददर्श ।

अभ्रंलिहाग्रैरिति—यो विमानः, अभ्रंलिहाग्रैर्घनस्पर्शिशिरोभिः, नवरत्ननद्धैर्नूतनमणिखचितैः सहस्रसंख्यैर्दशशतसंख्याकैः, रविदीप्रकूटैर्भास्करभास्वरशिखरैः पातालल्लोकाद् रसातलाद्, उद्यन् उद्गच्छन्, फणरत्नजुष्टो मूर्धमणिसेवितः फणिराडिव नागराज इव संलक्ष्यते दृश्यते ॥१४॥

यत्कूटलग्नेति—यस्य कूटेषु शिखरेषु लग्ना समासक्ता, स्फुटतारकाणां प्रकाशितनक्षत्राणामालिः पङ्क्तिः, अमरलोकवृष्ट्या देवलोकवर्षणेन, सुमावलिश्च पुष्पसमूहश्च, विलोलैश्चपलैः, गन्धान्वितैर्गन्धसहितैः, झङ्कृतमञ्जुगानैर्झङ्कृतमनोहरगीतैः, षट्चरणैर्भ्रमरैः, विभिद्यते पृथक्क्रियते । स्फुटतारकालिः षट्पदरहिता सुमावलिश्च तत्सहिता बभूवेति भावः ॥१५॥

मन्दमारुतेति—समन्ततो विष्वक्, मन्दमारुतेन मन्थरपवनेन विधूतानि केतनानि यस्य तथा-

तादृक्षः सकललोकलोचनासेचनकं घटितकवाटकं श्रीविमानमालोक्यातिसंतोषविस्मयाभ्यां परवशो दिनेश इव सुराचलं प्रदक्षिणीकृत्य कृत्यविदामग्रणीः कुरुवंशमणिरेवं स्तोतुमारेभे ।

भवभरभयदूरं भावितानन्दसारं
धृतविमलशरीरं दिव्यवाणीविचारम् ।
मदनमदविकारं मञ्जुकारुण्यपूरं
श्रयत जिनपधीरं शान्तिनाथं गभीरम् ॥ १७ ॥

यस्याशोकतरुर्विभाति शिशिरच्छायः श्रितानां शुचं
धुन्वन्सार्थकनामधेयगरिमा माहात्म्यसंवादकः ।
यं देवाः परितो ववर्षुरमितैः फुल्लैः प्रसूनोच्चयैः
कल्याणाचलमन्ततः कुसुमिता मन्दारवृक्षा यथा ॥ १८ ॥

सकलवचनभेदाकारिणी दिव्यभाषा
शमयति भवतापं प्राणिनां मङ्क्षु यस्य ।
अमरकरविधूतश्चामराणां समूहो
विलसति खलु मुक्तिश्रीकटाक्षानुकारी ॥ १९ ॥

भूतो यो विमानः, वन्दनाय वन्दनप्रयोजनाय, विततेन विस्तारितेन, बाहुना भुजेन, सन्ततं सर्वदा सुरासुरगणं देवदानववृन्दम्, आह्वयन्निवाकारयन्निव, विभाति शोभते ॥१६॥

तादृक्षमिति—तादृक्षं तथाविधम्, सकललोकलोचनानां निखिलनरनयनानामासेचनकमतृप्तिकरम्, 'तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्' इत्यमरः, घटितकवाटकं मेलितारररकम्, श्रीविमानं श्रीभगवद्गृहम्, आलोक्य दृष्ट्वा, अतिसन्तोषविस्मयाभ्यां सन्तोषातिशयाश्चर्याभ्याम्, परवशः परतन्त्रः, दिनेशः सूर्यः सुरासुरचलमिव सुमेरुशैलमिव, प्रदक्षिणीकृत्य परिक्रम्य, कृत्यविदां कार्यज्ञानाम्, अग्रणीः प्रधानः, कुरुवंशमणिः कुरुवंशरत्नं जीवन्धर इति यावत् एवं वक्ष्यमाणप्रकारेण, स्तोतुं स्तुतिं कर्तुम्, आरेभे प्रारब्धवान् ।

भवभरेति—अये लोकाः ! भवभराणां पर्याप्तसमूहानां भयेन भीत्या दूरं विप्रकृष्टम्, भावित आनन्दसारो यस्य तम् अनुभूतानन्दभरम्, धृतं विमलं समुज्ज्वलं शरीरं येन तम्, दिव्यवाण्या दिव्यध्वनेर्विचारो यस्य तम्, मदनमदविहारं कन्दर्पदर्पापहारकम्, मञ्जुकारुण्यपूरं मनोहरदयालुताप्रवाहम्, जिनपश्चासौ धीरश्चेति जिनपधीरस्तं जिनेन्द्रधीरम्, गम्भीरं धैर्योपेतम्, शान्तिनाथं षोडशतीर्थकरम्, श्रयत सेवध्वम् । मालिनीच्छन्दः ॥ १७ ॥

यस्याशोकतरुरिति—यस्य भगवतः, शिशिरा शीतला छायानातपो यस्य सः, श्रितानां तलं प्राप्तानाम्, शुचं शोकम्, धुन्वन् दूरीकुर्वन्, सार्थकोऽन्वर्थो नामधेयस्य नाम्नो गरिमा गौरवं यस्य सः, माहात्म्यस्य लोकोत्तरप्रभावस्य संवादकः सूचकः, अशोकतरुरेतन्नामा वृक्षः, विभाति शोभते । यं भगवन्तम्, परितः समन्तात् देवा अमराः, कल्याणाचलमन्ततः सुमेरुगिरिम् परितः, कुसुमिताः पुष्पिताः मन्दारवृक्षा यथा पारिजाततरवो यथा, अमितैरसंख्यैः, फुल्लैर्विकसितैः, प्रसूनोच्चयैः पुष्पसमूहैः, ववृषुः वर्षन्ति स्म । उपमालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ १८ ॥

सकलवचनभेदेति—सकलवचनभेदानां निखिलभाषाणामाकारः संस्थानमिति सकलवचनभेदाकारः सोऽस्ति यस्यां सा सकलवचनभेदाकारिणी सर्वभाषास्वभावेत्यर्थः, यस्य भगवतः, दिव्यभाषा दिव्यध्वनिः, प्राणिनां लोकानाम्, भवतापं संसारसन्तापम्, मङ्क्षु शीघ्रम्, शमयति दूरीकरोति । अमरकरैर्निर्लिम्पपाणिभिर्विधूतः कम्पित इत्यमरकरविधूतः, मुक्तिश्रिया मोक्षलक्ष्म्याः कटाक्षान्केकरानुकरोतीति मुक्तिश्रीकटाक्षानुकारी, चामराणां बालव्यजनानाम्, समूहः समुदायः, खलु निश्चयेन, विलसति शोभते मालिनीच्छन्दः ॥ १९ ॥

कनकशिखरिशृङ्गं स्पर्धते यस्य सिंहा-
सनमिदमखिलेशं द्वेष्टि धैर्यादितीव ।
वलयमपि च भासां पद्मबन्धुं विरुन्द्धे
मम पतिरिति सोऽयं ख्यातिमापेति रोषात् ॥ २० ॥

त्रिभुवनगतिभावं घोषयन्यस्य तारो
मुखरयति दशाशा दुन्दुभिध्वानपूरः ।
शमयितुमिह रागद्वेषमोहान्धकार-
त्रितयमिव विधूनां भाति च्छत्रत्रयं तत् ॥ २१ ॥

अक्षयाय नमस्तस्मै यक्षाधीशनताङ्घ्रये ।
दक्षाय शान्तिनाथाय सहस्राक्षनुतश्रिये ॥ २२ ॥

इत्यादिस्तुतिरवमुखरे कुरुवीरे, श्रीविमानाग्र्यग्रविलसिताभ्रङ्कषचम्पकद्रुमे प्रकटितनिजानुरागपल्लवेनेव तत्क्षणसञ्जातमञ्जुलमञ्जरीभरेणावनतमौलितया तदीयदेहकान्तिविलोकनकन्दलितमन्दाक्षमेदुरतयेवावनम्रे, पुरा मौनव्रतमाचरत्स्विव मूकीभूतेषु कलकण्ठेषु कुमारगम्भीरमधुरस्तुतिशैलीरवरमभ्यस्यमानेष्विव मधुरस्वरमुद्गिरत्सु, तत्रत्यसरोवरे स्फटिकद्रवपूर्ण इव कौरववदनशशाङ्ककान्तिविद्रुततटघटितनिशाकान्तकान्तशिलाविगलितपयोधारापरिपूर्णे इव तदीयनुतिविततिनिशम-

कनकशिखरिशृङ्गमिति—इदं कनकशिखरिशृङ्गम्, धैर्याद् धीरतागुणात्, अखिलेशं सर्वस्वामिनं भगवन्तमिति यावत्, द्वेष्टि तेन सह द्वेषं करोति, इतीव हेतोः यस्य भगवतः, सिंहासनं हरिविष्टरम्, कनकशिखरिणो हेमाद्रेः शृङ्गं शिखरम्, स्पर्धते ईर्ष्यति, सोऽयं रजन्यां लुप्तसत्ताकः, पद्मबन्धुः सूर्यः, मम रात्रिन्दिवं प्रकाशीभवतो भासां वलयस्य, पतिः स्वामी, इत्येवम्, ख्यातिं प्रसिद्धिम्, आप लेभे, इति रोषात्क्रोधात्, भासां प्रभाणाम्, वलयमपि च मण्डलमपि च भामण्डलमिति यावत्, पद्मबन्धुं सूर्यम्, विरुन्धे तेन सह विरोधं कुरुते । उत्प्रेक्षोपमे । मालिनीच्छन्दः ॥ २० ॥

त्रिभुवनगतिभावमिति—यस्य भगवतः त्रिभुवनगतिभावम् अयं त्रिभुवनस्य गतिः शरणमस्तीति, भावोऽभिप्रायस्तम्, घोषयन् सूचयन्, तारो गम्भीरः, दुन्दुभिध्वानपूरो दुन्दुभिनादसमूहः, दशाशा दशदिशः, मुखरयति वाचालयति । इह लोके, रागश्च द्वेषश्च मोहश्चेति रागद्वेषमोहास्त एवान्धकारस्तम्, शमयितुं निराकर्तुम्, समागतम्, विधूनां चन्द्राणाम्, त्रितयमिव त्रयमिव, तत् प्रसिद्धम्, छत्रत्रयमातपत्रत्रितयम्, भाति शोभते । छन्दोऽलङ्कारौ पूर्ववत् ॥ २१ ॥

अक्षयायेति—अक्षयाय अविनाशिने, यक्षाधीशेन कुबेरेण नताबङ्घ्री यस्य तस्मै, दक्षाय समर्थाय, सहस्राक्षेण पुरन्दरेण नुता स्तुता श्रीरार्हन्त्यलक्ष्मीर्यस्य तस्मै, शान्तिनाथाय षोडशतीर्थंकराय, नमः नमस्कारो भवतु । 'नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च' इति चतुर्थी ॥ २२ ॥

इत्यादिस्तुतीति—कुरुवीरे जीवन्धरे, इत्यादिस्तुतिरवेण पूर्वोक्तप्रकारादिस्तवनशब्देन मुखरे वाचाले सति, श्रीविमानाग्र्यग्रे श्रीजिनालयस्य पुरस्तात् विलसितः शोभमानो योऽभ्रंकषश्चासौ चम्पकद्रुमश्चेत्यभ्रंकषचम्पकद्रुमो गगनचुम्बिचाम्पेयवृक्षस्तस्मिन्, प्रकटितः प्रदर्शितो निजानुराग एव स्वस्नेह एव पल्लवाः किसलया येन तथाभूतेनेव, तत्क्षणं तत्कालं सञ्जातः समुत्पन्नो यो मञ्जुलमञ्जरीभरो मनोहरपुष्पसमूहस्तेन, अवनतो नम्रो मौलिर्यस्य तस्य भावस्तत्ता तया, तदीयायास्तत्सम्बन्धिन्या देहकान्त्या शरीरदीप्त्या विलोकनेन दर्शनेन कन्दलितं विवृद्धं यन्मन्दाक्षं त्रपा तेन मेदुरो मिलितस्तस्य भावस्तत्ता तयेव, अवनम्रे विनते सति, पुरा जीवन्धरदर्शनात् प्राक्, मौनव्रतवाचंयमव्रतम्, आचरत्स्विव दधत्स्विव, मूकीभूतेषु तूष्णीम्भूतेषु, कलकण्ठेषु कोकिलेषु, कुमारेण जीवन्धरेण कृता या गम्भीरमधुरा सार्थमनोहरा स्तुतिशैली स्तवनपद्धतिस्तस्याः स्वरं समुच्चारणध्वनिम्, अभ्यस्यमानेष्विव शिक्षमाणेष्विव, मधुरस्वरं मनोहरशब्दम्, उद्गिरत्सु प्रकटयत्सु सत्सु, तत्र भवस्तत्रत्यः स चासौ सरोवरः कासारश्चेति तत्रत्यसरोवरस्तस्मिन्, स्फटिकद्रवेण सितोपलनिष्यन्देन पूर्णः सम्भरितस्तस्मिन्निव, कौरवस्य जीवन्धरस्य वदनमेव शशाङ्कश्चन्द्रस्तस्य

नविजृम्भितानन्दनिष्यन्दपूरित इव क्षणादवदातवारिभरपूरिते, तत्र च विचित्रशतपत्रेषु सत्वरवि-सृत्वरगन्धाकर्षितलोलम्बकदम्बकरम्बितेषु, जीवन्धरसुकृततिकुञ्चिकयेव तादृशमपि जिनभ-वनमचिरेणोद्घाटितवज्रकवाटमजायत ।

आरामोऽयं वदति मधुरैः स्वागतं भृङ्गशब्दैः
पुष्पानम्रैर्विटपिविटपैरानतिं द्राक्तनोति ।
पाद्यार्घ्यादीन्दिशति धवलैस्तत्सरस्याः पयोभि-
रित्येवं श्रीकुरुकुलपतेराद्धे भूरिशङ्काम् ॥ २३ ॥

विमानस्योत्सङ्गे विमलवपुषं शान्तिजिनपं विलोक्यान्तर्भक्त्या कुरुकुलमणेस्तुष्टमनसः ।
दृशौ राकाचन्द्रद्रुतमणिदशां प्रागभजतां युगं पाण्योः प्रापन्मुकुलितपयोजाततुलनाम् ॥२४॥

तदनु, समीपमासाद्य सद्य एवोद्गतपुलकापदेशेन वाञ्छितवदान्यतरोर्बीजावापमारचय्य प्रमदजनितनयनप्रसृतबाष्पपयोभिः सेकमिवादधानः, कश्चन नागरिकपुरुषः, प्रश्रयभरकलितार्घ-साहाय्यकेन प्रणामेन दुरितं धुनानः, करुणाकरेण कुरुवीरेण 'कस्त्वमार्य' इति पृष्टः, तुष्टहृदयः शुभोत्तरमुत्तरं वक्तुमुपादत्त ।

कान्त्या दीप्त्या विद्युताः प्राप्तचरणा यास्तटघटितनिशाकान्तकान्तशिलास्तीरखचितचन्द्रकान्तमणिमनोहर-शिलास्ताभ्यो विगलिताः क्षरिता याः पयोधारा जलधारास्ताभिः परिपूर्णः सम्भरितस्तस्मिन्निव, तदीया जीवन्धरसम्बन्धिनी या नुतिवितितिः स्तुतिपङ्क्तिस्तस्या निशमनेन श्रवणेन विजृम्भितो वृद्धिङ्गतो य आनन्द-निष्यन्दः प्रमोदप्रवाहस्तेन पूरितः सम्भरितस्तस्मिन् तथाभूते सति, तत्र च तत्रत्यसरोवरे च विचित्रशत-पत्रेषु विविधारविन्देषु, सत्वरं क्षिप्रं विसृत्वरेण प्रसरणशीलेन गन्धेन सुरभिणाकर्षितानि समाकारितानि यानि लोलम्बकदम्बकानि भ्रमरसमूहास्तैः करम्बितानि व्याप्तानि तेषु तथाभूतेषु सत्सु, जीवन्धरस्य सुकृत-ततिरेव पुण्यपङ्क्तिरेव कुञ्चिका तयेव, तादृशमपि तथाभूतमपि, जिनभवनं जिनमन्दिरम्, अचिरेण तत्कालम्, उद्घाटितौ वज्रकवाटौ यस्य तथाभूतमपनीतवज्रारम्, अजायत बभूव ।

आरामोऽयमिति—अयमेषः, आराम उद्यानम्, मधुरैः कर्णप्रियैः, भृङ्गशब्दैर्भ्रमरगुञ्जितैः, स्वागतं शुभागमनम्, वदति कथयति, पुष्पानम्रैः कुसुमविनतैः, विटपिविटपैः शाखिशाखाभिः, द्राक् झटिति, आनतिं नमस्कारम्, तनोति विस्तारयति, तत्सरस्यास्तत्रत्यकासारस्य, धवलैः स्वच्छैः, पयोभिः सलिलैः, पाद्यार्घ्यादीन् पादोदकार्घ्यप्रभृतिसत्कारान्, दिशति सम्पादयति, श्रीकुरुकुलपतेर्जीवन्धरस्य, इत्येवं पूर्वोक्त-प्रकाराम्, भूरिशङ्कां प्रचुरसंदेहम्, आद्धे चकार । मन्दाक्रान्तावृत्तम् ॥ २३ ॥

विमानस्येति—विमानस्य चैत्यालयस्य, उत्सङ्गे मध्ये, विमलवपुषं निर्मलगात्रम्, शान्तिजिनपं षोडशतीर्थंकरप्रतिबिम्बम्, विलोक्य दृष्ट्वा, अन्तर्भक्त्या हृदयानुरागातिशयेन, तुष्टमनसः प्रसन्नचेतसः, कुरु-कुलमणेर्जीवन्धरस्य, दृशौ नयने, प्राक्झटिति, राकाचन्द्रेण पूर्णिमानिशाकरेण द्रुतौ प्राप्तद्रवौ यौ मणी चन्द्रकान्तमणी तयोर्दशामवस्थाम्, अभजतामसेवताम्, पाण्योर्हस्तयोः, युगं युगलञ्च, मुकुलिते निमीलिते ये पयोजाते कमले तयोस्तुलनां सादृश्यम्, प्रापत् अलब्ध । शिखरिणीवृत्तम् ॥ २४ ॥

तदन्विति—तदनु तदनन्तरम्, समीपं निकटम्, आसाद्य प्राप्य, सद्य एव झटित्येव, उद्गतानां प्रकटितानां पुलकानां रोमाञ्चानामपदेशो व्याजं तेन, वाञ्छितवदान्यतरोः काङ्क्षितकल्पानोकहस्य, बीजावापं बीजाधानम्, आरचय्य कृत्वा, प्रमदजनितानि हर्षसमुद्भूतानि नयनप्रसृतानि नेत्रोद्गलितानि यानि बाष्प-पयांस्यश्रुजलानि तैः, सेकं सिञ्चनम्, आदधान इव कुर्वाण इव, कश्चन कोऽपि, नागरिकपुरुषः पौरजनः, प्रश्रयभरेण विनयसमूहेन कलितं विहितमर्घसाहाय्यकं यस्य तेन, प्रणामेन नमस्कारेण, दुरितं पापम्, धुनानो दूरीकुर्वाणः, करुणाकरेण दयाकरेण, कुरुवीरेण जीवन्धरेण, 'आर्य ! हे महोदय ! त्वं भवान्, कः किम्परिचयः' इत्येवम्, पृष्टोऽनुयुक्तः, तुष्टहृदयः संतुष्टमानसः, सन्, शुभोत्तरं शुभपरिणामम्, उत्तरं प्रतिवचनम्, वक्तुं निगदितुम्, उपादत्त जग्राह, मत्युत्तरं दातुं तत्परो बभूवेति यावत् ।

प्रथिता विभाति नगरी गरीयसी
धुरि यत्र रम्यसुदतीमुखाम्बुजम् ।
कुरुविन्दकुण्डलविभाविभावितं
प्रविलोक्य कोपमिव मन्यते जनः ॥ २५ ॥

या क्षेमनगरीत्येवमभिख्यामावहन्त्यपि ।
पाकवैरिपुराभिख्यां दधाति मणिमन्दिरैः ॥ २६ ॥

तत्रास्ति देवान्त इति प्रतीतो नृपः कृपाचित्रितचित्तगेहः ।
क्षोणीशकोटीरसुमावलीनां धूलिव्रजैः पिञ्जरिताङ्घ्रिपीठः ॥ २७ ॥

यस्मिञ्छासति मेदिनीं नरपतौ सद्वृत्तमुक्तात्मता
हारेष्वेव गुणाकरेषु समभूच्छिद्राणि चैवान्ततः ।
लौल्यादन्यकलत्रसंगमरुचिः काञ्चीकलापे परं
सम्प्राप्तः श्रवणेषु खञ्जनदृशां नेत्रेषु पारिप्लवः ॥ २८ ॥

तस्य श्रेष्ठिपदप्राप्तः सुभद्रो वणिजां पतिः ।
स्वयं निर्वृतिरस्यासीद्या कान्ता निर्वृतेः पदम् ॥ २९ ॥

प्रथितेति—प्रथिता प्रसिद्धा, गरीयसी विशाला, नगरी वक्ष्यमाणनामधेया पुरी, विभाति शोभते, यत्र नगर्याम्, जनो लोकः, धुर्यग्रभागे, कुरुविन्दकुण्डलविभया पद्मरागमणिनिर्मितकर्णाभरणदीप्त्या विभावितं रक्तवर्णीकृतम्, सुदत्या मुखाम्बुजं सुदतीमुखाम्बुजं रम्यं च तत्सुदती मुखाम्बुजञ्चेति रम्यसुदतीमुखाम्बुजं सुन्दरवनितावदनवारिजम्, प्रविलोक्य दृष्ट्वा, कोपमिव क्रोधमिव तस्या इति शेषः, मन्यते जानाति । तद्गुणालङ्कारः । मञ्जुभाषिणीछन्दः 'सजसा जगौ भवति मञ्जुभाषिणी' इति लक्षणात् ॥ २५ ॥

या क्षेमनगरीति—या नगरी, 'क्षेम नगरी' इत्येवमितिप्रकाराम्, अभिख्यां नामधेयम्, आवहन्त्यपि दधत्यपि, मणिमन्दिरै रत्ननिकेतनैः, पाकवैरिपुरमित्यभिख्यां नामधेयं दधातीति विरोधः । पक्षे पाकवैरिणः पुरन्दरस्य पुरं नगरम्, अमरावतीति यावत्, तस्याभिख्यां शोभाम्, दधाति, 'अभिख्या नामशोभयोः' इत्यमरः । विरोधाभासालंकारः ॥ २६ ॥

तत्रास्तीति—तत्र क्षेमनगर्याम्, कृपया करुणया चित्रितं चित्रोपेतं चित्तगेहं मनोगृहं यस्य सः, क्षोणीशानां पृथिवीपालानां कोटीरेषु मुकुटेषु विद्यमाना या सुमावल्यः पुष्पस्रजस्तासाम्, धूलिव्रजैः रेणुनिकरैः, पिञ्जरितं पीतमङ्घ्रिपीठं चरणासनं यस्य सः, देवान्त इति प्रतीतः प्रख्यातः, नृपो राजा, अस्ति विद्यते ॥ २६ ॥

यस्मिन्निति—यस्मिन् नरपतौ राजनि, मेदिनीं वसुधाम्, शासति पालयति सति, सन्ति निर्दुष्टानि वृत्तानि वर्तुलानि मुक्तानि मुक्ताफलान्यात्मा देही येषां तेषां भावस्तत्ता, अन्ततो मध्ये छिद्राणि च रन्ध्राणि च, गुणाकरेषु तन्तुसहितेषु, हारेष्वेव मणिमालास्वेव, समभूत् आसीत्, अन्यत्र गुणाकरेषु गुणखनिषु जनेषु सद्वृत्तेन सदाचारेण, मुक्तो रहित आत्मा येषां तेषां भावस्तत्ता, अन्ततो हृदये, छिद्राणि दोषाश्च, नैव समभूत् । लोलस्य भावो लौल्यं तस्मात्, चपलत्वात्, अन्यकलत्रैरन्यस्त्रीभिः संगमस्य सम्बन्धस्य रुचिरभिलापः परं केवलम्, काञ्चीकलापे मेखलामण्डले, समभूत्, अन्यत्र लौल्यात् सतृष्णत्वात्, अन्यकलत्रैः परभार्याभिः सङ्गमस्य सुरतस्य रुचिरभिलाषो नाभूत्, 'दुर्गस्थाने नृपादीनां कलत्रं श्रोणिभार्ययोः' इति रभसः, पारिप्लवश्चञ्चलत्वम्, सम्प्राप्तमायतत्वात्प्राप्तं श्रवणं कर्णं यैस्तेषु, खञ्जनदृशां खञ्जरीटलोचनानाम्, नेत्रेषु नयनेषु, केवलं समभूत्, अन्यत्र, सम्प्राप्तं लब्धं श्रवणं शास्त्राकर्णनं यैस्तेषु जनेषु पारिप्लवः क्षुब्धता न समभूत् । परिसंख्यालंकारः । शार्दूलविक्रीडितवृत्तम् ॥ २८ ॥

तस्येति—तस्य नरपतेः, श्रेष्ठिपदप्राप्तो राजश्रेष्ठिपदारूढः, सुभद्र एतन्नामधेयः, वणिजां पति

तयोरभूत्सुतारत्नं क्षेमश्रीरिति विश्रुतम् ।
प्रत्यादेशः सरस्वत्याः पर्यायः कमलाकृतेः ॥ ३० ॥
या कान्तीनां परा संपद्विनयाम्बुधिचन्द्रिका ।
लज्जाया जननस्थानं जयकेतुर्मनोजनेः ॥ ३१ ॥
विधाय पूर्णशीतांशुं विधाता यन्मुखाह्वयम् ।
निजासनाब्जनिद्रातो नूनं दुःस्थितिरञ्जसा ॥ ३२ ॥
एतस्या वदनं दन्तकान्तिभिः क्लृप्तकेसरम् ।
पद्मं ध्रुवं मधुलिहा भवितव्यं भवादृशा ॥ ३३ ॥

अत्रत्यजिनालयवज्रकवाटविघटनकुञ्चिकायमानस्तुतिवचनरचनः पुरुषपञ्चवदनस्तत्पतिर्भविष्यतीति जननलग्नफलनिश्चयचतुरकार्तान्तिकवार्ता निशम्य तदवसरप्रतिपालनविनिद्रेण सुभद्रेण, प्रेषितो गुणभद्रसमाह्वयोऽहं, भवन्तं समीक्ष्य कृतार्थतामनुभवामीति व्याहृत्य, सुभद्राय वृत्तान्तमिमं कथयितुं निर्जगाम ।

तदनु सरसीपुष्पाण्यादाय भक्तिभरानतो
जिनपभवनं विन्दन्वन्दारुकल्पकशाखिनः ।
जिनवरपतेः पूजां कर्तुं समारभत स्वयं
कुरुकुलवरः सोऽयं पारीणपुण्यगुणाकरः ॥ ३४ ॥

वैश्येशः, अस्तीति शेषः, अस्य श्रेष्ठिनः, निर्वृतिः एतन्नामधेया सा कान्ता वल्लभा, आसीद्, या स्वयं स्वेनैव, निर्वृतेः संतोषस्य सुखस्य, पदं स्थानम्, वर्तत इति शेषः ॥ २९ ॥

तयोरिति—सा च स चेति तौ तयोर्दम्पत्योः, सरस्वत्याः शारदायाः प्रत्यादेशः प्रतिकृतिः, कमलाकृतेर्लक्ष्मीसंस्थानस्य, पर्यायो रूपान्तरम्, क्षेमश्रीरिति विश्रुतं प्रसिद्धम्, सुतारत्नं पुत्रीरत्नम्, अभूदासीत् ॥ ३० ॥

येति—या क्षेमश्रीः, कान्तीनां दीप्तीनाम्, परा श्रेष्ठा, संपद् गुणोत्कर्षः, विनयाम्बुधेर्नम्रतासागरस्य चन्द्रिका कौमुदी, लज्जायास्त्रपायाः, जननस्थानमुत्पत्तिधाम, मनोजनेः कामस्य, जयकेतुर्विजयवैजयन्ती । अस्तीति शेषः । रूपकालंकारः ॥३१॥

विधायेति—विधाता ब्रह्मा, यन्मुखाह्वयं यद्वदननामधेयम्, पूर्णशीतांशुं, पूर्णचन्द्रमसम्, विधाय रचयित्वा, निजासनं स्वकीयविष्टरभूतं यदब्जं कमलं तस्य निद्रातो निमीलनात्, नूनं निश्चयेन, अञ्जसा याथार्थ्येन, दुःस्थितिः संकटापन्नस्थितिः, वर्तत इति शेषः ॥३२॥

एतस्या इति—एतस्याः क्षेमश्रियाः वदनं वक्त्रम्, दन्तकान्तिभिर्दशनदीप्तिभिः, क्लृप्तकेसरं किञ्जल्ककलितम्, पद्मं कमलम्, ध्रुवं निश्चयेन, वर्तते, भवादृशा त्वादृशेन, तत्र, मधुलिहा भ्रमरेण, भवितव्यम्, भावे प्रयोगः ॥३३॥

अत्रत्येति—अत्रत्यजिनालयस्य वज्रकवाटयोः सुदृढारत्योर्विघटनेऽपनयने कुञ्चिकायमाना स्तुतिवचनरचना स्तोत्रवचनसन्दर्भो यस्य तथाभूतः, पुरुषपञ्चवदनो मनुजमृगेन्द्रः, तत्पतिः क्षेमश्रीधवः, भविष्यति, इत्येवम्, जननलग्नस्य जन्मलग्नस्य फलनिश्चये परिणामनिश्चये चतुरा निपुणा ये कार्तान्तिका दैवज्ञास्तेषां वार्तां निवेदनम्, निशम्य समाकर्ण्य, तदवसरस्य तत्कालस्य प्रतिपालने प्रतीक्षणे विनिद्रः सावधानस्तेन, सुभद्रेण राजश्रेष्ठिना, प्रेषितः प्रहितः, गुणभद्रसमाह्वयो गुणभद्रनामधेयः, अहं भवत्पुरोवर्ती, भवन्तं श्रीमन्तम्, समीक्ष्य विलोक्य, कृतार्थतां कृतकृत्यताम्, अनुभवामि भुञ्जे, इत्येवम्, व्याहृत्य निगद्य, सुभद्राय श्रेष्ठिने, इममेतम्, वृत्तान्तमुदन्तम्, कथयितुं निवेदयितुम्, स निर्जगाम निश्चक्राम ।

तदनु सरसीति—तदनु तदनन्तरम्, पारीणं पारंगतं पुण्यं सुकृतं यस्य स पारीणपुण्यः, गुणानां दयादाक्षिण्यादीनामाकरो गुणाकरः, पारीणपुण्यश्चासौ गुणाकरश्चेति पारीणपुण्यगुणाकरः, सोऽयं प्रसिद्धः, कुरुकुलवरो जीवन्धरः, स्वयं स्वतः, सरसीपुष्पाणि कासारकुसुमानि, आदाय गृहीत्वा, भक्तिभरेणानुरागाति-

गुणभद्रोऽपि संप्राप्य सुभद्रं भद्रमन्दिरे ।
चिन्तानिद्रां बिभेदाशु वचःपीयूषसेचनैः ॥ ३५ ॥

कश्चित्पूरुषचन्द्रमाः कुवलयायाह्लादसंदायकः
संतोषाम्बुधिवर्धकः स्तुतिमयीं पीयूषधारां किरन् ।
बाह्योद्याननभःस्थलीमवतरन्नाभाति यद्दर्शना-
दारामः सरसीजलच्छलवशादानन्दबाष्पं दधे ॥ ३६ ॥

सोऽयं न चन्द्रो न च पञ्चबाणो न वासवः किंतु वसन्त एव ।
कुतोऽन्यथा चम्पकपादपस्य प्रसूनभारस्ततगन्धपूरः ॥ ३७ ॥

तस्मिन्स्तुतिरवमुखरे पुरुषकुञ्जरे वनस्थलीं भास्वतीव प्राचीदिशमधिगच्छति जिनभवनं कमलवनं च क्षणादुद्घाटितकवाटमजायतेति ।

श्रुत्वा तदीयाममृतोर्मिलां गां तस्मै ददावुच्छ्रितपारितोषिकम् ।
मनोरथस्फूर्तिलताप्ररोहोपदानमौल्यं किल तद्वणिक्पतिः ॥ ३८ ॥

शयेन आनतो विनम्र इति भक्तिभरानतः, सन् जिनपभवनं जिनेन्द्रमन्दिरम्, विन्दन् प्राप्नुवन्, तत्र प्रविशन्निति यावत्, वन्दारूणां वन्दनशीलानां कल्पकशाखी कल्पवृक्षस्तस्य तथाभूतस्य, जिनवरपतेर्जिनेन्द्रदेवस्य, पूजां सपर्याम्, कर्तुं विधातुम्, समारभत समारब्धवान् । हरिणीच्छन्दः ॥३४॥

गुणभद्रोऽपीति—गुणभद्रोऽपि श्रेष्ठिसेवकोऽपि, भद्रमन्दिरे भव्यभवने, सुभद्रमेतन्नामानं राजश्रेष्ठिनम्, संप्राप्य लब्ध्वा, वचःपीयूषस्य वचनसुधायाः सेचनानि समुक्षणानि तैः, आशु झटिति, चिन्तानिद्रां चिन्तास्वापम्, बिभेद खण्डयामास, तस्येति शेषः । वरागमनसमाचारेण तस्य चिन्तां दूरीचकारेति भावः ॥३५॥

कश्चिदिति—कोर्वलयं कुवलयं तस्मै महीमण्डलाय, पक्षे नीलकमलाय, आह्लादसंदायको हर्षप्रदायकः, संतोष एवाम्बुधिः सन्तोषाम्बुधिः संतृप्तिसागरस्तस्य वर्धको वृद्धिकरः, स्तुतिमयीं स्तवनरूपाम्, पीयूषधारां सुधाधाराम्, किरन् प्रक्षिपन्, बहिर्भवं बाह्यं तच्च तदुद्यानञ्चेति बाह्योद्यानं बाह्योपवनं तदेव नभःस्थली गगनभूमिस्ताम्, अवतरन् अवतीर्णो भवन्, कश्चित् कोऽपि, पूरुष एव चन्द्रमाः पूरुषचन्द्रमा मनुजमृगाङ्कः, आभाति पुनःपुनरतिशयेन वा शोभते । यस्य दर्शनं यद्दर्शनं तस्मात् यदवलोकनात्, आराम उद्यानम्, सरस्याः कासारस्य जलं सलिलं तस्य छलं व्याजं तस्मात्, आनन्दबाष्पं हर्षाश्रु, दधे धृतवान् । रूपकालंकारः । शार्दूलविक्रीडितवृत्तम् ॥३६॥

सोऽयमिति—सोऽयं प्रसिद्धः पूरुषः, न चन्द्रो न निशाकरः, न च पञ्चबाणो न च मदनः, न वासवो न पुरन्दरः, वर्तत इति शेषः, किन्तु वसन्त एव पुष्पाकर एव, वर्तत इति शेषः । अन्यथा-इतरथा, चम्पकपादपस्य चाम्पेयतरोः, प्रसूनभारः कुसुमकलापः, ततो विस्तृतो गन्धपूरः सुरभिप्रवाहो यस्य तथाभूतः, कुतः कथम्, स्यादिति शेषः । अपह्नुतिरलंकारः । उपजातिवृत्तम् ॥ ३७ ॥

तस्मिन्निति—स्तुतिरवेण स्तवनशब्देन मुखरो वाचालस्तस्मिन्, पुरुषकुञ्जरे पुरुषश्रेष्ठे, तस्मिन् सात्यन्धरौ, प्राचीदिशं पूर्वाशाम्, भास्वतीव भानाविव, वनस्थलीं काननभूमिम्, अधिगच्छति समधितिष्ठति सति, जिनभवनं जिनेन्द्रमन्दिरम्, कमलवनं च पद्मारण्यञ्च, क्षणादचिरेण, उद्घाटितकवाटमपनीतारं प्रस्फुटितदलञ्च, अजायत बभूव, इतीत्थं गुणभद्रः सुभद्रं प्रति जगाद ।

श्रुत्वेति—स चासौ वणिक्पतिश्चेति तद्वणिक्पतिः, सुभद्रश्रेष्ठी, अमृतस्योर्मिला तामृ पीयूषतरङ्गवतीम् तदीयां तत्सम्बन्धिनीम्, गां वाणीम्, श्रुत्वा निशम्य, तस्मै गुणभद्राय, मनोरथस्य काङ्क्षितस्य स्फूर्तिरेव विकास एव लता वल्ली तस्याः प्ररोहोऽङ्कुरस्तस्योपदानं समर्पणं तस्य मूल्यं वस्नम् 'मूल्यं वस्नोऽप्यवक्रयः' इत्यमरः, उच्छ्रितपारितोषिकं प्रचुरपुरस्कारम्, ददौ दत्तवान्, किलेति वार्तायां वाक्यालङ्कारे वा । अत्र प्रथमं चरणमिन्द्रवज्रायास्तृतीयमुपेन्द्रवज्रायाः, द्वितीयचतुर्थाविन्द्रवंशायाः, सर्वेषां मेलनादुपजातिवृत्तम् ॥ ३८ ॥

तदनु निजसहायतासहितो वणिजां पतिस्तुङ्गतमशताङ्गमारूढः, पुरतोरणमतीत्य, पुरतो विराजमानं श्रीविमानमासाद्य, तत्र वन्दारुजनसन्दोहमन्दारस्य शान्तिनाथस्य पादारविन्दसेवाहेवाकभावकलितान्तरङ्गम्, अगण्यपुण्यपुञ्ज इव विस्तीर्णस्फटिकोपलविष्टरे तस्थिवांसं जीवन्धरमद्राक्षीत् ।

पश्यता वैश्यनाथेन परमोत्कृष्टलक्षणम् ।
निर्निमीलननेत्रेण निरणाय्यस्य वैभवम् ॥ ३९ ॥

कान्त्या परीतं कुरुवंशकेतुमुवाच मोदेन विशामधीशः ।
सप्रश्रयं सत्कृतशान्तिनाथमुपागतः स्वागतमारचय्य ॥ ४० ॥

फलं दृष्ट्योः प्राप्तं परिणतमयं मे सुदिवस-
स्तथास्मद्वंश्यानां कृतसुकृतवल्ली च फलिता ।
मदीयेष्टार्थोऽपि स्फुटतरमदूरे विजयते
यतः श्रीमान्प्राप्तो नयनपथपान्थत्वमधुना ॥ ४१ ॥

पद्माप्ततां कुवलयोल्लसनं च तन्व-
त्यद्य प्रकाशति पुरस्त्वयि राजहंसे ।
सूर्यो भयाकलितवृत्तिरभूच्छशाङ्को
दोषाकरो धृतकलङ्कभरः क्षयिष्णुः ॥ ४२ ॥

तदनु निजसहायतेति—तदनु तदनन्तरम्, निजसहायतासहितः स्वकीयमित्रसमूहसहितः, वणिजां सार्थवाहानाम्, पतिः स्वामी, सुभद्र इति यावत्, अतिशयेन तुङ्गं तुङ्गतमं तच्च तच्छताङ्गञ्चेति तुङ्गतमशताङ्गं तत् समुच्चस्यन्दनम्, आरूढोऽधिष्ठितः, सन्, पुरतोरणं नगरद्वारम्, अतीत्य समुल्लङ्घ्य, पुरतोऽग्रे, विराजमानं शोभमानम्, श्रीविमानं श्रीजिननिकेतनम्, आसाद्य प्राप्य, तत्र श्रीविमाने, वन्दारुजनानां वन्दनशीलपुरुषाणां सन्दोहः समूहस्तस्य मन्दारः पारिजातकस्तस्य, शान्तिनाथस्य षोडशतीर्थकरस्य, पादारविन्दसेवायां चरणकमलाराधनायां यो हेवाकभावो नम्रत्वभावस्तेन कलितं सहितमन्तरङ्गं स्वान्तं यस्य तम्, अगण्यपुण्यपुञ्ज इवापरिमितसुकृतराशाविव, विस्तीर्णं विस्तृतं यत्स्फटिकोपलविष्टरं सितोपलासनं तस्मिन्, तस्थिवांसं स्थितम्, जीवन्धरं सात्यन्धरिम्, अद्राक्षीद् विलोकयामास ।

पश्यतेति—परमोत्कृष्टानि श्रेष्ठतमानि लक्षणानि सामुद्रिकशास्त्रप्रणीतचिह्नानि यस्य तं जीवन्धरम्, पश्यता विलोकयता, निर्निमीलने निमेषरहिते नेत्रे यस्य तेन, वैश्यनाथेन सुभद्रश्रेष्ठिना, अस्य सात्यन्धरेः, वैभवं माहात्म्यम्, निरणायि निर्णीतम् । कर्मणि प्रयोगः ॥ ३९ ॥

कान्त्येति—सप्रश्रयं सविनयम्, सत्कृतः शान्तिनाथो येन तं सत्कृतशान्तिनाथं सुपूजितषोडशतीर्थकरम्, कान्त्या दीप्त्या, परीतं सहितम्, कुरुवंशस्य केतुर्ध्वजस्तं जीवन्धरम् उपागतः प्राप्तः, विशामधीशः श्रेष्ठी सुभद्र इति यावत्, स्वागतं शुभागमनम्, आरचय्य कृत्वा, मोदेन हर्षेण, उवाच जगाद ॥ ४० ॥

फलमिति—यतः कारणात्, श्रीमान् भवान्, नयनपथस्य नेत्रमार्गस्य पान्थः पथिकस्तस्य भावस्तत्त्वम्, प्राप्तः समायातः, ममेति शेषः, तत् तस्मात्कारणात्, अधुना साम्प्रतम्, दृष्ट्योर्नयनयोः, परिणतं पक्वम्, फलं प्रयोजनम्, प्राप्तं लब्धम्, मयेति शेषः, अयमेषः, मे मम, सुदिवसः शोभनवासरः अस्तीति शेषः, वंशे भवा वंश्याः, मम वंश्या अस्मद्वंश्यास्तेषां मत्पूर्वपुरुषाणाम्, कृतसुकृतवल्ली कृतपुण्यलता, फलिता च सञ्जातफला च जातेति शेषः, मदीयेष्टार्थोऽपि मदीप्सितार्थोऽपि, स्फुटतरं प्रकटतरं यथा स्यात्तथा, अदूरे निकटे, विजयते सर्वोत्कर्षेण वर्तते । शिखरिणीच्छन्दः ॥ ४१ ॥

पद्माप्ततामिति—पद्मया लक्ष्म्या आप्तः प्राप्तस्तस्य भावस्तत्ता ताम्, पक्षे पद्मैः कमलैराप्तस्तस्य भावस्ताम्, कुवलयस्य महीमण्डलस्य पक्षे नीलकमलस्योल्लसनं विकासनञ्च, तन्वति विस्तारयति, त्वयि भवति, राजहंसे श्रेष्ठनृपतौ अथवा राजा च चन्द्रश्च हंसश्च सूर्यश्च, अनयोः समाहारस्तस्मिन्, पुरोऽग्रे

युष्मत्पादपयोजधूलिनिचयैरालयो मामकः
शुद्धः कार्य इति प्रमोदकलिका चित्ते जरीजृम्भते ।
सेयं संप्रति धीमता विकसिता कार्या न चेदेष वै
द्रागाकारखिलीभवत्तदभिधावाच्यार्थमाटीकते ॥ ४३ ॥

सकलभवनवृन्दं सत्पदाम्भोजधूली-
परिचयपरिहीनं नैजनाम्नोऽन्यथार्थम् ।
भजत इति ह लोके सुप्रतीतं सुधीनां
निखिलगुणपयोधे मद्वचोऽङ्गीकुरुष्व ॥ ४४ ॥

तदनन्तरमनुकम्पितचेतः कुरुकुलशशाङ्कस्तद्वचनं बहुमन्यमानः, तपनरथजवनिन्दनेन स्यन्दनेन गोपुरद्वारं प्रविश्य, प्रासादपालिकावातायनप्रसृतपुरन्ध्रिकापाङ्गतरङ्गितनीलोत्पलश्यामलतोरणदामावलीषु प्रतोलीषु रक्तनयननालीको नालीकसायकस्तालीफलस्तनीनां व्यालीनिभवेणीनां रमणीमणीनामक्षिभ्यः पुष्कलसंमदाश्रुलहरीम्, कटितटेभ्यो नीवीबन्धपद्वीम्, हृदयेभ्यो धैर्यपरिपाटीम्, युगपद्गलितामादधानो, मन्दमन्दं तन्मन्दिरमविन्दत ।

प्रकाशति दीप्यमाने सति, प्रकाशतीत्यत्रात्मनेपदाभावश्चिन्त्यः, सूर्यो दिवाकरः, भया दीप्त्या आकलिता युक्ता वृत्तिर्यस्य तथाभूतः, शशाङ्को मृगाङ्कः, दोषाकरो रात्रिकरः पक्षे दोषाणामवगुणानामाकरः खनिः, धृतः कलङ्कभरो लक्ष्मभरः पक्षे कल्मषसमूहो येन तथाभूतः, क्षयिष्णुः क्षयशीलश्च, अभूत् बभूव । अन्यस्मिन्प्रतापाधिके विद्यमाने निष्प्रतापा अन्ये निष्प्रभा भीताश्च भवन्त्येवेति भावः । श्लेषः । वसन्ततिलकावृत्तम् ॥ ४२ ॥

युष्मत्पादेति—अत्र नगरे, मामको मदीयः, आलयः आगत्य लीयते यस्मिन्नित्यालयो भवनम्, तव पादपयोजयोश्चरणकमलयोर्धूलिनिचयाः परागसमूहास्तैः शुद्धः पवित्रः, कार्यो विधातव्यः, इत्येवम्, प्रमोदकलिका हर्षकोरकः 'कलिका कोरकः पुमान्' इत्यमरः, चित्ते हृदये, जरीजृम्भते अतिशयेन वर्धते, सा पूर्वोक्ता, इयमेषा प्रमोदकलिका, सम्प्रतीदानीम्, धीमता सुधिया भवता, विकसिता प्रस्फुटा, कार्या कर्तव्या, न चेद् यद्येवं न स्यात्, तर्हि, वै निश्चयेन, एष आलयशब्दः, द्राक् सत्वरम्, आकारेण संस्थानेन दीर्घाकारवर्णेन च खिलीभवन् विरलीभवन् यस्तदभिधायास्तच्छब्दस्य वाच्यार्थः प्रतिपाद्यार्थस्तम्, आटीकते प्राप्नोति आकारेण रहित आलयो लयो भवति तस्य च प्रतिपाद्योऽर्थो विनाशस्तं प्राप्नोति यावत् ॥४३॥

सकलभवनवृन्दमिति—सतां साधूनां यानि पदाम्भोजानि चरणकमलानि तेषां धूली परागस्तस्याः परिचयः सम्पर्कस्तेन परिहीनं रहितम्, सकलभवनवृन्दं निखिलनिकेतननिकुरम्बम्, नैजनाम्नः स्वकीयाभिधानस्य, अन्यथार्थं विपरीताभिधेयम्, भजते प्राप्नोति, इत्येवम्, लोके भुवने, सुधीनां विदुषाम्, अत्र सुधीशब्दस्य षष्ठीबहुवचने 'सुधीनाम्' इति प्रयोगश्चिन्त्यः, सुप्रतीतं सुप्रसिद्धम्, अस्तीति शेषः । हे निखिलगुणपयोधे ! सकलगुणसागर ! मद्वचोऽस्मद्वचनम्, अङ्गीकुरुष्व स्वीकुरु । 'ह' इत्यव्ययं पादपूर्तौ । मालिनीच्छन्दः ॥४४॥

तदनन्तरमिति—तदनन्तरं तत्पश्चात्, अनुकम्पितं दयायुक्तं चेतो हृदयं यस्य तथाभूतः, कुरुकुलशशाङ्कः कुरुवंशचन्द्रः, जीवन्धर इति यावत्, तद्वचनं श्रेष्ठिवाचम्, बहुमन्यमानः—आदरेण स्वीकुर्वाणः, तपनरथजवनिन्दनेन सूर्यस्यन्दनरयविनिन्दकेन, स्यन्दनेन शताङ्गेन, गोपुरद्वारं प्रधानप्रवेशमार्गम्, प्रविश्य प्रवेशं कृत्वा, प्रासादपालिकाया हर्म्यसन्ततेर्वातायनेभ्यो गवाक्षेभ्यः प्रसृतानि निर्गत्य विस्तृतानि यानि पुरन्ध्रिकाणां सौभाग्यवतीनामपाङ्गानि कटाक्षास्तैस्तरङ्गितानि कल्लोलितानि यानि नीलोत्पलानि नीलकमलानि तैः श्यामला नीलप्रभास्तोरणदामावल्यो वन्दनस्रक्सन्ततयो यासु तासु, प्रतोलीषु रथ्यासु, रक्ते लोहितवर्णे नयननालीके नेत्रारविन्दे यस्य तथाभूतः, नालीकसायकः कमलपुष्पायुधः कामदेवपदधारकः जीवन्धर इति यावत्, तालीफले इव स्तनौ यासां तासाम्, व्यालीनिभा नागीतुल्या वेण्यः कबर्यो यासां तासाम्, रमणीमणीनां नारीश्रेष्ठानाम्, अक्षिभ्यो नयनेभ्यः, पुष्कलसंमदाश्रुलहरीं पूर्णप्रहर्षबाष्पपरम्पराम्, कटितटेभ्यो-

तत्रालये कनकपीठमलंकरिष्णु-
जिष्णुप्रतीपविभवः कुरुवंशकेतुः ।
संप्रार्थितो बहुतरं वणिजां वरेण
कन्याकराम्बुरुहपीडनमन्वमंस्त ॥ ४५ ॥

हुताशने साक्षिणि मङ्गलग्ने सुभद्रदत्तां कुरुसिंह एषः ।
क्षेमश्रियं कोमलगात्रवल्लीं जग्राह पाणौ जगदेकवीरः ॥ ४६ ॥
पाणिपद्मं गृहीत्वास्याः स्विन्नाङ्गुलिदलोज्ज्वलम् ।
मृदुलं सुकुमाराङ्गयाः संदिग्धे कुरुकुञ्जरः ॥ ४७ ॥

तथाहि—
अवश्यायाकीर्णः किमु कमलकोशो न हि न हि
प्रभेदृक्तस्यास्ते किमु नवसुधासूतिमिहिका ।
न चास्याः सौगन्ध्यं सपदि करनीरेजविगल-
न्मधुस्यन्दः किं वा न हि न हि सुधैव प्रसरति ॥४८॥

तौ दम्पती महाकान्ती मणिभूषणमण्डितौ ।
चकासामासतुर्वेद्यां रतिपञ्चशराविव ॥४९॥

वलग्नप्रदेशेभ्यः, नीवीबन्धपद्वीं अधोवस्त्रग्रन्थिसन्ततिम्, दर्पेभ्यश्चित्तेभ्यः, धैर्यपरिपाटीं धीरतापरम्पराम्, युगपदेककालम्, गलितां पतिताम्, आदधानः कुर्वाणः, मन्दमन्दं शनैः शनैः, तन्मन्दिरं सुभद्रश्रेष्ठिसदनम्, अविन्दत लेभे ।

तत्रालय इति—तत्रालये तस्मिन् भवने, कनकपीठं सुवर्णसिंहासनम्, अलंकरिष्णुः शोभयन् , जिष्णुप्रतीपो पुरन्दरप्रतिपक्षो विभव ऐश्वर्यं यस्य सः, कुरुवंशकेतुर्जीवन्धरः, वणिजां वरेण सुभद्रेण, बहुतरं प्रचुरतरम्, संप्रार्थितः प्रार्थनाविषयीकृतः सन् , कन्याकराम्बुरुहपीडनं पतिंवरापाणिपद्मपीडनम्, अन्वमंस्त स्वीचकार । वसन्ततिलकावृत्तम् ॥४५॥

हुताशन इति—एकश्चासौ वीरश्चेत्येकवीरः, जगत्येकवीर इति जगदेकवीरो लोकैकशूरः, एषः सः, कुरुसिंहो जीवन्धरः, मङ्गलग्ने समुत्सवावसरे, हुताशने वह्नौ, साक्षिणि साक्षात्कर्तरि सति, सुभद्रेण श्रेष्ठिना दत्ता समर्पिता ताम्, कोमला मृदुला गात्रवल्ली तनुलता यस्यास्ताम्, क्षेमश्रियम्-एतन्नाम्नीं कन्याम्, पाणौ करे, जग्राह गृहीतवान्, तामुदवोढेति भावः ॥४६॥

पाणिपद्ममिति—कुरुकुञ्जरो जीवन्धरः, सुकुमाराङ्गया मृदुलकलेवरायाः, अस्याः क्षेमश्रियः, मृदुलं कोमलम्, स्विन्नाङ्गुल्य एव स्वेदार्द्रहस्तशाखा एव दलानि पत्राणि तैरुज्ज्वलं मनोहरम्, पाणिपद्मं कर-कमलम्, गृहीत्वा स्वहस्तेनादाय, संदिग्धे संदेहं चकार ॥४७॥

तथाहि—संदेहप्रकारं प्रदर्शयति ।

अवश्यायाकीर्ण इति—अस्या हस्तः, अवश्यायैस्तुषारैराकीर्णो व्याप्तः, कमलकोशः कमलकुड्मलम्, किम् कथम्, उ इति वितर्के पूर्वसंदेहं परिहरति—नहि स न भवेत्, हि यतः, तस्य कमलकोशस्य, ईदृक् हस्तसदृशी, प्रभा कान्तिः, न नो वर्तते इति शेषः । अथवा नवमेव नवीनमेव सुधासूतिश्चन्द्रस्तस्य मिहिका हिमं 'अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम् । प्रालेयं मिहिका चाथ हिमानी हिमसंहतिः' इत्यमरः, किम् कथम्, उ इति वितर्के, अथ संदेहं परिहरति, अस्या नवसुधासूतिमिहिकायाः सौगन्ध्यं सुरभित्वं न च वर्तते, अत्र तु सौगन्ध्यं वर्तते तदियं सा न भवतीति यावत् , किं वा यद्वा, सपदि झटिति करनीरेजात्पाणिपद्माद् विगलंश्चासौ मधुस्यन्दश्च मकरन्दनिस्यन्दश्चेति तथा, अस्तीति शेष, एतत्संदेहमपि परिहरति—नहि नहि स न वर्तते किन्तु सुधैव पीयूषमेव, प्रसरति प्रसारं प्राप्नोति । संदेहालंकारः । शिखरिणीच्छन्दः ॥४८॥

तौ दम्पतीति—महती कान्तिर्ययोस्तौ, तौ दम्पती जायापती, वेद्यां परिष्कृतायां भूमौ, 'वेदी

क्षेमश्रीः कुरुकुञ्जरस्य सविधे पाथोजधिक्कारिणी
पद्भ्यामूरुयुगेन सारकदलीकाण्डश्रियं बिभ्रती ।
पाणिभ्यां नवपल्लवप्रतिमतां संसूचयन्ती स्वयं
वक्षोजद्वितयेन कोकयुगलंन्यक्कारधीरा बभौ ॥४६॥

इति महाकविहरिचन्द्रविरचिते श्रीमति जीवन्धरचम्पूकाव्ये
क्षेमश्रीलम्भो नाम षष्ठो लम्भः ।

परिष्कृता भूमिः' इत्यमरः, रतिश्च पञ्चशरश्चेति रतिपञ्चशरौ ताविव रतिपञ्चशराविव रतिप्रद्युम्नाविव, 'इवेन नित्यसमासो विभक्त्यलोपश्च' इति समासः, चकासामासतुः शुशुभाते । उपमा ॥४८॥

क्षेमश्रीरिति—पद्भ्यां चरणाभ्याम्, पाथोजधिक्कारिणी कमलविनिन्दिनी, ऊरुयुगेन सक्थियुग्मेन, सारकदलीकाण्डश्रियं श्रेष्ठतमरम्भाप्रकाण्डलक्ष्मीम्, बिभ्रती दधती पाणिभ्यां हस्ताभ्याम्, स्वयं स्वतः, नवपल्लवप्रतिमतां प्रत्यग्रकिसलयतुलनाम्, संसूचयन्ती प्रकटयन्ती, वक्षोजद्वितयेन कुचयुगलेन, कोकयुगलस्य चक्रवाकद्वन्द्वस्य धिक्कारे पराभवे धीरा निपुणा, क्षेमश्रीः सुभद्रश्रेष्ठिसुता, कुरुकुञ्जरस्य जीवन्धरस्य, सविधे समीपे । बभौ शुशुभे । उपमा । शार्दूलविक्रीडितच्छन्दः ॥४९॥

इति महाकविहरिचन्द्रविरचिते श्रीमति 'कौमुदी' व्याख्याधरे जीवन्धरचम्पूकाव्ये
क्षेमश्रीलम्भो नाम षष्ठो लम्भः ॥

सप्तमो लम्भः

तदनु कुरुवरिष्ठः क्षेमलक्ष्म्या कृशाङ्ग्या
निरवधिसुखतातिं नित्यसंयोगहेतुम् ।
अविरतमनुभूय प्रागिवासौ कदाचि-
न्निशि निरगमदेकः काननान्तं क्रमेण ॥ १ ॥

तदनु, प्राणकान्तावियोगेन तान्तां दग्धरज्जुसमकान्तिसङ्क्रान्ताम्, नयनयुगलं निःश्वासं च दीर्घमादधानाम्, पयोधरभरं सन्तापं च गुरुं बिभ्राणाम्, कचनिचयं चित्तं च तमःसमूहसहायमातन्वतीम्, तनुवल्लीं मध्यस्थलं चातितनुमाकलयन्तीम्, दुःखसागरनिमग्नां पुत्रीं विलोक्य, सुभद्रोऽपि संतप्तस्वान्तः कान्तारमागत्य, तत्र तत्र विचित्य, तदीयमार्गमलभमानो न्यवर्तिष्ट ।

स्वामी च काननतले गगने शशीव
सञ्चारकेलिचतुरो मणिभूषणानि ।
कस्मैचिदर्पयितुमैहत दानशौण्डो
धर्माध्वनीनमनसे वनसेवकाय ॥ २ ॥

करधृतऋजुतोत्रः कम्बलच्छन्नदेहः
कटितटगतदात्रः स्कन्धसम्बद्धसीरः ।
वनभुवि पथि कश्चिन्नागमत्तस्य पार्श्वे
नियतिनियतरूपा प्राणिनां हि प्रवृत्तिः ॥ ३ ॥

तदन्विति—तदनु पाणिग्रहणानन्तरम्, असौ प्रसिद्धः, कुरुवरिष्ठः कुरुवंशश्रेष्ठो जीवन्धरः, कृशाङ्ग्या तन्वङ्ग्या, क्षेमलक्ष्म्या क्षेमश्रिया, साकम्, नित्यसंयोगोऽनवरतसमागमो हेतुः कारणं यस्यास्ताम्, निरवधिसुखतातिं निःसीमसौख्यसमूहम्, अविरतमश्रान्तम्, अनुभूय समुपभुज्य, प्रागिव पूर्ववत्, कदाचिन्जातुचित्, निशि रजन्याम्, एकोऽद्वितीयः सन्, क्रमेण क्रमशः काननान्तं वनान्तम्, निरगमत् निश्चक्राम । मालिनीच्छन्दः ॥ १ ॥

तदनु प्राणकान्तवियोगेनेति—तदनु तदनन्तरम्, प्राणकान्तस्य जीवन्धरस्य वियोगो विरहस्तेन, तान्तां दुःखिताम्, दग्धरज्जुसमा प्लुष्टप्रग्रहसदृशी या कान्तिस्तया संक्रान्ता मिलिता ताम्, नयनयुगलं नेत्रयुगम्, निःश्वासं श्वासोच्छ्वासञ्च, दीर्घमायतम्, आदधानां बिभ्रतीम्, पयोधरभरं स्तनभारम्, संतापं दुःखञ्च, गुरुं दुर्भरमधिकञ्च, बिभ्राणां दधतीम्, कचनिचयं केशसमूहं चित्तञ्च मानसञ्च, तमःसमूहसहायं ध्वान्तनिचयसदृशं मोहसमूहसहितम् च, आतन्वतीं कुर्वन्तीम्, तनुवल्लीं शरीरलतां मध्यस्थलं च, कटिप्रदेशं च, अतितनुं कृशतरम्, आकलयन्तीमादधतीम्, दुःखसागरेऽशर्मसमुद्रे निमग्ना ब्रुडिता ताम्, पुत्रीं सुतां क्षेमश्रियमिति यावत्, विलोक्य दृष्ट्वा, सुभद्रोऽपि वणिग्वरोऽपि, संतप्तं खिन्नं चित्तं हृदयं यस्य तथाभूतः सन्, कान्तारं वनम्, आगत्य समेत्य, तत्र तत्र तेषु तेषु प्रदेशेषु, विचित्य समन्विष्य, तदीयमार्गं तदयनम्, अलभमानोऽप्राप्नुवन्, न्यवर्तिष्ट प्रत्यावृत्तो बभूव ।

स्वामी चेति—गगने वियति, शशीव चन्द्र इव, सञ्चारकेल्यां विहारक्रीडायां चतुरो दक्ष इति सञ्चारकेलिचतुरः, दाने वितरणे शौण्डो निपुण इति दानशौण्डः, स्वामी च जीवन्धरश्च, धर्मस्य रत्नत्रयरूपस्याध्वनीनं पथिकं मनो हृदयं यस्य तस्मै, कस्मैचित्, वनसेवकाय वनचराय, मणिभूषणानि रत्नाभरणानि, अर्पयितुम् प्रदातुम्, ऐहत ऐच्छत् । वसन्ततिलकावृत्तम् ॥ २ ॥

करधृतेति—करे हस्ते धृतं गृहीतम् ऋजु सरलं तोत्रं वैणुकं ('पयेना' इति प्रसिद्धं) येन सः

ततः कृपासंक्रान्तस्वान्तः कुरुनिशाकान्तः, पार्श्वगतं नीलकम्बलावगुण्ठितकलेवरतयान्तरमेयत्वेन बहिरपि प्रसरताज्ञानपटलेनेवावृतम्, मलीमसोष्णीषपरिष्कृतोत्तमाङ्गतया कुरुवीरदर्शननिर्गमिष्यत्पापमिव प्रतीयमानम्, कान्त्या जात्या च जघन्यवर्णम्, तमेनमालोक्य, 'अपि कुशलम्' इति पप्रच्छ।

सौलभ्यं हि महत्ताया भूषणाय प्रकल्पते।
प्रभुत्वस्येव गाम्भीर्यमौदार्यस्येव सौम्यता ॥ ४ ॥

महत्त्वमात्रं कनकाचलेऽपि लोष्टेऽपि सौलभ्यमिह प्रतीतम्।
एतद्द्वयं कुत्रचिदप्रतीतं कुरुप्रवीरे न्यवसत्प्रकाशम् ॥५॥

वृषलोऽपि विनीतः सन्नुवाच कुरुकुञ्जरम्।
कुशलं साम्प्रतं युष्मद्दर्शनेन विशेषतः ॥ ६ ॥

तदिदमाकर्ण्याव्याजबन्धुर्जीवन्धरः, जीवादितत्त्वयाथात्म्यविवेचनचतुरः तत्तादृशागण्यपुण्यैकलभ्यां मोक्षपदवीं विवरीतुमारभत।

'तोत्रं वैणुकम्' इत्यमरः, कम्बलेन रल्लकेन छन्नः पिहितो देहो विग्रहो यस्य सः, 'समौ रल्लककम्बलौ' इत्यमरः, कटितटं मध्यप्रदेशं गतं प्राप्तमिति कटितटगतम्, तथाभूतं दात्रं लवित्रं यस्य सः, स्कन्धे बाहुशिरसि सम्बद्धः स्थापितः सीरो हलो यस्य सः, कश्चित् कोऽपि, ना पुमान्, वनभुवि काननवसुधायाम्, पथि मार्गे, तस्य जीवन्धरस्य, पार्श्वं समीपम्, आगमत्-आजगाम, हि यतः प्राणिनां जन्मिनाम्, प्रवृत्तिश्चेष्टा, नियत्या दैवेन नितं नियन्त्रितं रूपं परिणामो यस्यास्तथाभूता। भवतीति शेषः। अर्थान्तरन्यासः। मालिनीवृत्तम् ॥ ३ ॥

तत इति—ततस्तदनन्तरम्, कृपया करुणया संक्रान्तं मिलितं स्वान्तं चित्तं यस्य सः, कुरुनिशाकान्तः कुरुवंशचन्द्रः, जीवन्धर इति यावत्, पार्श्वगतं निकटप्राप्तम्। नीलकम्बलेन कृष्णरल्लकेनावगुण्ठितं समावृतं कलेवरं शरीरं यस्य तस्य भावस्तत्ता तया, अन्तर्मध्ये, अमेयत्वेन मातुमशक्यत्वेन, बहिरपि प्रसरता प्रसरणशीलेन, अज्ञानपटलेनाज्ञानसमूहेन, आवृतमिव तिरोहितमिव, मलीमसेन मलिनेनोष्णीषेण शिरोवेष्टनेन परिष्कृतं सहितमुत्तमाङ्गं शिरो यस्य तस्य भावस्तत्ता तया, कुरुवीरदर्शनेन जीवन्धरविलोकनेन निर्गमिष्यन्निष्क्रमिष्यत्पापं दुरितं यस्य तथाभूतमिव प्रतीयमानं दृश्यमानम्, कान्त्या दीप्त्या, जात्या च ज्ञात्या च, जघन्यो हीनो वर्णो रूपं शूद्रसंज्ञकश्च यस्य तम्, तं पूर्वोक्तम्, एनं नरम्, आलोक्य दृष्ट्वा, 'अपि कुशलम्' 'कच्चित् क्षेमम्' इति पप्रच्छ पृच्छति स्म।

सौलभ्यमिति—हि निश्चयेन, सौलभ्यं सुप्राप्यत्वम्, सर्वेषामिति शेषः, महत्ताया महत्त्वस्य, भूषणायाभरणाय, प्रकल्पते जायते। यो हि महान् सर्वेषां सुलभो भवेत् स साधुरिति यावत्। किं वत्? प्रभुत्वस्य समृद्धिमत्त्वस्य भूषणाय गाम्भीर्यमिव स्थैर्यमिव, औदार्यस्य दातृत्वस्य, सौम्यतेव सज्जनतेव। उपमा ॥ ४ ॥

महत्त्वमात्रमिति—इह लोके, महत्त्वमेव महत्त्वमात्रम्, केवलमहत्त्वमिति यावत्, कनकाचलेऽपि सुमेरावपि, सौलभ्यं सुप्राप्यत्वम्, लोष्टेऽपि पाषाणखण्डेऽपि, प्रतीतं प्रसिद्धम्, एतयोर्महत्त्वसौलभ्ययोर्द्वयं युगलम्, कुत्रचित्क्वापि, अप्रतीतमप्रसिद्धम्, कुरुप्रवीरे जीवन्धरे तु, प्रकाशं स्पष्टं यथा स्यात्तथा, न्यवसत् निवासं चकार ॥ ५ ॥

वृषलोऽपीति—वृषलोऽपि शूद्रोऽपि, विनीतो विनम्रः सन्, कुरुकुञ्जरं जीवन्धरम्, उवाच जगाद, साम्प्रतमधुना, युष्मद्दर्शनेन भवदवलोकनेन, विशेषतः सातिशयम्, कुशलं मङ्गलम्, अस्तीति शेषः ॥ ६ ॥

तदिदमिति—अव्याजबन्धुर्निश्छलबन्धुः, जीवादितत्त्वानां जीवप्रभृतिपदार्थानां याथात्म्यस्य वास्तविकस्वरूपस्य विवेचने निरूपणे चतुरो विदग्धः, जीवन्धरः सात्यन्धरिः, तदिदं वृषलोक्तम्, आकर्ण्य श्रुत्वा, तत्तादृशेन अगण्येन प्रचुरेण पुण्येन सुकृतेन—एकेन—अद्वितीयेन लभ्या प्राप्या ताम्, मोक्षपदवीं मुक्तिपद्धतिम्, विवरीतुं वर्णयितुम्। आरभत तत्परो बभूव।

कुशलं न हि कर्मषट्कजातं विविधाशाव्रततिप्ररोहकन्दम् ।
अपवर्गजमात्मसाध्यमाहुः कुशलं सौख्यमनन्तमात्मरूपम् ॥ ७ ॥

तच्च रत्नत्रये पूर्णे परमं प्राप्यमात्मनः ।
तच्च सद्दृष्टिसंज्ञानचारित्राणि प्रकीर्तितम् ॥ ८ ॥
आप्तागमपदार्थानां श्रद्धानं दर्शनं विदुः ।
तन्मूले ज्ञानचारित्रे भव्यलोकैकभूषणे ॥ ९ ॥
उत्तमाङ्गमिवाङ्गेषु नयनं करणेष्विव ।
मुक्त्यङ्गेषु प्रधानाङ्गं सम्यग्दर्शनमिष्यते ॥ १० ॥
आत्मा हि ज्ञानदृक्सौख्यलक्षणो विमलः परः ।
सर्वाशुचिनिदानेभ्यो देहादिभ्य इतीरितः ॥ ११ ॥
इत्यादि स्वार्थविज्ञानं सम्यक्ज्ञानमसंशयम् ।
सम्यक्ज्ञानवता कार्यः परित्यागः परस्य वै ॥ १२ ॥
परित्यागवतो जीवा द्विविधाः परिकीर्तिताः ।
अनगाराश्च सागाराः पूर्वे सावद्यवर्जिताः ॥ १३ ॥

यतीनां सुधर्मं न शक्तोषि वोढुं महोक्षेण वाह्यं यथा तत्किशोरः ।
अतस्त्वं गृहाण गृहस्थस्य धर्मं यतो मुक्तिलक्ष्मीरदूरे भवित्री ।[1]१४॥

कुशलमिति—विविधा बहुप्रकारा या आशाव्रततयस्तृष्णावल्लर्यस्तासां प्ररोहस्याङ्कुरस्य कन्दं मूलम्, कर्मषट्केन कृष्यादिषट्कर्मसमूहेन जातं समुत्पन्नम्, सौख्यं शर्म, कुशलं क्षेमम्, न हि निश्चयेन न वर्तते, अपवर्गजं मोक्षोत्पन्नम्, आत्मसाध्यं स्वसाध्यम्, अनन्तमन्तातीतम्, आत्मरूपमात्मस्वभावात्मकम्, सौख्यं शर्म, कुशलं क्षेमम्, आहुः कथयन्ति, सन्त इति शेषः ॥ ७ ॥

तच्च रत्नत्रय इति—आत्मनश्चितः, परममुत्कृष्टम्, तच्च सौख्यञ्च, रत्नत्रये सम्यग्दर्शनादित्रितये सति, प्राप्यं लभ्यम्, भवेदिति शेषः । तच्च रत्नत्रयञ्च, सद्दृष्टिश्च संज्ञानञ्च चारित्रञ्चेति सद्दृष्टिसंज्ञानचारित्राणि सम्यग्दर्शनसम्यग्ज्ञानसम्यक्चारित्राणि, प्रकीर्तितं कथितम्, विशेष्यापेक्षयैकत्वम् ॥ ८ ॥

आप्तागमेति—आप्तश्च जिनेन्द्रश्चागमश्च शास्त्रञ्च पदार्थश्च जीवादितत्त्वञ्चेत्याप्तागमपदार्थास्तेषाम्, श्रद्धानं प्रत्ययः, दर्शनं सम्यग्दर्शनम्, तत्सम्यग्दर्शनं मूलं कारणं ययोस्ते, भव्यलोकानां भव्यप्राणिनामेकभूषणे, मुख्याभरणे, ज्ञानचारित्रे बोधवृत्ते, विदुर्जानन्ति, सन्त इति शेषः ॥ ९ ॥

उत्तमाङ्गमिति—अङ्गेषु हस्तपादाद्यवयवेषु, उत्तमाङ्गमिव शिर इव, करणेषु हृषीकेषु, नयनं लोचनमिव मुक्त्यङ्गेषु मोक्षसाधनेषु, सम्यग्दर्शनमाप्तरुचम्, प्रधानाङ्गं प्रमुखसाधनम्, इष्यतेऽभिलष्यते ॥ १० ॥

आत्मा हीति—हि निश्चयेन, ज्ञानदृक्सौख्यानि बोधप्रत्ययाह्लादा लक्षणं चिह्नं यस्य तथाभूतः विमलो निर्मलः आत्मा जीवः, सर्वाशुचिनिदानेभ्यो निखिलामेध्यकारणेभ्यः देहादिभ्यः शरीरादिभ्यः, परो भिन्नः, अस्तीति, ईरितः कथितः ॥ ११ ॥

इत्यादीति—इत्यादि पूर्वोक्तप्रकारेण, स्वार्थविज्ञानम् आत्मपदार्थबोधः, असंशयं सन्देहरहितम्, उपलक्षणाद्विपर्ययानध्यवसायरहितमपि, सम्यग्ज्ञानं साधुबोधः, अस्तीति शेषः, सम्यग्ज्ञानवता सम्यग्बोधयुक्तेन जनेन, वै निश्चयेन, परस्य भिन्नस्य शरीरादेः परित्यागः परिहारः, कार्यो विधातव्यः ॥ १२ ॥

परित्यागेति—परित्यागेन युताः परित्यागयुताः परपरिहारसहिताः, अत्र लक्षणभ्रष्टतया 'परित्यागवतः' इति पाठो हेयः, जीवाः प्राणिनः, द्विविधाः द्विप्रकाराः, परिकीर्तिताः कथिताः, अनगारा मुनयः सागाराश्च गृहस्थाश्च, तयोः पूर्वेऽनगाराः, सावद्यवर्जिताः सपापकार्यरहिताः, सन्तीति शेषः ॥ १३ ॥

यतीनामिति—त्वम्, महोक्षेण महावृषभेण, वाह्यं वोढुं योग्यं भारम्, तत्किशोरो यथा तद्बालक इव,

---

[1] सज्ज्ञान ब० ।

पञ्चाणुव्रतसम्पन्ना गुणशिक्षाव्रतोद्यताः ।
सम्यग्दर्शनविज्ञानाः सावद्या गृहमेधिनः ॥ १५ ॥
हिंसानृतस्तेयवधूव्यवायपरिग्रहेभ्यो विरतिः कथञ्चित् ।
मद्यस्य मांसस्य च माक्षिकस्य त्यागस्तथा मूलगुणा इमेऽष्टौ ॥१६॥
दिग्देशानर्थदण्डेभ्यो विरतिस्तु गुणव्रतम् ।
भोगोपभोगसंख्यानं केचिदाहुर्गुणव्रतम् ॥१७॥
सामायिकः प्रोषधकोपवासस्तथातिथीनामपि संग्रहश्च ।
सल्लेखना चेति चतुःप्रकारं शिक्षाव्रतं शिक्षितमागमज्ञैः ॥१८॥
इत्युक्तव्रतसम्पन्नः क्वचिद्देशे क्वचित्क्षणे ।
महाव्रती भवेत्तस्माद्ग्राह्यं धर्ममगारिणाम् ॥१९॥

इति प्रतिपादितं धर्मं शिरसा मनसा च प्रतिगृह्णानमन्तर्गतप्रतापकोरकपुञ्जमिव मणिभूषणगणमात्मना वितीर्णमत्यादरमेदुरेण करेण पचेलिमाभाग्यधुन्दुमिवादाय सम्मदपयःपूरैः

यतीनां मुनीनाम् सुधर्मं सम्यग्धर्मम्, वोढुं धर्तुम्, न शक्नोषि न समर्थोऽसि, अतोऽस्मात्कारणात्, गृहस्थस्य गृहमेधिनः, धर्मं पञ्चाणुव्रतात्मकम्, गृहाण स्वीकुरु, यतो यस्माद्धर्मात्, मुक्तिलक्ष्मीर्मोक्षश्रीः, अदूरे निकटे भवित्री भविष्यति ॥ १४ ॥

पञ्चाणुव्रतसम्पन्नेति—पञ्चभिरणुव्रतैः सम्पन्ना इति पञ्चाणुव्रतसम्पन्ना अणुव्रतपञ्चकयुक्ताः, गुणशिक्षाव्रतेषूद्यता पालनतत्परा इति गुणशिक्षाव्रतोद्यताः, समीची दर्शनविज्ञाने येषां ते सम्यग्दर्शनविज्ञानाः सम्यग्दर्शनसम्यग्ज्ञानसहिताः, अवद्यैः सहिता इति सावद्याः सारम्भाः, जनाः, गृहमेधिनः सागाराः, सन्तीति शेषः ॥१५॥

हिंसानृतस्तेयेति—हिंसा चानृतं च स्तेयं च वधूव्यवायश्च परिग्रहश्चेति हिंसानृतस्तेयवधूव्यवायपरिग्रहास्तेभ्यो हिंसादिपञ्चपापेभ्यः, कथञ्चित् स्थूलप्रकारेण, विरतिर्विरमणम्, तथा, मद्यस्य मदिरायाः, मांसस्य पिशितस्य, माक्षिकस्य च क्षौद्रस्य च त्यागः परिहारः, इमे एते, अष्टौ अष्टसंख्याकाः, मूलगुणा मुख्यगुणाः, सन्तीति शेषः ॥१६॥

दिग्देशानर्थेति—दिक् च देशश्च, अनर्थदण्डश्चेति दिग्देशानर्थदण्डास्तेभ्यः, विरतिस्तु विरमणं तु गुणव्रतं प्रसिद्धम्, अस्तीति शेषः, केचिदाचार्याः, भोगोपभोगसंख्यानं भोगोपभोगयोः संख्यानं नियमनमिति भोगोपभोगसंख्यानम्, भुक्त्वा परिहातव्यो भोगो भुक्त्वा पुनश्च भोक्तव्यः' इति भोगोपभोगयोर्लक्षणम्, गुणव्रतम्, आहुः कथयन्ति, दिग्व्रतं देशव्रतमनर्थदण्डव्रतमिति गुणव्रतानि सन्ति, मतान्तरापेक्षया देशव्रतस्थाने भोगोपभोगपरिमाणव्रतं गण्यते, तच्च शिक्षाव्रतचतुष्टये ॥१७॥

सामायिक इति—सामायिकः सर्वावद्यपरिहारः, प्रोषधकोपवासः पर्वचतुष्टयेऽनशनधारणम्, तथा अतिथीनां मुन्यार्यिकादीनामपि, संग्रहश्च दानार्थं प्रतिग्रहणम्, सल्लेखना च सन्न्यासश्च, इतीत्थम्, आगमज्ञैः शास्त्रज्ञैः, चतुःप्रकारं चतुर्विधम्, शिक्षाव्रतं प्रसिद्धम्, शिक्षितं निर्दिष्टम् । मतान्तरापेक्षया, सल्लेखनायाः स्थाने देशव्रतं भोगोपसंख्यानं वा व्रतं गण्यते ॥१८॥

इत्युक्तव्रतसम्पन्न इति—इत्युक्तव्रतैः पूर्वोक्तव्रतैः सम्पन्नः सहितः, गृही, क्वचित् कस्मिंश्चिद्, देशे मर्यादाया बहिरिति यावत्, क्वचित् क्षणे सामायिकादिप्रतिज्ञाकाले, महाव्रती महाव्रतयुक् इव, भवेत् स्यात्, तस्मात् कारणात्, अगारिणां गृहस्थानाम्, धर्ममाचारः, ग्राह्यं गृहीतुं योग्यम्, अस्तीति शेषः, धर्मशब्दस्य क्लीबे प्रयोगोऽप्रसिद्धः, अथवागारिणां धर्मं ग्राह्यं कथयन्तीति शेषः ॥१९॥

इति प्रतिपादितमिति—इति पूर्वोक्तप्रकारेण, प्रतिपादितं निरूपितम्, धर्मं गृहस्थाचारम्, शिरसा मूर्ध्ना, मनसा हृदयेन च, प्रतिगृह्णानं स्वीकुर्वाणम्, अन्तर्गतप्रतापस्यान्तःस्थिततेजसः कोरकपुञ्जमिव कुड्मलकलापमिव, आत्मना स्वेन, वितीर्णं प्रदत्तम्, मणिभूषणगणं रत्नाभरणसमूहम्, पचेलिमभाग्यधुन्दुमिव

क्षालयन्तमिवातिसन्तोषकोरकितान्तरङ्गं तं धार्मिकमुत्सृज्य तस्य स्मरन्नेव कुरुकुञ्जरस्तस्माद्वना-न्निर्जगाम ।

गभस्तिमाली गगनस्य मध्यं द्रुमालवालं जलमध्यमेणः ।
जिह्वा च शोषं सममाप नृणां शरीरमुद्यद्घनधर्मतोयम् ॥२०॥

तदानीं, पचेलिमहेलिसन्तापार्ततया घृष्टचन्दनरसपाण्डुगण्डमण्डलेषु वनशुण्डालेषु चलाचलनिजकर्णतालपवनसंवीज्यमानाननेषु हस्तोज्झितशीकरनिकरसंसिक्तहृदयेषु मन्दमन्दमागत्य सरोवरप्रवेशनपरेषु, कर्णिकारमुकुलानि निर्भिद्यान्तर्लीयमानेषु षट्चरणेषु, संतप्तजलं विहाय शीतलनलिनीदलं सेवमानेषु कारण्डवेषु, पञ्जरबद्धक्रीडाशुकेषु जलं याचमानेषु, त्रिजगदेकातपत्रायितकीर्तिमण्डलेन सकलजनतासन्तापनाशनोऽपि कुरुवंशपावनः श्रान्तो विश्रान्तिकृते नमेरुतरुमूलमाससाद ।

निषण्णस्तत्र मधुरं रवं शृण्वन्कुरूत्तमः ।
संदिग्धे सिन्धुगम्भीरः कल्याणाद्रिरिव स्थिरः ॥२१॥
टङ्कारः किं मारबाणासनस्य झङ्कारोऽयं मत्तमाध्वीलिहां किम् ।
हंसानां किं मञ्जुलः कण्ठनादः किंवा लीलाकोकिलालाप एषः ॥२२॥

पाकोन्मुखदैवसमूहमिव, अभ्यादरमेदुरेण आदरातिशयमिलितेन, करेण हस्तेन, आदाय गृहीत्वा, संमदपयःपूरैर्हर्षाश्रुजलप्रवाहैः, क्षालयन्तमिव प्रक्षालनं कुर्वन्तमिव, अतिसन्तोषेण प्रहर्षातिशयेन कोरकितं व्याप्तमन्तरङ्गं चेतो यस्य तम्, तं पूर्वोक्तम् धर्मेण चरति धार्मिकस्तम् धर्मात्मानम् उत्सृज्य विसृज्य, तस्य धार्मिकनृपलस्य स्मरन्नेव स्मरणं कुर्वन्नेव 'अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी, कुरुकुञ्जरो जीवन्धरः, तस्मात्पूर्वोक्तात्, वनात्काननात्, निर्जगाम निरक्रमीत् ।

गभस्तिमालीति—गभस्तिमाली सूर्यः, गगनस्य वियतः, मध्यं मध्यभागम्, एणो मृगः, जलमध्यं जलं मध्ये यस्य तं तोयमध्यं, द्रुमालवालं वृक्षावापं, नृणां मनुष्याणाम्, जिह्वा रसना, शोषं शोषणम्, तृष्णातिरेकाद्गिति यावत्, शरीरञ्च गात्रञ्च, उद्यत् प्रकटीभवत्, घनघर्मतोयं प्रचुरप्रस्वेदम्, समं सार्धम्, आप प्रापत् । सहोक्तिरलङ्कारः ॥२०॥

तदानीमिति—तदानीं तस्मिन् काले, पचेलिमस्तरुणो यो हेलिः सूर्यस्तस्य संतापेन निदाघातिशयेनार्ततया पीडिततया, घृष्टचन्दनरसेन घृष्टमलयजरसेन पाण्डूनि धवलानि गण्डमण्डलानि कटतटानि येषां तेषु, हस्तेभ्यः शुण्डाभ्य उज्झिता उत्सृष्टा ये शीकरनिकरा जलकणसमूहास्तैः संसिक्तं हृदयं येषां तेषु, वनशुण्डालेषु काननकरिषु, मन्दमन्दं शनैःशनैः, आगत्य समेत्य, सरोवरेषु कासारेषु प्रवेशनं प्रवेशस्तस्मिन्परा उद्युक्तास्तथाभूतेषु सत्सु, षट्चरणेषु भ्रमरेषु, कर्णिकारमुकुलानि द्रुमोत्पलकुड्मलेषु 'अथ द्रुमोत्पलः । कर्णिकारः परिव्याधः' इत्यमरः, निर्भिद्य विदार्य, अन्तर्मध्ये, लीयमानेषु स्थितेषु सत्सु, कारण्डवेषु काकतुण्डेषु दीर्घपादेषु कृष्णवर्णेषु जलपक्षिविशेषेषु संतप्तजलं संतप्तनीरम्, विहाय त्यक्त्वा, शीतलं च तन्नलिनीदलञ्चेति शीतलनलिनीदलं तत्, शिशिरकमलिनीपत्रम्, सेवमानेषु समाश्रयत्सु सत्सु, पञ्जरेषु बद्धाः पञ्जरबद्धाः ते च ते क्रीडाशुकाश्चेति पञ्जरबद्धक्रीडाशुकास्तेषु शलाकागृहरुद्धक्रीडाकीरेषु, जलं सलिलम्, याचमानेषु प्रार्थयत्सु सत्सु, त्रिजगतस्त्रिलोकस्यैकातपत्रायितमेकच्छत्रायितं यत्कीर्तिमण्डलं यशश्चक्रवालं तेन, सकलजनताया निखिलजनसमूहस्य संतापनाशनोऽपि संतापापहारकोऽपि, कुरुवंशपावनो जीवन्धरः, श्रान्तः सन्, विश्रान्तिकृते विश्रामाय, नमेरुतरुमूलं छायावृक्षमूलम्, आससाद प्राप ।

निषण्ण इति—तत्र छायावृक्षतले, निषण्णः समुपविष्टः, सिन्धुरिव सागर इव गम्भीरोऽगाधधैर्यः, कल्याणाद्रिरिव सुमेरुरिव, स्थिरः सुनिश्चलमानसः, कुरूत्तमो जीवन्धरः, मधुरं मनोहरम्, रवं शब्दम्, शृण्वन् समाकर्णयन्, संदिग्धे संदेहं चकार ॥२१॥

अथ तमेव सन्देहं दर्शयति—टङ्कार इति—अयमेषः, किं मारबाणासनस्य कन्दर्पकोदण्डस्य, टङ्कारः

इति संदेहं पराङ्गनानूपुररवविनिश्चयेन निवर्तयन्परपरिग्रहविरक्तमानसः कुलकुलोत्तंसः पराङ्मुखो बभूव ।

> संचरन्ती वने तत्र भर्त्रा काचन खेचरी ।
> प्रतार्य तं मिषेणाशु पुरस्तादस्य संन्यधात् ॥२३॥
>
> यस्या मुखं पर्वविधुं विजित्य भ्रूचापदम्भाज्जयकेतुनद्धम् ।
> कर्णद्वये तज्जयकीर्तिपत्रं बभार ताटङ्कमणिच्छलेन ॥ २४ ॥
>
> वृषस्यन्ती वरारोहा वृषस्कन्धं कुलद्वहम् ।
> वीक्ष्य तस्याङ्गसौन्दर्यं नातृपत्सा त्रपाकुला ॥ २५ ॥
>
> यस्यांसाविह रेजतुर्जयरमाक्रीडामहीध्राविव
> श्रीदेवीस्थितिवज्रपट्टमिव यद्वक्षःस्थलं व्याबभौ ।
> नाभिर्यौवतदृग्विशालगजतारोधार्थवारीनिभा
> जङ्घे पूगगुलुच्छनिन्दनकरे पादौ जिताम्भोरुहौ ॥ २६ ॥
>
> यद्वक्त्रं वितताान वाग्वरसतीक्रीडास्थलीविभ्रमं
> यद्भासा च कलावतारविलसन्निःश्रेणिकासंशयम् ।

प्रत्यग्चारवः, किम्, मत्ताश्च ते मार्ध्वीलिहश्चेति मत्तमार्ध्वीलिहस्तेषां क्षीवषट्पदानाम्, झङ्कारो गुञ्जनशब्दः, किम्, हंसानां मरालानाम्, मञ्जुलो मनोहरः, कण्ठनादो गलध्वनिः, किं वा, एषोऽयम्, लीलाकोकिलानां केलिपरपुष्टानामालापः शब्दः, अस्तीति शेषः । संदेहालङ्कारः, शालिनीच्छन्दः 'शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः' इति लक्षणात् ॥२२॥

इतीति—इति इत्याकारम्, संदेहं संशयम्, पराङ्गनायाः परनार्या नूपुररवस्य मञ्जीरशिञ्जानस्य विनिश्चयो निर्णयस्तेन, विवर्तयन् दूरीकुर्वन्, परपरिग्रहादन्यस्त्रिया विरक्तं विरतं मानसं चित्तं यस्य तथाभूतः कुलकुलोत्तंसः कुलवंशाभरणोपमो जीवन्धरः, पराङ्मुखो विमुखः, बभूव अजायत ।

सञ्चरन्तीति—तत्र तस्मिन्, वने गहने, भर्त्रा पत्या, सह, सञ्चरन्ती भ्रमन्ती, काचन कापि, खेचरी विद्याधरी, तं भर्तारम्, मिषेण केनापि व्याजेन, प्रतार्य वञ्चयित्वा, अज्ञानमनार्थं तं दूरे प्रहित्येति यावत्, आशु झटिति, अस्य जीवन्धरस्य, पुरस्तात् अभिमुखम्, संन्यधात् संनिहिता बभूव ॥२३॥

यस्या मुखमिति—यस्या वनितायाः, मुखं वदनम्, पर्वविधुं राकानिशाकरम्, विजित्य पराजितं कृत्वा, भ्रूचापदम्भात् भ्रुकुटिकार्मुकपटात्, जयकेतुना विजयवैजयन्त्या नद्धं बद्धमिति जयकेतुनद्धं सत्, ताटङ्कमणिच्छलेन कर्णाभरणमणिव्याजेन, कर्णद्वये श्रवणयुगले, तस्य पर्वविधोर्जयः पराभवस्तस्य कीर्तिपत्रं यशःपत्रम्, बभार दधार, अपह्नुतिरलङ्कारः ॥२४॥

वृषस्यन्तीति—वृषस्य स्कन्ध इव स्कन्धो यस्य तं पीवरांसमिति यावत्, कुलद्वहं जीवन्धरम् । वृषस्यन्ती मैथुनेच्छयाभिलषन्ती, 'अश्ववृषयोर्मैथुनेच्छायाम्' इति क्यच्यसुगागमः, वरारोहा सुन्दराङ्गी, त्रपाकुला लज्जावती, सा वनिता, तस्य जीवन्धरस्य, अङ्गसौन्दर्यं कामकामनीयकम्, वीक्ष्य दृष्ट्वा, नातृपत् नो तृप्ता बभूव ॥२५॥

यस्यांसाविहेति—इह लोके, यस्य सत्यन्धरेः, अंसौ स्कन्धौ, जयरमाया विजयलक्ष्म्याः क्रीडामहीध्राविव केलिपर्वताविव, रेजतुः शुशुभाते, यस्य वक्षःस्थलं यद्वक्षःस्थलं वक्षुरःप्रदेशः, श्रीदेव्या लक्ष्मीदेव्याः स्थितेरवस्थानस्य वज्रपट्टमिव हीरकफलकमिव, व्याबभौ विशेषेण शुशुभे, नाभिस्तुन्दिः, युवतीनां समूहो यौवतं तस्य दृशौ लोचनान्येव विशालगजता बृहद्गजसमूहस्तस्य रोधार्थमवरोधनार्थं वा वारी गजबन्धनं तस्या निभा सदृशी, आसीदिति शेषः, जङ्घे प्रसृते, पूगगुलुच्छस्य क्रमुकानोकहप्रकाण्डस्य निन्दनकरे निन्दाविधायके, पादौ चरणौ च, जिताम्भोरुहौ पराभूतपद्मौ, आस्तामिति शेषः । उपमा । शार्दूलविक्रीडितं छन्दः ॥२६॥

यद्वक्त्रमिति—यस्य वक्त्रं यद्वक्त्रं यद्वदनम्, वागेव वरसतीति वाग्वरसती सरस्वती सती-

यन्नेत्रे ददतुर्विशालकमलाक्रीडातटाकभ्रमं
यद्भ्रूयुग्ममपाचकार नियतं पिचुमन्दच्छदाडम्बरम् ॥ २७ ॥
अश्वस्यन्ती विशालाक्षी विश्वाधिकविभोज्ज्वलम् ।
कुरुवीरमुवाचेदं कुसुमायुधवञ्चिता ॥ २८ ॥
श्रीमन् तवाङ्गकान्त्या मे नयने सफलेऽधुना ।
कर्णौ वचनमाधुर्याद्धृदयं गुणमालया ॥ २९ ॥
ममार्य विरहानलं शमय शीतलापाङ्गतो
मुखेन्दुरुचिसंपदा सपदि छिन्धि कामान्धताम् ।
सुधासमगिराधरामृतरसप्रदानेन च
प्रणाशय घृणानिधे बहलकामतृष्णामिमाम् ॥ ३० ॥

इत्यादितद्वचनपरिपाटीमाकर्ण्य शम्बरारिविकारसंतमसवासरायमाणमानसः कृत्यविदामग्रगण्यः कुरुवरेण्यः परीतवैराग्यप्रावण्यस्तदरण्यान्निर्गन्तुमारभत । तदनु पञ्चशरनाराचवञ्चितविवेका सा विद्याधरचञ्चलाक्षी किञ्चिदन्तरमुपसृत्य मदनहुतभुगरणिनिकाशतनुलता तदिङ्गितं विज्ञाय तन्मनोवशीकारकोरकितकुतूहला निजोदन्तमित्थं प्रकटयामास ।

शिरोमणिस्तस्या या क्रीडास्थली केलिभूमिस्तस्या विभ्रमः सन्देहस्तम्, विततान विस्तारयामास, यन्नासा च यदीयनासिका च, कलानां वैदग्ध्यानामवताराय समवतरणाय विलसन्ती शोभमाना या निःश्रेणिका सोपानं तस्याः संशयस्तम्, विततान, यन्नेत्रे यदीयलोचने, कमलायाः श्रियाः क्रीडातटाक इति कमलाक्रीडातटाकः, विशालो विपुलो यः कमलाक्रीडातटाको लक्ष्मीकेलिकासारस्तस्य भ्रमः सन्देहस्तं ददतुः अदाताम्, यद्भ्रूयुग्मं यदीयभ्रुकुटियुगलम्, नियतं ध्रुवम्, पिचुमन्दच्छदाडम्बरम्, पिचुमन्दपत्राडम्बरं अपाचकार तिरश्चकार । उपमा ॥ २७ ॥

अश्वस्यन्तीति—अश्वस्यन्ती मैथुनेच्छावती, कुसुमायुधेन कामेन वञ्चिता प्रतारिता, विशालाक्षी दीर्घलोचना, सा ललना, विश्वेभ्योऽधिका विश्वाधिका सर्वाधिका सा चासौ विभा च दीप्तिश्च तयोज्ज्वलो दीप्तस्तम्, कुरुवीरं जीवन्धरम्, इदं वक्ष्यमाणम् । उवाच जगाद ॥२८॥

श्रीमन्निति—हे श्रीमन् हे शोभासम्पन्न, तव भवतः अङ्गकान्त्या शरीरदीप्त्या, मे मम, नयने नेत्रे, सफले सार्थकनिर्माणे, जाते इति शेषः, अधुना साम्प्रतम्, वचनमाधुर्याद्वचनमाधुर्यात्, कर्णौ श्रुती, गुणमालया गुणपङ्क्त्या, हृदयं चित्तञ्च, सफलमिति शेषः ॥२९॥

ममार्येति—हे आर्य ! हे श्रेष्ठ ! शीतलापाङ्गतः शिशिरकटाक्षतः, मम त्वदेकानुरागिण्याः, विरहानलं विप्रयोगपावकम्, शमय प्रशान्तं कुरु, मुखेन्दुरुचिसम्पदा वदनचन्द्रदीप्तिसम्पत्त्या, सपदि झटिति, कामान्धतां मदनान्धताम्, छिन्धि नाशय, हे घृणानिधे हे दयानिधे, सुधासमगिरा पीयूषतुल्यवाण्या, अधरामृतरसेन दशनच्छदसुधारसेन च, इमां प्राणापहारिणीम् । बहलकामतृष्णां सातिशयमदनपिपासाम्, प्रणाशय नष्टां कुरु । पृथिवीच्छन्दः ॥३०॥

इत्यादितद्वचनपरिपाटीमिति—तस्या वचनपरिपाटीति तद्वचनपरिपाटी, इत्यादिश्चासौ तद्वचनपरिपाटी चेति तथा ताम्, पूर्वोक्ततद्वचनपरम्पराम्, आकर्ण्य श्रुत्वा, शम्बरारिर्मनसिजस्तस्य विकारः समुद्रेक एव संतमसं गाढध्वान्तं तस्य वासरायमाणं दिवसायमानं मानसं चित्तं यस्य सः, कृत्यविदां कार्यज्ञानाम्, अग्रगण्यः प्रधानः, कुरुवरेण्यः कुरुश्रेष्ठो जीवन्धरः परीतं प्राप्तं वैराग्ये प्रशमित्वे प्रावण्यं नैपुण्यं येन तथाभूतः सन्, तदरण्यात्तत्काननात्, निर्गन्तुं बहिर्यातुम् आरभत तत्परोऽभूत् । तदनु तदनन्तरम्, पञ्चशरस्य कामस्य नाराचैर्बाणैर्वञ्चितः प्रतारितो विवेको सदसज्ज्ञानं यस्यास्तथाभूता, सा पूर्वोक्ता, विद्याधरचञ्चलाक्षी खेचरचपललोचना, किञ्चित्किमपि, अन्तरं समीपस्थलम्, उपसृत्य समुपेत्य मदनहुतभुजः कामानलस्यारणिनिकाशारणिसदृशी तनुलता शरीरवल्लिर्यस्यास्तथाभूता, सती तदिङ्गितं जीवन्धरचेष्टितम्, विज्ञाय ज्ञात्वा, तस्य जीवन्धरस्य मनोवशीकारेण चित्तवशीकरणेन कोरकितं

अनङ्गतिलकाह्वया खचरकन्यकाहं विभो
वनान्तमिदमापिता गगनचारिणा केनचित् ।
अनेन निजनायिकाभयवशेन निःसारिता
दयाविसरवारिधे महित रक्षणीया त्वया ॥ ३१ ॥

अशरण्यशरण्यत्वं परोपकृतिशीलता ।
दयापरत्वं दाक्षिण्यं श्रीमतः सहजा गुणाः ॥ ३२ ॥

"तावता, हा प्रिये हा प्राणकान्ते क्वासि क्वासि, वियोगवेदना विषमिव विसर्पति, पावक इवाङ्गानि निर्दहति, मृत्युरिव प्राणान्निःसारयति, मोह इव विद्यां विलुम्पति, क्रकच इव मर्माणि कृन्तति" इत्यादि कस्यचिदार्तस्वरं निशम्य विद्याधरविशालनयनायां मिषेणान्तर्हितायां, विस्मयविस्तृताक्षं कुरुहर्यक्षं सोऽपि विद्याधरः समीपमागत्य सगद्गदमेवमुवाच ।

सतीमुदन्याकुलितान्तरङ्गामत्रैव संस्थाप्य जलाशयाय ।
गतोऽहमागत्य सरोरुहाक्षीं नाद्राक्षमद्य प्रतिकूलदिष्टात् ॥ ३३ ॥

नरोत्तम तया सार्धं विद्यापि मम निर्गता ।
मनोवृत्तिश्च तत्कर्तुं चिन्तापि न हि शक्यते ॥ ३४ ॥

समुत्पन्नं कुतूहलं कौतुकं यस्यास्तथाभूता सती, निजोदन्तं स्ववृत्तान्तम्, इत्थमनेन प्रकारेण, प्रकटयामास प्रकथयामास ।

अनङ्गतिलकाह्वयेति—हे विभो हे स्वामिन्, हे दयाविसरवारिधे हे कृपाविस्तारसागर, हे महित हे पूजित, केनचित्केनापि, गगनचरिणा खेचरेण, इदमेतत्, वनान्तं काननान्तम्, आपिता आगमिता, निजनायिकाभयवशेन स्ववल्लभाभीतिवशेन, निःसारिता स्वसमीपाद्दूरीकृता, अनङ्गतिलकाह्वया अनङ्गतिलकानाम्नी, खचरकन्यका विद्याधरपुत्री, अहं भवत्पुरो वर्तमाना, त्वया भवता, रक्षणीया रक्षितुं योग्या, अस्मीति शेषः । पृथिवीच्छन्दः ॥ ३१ ॥

अशरण्येति—अशरण्यानां शरणरहितानां शरण्यत्वं रक्षकत्वम् इत्यशरण्यशरण्यत्वम्, परोपकृतिः परोपकारः शीलं स्वभावो येषां तेषां भावः परोपकृतिशीलता, दयापरत्वं करुणापरता, दाक्षिण्यमौदार्यम् । एते श्रीमतो महानुभावस्य, सहजाः स्वाभाविकाः, गुणा वैशिष्ट्योत्पादकाः, सन्तीति शेषः ॥ ३२ ॥

तावतेति—तावता तावत्कालेन, हा प्रिये वल्लभे, हा प्राणकान्ते हा जीवितेश्वरि, क्वासि क्वासि कुत्र वर्तसे, कुत्र वर्तसे, वियोगवेदना विरहव्याधिः, विषमिव गरलमिव, विसर्पति प्रसरति, पावक इव वह्निरिव अङ्गानि प्रतीकान्, निर्दहति भस्मसात्करोति, मृत्युरिव यम इव, प्राणान् आयुःप्रभृतीन्, निःसारयति निष्कासयति, मोह इव भ्रम इव, विद्यां मन्त्रसिद्धिम्, विलुम्पति लुप्तां करोति, क्रकच इव करपत्रमिव, मर्माणि ईर्माणि कृन्तति छिनत्ति, इत्यादि इतिप्रभृतिकम्, कस्यचित्कस्यापि, आर्तस्वरं पीडितशब्दम्, निशम्य श्रुत्वा, विद्याधरविशालनयनायां खेचरायताक्ष्याम्, मिषेण व्याजेन, अन्तर्हितायां तिरोहितायाम्, सत्याम्, सोऽपि पूर्वोक्तशब्दकर्ता, विद्याधरः खेचरः, विस्मयेन विस्तृते अक्षिणी यस्य तम् आश्चर्यायतलोचनम्, कुरुहर्यक्षं कुरुसिंहम्, 'सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः' इत्यमरः, समीपं निकटम्, आगत्य समेत्य, सगद्गदं समवरुद्धकण्ठस्वरसहितं यथा स्यात्तथा, एवं वक्ष्यमाणप्रकारेण, उवाच जगाद ।

सतीमुदन्येति—सतीमपांसुलाम्, उदन्यया पिपासयाकुलितं दुःखीभूतमन्तरङ्गं हृदयं यस्यास्ताम्, सरोरुहाक्षीं कमललोचनाम्, अत्रैव इहैव, संस्थाप्य स्थितां कृत्वा, जलाशयाय सरोवराय, गतो यातः, अहंतत्प्राणेश्वरः आगत्य जलाशयात्प्रत्यावृत्य, अद्य साम्प्रतम्, प्रतिकूलदिष्टात् विरुद्धभाग्यात्, नाद्राक्षम् नावलोकयामास ॥ ३३ ॥

नरोत्तमेति—हे नरोत्तम हे पुरुषोत्तम, यद्यस्मात्, तया प्राणवल्लभया, सार्धं सह, मम खेचरस्य, विद्यापि विचाराविचारशक्तिरपि, मनोवृत्तिश्च मानसिकशक्तिरपि निर्गता निष्क्रान्ता, तत् तस्मात् कारणात् चिन्तापि, सा कुत्र गता भवेदित्यादिविचारोऽपि, कर्तुं विधातुम्, न हि शक्यते न वै पार्यते ॥३४॥

इति कर्तव्यतामूढं मामुद्दिश्य नरोत्तम ।
प्रज्ञानामग्रगण्यस्त्वं ब्रूहि कर्तव्यमत्र वै ॥ ३५ ॥

इत्यादिविद्याधरदैन्यदन्तुरितवचनरचनामाकर्ण्य पारावारगभीरकुरुवीरो मन्दस्मित-रुचिलहरीकपटेन सुधाधारां किरन्निव गम्भीरवचनगुम्भं विजृम्भयामास ।

धैर्यौदार्यविवर्जितः क्षितिपतिः प्रज्ञाविहीनो गुरुः
कृत्याकृत्यविचारशून्यसचिवः संग्रामभीरुर्भटः ।
सर्वज्ञस्तवहीनकल्पनकविर्वाग्मित्वहीनो बुधः
स्त्रीवैराग्यकथानभिज्ञपुरुषः सर्वे हि साधारणाः ॥ ३६ ॥

वज्रात्कठोरतरमेणदृशां हि चित्तं
पुष्पादतीव मृदुलो वचनप्रचारः ।
कृत्यं निजालककुलादपि वक्ररूपं
तस्माद्बुधाः सुनयनां न हि विश्वसन्ति ॥ ३७ ॥

वक्त्रं श्लेष्मनिकेतनं मलमयं नेत्रद्वयं तत्कुचौ
मांसाकारघनौ नितम्बफलकं रक्तास्थिपुञ्जाततम् ।
शीतांशुर्विकचोत्पलं करिपतेः कुम्भौ महासैकतं
भातीत्येवमुशन्ति मुग्धकवयस्तद्रागविस्फूर्जितम् ॥ ३८ ॥

इतीति—नरेषूत्तमो नरोत्तमस्तत्सम्बुद्धौ हे नरोत्तम हे पुरुषश्रेष्ठ, इति पूर्वोक्तप्रकारेण, कर्तव्यतायां मूढस्तं कार्यानभिज्ञम्, मां शरणापन्नम्, उद्दिश्य समभिलक्ष्य, प्रज्ञानां विदुषाम्, अग्रगण्यः प्रधानः, त्वं भवान् , अत्र विषये, वै निश्चयेन, कर्तव्यं करणीयोपायम्, ब्रूहि निवेदय ॥३५॥

इत्यादीति—इत्यादिः पूर्वोक्तप्रकारा विद्याधरस्य खेचरस्य दैन्यदन्तुरिता दैन्यव्याप्ता या वचनरचना वाक्सन्दर्भस्ताम्, आकर्ण्य श्रुत्वा, पारावार इव सागर इव गभीरोऽगाधधैर्यः, कुरुवीरो जीवन्धरः, मन्दस्मितस्य मन्दहास्यस्य या रुचिलहरी कान्तिपरम्परा तस्याः कपटेन व्याजेन, सुधाधारां पीयूषधाराम् , किरन्निव प्रक्षिपन्निव, गम्भीरवचनगुम्भं विशिष्टार्थोपेतवचनसमूहम् , विजृम्भयामास वर्धयामास, उवाचेति यावत् ।

धैर्यौदार्यविवर्जित इति—धैर्यञ्चौदार्यञ्चेति धैर्यौदार्ये स्थैर्यदातृत्वे ताभ्यां विवर्जितो रहितः, क्षितिपती राजा, प्रज्ञया बुद्ध्या विहीनो रहितः प्रज्ञाविहीनः गुरुरुपाध्यायः कृत्याकृत्ययोः करणीयाकरणीययोर्विचारेण विमर्शेन शून्य इति कृत्याकृत्यविचारशून्यः स चासौ सचिवश्च मन्त्री चेति तथा, संग्रामात्समरात् भीरुर्भीतकः संग्रामभीरुः, भटो योद्धा, सर्वज्ञस्तवेन जिनेन्द्रस्तुत्या हीना रहिता कल्पना समुत्प्रेक्षा यस्येति सर्वज्ञस्तवहीनकल्पनः स चासौ कविश्च काव्यकर्ता चेति तथा, प्रशस्ता वाचः, सन्ति यस्य स वाग्मी तस्य भावो वाग्मित्वं तेन हीनो रहितः, बुधो विद्वान् , स्त्रीवैराग्यस्य वनितानिर्वेदस्य कथायां वार्तायामनभिज्ञ इति स्त्रीवैराग्यकथानभिज्ञः स चासौ पुरुषश्चेति तथा, हि निश्चयेन, एते सर्वे समस्ताः, साधारणाः समानाः, सन्तीति शेषः, समुच्चयालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥३६॥

वज्रादिति—हि यतः, एणदृशां मृगलोचनानाम् , चित्तं मनः, वज्रात्कुलिशात् , कठोरतरं तीक्ष्णतरम् , वचनप्रचारो वाक्यसमूहः पुष्पात्कुसुमात् , अतीव नितराम् , मृदुलः कोमलः, कृत्यं कार्यम् , निजालककुलादपि स्वकीयकेशसमूहादपि, वक्ररूपं कुटिलात्मकम् , अस्तीति शेषः, तस्मात्कारणात् , बुधा विपश्चितः, सुनयनां सुलोचनां नारीमिति यावत् , न हि विश्वसन्ति न वै प्रतियन्ति, तस्या विश्वासं नो कुर्वन्तीति भावः ॥ ३७ ॥

वक्त्रमिति—श्लेष्मणः कफस्य निकेतनं स्थानमिति श्लेष्मनिकेतनम् , वक्त्रं वदनम् , मलमयं मलप्रचुरम् , नेत्रद्वयं नयनयुगलम् , मांसाकारेण पिशिताकारेण घनौ निबिडौ, तस्याः कामिन्याः कुचौ स्तनौ, रक्तञ्च रुधिरञ्चास्थीनि च कीकसानि चेति रक्तास्थीनि तेषां पुञ्जेन समूहेनाततं विस्तृतं स्थूलमिति

इत्यादिनिजवचोविलासं विद्याधरजडहृदये सारमेयोदरे सर्पिरिवासंलग्नमालोक्य विस्तारितकरुणः कुरुवारणः, तस्माद्विपिनान्निर्गत्य, निसर्गरुचिरां नितम्बिनीमिव मुखभागकलिततिलकशोभमानां पृथुलकुचविराजितमदनतरूपशोभितां मदनाधिष्ठितां चारामस्थलीमाससाद ।

यत्र हि—

श्रोत्रं भृङ्गकुलारवः सुखयति प्रत्यग्रपुष्पस्तरु-
　　नेत्रं फुल्लसरोजगन्धलहरी घ्राणं मनो दीर्घिका ।
वायुः स्पर्शनमन्ततो रसभरीपूर्णः फलानां चयः
　　पक्वोऽयं रसनां तदिन्द्रियगणः सर्वः सुखं गाहते ॥ ३९ ॥
निर्मला सरसी यत्र निर्मिमीते मुदं पराम् ।
विशाला पद्मरुचिरा वीक्षिकेव वनश्रियः ॥ ४० ॥

तत्र चाभ्रंलिहस्य शकुन्तसन्तानदन्तुरितनीलच्छदस्य मधुलुब्धमधुकरकुलालङ्कृतस्य कस्य चरसालस्मारुहस्य शाखाग्रभागविराजितं वनदेवतारसपूर्णहेमकरण्डकायमानं परिपाकपाटलफलं

यावत्, नितम्बफलकं कटिपश्चात्प्रदेशः क्रमेण, शीतांशुश्चन्द्रः, विकचोत्पलं प्रफुल्लनीलारविन्दम्, करिपतेर्गजेन्द्रस्य, कुम्भो गण्डो, महासैकतं दीर्घपुलिनम्, इवेति शेषः, भाति शोभते, एवमनेन प्रकारेण, मुग्धकवयो मूढकवयः, तस्यां रागस्तद्रागस्तस्य विस्फूर्जितं वृद्धिर्यथा स्यात्तथा, उशन्ति इच्छन्ति, 'वश कान्तौ' इत्यस्य लटि रूपम् । यथासंख्यमलङ्कारः ॥३८॥

इत्यादिनिजवचोविलासमिति—इत्यादिश्चासौ निजवचोविलासश्च तम्, पूर्वोक्तस्ववचनचेष्टितम्, विद्याधरस्य खगस्य जडहृदये मुग्धमनसि, सारमेयोदरे कुक्कुरजठरे, सर्पिरिव घृतमिव, असंलग्नमनात्मकम्, आलोक्य दृष्ट्वा, विस्तारिता प्रसारिता करुणा कृपा येन सः, कुरुवारणो जीवन्धरः, तस्मात्पूर्वोक्तात्, विपिनात् काननात्, निर्गम्य निष्क्रम्य, निसर्गरुचिरां स्वभावसुभगाम्, नितम्बिनीमिव नारीमिव, आरामस्थलीमुद्यानभूमिम्, आससाद समुपजगाम, अथोभयोः सादृश्यमाह—मुखभागेऽग्रभागे पक्षे वदनैकदेशे ललाट इति यावत्, कलितेन स्थितेन तिलकेन क्षुरकवृक्षेण पक्षे स्थासकेन शोभमाना विराजमाना ताम्, पृथुभिर्बृहदाकारैर्लकुचैर्डहुवृक्षैः पक्षे पृथुलाभ्यां पीनाभ्यां कुचाभ्यां स्तनाभ्यां विराजितां शोभिताम्, मदनकैर्मदनकवृक्षैरुपशोभितां विराजितां पक्षेऽमतरूपेणात्यन्तसौन्दर्येण शोभितां समलङ्कृताम्, मदनेन मदनवृक्षेण पक्षे कामेनाधिष्ठितां सहिताम् ।

यत्र हि—यस्यामारामस्थल्यां हि ।

श्रोत्रमिति—भृङ्गकुलस्य षट्पदसमूहस्यारवो गुञ्जनध्वनिः, श्रोत्रं कर्णम्, प्रत्यग्राणि नूतनानि पुष्पाणि कुसुमानि यस्मिन्निति प्रत्यग्रपुष्पः, तरुर्वृक्षः, नेत्रं नयनम्, फुल्लसरोजानां विकसितसरसीरुहाणां गन्धलहरी सौरभपरम्परा, घ्राणं नासाम्, दीर्घिका वापिका, मनो हृदयम्, वायुः पवनः, स्पर्शनमाद्येन्द्रियम्, रसभरीपूर्णो रसनिष्यन्दसम्भृतः, पक्वः परिणतः, अयमेषः, फलानां मोचामातुलिङ्गमाकन्दादीनाम्, चयः समूहः, रसनाम्, अन्ततः सामस्त्येन, सुखयति सुखं करोति, तत् तस्मात्कारणात्, यत्रारामस्थल्याम्, सर्वो निखिलः, इन्द्रियगणो हृषीकसमूहः, सुखं हर्षम्, गाहते प्राप्नोति ॥३९॥

निर्मलेति—यत्रारामस्थल्याम्, निर्मला पङ्कादिमलरहिता पक्षे तिमिरादिदोषशून्या विशाला सुदीर्घा, पद्मैः कमलै रुचिरा मनोहरा पक्षे पद्ममिव कमलमिव रुचिरा मनोहरा, वनश्रियः काननलक्ष्म्याः, वीक्षिकेव दृष्टिरिव, सरसी कासारः परामत्यन्ताम्, मुदं हर्षम्, निर्मिमीते जनयति । उपमा ॥४०॥

तत्र चेति—तत्र आरामस्थल्यां च, शकुन्तसन्तानेन पक्षिसमूहेन दन्तुरितानि नतोन्नतानि नीलच्छदानि हरितपत्राणि यस्य तस्य, मधुनि मकरन्दे लुब्धानि सतृष्णानि यानि मधुकरकुलानि भ्रमरसमूहास्तैरलङ्कृतस्य शोभितस्य, कस्यचन कस्यापि रसालस्यासौ रसारुहश्चेति रसालरसारुहस्तस्य माकन्दमहीरुहस्य शाखाग्रभागे लताग्रप्रदेशे विराजितं शोभितम्, वनदेवताया काननाधिष्ठातृदेव्या रसपूर्णहेमकरण्डकमिव रसभृतसुवर्णपात्रमिवाचरतीति तथाभूतम्, परिपाकेन परिणामेन पाटलं श्वेतरक्तं फलं तत्,

पातयितुं प्रयतमानानपराद्धानेकशरनिकरान्नरपतिकुमारानवलोक्य, लोकोत्तरकोदण्डविद्यापाण्डित्यमण्डितो जीवन्धरः करकलितकार्मुकलताविस्फारपूरितदिगन्तरः, सरभसप्रक्षिप्तप्रक्ष्वेडनलक्षीकृतं तत्फलं सशिलीमुखं करेणोपादत्त ।

उदारः सहकारोऽयं मार्गणाय फलं दिशन् ।
भेजे कल्पकतां नो चेत्सुमनस्सेव्यता कथम् ॥ ४१ ॥

दृष्ट्वा फलं सशरमापतितं कराब्जे
जीवन्धरस्य शरकौशलपारगस्य ।
व्यस्मेष्ट मङ्क्षु नरपालतनूजवर्गः
श्लाघावशेन विगलन्निजकर्णपूरम् ॥ ४२ ॥

ततस्तत्समीपमभ्येत्य कलितविनयो राजतनयः, ससाध्वसं, भो भो महाभाग कार्मुकविद्याकोविद, मामज्ञातभवादृशसज्जनसमुचितसल्लापप्रकारमपि मुखरयति श्रीमदीयचापविद्यावैदग्ध्यनिरीक्षणक्षणजनितविस्मयः काञ्चनगौरतावकशरीरसौन्दर्यावलोकनजातानन्दकन्दलश्च ।

अतस्त्वां प्रार्थये श्रीमन्युक्तं वायुक्तमेव वा ।
मामकीनं वचो नूनं कर्णदेशे विधीयताम् ॥ ४३ ॥

पातयितुं भ्रंशयितुम्, प्रयतन्त इति प्रयतमानास्तान् प्रयासं कुर्वाणान्, अपराद्धो लक्ष्यच्युतोऽनेकशरनिकरो विविधबाणसमूहो येषां तान्, नरपतिकुमारान् राजपुत्रान्, अवलोक्य दृष्ट्वा, लोकोत्तरं सर्वश्रेष्ठं यत्कोदण्डविद्यायां धनुर्विद्यायां पाण्डित्यं वैशारद्यं तेन मण्डितः शोभितः, जीवन्धरो विजयासूनुः, करे हस्ते कलिता धृता या कार्मुकलता धनुर्वल्लरी तस्या विस्फारेण समास्फालनरवेण पूरितं व्याप्तं दिगन्तरं काष्ठान्तरालं येन तथाभूतः सन्, सरभसं सवेगं यथा स्यात्तथा प्रक्षिप्तं चालितं यत्प्रक्ष्वेडनं बाणस्तेन लक्षीकृतं शरव्यीकृतम्, तत्फलं तत्माकन्दप्रसवम्, सशिलीमुखं बाणसहितम्, करेण हस्तेन, उपादत्त जग्राह ।

उदार इति—उदारो महान् पक्षे दानशीलः, मार्गणाय बाणाय पक्षे याचकाय, फलं प्रसवं पक्षे समीप्सितार्थम्, दिशन् ददन्, अयमेषः सहकार आम्रः, चेद्यदि, कल्पकतां कल्पवृक्षताम्, नो भेजे न प्राप्तवान्, तर्हि सुमनोभिः पुष्पैः पक्षे देवैः सेव्यता सहितता समुपास्यता च, कथं केन कारणेन स्यादिति शेषः, 'सुमनाः पुष्पमालत्योः स्त्रियां धीरे सुरे पुमान्' इति विश्वलोचनः । श्लेषः ॥४१॥

दृष्ट्वेति—शरकौशलस्य बाणवैदग्ध्यस्य पारमन्तं गच्छतीति शरकौशलपारगस्तस्य, जीवन्धरस्य जीवकस्य, कराब्जे पाणिपद्मे, सशरं सबाणम्, आपतितं सम्प्राप्तम्, फलमाम्रप्रसवम्, दृष्ट्वा विलोक्य, नरपालतनूजवर्गो राजकुमारकलापः, श्लाघावशेन प्रशंसापरतया, विगलन्निजकर्णपूरं स्रंसमानस्वकीयावतंसं यथा स्यात्तथा, मङ्क्षु शीघ्रम्, व्यस्मेष्ट विस्मितो बभूव । वसन्ततिलकावृत्तम् ॥४२॥

ततस्तत्समीपमिति—ततस्तदनन्तरम्, तत्समीपं जीवकाभ्यर्णम्, अभ्येत्य समागत्य, कलितविनयो धृतनम्रत्वः, राजतनयो नृपतिनन्दनः, ससाध्वसं सभयं, यथा स्यात्तथा, इत्थमनेन प्रकारेण, अवोचत जगाद, भो भो हे हे कार्मुकविद्यायां धनुर्विद्यायां कोविदो निपुणस्तत्सम्बुद्धौ, हे कार्मुकविद्याकोविद, महाभाग महानुभाव, श्रीमदीयस्य भवदीयस्य चापविद्यावैदग्ध्यस्य धनुर्विद्यापाण्डित्यस्य निरीक्षणक्षणेऽवलोकनकाले जनितः समुत्पन्नो यो विस्मय आश्चर्यं सः, काञ्चनगौरस्य सुवर्णपीतस्य तावकशरीरस्य त्वदीयदेहस्य यत्सौन्दर्यं लावण्यं तस्यावलोकनं दर्शनं तेन जातः समुद्भूतो य आनन्दकन्दलो हर्षसमूहः स च, अज्ञातोऽविदितो भवादृशस्य त्वत्सदृशस्य सज्जनस्य समुचितो योग्यः सल्लापप्रकारः सम्भाषणशैली येन तथाभूतमपि, मां भवत्पुरोवर्तमानम्, मुखरयति वाचालयति ।

अतस्त्वामिति—अतोऽस्मात्कारणात्, हे श्रीमन् हे महानुभाव, त्वां भवन्तम्, प्रार्थये विनयेन निवेदयामि, युक्तं वा समुचितं वा, अयुक्तमसमुचितमेव वा मामकीनं मदीयम्, वचो वचनम्, नूनं निश्चयेन, कर्णदेशे श्रवणप्रान्ते, विधीयताम् क्रियताम् । उचितमनुचितं वा मद्वचः श्रूयतामिति भावः ॥ ४३ ॥

अत्रास्ति हेमाभपुरी गरीयसी यद्गृहसौधेष्वधिरात्रि संपतन् ।
सुधामयूखः कलशार्णवान्तरे पुनर्निवासं कलयन्निवेक्ष्यते ॥ ४४ ॥

कुरुविन्दमन्दिरकुलानि संगता-
न्यरुणस्य बालकिरणैः सहैकताम् ।
तमसीव हस्तपरिमर्शतः प्रगे
परिनिश्चिनोति पुरि यत्र सज्जनः ॥ ४५ ॥

दृढमित्र इति प्रतीतभूपः पुरमेनां परिपालयत्यजस्रम् ।
नलिना नलिनामलायताक्षी महिषी तस्य महीललामवल्ली ॥४६॥

तयोः सुताः सुमित्राद्यास्तेष्वप्यन्यतमोऽस्म्यहम् ।
विद्याहीना वयं सर्वे नद्या हीना इवाद्रयः ॥४७॥

अतः कोदण्डविद्याकुशलं नरशार्दूलमन्वेषमाणोऽस्मत्तातपादः, पराक्रमापहृतसामन्तसीमन्तिनीनयनकज्जलकालिकाशङ्कावदान्यमौर्वीकिणश्यामिकालङ्कृतभुजदण्डस्य श्रीमतः सन्दर्शनेन, कलापीव बलाहकदर्शनेन, नदीपतिरिव निशाकरदर्शनेन, वनोत्कर इव वसन्तदर्शनेन, कमलाकर इव कमलबन्धुदर्शनेन, प्रमोदसर्वस्वमनुभविष्यति ।

तस्मादस्मत्पितुर्वाञ्छावल्लीं सम्प्रति पुष्पिताम् ।
सभास्तारदृशश्चापि सफलीकुरु कोविद ॥४८॥

अत्रास्तीति—अत्र इह प्रदेशे, गरीयसी श्रेष्ठतरा, हेमाभपुरी एतन्नामनगरी, अस्ति विद्यते, अधिरात्रि रजन्याम् यद्गृहसौधेषु यदीयहीरकहर्म्येषु संपतन् प्रतिबिम्बितः, सुधारूपा मयूखा यस्य स सुधामयूखश्चन्द्रः, कलशार्णवान्तरं क्षीरसागरमध्ये, पुनर्भूयः, निवासमावासम्, कलयन्निव प्राप्नुवन्निव, ईक्ष्यते दृश्यते । उत्प्रेक्षालङ्कारः । इन्द्रवंशावंशस्थयोः संमिश्रणादुपजातिवृत्तम् ॥ ४४ ॥

कुरुविन्देति—यत्र यस्याम्, पुरि नगर्याम्, सज्जनः सत्पुरुषः प्रगे प्रातःकाले, अरुणस्य सूर्यस्य, बालकिरणैर्बालरश्मिभिः, सह सार्धम्, एकतामभिन्नताम्, संगतानि प्राप्तानि, कुरुविन्दमन्दिरकुलानि पद्मरागमणिमयभवनानि, तमसीव ध्वान्त इव, हस्तपरिमर्शतः करस्पर्शतः परिनिश्चिनोति परितो निर्णीते । तद्गुणालङ्कारः । मञ्जुभाषिणीच्छन्दः ॥ ४५ ॥

दृढमित्र इति—दृढमित्र इति प्रतीतभूपः दृढमित्रनाम्ना प्रसिद्धो राजा, एनामेताम्, पुरं नगरीम्, अजस्रं निरन्तरम्, परिपालयति रक्षति, तस्य दृढमित्रस्य, नलिने इव कमले इवामले निर्मले आयते सुदीर्घे अक्षिणी नयने यस्यास्तथाभूता, महीललामवल्ली पृथिव्याभरणलता, नलिना एतन्नामवती, महिषी पट्टराज्ञी, अस्तीति शेषः ॥ ४६ ॥

तयोरिति—सा च स चेति तौ तयोर्नलिनादृढमित्रयोः, सुमित्राद्याः सुमित्रप्रभृतयः, सुताः पुत्राः, सन्तीति शेषः, अहमपि, तेषु सुमित्राद्येषु, अन्यतम एकः, अस्मि भवामि, वयं सर्वे निखिलाः, नद्या स्रवन्त्या, हीना रहिताः, अद्रय इव पर्वता इव, विद्याहीना विद्यारहिताः, स्म इति शेषः ॥ ४७ ॥

अतः कोदण्डेति—अतोऽस्मात्कारणात्, कोदण्डविद्याकुशलं धनुर्विद्यानदीष्णम्, नरशार्दूलं पुरुषसिंहम्, अन्वेषमाणो गवेषमाणः, अस्मत्तातपादो मदीयपितृचरणः, पराक्रमेण बलातिशयेनापहृतं दूरीकृतं यत् सामन्तसीमन्तिनीनां मण्डलेश्वरमानिनीनां नयनकज्जलं नेत्राञ्जनं तस्य कालिका कार्ष्ण्यं तस्याः शङ्कायां संशीतौ वदान्यो दानृनिपुणो या मौर्वीकिणश्यामिका प्रत्यञ्चाकिणकालिमा तयालङ्कृतः समुद्भासितो भुजदण्डो यस्य तथाभूतस्य, श्रीमतो भवतः, संदर्शनेन विलोकनेन बलाहकदर्शनेन मेघावलोकनेन, कलापीव मयूर इव, निशाकरदर्शनेन चन्द्रावलोकनेन, नदीपतिरिव सागर इव, वसन्तदर्शनेन कुसुमाकरविलोकनेन, वनोत्कर इव काननसमूह इव, कमलबन्धुदर्शनेन सूर्यसाक्षात्कारेण, कमलाकर इव पद्माकर इव, प्रमोदसर्वस्वमानन्दतत्त्वम्, अनुभविष्यति समुपभोक्ष्यते । मालोपमा ॥

तस्मादिति—तस्मात्कारणात्, हे कोविद हे विद्वन्, अस्मत्पितुर्मदीयजनकस्य, पुष्पितां कुसुमिताम्

स तस्य विनयोज्ज्वलां वचनबन्धशैलीं श्रुतौ
मनस्यनुमतिं धरापतिनिरीक्षणाय क्षणात् ।
रथे च चरणाम्बुजं नृपसुतैः पुरः स्थापिते
चकार युगपद्दयाजलनिधिः कुरूणां पतिः ॥४९॥

तदनु प्रत्येकमधिष्ठितस्यन्दनैर्नृपनन्दनैः परिवृतशताङ्गः कुरुकुलशशाङ्कः पुरद्वारं प्रविश्य प्रासादवातायनदत्तनयनैर्विलासिनीजनैः सस्पृहमालोक्यमानः क्रमेण नरपतिभवनद्वारि रथादवतीर्य तैः पुरस्कृतो दौवारिकजनदीयमानमार्गः क्षितिपतिसंसदमाससाद ।

भूपोऽपि नन्दनगिरा वपुषा च तस्य
माहात्म्यसंपदमवेत्य चकार वीरम् ।
तं रत्नपीठशिखरे तदुपान्तभूमौ
पुत्रांस्तदाननविधौ निजदृक्चकोरम् ॥५०॥

अनामयोक्तेरनुजाथ वाणी नृपाननाब्जाद्द्रुतमाविरास ।
फुल्लात्सरोजान्मकरन्दभर्याः पश्चात्प्रभूतेव सुगन्धिलक्ष्मीः ॥५१॥

कत्यास्त्वदीयविरहकातरीकृतमानसाः ।
कत्यानां नयनानन्दः सम्भविष्यति दर्शनात् ॥५२॥

वाञ्छावल्लीमालवालताम्, तारदृशो विशाललोचनाः, सभाः समितीश्चापि, सम्प्रति साम्प्रतम् सफलीकुरु सफलय, स्वकीयदर्शनेनेति यावत् ॥४८॥

स तस्येति—दयाजलनिधिः करुणाकूपारः, स पूर्वोक्तः, कुरूणां पतिर्जीवन्धरः, तस्य महीपालसुतस्य विनयेन प्रश्रयेणोज्ज्वला मनोहरा ताम् वचनबन्धशैलीं वाणीसन्दर्भम् । श्रुतौ कर्णे, क्षणादचिरम्, धरापतिनिरीक्षणाय राजावलोकनाय, अनुमतिं सम्मतिम्, मनसि चेतसि, चरणाम्बुजं पादारविन्दम्, नृपसुतै राजकुमारैः, पुरोऽग्रे, स्थापिते निवेशिते, रथे च स्यन्दने च, युगपदेककालावच्छेदेन, चकार विदधौ । पृथिवीच्छन्दः ।

तदन्विति—तदनु तदनन्तरम् प्रत्येकम् एकैकशः, अधिष्ठितान्यध्यारूढानि स्यन्दनानि रथा यैस्तैः, नृपनन्दनै राजपुत्रैः, परिवृतं परिवेष्टितं शताङ्गं स्यन्दनं यस्य सः, कुरुकुलस्य कुरुवंशस्य शशाङ्कश्चन्द्रः, जीवन्धर इति यावत्, पुरद्वारं गोपुरम्, प्रविश्य प्रवेशं कृत्वा, प्रासादानां हर्म्याणां वातायनेषु गवाक्षेषु दत्तानि समर्पितानि नयनानि लोचनानि यैस्तैः, विलासिनीजनैर्वनितावृन्दैः सस्पृहं सोत्कण्ठं यथा स्यात्तथा, आलोक्यमानो दृश्यमानः, सन्, क्रमेण क्रमशः, नरपतिभवनस्य राजमन्दिरस्य द्वारि प्रवेशमार्गे, रथात्स्यन्दनात्, अवतीर्यावरुह्य, तै राजसुतैः, पुरस्कृतोऽग्रेकृतः, दौवारिकजनैः प्रतीहारजनैर्दीयमानोऽर्प्यमाणो मार्गः पन्था यस्य तथा भूतः सन्, क्षितिपतिसंसदं राजसभाम्, आससाद प्राप ।

भूपोऽपीति—भूपोऽपि दृढमित्रनरेन्द्रोऽपि, नन्दनगिरा पुत्रवाण्या, तस्य जीवन्धरस्य, वपुषा देहेन च, तस्य, माहात्म्यमेव सम्पद् तां प्रभुत्वसम्पत्तिम्, अवेत्य ज्ञात्वा, वीरं सुभटम्, तं कुमारम्, रत्नपीठशिखरे मणिमयासनाग्रभागे, पुत्रान् सुतान्, तदुपान्तभूमौ तदभ्यर्णमह्याम्, निजदृक्चकोरं स्वकीयलोचनजीवंजीवम्, तदाननविधौ जीवन्धरवदनचन्द्रमसि, चकार विदधे । वसन्ततिलकावृत्तम् ॥५०॥

अनामयोक्तेरिति—अथानन्तरम्, फुल्लात् विकसितात्, सरोजात् कमलात्, मकरन्दभर्याः कौसुमरससन्ततेः, पश्चादनन्तरम्, प्रभूता समुत्पन्ना, सुगन्धिलक्ष्मीरिव सुरभिश्रीरिव, नृपाननाब्जात् राजवदनवारिजात्, अनामयोक्तेः अनामयमारोग्यमस्तीत्युक्तिरनामयोक्तिस्तस्याः कुशलप्रश्नस्य, अनुजा पश्चाज्जाता, वाणी भारती, द्रुतं सत्वरम्, आविरास प्रकटीबभूव । "ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम् । वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च" इति मनुः ॥५१॥

कत्यस्या इति—क भवाः कत्याः कुत्रत्या जनाः, त्वदीयेन विरहेण कातरीकृतं भीरूकृतं मानसं चित्तं

को वा देशः पचेलिमभाग्यः श्रीमदीयप्रवालकोपमपदयुगलस्पर्शसुखमनुभविष्यति। कीदृशपुरप्रासादाङ्गणालङ्करणरमणीनां नयनकुवलयेषु श्रीमदीयसन्दर्शनकन्दलितानन्दबाष्पनिष्यन्दो मकरन्दशङ्कामङ्कुरयिष्यति। कस्यां वा वंशवल्ल्यां विमुक्तोपमानोऽपि भवान्मुक्ताफलायते। कः पुनः श्रीमता पुत्रवतां मौलिमाणिक्यतामारोपितो भाग्यवतां माहात्म्यवतां कीर्तिमतां च।

इत्यादिप्रश्नपदवीं यथायोग्योत्तराक्षरैः।
लङ्घयामास जङ्घालः स्वामी वचनवर्त्मनि ॥५३॥
विनयकन्दलितैर्विमलोत्तरैर्नरपतिर्द्विगुणीकृतकौतुकः।
चिरमयाचत नन्दनसंसदां वरशरासकलाप्रतिपादनम् ॥५४॥
विज्ञाय तदभिप्रायं प्रज्ञाशाली नराधिपः।
कौरवस्य वशे चक्रे कुमारानखिलानपि ॥५५॥

तदनु कोदण्डभिण्डिपालपरिघमुद्गरपरश्वधादिपरिष्कृताम्, क्षोणीमिव शरधिभिरलङ्कृताम्, त्रिदशनगरीमिव सर्वतोऽमरसेविताम्, जलधिवेलामिव प्रचुरतरवारिविराजिताम्, वनसीमामिव

येषां तथाभूताः सन्तीति शेषः, कुत आगतो भवानिति भावः, कस्यानां कुत्रभवानाम्, नयनानन्दो लोचनहर्षः, दर्शनाद् भवद्विलोकनात्, सम्भविष्यति समुत्पत्स्यते, कुत्र गमिष्यति भवानिति भावः ॥५२॥

को वा देश इति—पचेलिमं पाकार्हं भाग्यं सुदैवं यस्य तथाभूतः, को वा देशो जनपदः, श्रीमदीयं भवदीयं प्रवालकोपमं किसलयतुल्यं यत्पदयुगलं चरणयुगं तस्य यत् स्पर्शसुखं संसर्गशानम् तत्, अनुभविष्यति प्राप्स्यति। कीदृशस्य किम्प्रकारस्य पुरस्य नगरस्य प्रासादाङ्गणानां भवनाजिराणामलङ्करणानि भूषणानि या रमण्यो ललनास्तासां नयनकुवलयेषु नेत्रनीलारविन्देषु, श्रीमदीयसन्दर्शनेन भवदीयावलोकनेन कन्दलितः समुत्पन्नो यो बाष्पनिष्यन्दो हर्षाश्रुभरः सः, मकरन्दशङ्कां कौसुमसन्देहम्, 'मकरन्दश्च कौसुमम्' इति धनञ्जयः, अङ्कुरयिष्यति जनयिष्यति। कस्यां वा किन्नामधेयायां वा वंशवल्ल्यां गोत्रसन्ततौ पक्षे वेणुलतायाम्, मुक्तारूपमुपमानं मुक्तोपमानं विगतं मुक्तोपमानं यस्य तथाभूतः सन्नपि मुक्ताफलोपमारहितोऽपि, पक्षे विमुक्तं दूरीभूतमुपमानं यस्य तथाभूतोऽपि सन्, मुक्ताफलायते मुक्ताफलमिवाचरति, पुनः किञ्च कः किन्नामधेयो जनः श्रीमता भवता, पुत्रवतां सुतयुक्तानाम्, भाग्यवतां भाग्यशालिनाम्, माहात्म्यवतां महत्त्वोपेतानाम्, कीर्तिमताञ्च यशस्विनाञ्च, मौलिमाणिक्यतां मुकुटरत्नतां श्रेष्ठतामिति यावत्, आरोपितः प्रापितः, कस्य पुत्रो भवानिति यावत्।

इत्यादीति—वचनवर्त्मनि वाक्पथे, जङ्घालः प्रकृष्टगामी, स्वामी जीवकः, इत्यादिप्रश्नपदवीं पूर्वोक्तप्रश्नमार्गम्, यथायोग्योत्तराक्षरैः समुचितोत्तरवर्णैः, लङ्घयामास समतिचक्राम ॥५३॥

विनयकन्दलितैरिति—विनयेन कन्दलितानि विनयकन्दलितानि तैर्नम्रतासमुद्भूतैः विमलोत्तरैरुज्ज्वलसमाधानैः, द्विगुणीकृतं कौतुकं कौतूहलं यस्य तथाभूतः, नरपतिर्दृढमित्रः, नन्दनसंसदः पुत्रसमूहस्य, वरशरासकलाया उत्तमकोदण्डवैदग्ध्याः, प्रतिपादनं प्रदानम्, चिरं दीर्घकालपर्यन्तम्, अयाचत प्रार्थितवान्। अस्मत्पुत्रान् धनुर्विद्यायां निपुणान्विधेहीति तं दृढमित्रश्चिरं प्रार्थयामासेति भावः ॥५४॥

विज्ञायेति—प्रज्ञाशाली बुद्धिशोभी, नराधिपः, तदभिप्रायं जीवकाशयम्, विज्ञाय विदित्वा, अखिलानपि सर्वानपि, कुमारान् पुत्रान्, कौरवस्य जीवन्धरस्य, वशे निघ्नतायाम्, चक्रे विदधे ॥५५॥

तदन्विति—तदनु तदनन्तरम्, कोदण्डं कार्मुकं, भिण्डिपालः (भिन्दिपालः), सृगः अश्मप्रक्षेपसाधनं रज्जुमयो यन्त्रविशेष इति यावत्, परिघः परिघातिनः—लोहबद्धहस्तप्रमाणलगुड इति यावत्, मुद्गरो घनः, परश्वधः कुठारः, एषां द्वन्द्वः तदादिभिस्तत्प्रभृतिभिः परिष्कृता सहिता ताम्, 'धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्' 'भिन्दिपालः सृगस्तुल्यौ परिघः परिघातिनः' 'द्रुघणो मुद्गरघनौ' 'द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः' इति सर्वत्रामरः, क्षोणीमिव पृथिवीमिव शरधिभिस्तूणीरैः पक्षे जलधिभिः, अलङ्कृतां शोभिताम्, त्रिदशनगरीमिव देवपुरीमिव, सर्वतोमरसेवितां सर्वाणि च तानि तोमराणि चेति सर्वतोमराणि

पत्त्रिकुलपरिवृताम्, आयुधकान्तिसन्तानद्विगुणीकृतारुण्यरक्तमृत्तिकापरीतभूमिभागतया मूर्तमिव चापविद्याविशारदप्रतापमादधानाम्, मध्ये निखातवज्रमयस्तम्भशोभिततया प्रहरणगणविजित्य वन्दीकृतमिव कुलिशायुधकुलिशं बिभ्राणामायुधशालां शुभे मुहूर्ते प्रविश्य जीवन्धरः क्षितिपति-तनयानुद्दिश्य कार्मुककौशलं विवरीतुमारेभे।

नृपात्मजानां निचयस्ततो नु कोदण्डविद्याकुशलत्वमाप।
तत्कीर्तिकल्लोलपरम्परा च जगत्त्रयं मोदरसं महीशः ॥५६॥

विद्यावैदग्ध्यपीठीमधिवसति निजे नन्दनानां समाजे
दृष्टिं हेमासनस्थे कुरुकुलतपने प्रीतिमन्तश्च चिन्ताम्।
किं कुर्यामस्य वीरव्रजमहितकलादानमान्योपकार-
श्लाघ्यस्येति क्षितीशश्चिरतरमतनोद्धीमतामग्रगण्यः ॥५७॥

तदनु कन्याविश्राणनं करणीयं गणयता नरपालमणिना प्रार्थितं परिणयं वरुणालयगभीरः करुणाकरो जीवन्धरः क्रमेणाङ्गीचकार।

निखिलसर्वला तैः सेविता ताम्, पक्षे सर्वतः समन्तात् अमरैर्देवैः सेविता ताम् 'तोर्गन्ता म्रियतेऽनेन तोमरः' इति तोमरशब्दव्युत्पत्तिः 'सर्वला (शर्वला) तोमरोऽस्त्रियाम्' इत्यमरः, जलधिवेलामिव सागरतटीमिव, प्रचुराः प्रभूता ये तरवारयः कृपाणास्तैर्विराजिता शोभिता ताम् पक्षे प्रचुरतराणि प्रभूततमानि यानि वारीणि जलानि तैर्विराजितां शोभिताम्, वनसीमामिव काननमर्यादामिव, पत्त्रिकुलैः बाणसमूहैः परिवृता ताम्, पक्षे पत्त्रिकुलैः पक्षिसमूहैः परिवृता ताम्, आयुधानां शस्त्राणां कान्तेर्दीप्त्या द्विगुणीकृतं यदारुण्यं लौहित्यं तेन रक्ता लोहिता या मृत्तिका मृत् तया परीतो व्याप्तो भूमिभागो महीप्रदेशो यस्यास्तस्या भावस्तया, मूर्तं सशरीरम्, चापविद्याविशारदस्य धनुर्विद्याकोविदस्य प्रतापस्तेजस्तम्, आदधानामिव बिभ्राणामिव, मध्येऽन्तः, निखातः समारोपितो यो वज्रमयस्तम्भः सुदृढस्तम्भस्तेन शोभिततया समुद्भासितत्वेन, प्रहरणगणैः शस्त्रसमूहैः, विजित्य पराभूय, वन्दीकृतं कारावस्थापितम्, कुलिशायुधस्य वज्रायुधस्य पुरन्दरस्येति यावत्, कुलिशं वज्रम्, बिभ्राणामिव दधानामिव, आयुधशालां शस्त्रागारम्, शुभे मङ्गले, मुहूर्ते समये, प्रविश्य प्रवेशं कृत्वा, जीवन्धरो विजयात्मजः, क्षितिपतितनयान् राजकुमारान्, उद्दिश्य समभिलक्ष्य, कार्मुककौशलं शरासननैपुण्यम्, विवरीतुं व्याख्यातुं प्रकटयितुमिति यावत्, आरेभे समारब्धवान्। श्लिष्टोपमालङ्कारः।

नृपात्मजानामिति—ततस्तदनन्तरम्, नृपात्मजानां नरेन्द्रनन्दनानाम्, निचयः समूहः कोदण्डविद्यायां धनुर्विद्यायां कुशलत्वं नैपुण्यम्, आप लेभे, तस्य जीवन्धरस्य कीर्तिकल्लोलपरम्परा यशस्तरङ्गसन्ततिः, जगत्त्रयं लोकत्रितयम्, महीशो नृपः, मोदरसं च प्रहर्षातिशयञ्च, आप लेभे, तु वितर्के ॥ ५६ ॥

विद्यावैदग्ध्येति—धीमतां बुद्धिमताम्, अग्रगण्यः प्रधानः, क्षितीशो नृपः विद्यावैदग्ध्यं धनुर्विद्याकौशलमेव पीठी आसनं ताम्, अधिवसति आश्रयति, निजे स्वकीये, नन्दनानां पुत्राणाम्, समाजे समूहे, दृष्टिं स्निग्धां दृशम्, हेमासनस्थे सुवर्णपीठस्थिते कुरुकुलतपने कुरुवंशसूर्ये, जीवन्धर इति यावत्, प्रीतिं प्रसन्नताम्, अन्तश्च स्वकीयहृदये च, वीरव्रजैः सुभटसमूहैर्महिता पूजिता या कला कोदण्डवैदग्ध्यं तस्या दानमेव प्रदानमेव मान्यश्चासौ समादरणीयश्चासावुपकार उपग्रहश्चेति तेन श्लाघ्यः प्रशंसनीयस्तस्य, अस्य जीवन्धरस्य, किं किन्नामधेयम्, कुर्याम् विदध्याम्, उपकारमिति शेषः, इतीत्थम्, चिन्तां विचारसन्ततिम्, चिरतरं दीर्घकालपर्यन्तम्, अतनोत विस्तारयामास ॥ ५७ ॥

तदन्विति—तदनु चिन्तानन्तरम्, कन्याविश्राणनं पतिंवराप्रदानम्, करणीयं कर्तुं योग्यम्, गणयता निश्चिन्वता, नरपालमणिना राजश्रेष्ठेन, प्रार्थितं याचितम्, परिणयं विवाहम्, वरुणालय इव सागर इव गम्भीरो धीर इति वरुणालयगम्भीरः, करुणाकरो दयाकरः, जीवन्धरः कुरुवंशाग्रणीः, क्रमेण क्रमशः अङ्गीचकार स्वीचकार।

नरपतिपरिदत्तां यौवनारम्भमत्तां
सपदि कनकमालां वक्षसि श्लिष्टमालाम् ।
सकलगुणवरिष्ठां सन्मुहूर्ते वरिष्ठे
कुरुपतिरुपयेमे मण्डपे तत्र हैमे ॥५८॥

इति महाकविहरिचन्द्रविरचिते श्रीमति जीवन्धरचम्पूकाव्ये
कनकमालालम्भो नाम सप्तमो लम्भः ।

नरपतिपरिदत्तामिति—कुरुपतिर्जीवन्धरः, तत्र तस्मिन्, हैमे सौवर्णे, मण्डपे जनाश्रये 'मण्डपोऽस्त्री जनाश्रयः' इत्यमरः, नरपतिना राज्ञा परिदत्तां समर्पिताम् । यौवनस्य तारुण्यस्यारम्भे प्रक्रमेण मत्ताम्, वक्षसि भुजमध्ये, श्लिष्टा संसक्ता माला स्रग्यस्यास्ताम्, सकलगुणैर्निखिलगुणैर्वरिष्ठा श्रेष्ठा ताम्, कनकमालामेतन्नामकन्याम्, वरिष्ठे श्रेष्ठे, सन्मुहूर्ते शुभलग्ने, उपयेमे परिणीतवान् ॥५८॥

इति श्रीमहाकविहरिचन्द्रविरचिते श्रीमति 'कौमुदी' व्याख्याधरे जीवन्धरचम्पूकाव्ये
कनकमालालम्भो नाम सप्तमो लम्भः ।

अष्टमो लम्भः

नीलालकां तामुपयम्य रामां कुरूद्वहः सौख्यपयोधिमग्नः ।
स्यालेषु वात्सल्यवशेन तत्र चिरं न्यवात्सीद्रमयन्मृगाक्षीम् ॥१॥

अथ कदाचिन्मन्दस्मितमकरन्दोद्गारिवदनारविन्दां विस्मयवशप्रमुषितनिमेषनयननीलोत्पलतया सालकाननाच्छोणाधरपल्लवसौरभ्यसमाकृष्टौ नासाचम्पकदर्शनेन तत्रैव निश्चलतामुपगतौ भृङ्गाविति सम्भावनां सम्पादयन्तीम्, मरकतवलयप्रभाबहलीकृतरोमराजिलताकान्तिम्, वल्गत्कुचजितमरालगमनकेलीपरवशतया मन्दानिलान्दोलितगुलुच्छयुगलीं जङ्गमकनकलतां तुलयन्तीम्, सम्मुखासीनमप्यात्मानं सकलमनुजनयनसरोजकुड्मलीकरणचणेन तेजःप्रसरणेन परीतं द्रष्टुमक्षमतया नलिनान्तिकोल्लासितपल्लवतल्लजभ्रमकारिणा नयनोपरिभागचारुणा पाणिना मुखं व्यवधाय पश्यन्तीम्, प्रान्तमावसन्तीं जीवन्धरः काञ्चिदायताक्षीमप्राक्षीत् ।

किं वक्तुकामासि कुरङ्गनेत्रि किमागता कोमलबन्धगात्रि ।
स्मितावदाता तव वक्त्रलक्ष्मीः संसूचयत्यादरतो विवक्षाम् ॥२॥

नीलालकामिति—नीला अलका यस्यास्तां श्यामलचूर्णकुन्तलाम्, तां पूर्वोक्ताम्, रामां कनकमालाभिधानां प्रियाम्, उपयम्य परिणीय, सौख्यपयोधौ शातसागरे मग्नो ब्रुडित इति सौख्यपयोधिमग्नः, कुरूद्वहो जीवन्धरः, स्यालेषु भार्याभ्रातृषु, वात्सल्यवशेन स्नेहनिघ्नतया, मृगाक्षीं कुरङ्गलोचनाम्, रमयन् क्रीडयन्, सन्, तत्र हेमाभपुर्याम्, चिरं बहुकालं यावत्, न्यवात्सीत् निवसति स्म ॥१॥

अथ कदाचिदिति—अथानन्तरम्, कदाचिज्जातुचित्, मन्दस्मितमेव मन्दहास्यमेव मकरन्दं कौसुमं तदुद्गारि तत्प्रकटयितृ वदनारविन्दं मुखसरसीरुहं यस्यास्ताम्, विस्मयवशेनाश्चर्यवशेन प्रमुषितो दूरीभूतो निमेषः पक्ष्मपातो याभ्यां तथाभूते नयननीलोत्पले नेत्रकुवलये यस्यास्तस्या भावस्तत्ता तया, सालकं सचूर्णकुन्तलं यदाननं वदनं तस्मात्, अथ च सालकाननमेव सालानां सर्जतरूणां काननं वनं तस्मात्, शोणश्चासावधरपल्लवश्चेति शोणाधरपल्लवो लोहितदशनच्छदकिसलयस्तस्य सौरभ्येण सौगन्ध्येन समाकृष्टौ बलादाहूतौ, नासाचम्पकस्य घ्राणचाम्पेयस्य दर्शनं समवलोकनं तेन, तत्रैव नासोपरिभाग एव, निश्चलतां स्थिरताम्, उपगतौ प्राप्तौ, भृङ्गौ भ्रमरौ, इतीत्थम्, सम्भावनामुत्प्रेक्षाम्, सम्पादयन्तीमुत्पादयन्तीम्, मरकतवलयस्य हरिन्मणिनिर्मितकटकस्य प्रभया दीप्त्या बहलीकृता प्रचुरीकृता रोमराजिलताया लोमपङ्क्तिवल्लर्याः कान्तिर्दीप्तिर्यस्यास्ताम्, वल्गद्भ्यां संचलद्भ्यां कुचाभ्यां स्तनाभ्यां जितमराला पराभूतसितच्छदा या गमनकेली गमनक्रीडा तस्याः परवशतया निघ्नतया, मन्दानिलेन मन्दपवनेनान्दोलिता कम्पिता गुलुच्छयुगली स्तबकयुगी यस्यास्ताम्, जङ्गमकनकलतां गतिशीलसुवर्णवल्लरीम्, तुलयन्तीमुपमिमानाम्, संमुखासीनमपि पुरस्तादुपविष्टमपि, सकलमनुजानां निखिलनराणां यानि नयनसरोजानि लोचनारविन्दानि तेषां कुड्मलीकरणेन निमीलनेन वित्तं तेन 'तेन वित्तश्चुञ्चुप्चणपौ' इति चणप्प्रत्ययः, तेजःप्रसरेण प्रतापसमूहेन परीतं व्याप्तम्, आत्मानं स्वम्, जीवन्धरमिति यावत्, द्रष्टुमवलोकयितुम्, अक्षमतयाऽसमर्थतया, नलिनस्य कमलस्यान्तिके समीप उल्लासित उत्क्षेपितो यः पल्लवतल्लजः श्रेष्ठकिसलयस्तस्य भ्रमकारिणा सन्देहोत्पादकेन, नयनोपरिभागेन नेत्रोपरितनांशेन चारुर्मनोहरस्तेन, पाणिना हस्तेन, मुखं वक्त्रम्, व्यवधाय समाच्छाद्य, पश्यन्तीमवलोकयन्तीम्, प्रान्तं निकटम्, आवसन्तीं स्थिताम्, काञ्चित् कामपि, आयताक्षीं विशालनयनाम्, जीवन्धरो विजयात्मजः, अप्राक्षीत् पृच्छति स्म । द्वितीयश्लोकप्रतिपाद्याभिधेयं वस्त्विह पृच्छतेर्द्वितीयं कर्म ।

किं वक्तुकामासीति—कुरङ्गस्येव नेत्रे यस्यास्तत्सम्बुद्धौ हे कुरङ्गनेत्रि हे मृगाक्षि, किं किन्नामधेयं

इति पृष्टा चकोराक्षी मधुरां गिरमाददे ।
अब्जिनी भृङ्गमुखरा मकरन्दझरीमिव ॥३॥

अत्र चायुधगृहेऽपि चैकदा त्वां निरीक्ष्य परिमण्डितं श्रिया ।
चित्रिते रमति चित्तमन्दिरे संमदो मम विवक्षया सह ॥४॥

इत्यादिवचनरचनां चन्द्रकलामिव कान्ताजनकटाक्षलीलामिवेक्षुचापकोदण्डयष्टिमिव च वक्रमधुरामाकर्ण्य विस्मितान्तरङ्गः कुरुशशाङ्कः, किमिदमश्रुतपूर्वमिति चिन्तयन् क्रमेण नन्दाढ्यः समागतः किमित्यूहाञ्चक्रे ।

वपुषा प्रथमं विवेश शालां मनसा चैव ततः कुरूद्वहः ।
कुतुकप्रसरे हि निर्निरोधे क्रमभावो न च तत्र लक्ष्यते ॥५॥

अवलोक्याग्रजन्मानं नन्दाढ्यो मन्दविस्मयः ।
प्रमोदभारगुरुणा वपुषा प्रणनाम सः ॥६॥

विकसत्कुसुमाञ्चितेन मूर्ध्ना क्षितिभागं स न यावदस्पृशत् ।
रभसेन कुरूद्वहेन तावज्जगृहे कोमलबाहुयष्टिना ॥७॥

वस्तु, वक्तुकामासि कथयितुमना असि, कोमलबन्धं मृदुलाश्लेषणं गात्रं शरीरं यस्यास्तत्सम्बुद्धौ हे कोमलबन्धगात्रि, किं किंप्रयोजनेन, आगता सम्प्राप्ता, स्मितेन मन्दहसितेनावादृता समुज्ज्वला, तव भवत्याः, वक्त्रलक्ष्मीर्मुखश्रीः, आदरतो विनयतः, वक्तुमिच्छां विवक्षाम्, संसूचयति प्रकटयति ॥२॥

इति पृष्टेति—इत्येवं प्रकारेण, पृष्टानुयुक्ता, चकोराक्षी जीवंजीवलोचना सा ललना, भृङ्गमुखरा भ्रमरशब्दायमाना, अब्जिनी कमलिनी, मकरन्दझरीमिव कौसुमसन्ततिमिव, मधुरां मनोहराम्, गिरं भारतीम्, आददे जग्राह, उवाचेति यावत् ॥३॥

अत्र चेति—अत्रास्मिन् प्रदेशे, आयुधगृहेऽपि च शस्त्रशालायामपि च, एकदा युगपत्, श्रिया लक्ष्म्या, परिमण्डितं शोभितम्, त्वां भवन्तम्, निरीक्ष्य दृष्ट्वा, चित्रमाश्चर्यं संजातं यस्मिंस्तस्मिन्, मम भवत्पुरो वर्तमानायाः, चित्तमन्दिरे मानसहर्म्ये, विवक्षया सह वक्तुमिच्छया सार्धम्, संमदो हर्षः, 'मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः' इत्यमरः, रमति क्रीडते, अत्र परस्मैपदप्रयोगश्चिन्त्यः । रथोद्धतावृत्तम् । 'रान्नराविह रथोद्धता लगौ' इति लक्षणात् ॥४॥

इत्यादिवचनरचनामिति—चन्द्रकलामिव शशिषोडशभागमिव, कान्ताजनस्य वनितावृन्दस्य कटाक्षलीलामिवापाङ्गशोभामिव, इक्षुचापस्य कामस्य कोदण्डयष्टिमिव धनुर्यष्टिमिव, च, वक्रमधुरां कुटिलमनोहारिणीम्, इत्यादिवचनरचनां पूर्वोक्तवाणीपरिपाटीम्, आकर्ण्य श्रुत्वा, विस्मितमाश्चर्यचकितमन्तरङ्गं चेतो यस्य तथाभूतः, कुरुशशाङ्कः कुरुवंशचन्द्रो जीवन्धरः, पूर्वं प्राग् न श्रुतं दृष्टञ्चेत्यश्रुतदृष्टपूर्वम्, इदमेतत्, किं स्यात् इत्येवम्, चिन्तयन् विचारयन्, विजयानन्दनः, क्रमेण क्रमशः नन्दाढ्यो गन्धोत्कटपुत्रः, समागतः समायातः, किमिति तर्के, इत्थम्, ऊहाञ्चक्रे तर्कयामास, 'इजादेश्चगुरुमतोऽनृच्छः' इत्याम् ।

वपुषा प्रथममिति—कुरुद्वहो जीवन्धरः, प्रथमं प्राक्, वपुषा शरीरेण, शालां भवनं शस्त्रागारमिति यावत्, विवेश प्रविशति स्म, ततः पश्चात्, मनसा चैव चेतसा चापि, हि यतः, निर्निरोधेऽप्रतिबन्धे, कुतुकप्रसरे कौतुकविस्तारे, सति, तत्र कार्येषु, क्रमभावः पौर्वापर्यम्, न लक्ष्यते न दृश्यते । अर्थान्तरन्यासः ॥५॥

अवलोक्येति—अमन्दो भूयान् विस्मय आश्चर्यं यस्य तथाभूतः, स वितर्कितः, नन्दाढ्यो जीवकानुजः, अग्रजन्मानं ज्येष्ठसहोदरम्, अवलोक्य दृष्ट्वा, प्रमोदभारेण हर्षातिरेकेण गुरु दुर्भरं तेन, वपुषा शरीरेण, प्रणनाम नमश्चकार ॥ ६ ॥

विकसत्कुसुमेति—स नन्दाढ्यः, विकसन्ति च तानि कुसुमानि च विकसत्कुसुमानि तैरञ्चितस्तेन विकसत्-

१. अत्र परस्मैपदप्रयोगश्चिन्त्यः ।

कुरुवीरवक्षसि कवाटविस्तृते न ममौ वपुः प्रमदभारमांसलम् ।
अनुजस्य तत्तदपि बाहुवल्लरीयुगलेन दैर्घ्यगुरुणाभिषस्वजे ॥८॥
विनयेन वामनमयं सहोदरं शिरसि स्म जिघ्रति कुरूत्तमो मुहुः ।
अनुजाङ्गसङ्गमसुखस्य सूचकैर्घनरोमकूपनिचयैर्निरन्तरः ॥ ९ ॥
आनन्दबाष्पैरभिषिक्तगात्रं सहोदरं हर्षविकासिनेत्रम् ।
आपृच्छ्य सौख्यं कुरुवंशकेतुः कथं समागा इति सोऽन्वयुङ्क्त ॥१०॥

इति भ्रातुरनुयोगशैलीं श्रवसा परिगृह्य मनसा ध्यातप्राक्तनवृत्तान्तः, पुनः प्रत्यावृत्ताग्रजविप्रयोगदुःखतान्त इव सरभसमुद्भूतनिःश्वसितसन्दीपितस्मृतिपथसंगतवियोगवह्निसंगादिव कोष्णान् तत्पूर्वतनानानन्दाश्रुबिन्दूनेव दुःखबाष्पासारतया परिणतान् स्फुटितमुक्तासरमणीनिव परितः किरन्, अमन्दतराक्रन्दनवेगं कथं कथमपि नियम्य नन्दाढ्यः स्वहृदयलगद्गद्गदः सगद्गदमुत्तरमादातुमुपचक्रमे ।

भवति राजपुरात्सति निर्गते सपदि पापविपाकवशेन नः ।
सकलबन्धुगणस्य तदोत्थितो मनसि दुःसहशोकहुताशनः ॥११॥

कुसुमाञ्चितेन विकसत्पुष्पपूजितेन, मूर्ध्ना शिरसा, यावत् क्षितिभागं भूप्रदेशं, नास्पृशत् न स्पर्शं चकार तावत् रभसेन वेगेन, कुरुद्वहेन जीवन्धरेण, कोमलबाहुयष्टिना मृदुलभुजदण्डेन अगृह्य गृह्यते स्म ॥७॥

कुरुवीरेति—प्रमदभारेण प्रमोदातिशयेन मांसलं पुष्टम्, अनुजस्य लघुसहोदरस्य, वपुः शरीरम्, कवाटवद् विस्तृतं तस्मिन् अररविस्तीर्णे, कुरुवीरस्य जीवन्धरस्य वक्षसि भुजमध्ये, न ममौ न माति स्म, यद्यपि, तदपि तथापि, दैर्घ्येणायतत्वेन गुरु विशालं तेन, बाहुवल्लरीयुगलेन भुजलतायुगेन, तदनुजवपुः, अभिषस्वजे समाश्लिष्टम् । मञ्जुभाषिणीच्छन्दः ॥ ८ ॥

विनयेनेति—अनुजस्य लघुसहोदरस्य यदङ्गं शरीरं तस्य सङ्गमेन संसर्गेण यत्सुखं शातं तस्य, सूचकैर्निवेदकैः, घनाः सान्द्रा ये रोमकूपा लोमकूपास्तेषां निचयैः समूहैः, निरन्तरो व्याप्तः, अयमेषः, कुरूद्वहो जीवन्धरः, विनयेन प्रह्वत्वेन, वामनं खर्वं नम्रमिति यावत् 'खर्वो ह्रस्वश्च वामनः' इत्यमरः, सहोदरं सनाभिम्, शिरसि मूर्ध्नि, मुहुरनेकवारम्, जिघ्रति स्म अघ्रौ, गुरुजना लघुजनं शिरसि जिघ्रन्तीति लोकव्यवहारः ॥ ९ ॥

आनन्दबाष्पैरिति—सः प्रसिद्धः कुरुवंशकेतुः सात्यन्धरिः, आनन्दबाष्पैर्हर्षाश्रुभिः, अभिषिक्तं स्नपितं गात्रं शरीरं यस्य तम्, हर्षविकासिनी नेत्रे यस्य तं संमदोल्लसितनयनम्, सहोदरं सगर्भम्, सौख्यं कुशलम्, आपृच्छ्य पृष्ट्वा, कथं केन प्रकारेण, समागाः समागमः, इत्येवम्, अन्वयुङ्क्त पप्रच्छ ॥ १० ॥

इति भ्रातुरिति—इति पूर्वोक्ताम्, भ्रातुरग्रजस्य, अनुयोगशैलीं प्रश्नपरम्पराम्, श्रवसा कर्णेन, परिगृह्य समादाय श्रुत्वेति यावत्, मनसा चेतसा, ध्यातश्चिन्तितः प्राक्तनवृत्तान्तः पूर्वोदन्तो येन तथाभूतः, पुनर्भूयः, प्रत्यावृत्तेन प्रत्यागतेन अग्रजविप्रयोगदुःखेन ज्येष्ठभ्रातृविरहाशर्मणा तान्त इव दुःखीकृत इव, सरभसं सवेगम्, उद्भूतानि समुत्पन्नानि यानि निःश्वसितानि दुःखोच्छ्वासास्तैर्दीपितः सन्धुक्षितो यः स्मृतिपथसंगतो ध्यानमार्गागतो वियोगवह्निर्विरहानलस्तस्य संगादिव संसर्गादिव कोष्णान् ईषदुष्णान्, दुःखबाष्पासारतया विषादाश्रुधारासंपाततया परिणतान् परिवर्तितान्, तत्पूर्वतनान् तत्प्रागभवान्, आनन्दाश्रुबिन्दूनेव हर्षाश्रुशीकरानेव, स्फुटिताः खण्डिता ये मुक्तासरमणयो मौक्तिकस्रग्रत्नानि तानिव, परितः समन्तात्, किरन् प्रक्षिपन्, अमन्दतरः प्रचुरतरो य आक्रन्दनवेगो रोदनवेगस्तम्, कथं कथमपि केन केनापि प्रकारेण, नियम्य समवरुध्य, स्वहृदये स्वकीयचेतसि लगन् समासन् गद्गदो बाष्पावरुद्धकण्ठत्वं यस्य तथाभूतः सन्, सगद्गदं गद्गदसहितं यथा स्यात्तथा, उत्तरं प्रतिवचनम्, आदातुं गृहीतुम्, उपचक्रमे तत्परो बभूव ।

भवतीति—तदा तस्मिन् काले, नोऽस्माकम्, पापस्य दुरितस्य विपाकः परिणामस्तस्य वशो निघ्नत्वं तेन, भवति त्वयि, सपदि शीघ्रम्, राजपुरात् स्वाधिष्ठानभूतान्नगरात्, निर्गते निष्क्रान्ते सति, सकल-

वाचामगोचरे शोकपारावारे निपातिताम् ।
निरीक्ष्य बन्धुतां दीनां मर्तुं व्यवसिता वयम् ॥१२॥

तदानीं दुरन्तदुःखनितान्ततान्तस्वान्तौ सन्ततमुद्भ्रान्तबाष्पधारया प्रथमामीतिबाधामिवावहन्तौ मातापितरावेवं प्रलापमातेनतुः ।

अहह बत तनूज क्वासि दैवं दुरन्तं
तनयविपदि सत्यामप्यहो दुःसहायाम् ।
परुषविजितवज्रं जीवितं निश्चलं नौ
कथमियमतिदीर्घा दुर्दशा हा विलङ्घ्या ॥१३॥

इत्यादिनिरङ्कुशपरिदेवनरवविजृम्भिते पित्रोर्मुनिवाक्यस्मरणेन कथं कथमपि शान्ततां नीते, देदीप्यमानशोकज्वालाविह्वलेषु बन्धुकुलेषु, काष्ठाङ्गारनिन्दापरेषु पौरेषु, दुष्पूरदुःखपूरेषु युष्मत्सहचरेषु, मरणोद्योगविस्मारितेतरवृत्तान्तानामस्माकं दैववशेन विद्याविदितवृत्तान्ता प्रजावती कथंवृत्तेति स्थाने बोधः समजायत ।

एवं भवद्दर्शनभाविसौख्यसंप्रापकादृष्टवशेन सद्यः ।
प्रजावतीमन्दिरमेत्य सोऽहं विषाददीनाक्षरमेवमूचे ॥१४॥

बन्धूनां निखिलभ्रातॄणां गणः समूहस्तस्य, मनसि चेतसि, दुःसहशोको हुताशन इव दुःसहशोकहुताशनो दुर्भरविषादवैश्वानरः, उत्थितः समुत्पन्नः । द्रुतविलम्बितवृत्तम् ॥ ११ ॥

तदानीमिति—तदानीं भवन्निष्क्रमणकाले, दुरन्तेन दुष्टावसानेन दुःखेन नितान्तमत्यन्तं तान्तं खिन्नं स्वान्तं चित्तं ययोस्तौ, सन्ततं निरन्तरम्, उद्भ्रान्तबाष्पधारया प्रकटिताश्रुसन्तत्या, प्रथमामाद्याम्, ईतेर्बाधा तामिव अतिवृष्टिपीडामिव, आवहन्तौ आदधतौ, माता च पिता चेति मातापितरौ जननीजनकौ 'आनङ्ऋतो द्वन्द्वे' इत्यानङ्, एवं वक्ष्यमाणप्रकारेण, प्रलापं विलापम्, आतेनतुर्विस्तारयामासतुः ।

अहह बतेति—'अहह' 'बत' इत्यव्ययद्वयं दुःखातिशये वर्तते, हे तनूज हे पुत्र, क्वासि कुत्र वर्तसे, दैवं भाग्यम्, अस्माकमिति शेषः, दुरन्तं दुष्टावसानं वर्तते, मत्पुत्रा म्रियन्ते स्म दैवाल्लब्धस्त्वमपि कुत्रचिन्निर्गत इत्यहो मम दौर्भाग्यमिति भावः । दुःसहायां कठिनायाम्, तनयविपदि सुतविपत्तौ, सत्यामपि विद्यमानायामपि, निश्चलं स्थिरम्, नौ आवयोः, जीवितं जीवनम्, परुषेण काठिन्येन विजितं पराभूतं वज्रं दम्भोलिर्येन तथाभूतम्, अस्तीत्यहो आश्चर्यम्, अतिदीर्घा विशालतरा, इयमेषा, दुर्दशा दुरवस्था, कथं केन प्रकारेण, विलङ्घ्या समतिक्राम्या, हा खेदे । मालिनीच्छन्दः ॥ १२ ॥

इत्यादीति—पित्रोर्मातापित्रोः, इत्यादिः पूर्वोक्तप्रकारो यो निरङ्कुशपरिदेवनरवो निर्बाधविलापशब्दस्तस्य विजृम्भितं विजृम्भणं वृद्धिरिति यावत् तस्मिन्, भावे क्तः, मुनिवाक्यस्य 'चरमशरीरी ते पुत्रो भविष्यति' इति यतीन्द्रवचनस्य स्मरणेन ध्यानेन, कथं कथमपि केन केनापि प्रकारेण, शान्ततां समाप्तिम्, नीते प्राप्ते सति, बन्धुकुलेषु सहोदरसमूहेषु, देदीप्यमानया जाज्वल्यमानया शोकज्वालया विषादार्चिषा विह्वला विकलास्तेषु सत्सु, पौरेषु नागरिकेषु, काष्ठाङ्गारस्य कृतघ्नस्य निन्दायां गर्हायां पराः सक्तास्तेषु सत्सु, युष्मत्सहचरेषु त्वत्सुहृत्सु, दुष्पूरो दुःखपूरो येषां तेषु दुर्भरदुःखसमूहेषु सत्सु, मरणोद्योगेन मृत्युव्यवसायेन विस्मारिता इतरवृत्तान्ता अन्योदन्ता यैस्तेषाम्, अस्माकं मम, विद्यया विदितोऽवगतो वृत्तान्त उदन्तो यया सा, प्रजावती भ्रातृजाया गन्धर्वदत्तेति यावत्, कथंवृत्ता कीदृगुदन्ता, अस्तीति शेषः, इति इत्याकारकः, स्थाने युक्तः, बोधो ज्ञानम्, समजायत समुत्पन्नो बभूव ।

एवमिति—एवमनेन प्रकारेण, सोऽहं कृतमरणनिश्चयो नन्दाढ्यः, भवतो दर्शनं भवद्दर्शनं त्वदवलोकनं तेन भावि भविष्यद्यत्सौख्यं तस्य संप्रापकं लम्भकं यददृष्टं दैवं तस्य वशो निघ्नत्वं तेन, सद्यो झटिति, प्रजावत्या गन्धर्वदत्ताया मन्दिरं भवनम्, एत्य प्राप्य, विषादेन त्वद्विरहजन्यखेदेन दीनाक्षरं मन्दाक्षरं यथा स्यात्तथा, एवमनेन प्रकारेण, ऊचे जगाद ॥१४॥

प्रजावति विजानती सकलपद्धतिं त्वं कथं
बिभर्षि नवमालिकां कचकुले हरिद्रां तनौ।
न युक्तमिदमास्थितं विगतभर्तृवामभ्रुवां
वृथा खलु सुखासिका सकललोकगर्हास्पदम् ॥ १५ ॥

इत्युक्ता सा विशालाक्षी मन्दहासाननाम्बुजा।
पिकीव मधुरालापा मधुरां वाचमाददे ॥१६॥

अङ्ग तावकसहोदरवर्यस्तुङ्गपुण्यविभवेन मण्डितः।
क्षेमवाञ्जयति सौख्यपरीतः पापतो वयमिहाततदुःखाः ॥१७॥
देशे देशे सुन्दरीश्चन्द्रवक्त्रः पाणीकृत्य प्राप्तहर्षप्रकर्षः।
हेमाभाख्ये पत्तने सोऽयमद्य प्रीतां राज्ञो नन्दिनीं सन्दधाति ॥१८॥

एवमगण्यपुण्यवशेन विपदमपि संपदात्मना परिणतामनुभवन्तं सुखमावसन्तं निरन्तर-निपतद्राजतनूजमकुटराजिनीराजितचरणनीरेजं भवदीयाग्रजं द्रष्टुमिच्छसि चेद्गम्येतेति प्रतिपाद्य, विद्याबैशद्येन स्मरतरङ्गिणीनाम्नि शयनतले शाययित्वा, सपत्रं मामत्रभवति प्राहिणोत्'

प्रजावतीति—हे प्रजावति हे भ्रातृजाये, सकलपद्धतिं निखिलरीतिम्, विजानती बुध्यमाना, त्वं भवती, कचकुले केशसमूहे, नवमालिकां नूतनस्रजम्, तनौ शरीरे, हरिद्रां रजनीम् पीताङ्गरागमिति यावत्, कथं केन कारणेन, बिभर्षि दधासि, इदमेतत्, आस्थितं पद्धतिः, युक्तं न साम्प्रतं न, खलु निश्चयेन, विगतः प्रोषितो भर्ता वल्लभो यासां तथाभूता या वामभ्रुवो वनितास्तासाम्, वृथा निष्प्रयोजना, सुखासिका सुखा-स्थितिः, सकललोकानां निखिलनराणां गर्हास्पदं निन्दास्थानम्, अस्तीति शेषः। पृथ्वीच्छन्दः ॥१५॥

इत्युक्तेति—इति पूर्वोक्तप्रकारेण, मया, उक्ता कथिता, सा विशालाक्षी दीर्घलोचना, मन्दो हासो यस्मिंस्तन्मन्दहासं तथाभूतमाननाम्बुजं यस्याः सा मन्दस्मितोपलक्षितवदनारविन्दा, पिकीव कोकिलेव, मधुरालापा मिष्टभाषणा, सती, मधुरां मिष्टाम्, वाचं वाणीम्, आददे जग्राह ॥१६॥

अङ्ग तावकेति—अङ्गेति सम्बुद्धौ, तुङ्गश्चासौ पुण्यविभवश्चेति तुङ्गपुण्यविभवस्तेन सून्नतसुकृतै-श्वर्येण, मण्डितः शोभितः, क्षेमवान् कल्याणयुक्तः, सौख्येन सुखेन परीतो व्याप्तः, तावकस्त्वदीयश्चासौ सहोदरवर्यो भ्रातृज्येष्ठश्चेति तावकसहोदरवर्यः, जयति सर्वोत्कर्षेण वर्तते, पापतो दुरितोदयात्, इह नगरे, वयम्, आततं व्याप्तं दुःखं येषां तथाभूताः, स्म इति शेषः। रथोद्धतास्वागतासंमिश्रणादुपजाति-वृत्तम् ॥१७॥

देशे देश इति—देशे देशे प्रतिजनपदम्, सुन्दरीः सुललनाः, पाणीकृत्य परिणीय, प्राप्तो लब्धो हर्षप्रकर्षः प्रमोदातिशयो येन तथाभूतः, चन्द्र इव वक्त्रं मुखं यस्य सः, सोऽयं त्वदीयो भ्राता, अद्य साम्प्रतम्, हेमाभाख्ये हेमाभनाम्नि, पत्तने पुटभेदने, राज्ञो नृपस्य, प्रीतां प्रसन्नाम्, नन्दिनीं पुत्रीम्, सन्दधाति सन्धारयति, तां सम्प्राप्तोऽस्तीति यावत्। शालिनीच्छन्दः ॥१८॥

एवमगण्येति—एवमनेन प्रकारेण, अगण्यश्च तत्पुण्यञ्चेत्यगण्यपुण्यम् अपरिमितसुकृतं तस्य वशस्तेन विपदमपि विपत्तिमपि, संपदात्मना सम्पत्तिस्वरूपेण, परिणतां परिवर्तिताम्, अनुभवन्तमुपभुञ्जानम्, सुखमावसन्तं हर्षेण निवसन्तम्, निरन्तरं शश्वन्निपतन्ति नम्रीभूतानि यानि राजतनूजमकुटानि नरेन्द्र-नन्दनमौलयस्तेषां राजिभिः पङ्क्तिभिर्नीराजितं कृतारार्तिकं चरणनीरेजं पादारविन्दं यस्य तथाभूतम्, भवदीयाग्रजं स्वकीयज्येष्ठसहोदरम्, द्रष्टुमवलोकयितुम्, इच्छसि वाञ्छसि, चेद्यदि, गम्येत व्रज्येत, तर्हि, इतीत्थम्, प्रतिपाद्य निवेद्य, विद्याया मन्त्रस्य वैशद्यं नैर्मल्यं तेन, स्मरतरङ्गिणीनाम्नि स्मरतरङ्गिणीनामधेये, शयनतले शय्यापृष्ठे, शाययित्वा स्वापयित्वा, सपत्रं पत्रसहितम्, मां नन्दाढ्यम्, अत्रभवति पूज्यनीये त्वयि, प्राहिणोत् प्रजिघाय।

इति करुणमयैर्गिरां प्रवाहैरनुजमुखादुदितैः कुरूद्वहोऽसौ ।
भृशमतनुत तापभारमन्तर्वदनतले न विकारलेशलेशम् ॥१९॥

अवाचयदसौ पत्रं सगर्भेण समर्पितम् ।
गन्धर्वदत्तालिखितं विचित्राक्षरलक्षितम् ॥२०॥

आर्यपुत्र ! गुणमाला विज्ञापयत्येवम्—

कन्दर्पो विषमस्तनोति तनुतां तन्वां ज्वरे गौरवं
मृत्युश्चापि दयाकथाविरहितो मां नैव सम्भाषते ।
आर्य त्वं च नवाङ्गनासुखवशाद्विस्मृत्य मां मोदसे
जातीपल्लवकोमला कथमियं जीवेत्तव प्रेयसी ॥२१॥

स्वामिन्नङ्कुरितौ ममोरसि कुचौ वृद्धिं गतौ तावके
वाचस्तावकवाग्रसैः परिचिता मौग्ध्येन सन्त्याजिताः ।
बाहू मातृगलस्थलादपसृतौ त्वत्कण्ठदेशेऽर्पिता-
वार्य प्रेमपयोनिधे स्थितमिदं विज्ञापितं किं पुनः ॥२२॥

इति प्रियाया अन्यापदेशलिखनपरिपाटीं मनसा चिन्तयन्प्रियाशोकविदीर्णशरीरः कुरु-

---

इति करुणमयैरिति—इति पूर्वोक्तप्रकारेण, अनुजमुखाल्लघुसहोदरवदनात्, उदितैर्निर्गतैः, करुणमयैः करुणरसात्मकैः, गिरां वाचाम्, प्रवाहैः सन्तानैः, असौ कुरूद्वहो जीवन्धरः, अन्तर्मनसि, भृशमत्यन्तम्, तापभारं खेदसमूहम्, अतनुत विस्तारयामास, वदनतले मुखतले, विकारस्य शोकजन्यविकृतेर्लेशस्यापि लेशो भागस्यापि भागस्तम्, नातनुत नो विस्तारयामास । महापुरुषत्वाद्बाह्ये शोकचिह्नं न प्रकटयामासेति भावः । पुष्पिताग्राच्छन्दः ॥१९॥

अवाचयदसाविति—असौ स्वामी, समानो गर्भो यस्य तेन सहोदरेण, समर्पितं प्रदत्तम् । गन्धर्वदत्तया प्रथमपत्न्या लिखितमङ्कितम् । विचित्राक्षरैरद्भुतवर्णैर्लक्षितं सहितम् । पत्रं संदेशकर्गलम्, अवाचयत् वाचयामास ॥२०॥

आर्यपुत्रेति—आर्यपुत्र ! हे हृदयवल्लभ ! गुणमाला भवद्भार्या, एवमनेन प्रकारेण, विज्ञापयति निवेदयति—

कन्दर्प इति—विषमस्तीक्ष्णः, कन्दर्पो मदनः, तन्वां शरीरे, तनुतां कृशताम्, ज्वरे कामतापे, गौरवं गुरुत्वम्, तनोति विस्तारयति, दयाकथाविरहितः करुणावार्ताशून्यः, मृत्युश्चापि यमश्चापि, मां विरहिणीम्, नैव सम्भाषते नैव ब्रवीति, हे आर्य हे पूज्य, त्वं च भवांश्च, नवाङ्गनासुखवशात् अभिनवरामासुखाधीनत्वात्, मां विस्मृत्य विस्मृतां कृत्वा, मोदसे हृष्यसि, जातीपल्लवा इव मालतीकिसलया इव कोमला मृदुला, तव भवतः, इयमेषा, प्रेयसी प्रियवल्लभा, कथम् केन प्रकारेण, जीवेत् जीविता भवेत् ॥२१॥

स्वामिन्निति—हे स्वामिन् हे जीवितेश्वर, कुचौ वक्षोजौ, मम गुणमालायाः, उरसि वक्षसि, अङ्कुरितौ प्ररूढौ समुत्पन्नाविति यावत्, तावके त्वदीये च, उरसि वक्षसि, वृद्धिं विस्तारम्, गतौ प्राप्तौ, वाचो गिरः, तावकवाग्रसैस्त्वदीयवचनस्नेहैः, परिचिताः प्राप्तैकत्वाः, सत्यः, मौग्ध्येन मूढत्वेन, सन्त्याजिता मोचिताः, मातुर्जनन्या गलस्थलात्कण्ठप्रदेशात्, अपसृतौ दूरीकृतौ, बाहू भुजौ, तव कण्ठदेशस्तस्मिन् त्वदीयगलप्रदेशे, अर्पितौ स्थापितौ, हे आर्य हे पूज्य, हे प्रेमपयोनिधे हे प्रीतिपारावार ! स्थितं वर्तमानम्, इदमेतत्, विज्ञापितं निवेदितम्, पुनरनन्तरम्, किं भविष्यतीति को जानीते ॥२२॥

इति प्रियाया इति—इत्येवं प्रकारेण, प्रियाया गन्धर्वदत्तायाः, अन्यस्या गुणमालाया अपदेशेन व्याजेन या लिखनपरिपाटी लेखनपरम्परा ताम्, मनसा चेतसा, चिन्तयन् विचारयन्, प्रियाशोकेन भार्याविषादेन विदीर्णं भिन्नं शरीरं यस्य तथाभूतः, कुरुकुमारो जीवन्धरः, मुहुर्मुहुर्भूयोभूयः, अनवीजनमच

कुमारैः, मुहुर्मुहुर्जननीजनवयस्यसतीजनकुशलानुयोगमत्यादरेण विस्तार्य, सगर्भसङ्गमतुङ्गतमतोषेण सुखमासामास ।

> समया कुरुकुञ्जरं निविष्टं कनकाद्रिं निकषेव शीतरश्मिम् ।
> अनुजं मनुजाधिपात्मजास्ते कुशलप्रश्नपुरःसरं परीयुः ॥२३॥

एवं सोदरसमागमसन्तुष्टस्वान्तं कुरुकुमुदिनीकान्तमुपतिष्ठमानेषु राजतनूजेषु, कदाचित्-समरभसधावनजनितोर्ध्वनिश्वासनिरन्तरनिःसरणदत्तार्धसाहाय्यकभरकम्पिततनुदण्डाः प्रचण्डवात-चलितबालपादपसरूपाः, अन्तरमेयतया बहिःप्रसृतैरिव भयानकरसपूरैः स्वेदसलिलैर्दैन्यसाम्राज्ये-ऽभिषिक्ता इव गोपाः, राजमन्दिराजिरे आर्ततरमेवं चुक्रुशुः ।

> हेलानाटकघोटकव्रजखुरप्राघुट्टनोद्यद्रजो-
> राज्या रासभधूम्रया कवलिताकाशावकाशैः परैः ।
> राजंस्तावकगोधनं निखिलमप्याहृत्य नीतं स्वतां
> किञ्चोदञ्चितशिञ्जिनीपटुरवैर्घोषोऽपि संक्षोभितः ॥२४॥

> उद्यत्प्रतापपटलेन सहस्ररश्मे-
> र्गोमण्डलं तव च भूमिपतेर्निरुद्ध्य ।
> प्रत्यर्थिसैनिककुलं प्रचुराट्टहासै-
> र्लोकस्थितिं शिथिलयत्यरिधीरतां च ॥२५॥

मातृजनश्च वयस्याश्च सखायश्च सतीजनश्च ललनाजनश्चेति जननीजनवयस्यसतीजनास्तेषां कुशलानुयोगं मङ्गलप्रश्नम्, अत्यादरेण प्रेमातिशयेन, विस्तार्य प्रपञ्च्य, सगर्भस्य सहोदरस्य सङ्गमेन संसर्गेण तुङ्गतमः सून्नतो यस्तोषः प्रमोदस्तेन, सुखं यथा स्यात्तथा, आसामास आसाञ्चक्रे 'दयायासश्च' इत्याम् ।

समयेति—ते पूर्वोक्ताः, मनुजाधिपात्मजा लोकपालतनयाः, कनकाद्रिं सुवर्णशैलम्, निकषा समीपे, निविष्टं स्थितम्, शीतरश्मिमिव चन्द्रमसमिव, कुरुकुञ्जरं जीवन्धरम्, समया निकटे, 'अभितः परितः समया निकषाहाप्रतियोगेऽपि' इति द्वितीया, निविष्टम्, अनुजं लघुभ्रातरम्, कुशलप्रश्नपुरस्सरं मङ्गलानुयोग-सहितम्, यथा स्यात्तथा, परीयुः परीत्य तस्थुः ॥२३॥

एवमिति—एवमनेन प्रकारेण, राजतनूजेषु नरेन्द्रनन्दनेषु, सोदरस्य सगर्भस्य समागमेन संयोगेन संतुष्टं प्रसन्नं स्वान्तं चित्तं यस्य तम्, कुरुकुमुदिनीकान्तं कुरुवंशचन्द्रम्, उपतिष्ठमानेषु मित्रीकुर्वत्सु मैत्री-भावेन समीपे तिष्ठत्स्विति यावत्, कदाचिज्जातुचित्, सरभसं सवेगं यथा स्यात्तथा धावमानेन पलायनेन जनितः समुत्पन्नो य ऊर्ध्वनिःश्वास उच्चैःश्वासस्तस्य निरन्तरमजस्रं निःसरणेन निर्गमनेन दत्तोऽर्पितो योऽर्धसाहाय्यकभरः किञ्चित्सहायतासमूहस्तेन कम्पितो वेपितस्तनुदण्डः शरीरयष्टिर्येषां ते, प्रचण्डवातेन तीक्ष्णपवनेन चलिताः कम्पिता ये बालपादपा बालतरवस्तेषां सरूपाः सदृशाः, अन्तर्मध्ये, अमेयतया मातुमशक्यत्वेन, बहिरभ्यन्तरम्, प्रसृतैर्विसृतैः, भयानकरसपूरैरिव भयरससमूहैरिव, स्वेदसलिलैः प्रस्वेद-जलैः, दैन्यसाम्राज्ये कातरत्वराज्ये, अभिषिक्ता इव कृताभिषेका इव, गोपा आभीराः, राजमन्दिराजिरे नरेन्द्रमन्दिरचत्वरे, आर्ततरं सदुःखप्रकर्षं यथा स्यात्तथा, एवं वक्ष्यमाणरीत्या, चुक्रुशुः आक्रोशन्ति स्म ।

हेलानाटकेति—हे राजन् हे भूपाल ! रासभधूम्रया खररोमधूम्रवर्णया, हेलया क्रीडया नाटका नटन्तो गच्छन्तो ये घोटका अश्वास्तेषां व्रजः समूहस्तस्य खुराः शफास्तेषां प्राघुट्टनेन संघर्षणेनोद्यन्ती समुत्पतन्ती या रजोराजिर्धूलिपङ्क्तिस्तया, कवलितो ग्रासीकृत आकाशावकाशो नभोऽवगाहो यैस्तैः, परैः शत्रुभिः, निखिलमपि समस्तमपि, तावकगोधनं त्वदीयगोसमूहः, स्वतां स्वकीयताम्, नीतं प्रापितम्, किञ्च अन्यच्च, उदञ्चिता उत्पन्ना ये शिञ्जिनीनां प्रत्यञ्चानां पटुरवास्तीक्ष्णशब्दास्तैः, घोषोऽपि आभीरवसति-रपि, संक्षोभितः क्षोभं प्रापितः । शार्दूलविक्रीडितं वृत्तम् ॥२४॥

उद्यत्प्रतापपटलेनेति—प्रत्यर्थिसैनिककुलं शत्रुसैन्यसमूहः, उद्यत्प्रतापपटलेन समुद्गच्छत्प्रताप-

इत्याक्रोशं समाकर्ण्य भूपतिर्बलमादिशत् ।
स्वामी श्वशुररुद्धोऽपि प्रस्थितः परवीरहा ॥ २६ ॥

तदनु रयविजितविहगपतितुरगगणविविधगतिविदलितवसुधातलनिर्गलद्धूलिकापालिकाविशेषशोषितनाकमहीसिन्धून्सुदूरमूर्ध्वप्रसारितशुण्डादण्डसत्वरपूत्कारशीकरपरम्पराभिर्गण्डतलयुगलविगलद्दानधाराभिश्च संपूर्य सार्थकनामधेयधरैः सिन्धुरैर्मन्थरगमनं, पयोनिधिफेनकूटायमानपटपरिष्कृतपताकादण्डमण्डितरथकड्यासङ्घटितं भृतमेचककञ्चुकसम्पत्तिभिः पत्तिभिः सङ्कुलं बलं पुरोधाय प्रतिष्ठमानाः, कुरुविन्दकुण्डलरुचिर्वीचीकवचितभुजविराजिततया बहिरपि साक्षात्प्रसृतमिव प्रतापं बिभ्राणाः, एते ह्यनतान्मण्डलीकान्निराकरिष्यन्तीति भयेन सेवार्थमागताभ्यामिव शीतोष्णरश्मिभ्यामङ्गदाभ्यां सङ्गताः, तुङ्गतममुक्ताहारमनोरमविशालवक्षःस्थलतया नक्षत्रमालालङ्कृतशारदाम्बरं तुलयन्तः, ते जीवन्धरनन्दाढ्यपुरःसरसुमित्रप्रमुखराजपुत्राः क्रमेण रणाङ्गणमवतेरुः ।

समूहेन, सहस्रं रश्मयो यस्य तस्य सूर्यस्य, गोमण्डलं किरणसमूहम्, तव च भवतश्च, गोमण्डलं धेनुसमूहम्, 'गौः स्वर्गे वृषभे रश्मौ वज्रे शीतकरे पुमान् । अर्जुनीनेत्रदिग्बाणभूवागादिषु योषिति' इति विश्वः, निरुध्य वशीकृत्य प्रचुराट्टहासैः प्रभूतसशब्दहसितैः, लोकस्थितिं जनमर्यादां जनवसतिं वा, अरिधीरतां च शत्रुधैर्यञ्च, शिथिलयति श्लथां करोति । वसन्ततिलकावृत्तम् ॥२५॥

इत्याक्रोशमिति—इति पूर्वोक्तम्, आक्रोशं रोदनध्वनिम्, समाकर्ण्य श्रुत्वा, भूपतिर्नृपः, बलं सैन्यम्, आदिशदाज्ञापयामास । पर वीरान् शत्रुयोद्धॄन् हन्तीति परवीरहा, स्वामी जीवन्धरः, श्वसुररुद्धोऽपि जायाजनकनिषिद्धोऽपि, प्रस्थितः प्रयातः ॥२६॥

तदन्विति—तदनु तदनन्तरम्, रयेण वेगेन विजितः पराभूतो विहगपतिर्गरुडो येन तथाभूतो यस्तुरगगणो घोटकसमूहस्तस्य विविधगतिभिरनेकप्रकारगमनैर्विदलितं खण्डितं यद् वसुधातलं पृथिवीतलं तस्मान्निर्गलन्ती निष्पतन्ती या धूलिकापालिका रजःश्रेणिस्तस्या विशेषेण शोषिता निर्जलीकृता नाकमहीसिन्धवः स्वर्गवसुधास्रवन्त्यो यैस्तान्, सुदूरं विप्रकृष्टतरं यथा स्यात्तथा ऊर्ध्वप्रसारित उपरिविस्तारितो यः शुण्डादण्डस्तस्य सत्वराः सरया याः फूत्कारशीकरपरम्पराः फूत्काराम्बुकणपङ्क्तयस्ताभिः, गण्डतलयुगलात्कपोलतलद्वन्द्वाद् विगलन्त्यो या दानधारा मदस्रोतांसि ताभिः, सम्पूर्य सम्पूर्णाः कृत्वा सार्थकमन्वितार्थं यन्नामधेयं नाम तस्य धरास्तैः सिन्धूर्नदीः रान्ति ददति स्वजलपूरेणेति सिन्धुरा हस्तिन इति सिन्धुरशब्दार्थः, सिन्धुरैर्हस्तिभिः, मन्थरं मन्दं गमनं यस्याः सा मन्थरगमना, पयोनिधेः सागरस्य फेनकूटायमानेन डिण्डीरपिण्डवदाचरता पटेन वस्त्रेण परिष्कृताः सहिता ये पताकादण्डा ध्वजदण्डास्तैर्मण्डिता शोभिता, मन्थरगमना पयोनिधिफेनकूटायमानपटपरिष्कृतपताकादण्डमण्डिता च या रथकड्या स्यन्दनसमूहस्तया संघटितं सहितम्, धृता गृहीता मेचकाः श्यामाः कञ्चुकसंपत्तयो वर्मसंपदो यैस्तैः पत्तिभिः पदातिभिः संकुलं व्याप्तम्, बलं सैन्यम्, पुरोधाय पुरस्तात्कृत्वा, प्रतिष्ठमानाः प्रयान्तः, कुरुविन्दकुण्डलानां पद्मरागमणिनिर्मितकर्णाभरणानां रुचिर्वीचीभिः कान्तिपरम्पराभिः कवचितभुजैर्व्याप्तबाहुभिर्विराजिततया शोभिततया, बहिरपि बाह्यमपि, प्रसृतमिव विस्तृतमिव, प्रतापं तेजः, बिभ्राणा दधानाः, एते जीवन्धरादयः, हि निश्चयेन, अनतान् अनम्रान्, मण्डलीकान् मण्डलाकारान्, पक्षे मण्डलेश्वरान्, निराकरिष्यन्ति पराभविष्यन्ति, इति भयेन भीत्या, सेवार्थं शुश्रूषायै, आगताभ्यां प्राप्ताभ्याम्, शीतोष्णरश्मिभ्यामिव सूर्याचन्द्रमोभ्यामिव, अङ्गदाभ्यां केयूराभ्याम्, संगताः सहिताः, तुङ्गतमेन समुन्नततमेन मुक्ताहारेण मनोरमं मनोहरं विशालवक्षःस्थलं विस्तृतोरःस्थलं येषां तेषां भावस्तत्ता तया, नक्षत्रमालया तारापङ्क्त्यालङ्कृतं शोभितं यच्छारदाम्बरं शरद्गगनं तत्, तुलयन्त उपमिमानाः, ते पूर्वोक्ताः, जीवन्धरनन्दाढ्यौ वैजयेयनन्दाढ्यौ पुरस्सरौ पुरोगामिनौ येषां तथाभूता ये सुमित्रप्रमुखराजपुत्राः सुमित्रादिनरेन्द्रनन्दनास्ते, क्रमेण क्रमशः, रणाङ्गणं समोऽजिरम्, अवतेरुरवतरन्ति स्म ।

भेरीरवः सकलदिक्पतिसौधशृङ्ग-
वातायनाररकुलानि विभिद्य तूर्णम् ।
अन्तः प्रविश्य बहुदूरकदध्वखेद-
विश्रान्तिमाप रणकेलिमुखप्रभूतः ॥२७॥

तदानीमुभयेषां सैनिकानां परस्परमेवं वीरवादा बभूवुः ।

अस्माकं त्रिजगत्प्रसिद्धयशसामेषा कृपाणीलता
शत्रुस्त्रीनयनान्तकज्जलजलैः श्यामा निपीतैः पुरा ।
संप्रत्याहवसीम्नि युष्मदसृजां पानेन शोणीकृता
वीरश्रीस्मितपाण्डुराचरिततश्चित्रा भविष्यत्यहो ॥२८॥

गोवृन्दसक्तान् भवतोऽस्मदीयभुजा वयस्या इव संयुगेन ।
नेष्यन्ति गामद्य निमेषमात्रान्न तिष्ठतास्मत्पुरतो हठेन ॥२९॥

पशून् वा प्राणान् वा जहत झटिति क्लीबपुरुषाः
स्वमूर्ध्नश्चापान् वा नमयत नरेन्द्रस्य पुरतः ।
मुखे वा हस्ते वा कुरुत शरवृन्दं नरपतिं
कृतान्तागारं वा शरणयत तूर्णं प्रतिभटाः ॥३०॥

अन्येऽप्येवमाहुः—

भेरीरव इति—रणकेलिमुखे समरक्रीडाप्रारम्भे प्रभूतः समुत्पन्नः, भेरीरवो दुन्दुभिनादः, तूर्णं शीघ्रम्, सकलदिक्पतीनां निखिलदिक्पालानां सौधशृङ्गवातायनानां भवनाग्रगवाक्षाणामररकुलानि कपाटसमूहान्, विभिद्य विदार्य, अन्तर्मध्ये, प्रविश्य प्रवेशं कृत्वा, कुत्सितोऽध्वा कदध्वा बहुदूरोऽतिविप्रकृष्टो यः कदध्वा कुमार्गस्तस्मिन् खेदः क्लेशस्तस्य विश्रान्तिं प्रशमम्, आप लेभे । वसन्ततिलकावृत्तम् ॥२७॥

तदानीमिति—तदानीं तस्मिन् काले, उभयेषां पक्षद्वयस्थानाम्, सैनिकानां सैन्यानाम्, परस्परं मिथः एवं वक्ष्यमाणप्रकाराः, वीरवादाः शूरभाषितानि, बभूवुरजायन्त ।

अस्माकमिति—त्रिजगत्सु त्रिभुवनेषु प्रसिद्धं प्रख्यातं यशः कीर्तिर्येषां तेषाम्, अस्माकं नः, एषा हस्ते धृता, कृपाणीलता खड्गवल्लरी, पुरा प्राक्, निपीतैर्गृहीतैः, शत्रुस्त्रीनयनान्तानां वैरिवनितानेत्रप्रान्तानां यानि कज्जलजलानि अञ्जनसलिलानि तैः, श्यामा कृष्णवर्णा, सम्प्रतीदानीम्, आहवसीम्नि रणाग्रे, युष्मदसृजां त्वदीयरुधिराणाम्, पानेन धयनेन, शोणीकृता रक्तीकृता, अतएवतोऽन्ते, वीरश्रिया वीरलक्ष्म्याः स्मितेन मन्दहसितेन पाण्डुरा धवलवर्णा, च सती, चित्रा विविधवर्णा, भविष्यतीत्यहो आश्चर्यम् । शार्दूलविक्रीडितवृत्तम् ॥२८॥

गोवृन्दसक्तानिति—गोवृन्दे धेनुसमूहे सक्तान् कृतममत्वान्, भवतो युष्मान्, अस्मदीयभुजा मद्बाहवः, वयस्या इव सखाय इव, संयुगेन युद्धेन, निमेषमात्रादचिरेण, अद्य साम्प्रतम्, गां धेनुम् पक्षे पृथिवीं स्वर्गं वा, नेष्यन्ति प्रापयिष्यन्ति, अस्मत्पुरतो मदग्रे, हठेन बलात्, न तिष्ठत न स्थिता भवत । श्लेषः ॥ २९ ॥

पशून् वा प्राणान् वेति—हे प्रतिभटाः प्रतियोद्धारः, क्लीबपुरुषाः प्रमत्तमानवाः, यूयम्, झटिति शीघ्रम्, पशून् वा गा वा, प्राणान् वा जीवितानि वा, जहत त्यजत, नरेन्द्रस्य राज्ञः, पुरतोऽग्रे, स्वमूर्ध्नः स्वशिरांसि, चापान् वा धनूंषि वा, नमयत प्रह्वयत, मुखे वा वदने वा, हस्ते वा करे वा, शरवृन्दं तृणसमूहं पक्षे बाणसमूहम्, कुरुत विधत्त, तूर्णं क्षिप्रम्, नरपतिं राजानम्, कृतान्तागारं वा यमभवनं वा, शरणयत शरण्यबुद्ध्या स्वीकुरुत, पक्षे गृहं कुरुत 'शरणं गृहरक्षित्रोः' इत्यमरः । विकल्पालङ्कारः 'विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः' इति लक्षणात् । शिखरिणीच्छन्दः ॥३०॥

अन्येऽप्येवमाहुः—इतरेऽपि जना अनेन प्रकारेण कथयामासुः—

किं वाचाविसरेण मुग्धपुरुषाः किं वा वृथाडम्बरै-
रात्मश्लाघनयानया किमु भटाः सैषा हि नीचोचिता ।
संक्रीडद्रथचक्रकृष्टधरणौ भिन्नेभमुक्ताफलै-
श्चापाश्राच्छरवर्षतो विजयिनः शुभ्रं यशोऽङ्कूरति ॥३१॥

इत्यादि वदतामेषामधरोष्ठपुटाविव ।
सैनिकानां समूहौ द्वौ सङ्गतौ समरोद्धतौ ॥३२॥

तदनु कुरुकुञ्जरपञ्चास्याभ्यां तुङ्गतमशताङ्गसङ्गताभ्यां तिलकितमुखभागाः, प्रत्यर्थिसार्थग्रसनाय प्रसृताभिरिव मृत्युरसनाभिः पट्टिसवल्लरीभिः परिवृताः, शात्रवजनप्राणानिलसंजिघृक्षया समागताभिरिव भुजङ्गीभिरसिलताभिर्विलसिताः, समीकविलोकनार्थं सन्निहितसूर्यचन्द्रशङ्कावहसौवर्णवज्रखेटकमण्डलमण्डिताः, विरोधिराजमण्डलकवलनायागताभिरिव विधुन्तुदपरम्पराभिः शक्तिभिर्भयानकाः, उभयेऽपि सैनिकाः सङ्ग्रामशिल्पमनल्पं कल्पयितुमारभन्त ।

शरासनगुणारवैः कुरुपतेः शराणां चयैः
परस्परविमर्दिभिर्गगनमण्डले पूरिते ।
गभीरहयहेषितैर्मदगजावलीबृंहितै-
र्जगत्त्रितयमन्वभूत्परमतोकशब्दात्मताम् ॥३३॥

किं वाचाविसरेणेति—हे मुग्धपुरुषा हे मूढमानवाः, वाचां वचनानां विसरेण समूहेन, किं किं प्रयोजनम् ? वृथाडम्बरैर्निष्प्रयोजनकार्याटोपैः, वा किं किं प्रयोजनम् ? अनया क्रियमाणया, आत्मश्लाघनया स्वप्रशंसया, किमु किं प्रयोजनम्, उ वितर्के, हि यतः, एषा सा इयं सा, नीचोचिता नीचजनार्हा, अस्तीति शेषः, संक्रीडन्तः संचलन्तो ये रथाः स्यन्दनास्तेषां चक्रै रथाङ्गैः कृष्टा प्राप्तकर्षणा या धरणिः पृथिवी तस्याम्, भिन्ना विदीर्णा च इभा गजास्तेषां मुक्ताफलैर्मुक्तानिकरैः, चापाश्रात् कोदण्डवलाहकात्, शरवर्षतः बाणान् वर्षतः, अत्र षष्ठीसमासश्चिन्त्यः, विजयिनो विजययुक्तस्य जनस्य, शुभ्रं धवलम्, यशः कीर्तिः अङ्कूरति प्ररोहति । शार्दूलविक्रीडितच्छन्दः ॥३१॥

इत्यादीति—इत्यादि पूर्वोक्तप्रकारम्, वदतां कथयताम्, एषां सैनिकानां सुभटानाम्, समरोद्धतौ युद्धोद्धतौ, द्वौ समूहौ समुदायौ, अधरोष्ठपुटाविव दशनच्छदयुगलपुटाविव, संगतौ मिलितौ ॥३२॥

तदनु कुरुकुञ्जरेति—तदनु तदनन्तरम्, तुङ्गतमशताङ्गाभ्यां समुन्नतरथाभ्यां संगतौ सहितौ ताभ्याम्, कुरुकुञ्जरश्च पञ्चास्यश्चेति कुरुकुञ्जरपञ्चास्यौ ताभ्याम्, तिलकितो विशेषितो मुखभागोऽग्रभागो येषां ते, प्रत्यर्थिनां शत्रूणां सार्थः समूहस्तस्य ग्रसनं निगरणं तस्मै, प्रसृताभिर्विस्तृताभिः, मृत्युरसनाभिरिव यमजिह्वाभिरिव, पट्टिसवल्लरीभिरस्त्रविशेषलताभिः 'पट्टिशोऽस्त्रभेदः, पट्टिस इति दन्त्यसान्त इति मुकुटः' परिवृताः परिवेष्टिताः, शात्रवजनस्य शत्रुसमूहस्य प्राणा एवानिलः पवनस्तस्य संजिघृक्षा गृहीतुमिच्छा तया, समागताभिः सम्प्राप्ताभिः, भुजङ्गीभिरिव पन्नगीभिरिव, असिलताभिः खड्गवल्लरीभिः, विलसिताः शोभिताः, समीकविलोकनार्थं युद्धदर्शनार्थम्, संनिहितसूर्यचन्द्रयोर्निकटस्थादित्यशशिनोः शङ्कावहानि संशयोत्पादकानि यानि सौवर्णवज्रखेटकमण्डलानि सुवर्णनिर्मितसुदृढखेटकसमूहास्तैर्मण्डिताः शोभिताः, 'खेटक' इति 'ढाल' इति प्रसिद्धस्य नाम । विरोधिराजमण्डलस्य प्रत्यर्थिनृपतिसमूहस्य पक्षे प्रत्यर्थिचन्द्रबिम्बस्य कवलनाय ग्रसनाय, आगताभिः प्राप्ताभिः, विधुन्तुदपरम्पराभिः सैंहिकेयपङ्क्तिभिः 'सैंहिकेयो विधुन्तुदः' इत्यमरः, शक्तिभिः शस्त्रविशेषैः, भयानका भयङ्कराः, उभयेऽपि द्विप्रकारा अपि, सैनिकाः सुभटाः, अनल्पं भूयांसम्, संग्रामशिल्पं समरचातुर्यम्, कल्पयितुं रचयितुम्, आरभन्त प्रक्रान्ते स्म ।

शरासनगुणारवैरिति—शरासनगुणानां धनुःप्रत्यञ्चानामारवाः शब्दास्तैः, परस्परविमर्दिभिर्मिथो विमर्दकारिभिः, कुरुपतेर्जीवन्धरस्य, शराणां बाणानाम्, चयैः समूहैः, गभीराणि च तानि हयहेषितानि चेति गभीरहयहेषितानि तैः समुच्चहयहेषानादैः, मदगजावलीनां प्रमत्तगजपङ्क्तीनां बृंहितानि गर्जितानि तैः, गगनमण्डले नभोमण्डले, पूरिते संभृते, सति, जगत्त्रितयं लोकत्रितयम्, परमतोका कैवलशब्दमयता वा

शब्दैकार्णवमग्नमेतदखिलं लोकं समीक्ष्य क्षणाद्
देवा व्योम्नि समिद्विलोकनकलाबद्धादरा मेदुराः ।
युद्धारम्भनिरस्ततन्द्रकुरुराड्बाणासनादुद्गता-
नाराचान्निबिडप्रभान्नभसि ते सान्ध्याम्बुदान्मेनिरे ॥३४॥

पद्मास्यमुख्यकरकोमलरक्तकान्ति-
कल्लोलपल्लवितकार्मुकवल्लरीभ्यः ।
नामाङ्किता प्रचलिता च शिलीमुखालि-
र्जीवन्धरस्य पदपद्मसमीपमाप ॥३५॥

द्विरेफः शरवारोऽयं तस्य पादाम्बुजान्तिके ।
भ्रमंश्चकार तद्युक्तं मित्रसान्निध्यसूचनम् ॥३६॥

तदनु नामाङ्कितत्तदीयबाणगणवीक्षणेन समुन्नतध्वजचिह्नसन्दर्शनेन च, एते वयस्या इति निश्चित्य, नरपतिना सार्कं तदभ्याशमागतः संमदविकसितरोमकूपकोरकिततनुलतः कुरुपतिः, सबहुमानं तानेकैकशः सम्भाव्य, निजानुज्ञया रथारूढैः सहचरनिकरैः पुरस्कृतः, पार्श्वगतस्यन्दन-कन्दलितस्थितिना महीपतिना सम्भाषमाणः, सिन्धुरगन्धर्वशताङ्गपदगशबलं बलं पुरतो विधाय

शब्दात्मता शब्दैकरूपता ताम्, अन्वभूत् अनुभवति स्म, भुवनत्रयं शब्दैकमयमभूदिति भावः । पृथिवी-च्छन्दः ॥३३॥

शब्दैकार्णवमग्नमिति—क्षणादल्पेनैव कालेन, एतम्, अखिलं सम्पूर्णम्, लोकं भुवनम्, शब्दैकार्णव-मग्नं शब्दैकसागरनिमग्नम्, समीक्ष्य दृष्ट्वा, समिद्विलोकनकलायां युद्धदर्शनकलायां बद्धो धृत आदरः सम्मानं यैस्तथाभूताः, अतएव, व्योम्नि गगने, मेदुरा मिलिताः, ते प्रसिद्धाः, देवा अमराः, युद्धारम्भे समरप्रारम्भे निस्तन्द्रो निरालस्यो यः कुरुराड् जीवन्धरस्तस्य बाणासनाद्धनुषः, उद्गतान् निष्क्रान्तान्, निबिडा सान्द्रा प्रभा दीप्तिर्येषां तान्, नाराचान् बाणान्, नभसि वियति, सन्ध्यायां भवाः सान्ध्यास्ते च तेऽम्बुदाश्चेति सान्ध्याम्बुदास्तान् सन्ध्यामेघान्, मेनिरे मन्यन्ते स्म । भ्रान्तिमान् । शार्दूलविक्रीडित-च्छन्दः ॥३४॥

पद्मास्येति—पद्मास्यो जीवन्धरसखा मुख्यः प्रधानो येषां तेषां कराणां हस्तानां कोमलरक्त-कान्तिकल्लोलैः मृदुलारुणदीप्तितरङ्गैः पल्लविताः किसलयिता याः कार्मुकवल्लर्यो धनुर्लतास्ताभ्यः, नामाङ्किता नामधेयचिह्निता, प्रचलिता च प्रयाता च, शिलीमुखालिर्बाणपङ्क्तिः पक्षे भ्रमरश्रेणिश्च, जीव-न्धरस्य सात्यन्धरेः, पदपद्मसमीपं चरणकमलपार्श्वम्, आप प्राप्नोत् । रूपकालङ्कारः । वसन्ततिलका-वृत्तम् ॥३५॥

द्विरेफ इति—तस्य जीवकस्य, पादाम्बुजान्तिके चरणकमलसमीपे, भ्रमन् संचरन्, अयं शरवारो बाणसमूहः, यत्, मित्रसान्निध्यसूचनं सूर्यसामीप्यनिवेदनं पक्षे वयस्यसामीप्यनिवेदनम्, चकार विदधे, तद् युक्तमुचितम् । श्लेषानुप्राणितो रूपकालङ्कारः ॥३६॥

तदनु नामाङ्कितेति—तदनु तदनन्तरम्, नामाङ्किता नामचिह्निता ये तदीयबाणगणास्तत्सम्बन्धि शरसमूहास्तेषां वीक्षणेन दर्शनेन, समुन्नतानां ध्वजानां चिह्नस्य लिङ्गस्य संदर्शनेन च समवलोकनेन च, एते वयस्या इमे सखायः, इतीत्थम्, निश्चित्य निश्चयं कृत्वा, नरपतिना नरेन्द्रेण, साकं सार्धम्, तदभ्याशं तन्निकटम्, आगतः समायातः, संमदेन हर्षेण विकसिताः प्रकटिता ये रोमकूपा लोमसमूहास्तैः कोरकिता कुड्मलिता तनुलता शरीरवल्ली यस्य तथाभूतः, कुरुपतिर्जीवन्धरः, सबहुमानं सन्मानसहितं यथा स्यात्तथा, तान् पद्मास्यादीन्, एकैकशः प्रत्येकं सम्भाव्य समादृत्य, निजानुज्ञया स्वकीयादेशेन, रथारूढैः स्यन्दनाधिष्ठितैः, सहचरनिकरैर्मित्रसमूहैः, पुरस्कृतोऽग्रेकृतः, पार्श्वगते समीपस्थिते स्यन्दने रथे कन्दलिता सम्भूता स्थितिः सत्ता यस्य तेन, महीपतिना राज्ञा, सह, सम्भाषमाणो वार्तालापं कुर्वाणः, सिन्धुराश्च गजाश्च, गन्धर्वाश्च हयाश्च, शताङ्गाश्च रथाश्च, पदगाश्च पत्तयश्चेति सिन्धुरगन्धर्वशताङ्गपदगं तेन शबलं चित्रितम्,

पुरतोरणमतीत्य चलितः, चिरतरविलोकने कुतूहलसंमिलितपौरजननिरन्तरे रथ्यान्तरे स्तम्बेरमकदम्बकं कादम्बिनीति मत्वा समागताभिरिव सौदामिनीभिः कनकवेत्रलताभिर्वितीर्णावकाशो विगाहमानः, पटुपटहकाहलीडिण्डिमझर्झरझल्लरीमुरजशङ्खप्रमुखवाद्यरवविहितोपहूतिभिः काभिश्चित्सामिकृतमण्डनकलाभिः करकमलसंरुद्धनीविबन्धनकनकचेलाभिरबलाभिः काभिश्चित्सरभसकाञ्चीपददत्तमुक्ताहारवल्लरीभिः कङ्कणपदसमर्पिततुलाकोटिवधूटीभिरत्युन्नतहर्म्याङ्गणवातायनदत्तदृष्टिभिर्निर्निमेषं विलोक्यमानः क्रमेण राजभवनमाससाद ।

कुशलानुयोगमथ कौरवः सखीन्
बहुधा विधाय मुदितान्तरः परम् ।
समशेत सोऽयमयथापुरोदिता-
दुपचारकौशलवशाद्विशेषतः ॥३७॥

कदाचिदेकान्ते भृशमपूर्वसम्मानसमाहितसंशयडोलायमानमनस्सरोजेन कुरुराजेन चोदिततन्निदानानां सहचराणां तिलकायमानः पद्मवदनः प्रत्युत्तरशैलीमेवमुपादत्त ।

स्वामिंस्त्वदीयविरहानलदग्धदेहाः
श्रीमद्भविष्यदवलोकनपुण्यपाकैः ।
आश्वासिताश्च दयया द्रुतदत्तहस्ता
देव्या बभूविम वयं हयपाणिवेषाः ॥ ३८ ॥

बलं सैन्यम्, पुरतोऽग्रे, विधाय कृत्वा, पुरतोरणं नगरबाह्यद्वारम्, अतीत्य समुल्लङ्घ्य, चलितो गतः, चिरतरं सुदीर्घकालेन भाव्यं विलोकनं दर्शनं यस्य तस्मिन्, कुतूहलेन कौतुकेन सम्मिलिताः संगता ये पौरजना नागरिकनरास्तैर्निरन्तरे व्याप्ते, रथ्यान्तरे मार्गमध्ये, स्तम्बेरमकदम्बकं गजसमूहम्, कादम्बिनीति मेघमालेति मत्वा, बुद्ध्वा, समागताभिः प्राप्ताभिः, सौदामिनीभिरिव शम्पाभिरिव, कनकवेत्रलताभिः सौवर्णवेत्रवल्लरीभिः, वितीर्णो विस्तारितोऽवकाशो यस्य तस्मिन् तथाभूते सति, विगाहमानः प्रविशन्, पटुपटहश्च काहली च डिण्डिमश्च झर्झरश्च झल्लरी च मुरजश्च शङ्खश्चेति पटुपटहादयः ते प्रमुखा येषु तथा भूतानि यानि वाद्यानि तेषां रवेण शब्देन विहिता कृतोपहूतिरामन्त्रणं यासां ताभिः, काभिश्चित्काभिश्चन, सामिकृतार्धकृता मण्डनकला भूषणधारणकला यासां ताभिः, करकमलैर्हस्तारविन्दैः संरुद्धानि गृहीतानि नीविबन्धनकनकचेलानि ग्रन्थिबन्धनसुवर्णवस्त्राणि याभिस्ताभिः, काभिश्चित्कतिपयाभिः सरभसं सवेगं यथा स्यात्तथा काञ्चीपदे मेखलास्थाने दत्ता अर्पिता मुक्ताहारवल्लर्यो मौक्तिकहारलता याभिस्ताभिः, कङ्कणपदे हस्ताभरणस्थाने समर्पिताः प्रदत्तास्तुलाकोटयो नूपुरा यासां ताभिः, अत्युन्नतानां तुङ्गतमानां हर्म्याङ्गणानां भवनाजिराणां वातायनेषु गवाक्षेषु दत्ता समर्पिता दृष्टिर्नयनं याभिस्ताभिः, वधूटीभिस्तरुणीभिः, युवतिभिरिति यावत्, निर्निमेषं पक्ष्मस्पन्दरहितं यथा स्यात्तथा, विलोक्यमानो दृश्यमानः, सन्, क्रमेण क्रमशः, राजभवनं नरेन्द्रनिकेतनम्, आससाद प्राप ।

कुशलानुयोगमिति—अथानन्तरम्, बहुधा नानाप्रकारेण, सखीन् मित्राणि, कुशलानुयोगं क्षेमप्रश्नम्, विधाय कृत्वा, परमत्यन्तम्, मुदितान्तरः प्रहृष्टमानसः, सोऽयं प्रसिद्धः, कौरवो जीवन्धरः, अयथापुरोदितादभूतपूर्वात्, उपचारकौशलवशात् शिष्टाचारचातुर्यवशात्, विशेषतः सातिशयम्, समशेत संशयञ्चकार । मञ्जुभाषिणीच्छन्दः ॥३७॥

कदाचिदेकान्त इति—कदाचिज्जातुचित्, एकान्ते रहसि, भृशमत्यन्तम्, अपूर्वसम्मानेन विशिष्टादरेण समाहितः समुत्पादितो यः संशयः संदेहस्तेन डोलायमानं चञ्चलं मनस्सरोजं चित्तारविन्दं यस्य तेन, कुरुराजेन जीवन्धरेण, चोदितं पृष्टं तन्निदानं तत्कारणं येषां तेषाम्, सहचराणां सखीनाम्, तिलकायमानो विशेषकायमानः प्रधान इति यावत्, पद्मवदनः पद्मास्यः, एवमनेन प्रकारेण, प्रत्युत्तरशैलीं प्रतिवचनपरम्पराम्, उपादत्त जग्राह ।

स्वामिन्निति—हे स्वामिन् हे नाथ ! त्वदीयविरहानलेन तावकवियोगपावकेन दग्धो देहो विग्रहो

* तदनु निखिलमाश्वीयं पुरोधाय पुरान्निर्याय पर्यायेणातिलङ्घितबहुदूराध्वानः पत्रिकुलनिध्वाननिरुद्धदिशावकाशामरण्यानीं प्रविश्याभ्रंलिहतरुषण्डमण्डितदण्डकारण्यभागपरिकल्पितपटसदननिकटतटेषु घोटपटलं विधाय विश्रान्तिसुखमनुभवामः स्म । तत्र च ।

सौधावलीमतिशयालुभिरुन्नतैस्तैः
शुभ्रैः पटायतगृहैः कलितं निवासम् ।
नूनं भवद्विरहकातरतत्पुरश्री-
रस्माभिरागतवतीति वयं स्म विद्मः ॥ ३६ ॥

तदन्वत्यद्भुतसंनिवेशं दण्डकारण्यप्रदेशमवलोकितुकामा वयम्, तत्र तत्र विहृत्य, क्वचन विजृम्भितकुम्भीन्द्रकुम्भस्थलमुक्तमुक्ताकुलसिकतिलं वनविहरणश्रान्तनिमज्जत्पुलिन्दसुन्दरीवदनाम्भोजपरिष्कृतं गभीरमहाह्रदम्, कुत्रचिद्वलीमुखकरकम्पितमहीरुहशाखानिपतितपर्णौघसमाघातकुपितसुप्तसमुत्थितशार्दूलधाव्यमानशबरजनसरभसारूढाभ्रंलिहानोकहचयम्, क्वचित्तरुमूलसुखसुप्तानि तमालस्तोमनिभानि भल्लूककुलानि, क्वचित्तपनकिरणसन्तप्तवशां पद्माकरसमीपमानीय निजकरनिर्मूलितबालमृणालवलयं तदङ्के निक्षिप्य पयोजरजःसुगन्धिशीतलजलशीकरनीकरांस्तन्मुखे

येषां ते, श्रीमतो भवतो भविष्यद् वत्स्यमाणमवलोकनं यस्मात्तथाभूतं यत्पुण्यं तस्य पाका उदयास्तैः, आश्वासिताः सन्तोषिताः, देव्या गन्धर्वदत्तया, दयया कृपया, द्रुतं शीघ्रं दत्तौ हस्तौ येभ्यस्ते तथाभूताः, वयं पद्मास्यादयः, हयपाणिवेषा अश्वविक्रेतृनेपथ्याः, बभूविम आस्म । वसन्ततिलकावृत्तम् ॥ ३८ ॥

तदन्विति—तदनु तदनन्तरम्, निखिलं समग्रम्, अश्वानां समूहोऽश्वीयं तत् 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' इति समूहार्थे छप्रत्ययः । पुरोधाय पुरस्तात्कृत्वा, पुरान्नगरात्, निर्याय निर्गत्य, पर्यायेण क्रमशः, अतिलङ्घितः समतिक्रान्तो बहुदूरोऽध्वा यैस्ते, तथाभूता वयम्, पत्रिकुलस्य पक्षिसमूहस्य, निध्वानेन शब्देन निरुद्धो संरुद्धो दिशावकाशो काष्ठान्तरालं यस्यां ताम्, अरण्यानीं महाटवीम्, प्रविश्य प्रवेशं कृत्वा, अभ्रंलिहैर्गगनचुम्बिभिस्तरुषण्डैर्वृक्षसमूहैर्मण्डितः शोभितो यो दण्डकारण्यभागो दण्डकवनप्रदेशस्तस्मिन्परिकल्पितानि यानि पटसद्मानि तेषां निकटतटेषु समीपप्रान्तेषु, घोटकपटलं हयसमूहम्, विधाय कृत्वा, विश्रान्तिसुखं विश्रामसातम्, अनुभवामः स्म—अन्वभूवम् । तत्र च दण्डक वने ।

सौधावलीमिति—सौधानां भवनानामावली पङ्क्तिस्ताम्, अतिशयालुभिरतिक्रामद्भिः, उन्नतैस्तुङ्गैः, शुभ्रैः शुक्लैः, तैः प्रसिद्धैः, पटायतगृहैर्वस्त्रविस्तृतनिकेतनैः, कलितं निर्मितम्, निवासमावसथम्, नूनं निश्चयेन, भवद्विरहेण त्वदीयविप्रयोगेण कातरा भीता या तत्पुरश्रीस्तन्नगरलक्ष्मीः सा, अस्माभिः सह, आगतवती समागता, इतीत्थम्, वयं विद्मो जानीमः । वसन्ततिलकावृत्तम् । उत्प्रेक्षा ॥३६॥

तदन्विति—तदनु तदनन्तरम्, अत्यद्भुतोऽत्याश्चर्यकरः सन्निवेशो रचना यस्य तम्, दण्डकारण्यप्रदेशं दण्डकवनाभोगम्, अवलोकितुकामा द्रष्टुमनसः, वयम्, तत्र तत्र स्थानेषु, विहृत्य विहारं कृत्वा, क्वचन कुत्रचित्, विजृम्भितानि विदीर्णानि यानि कुम्भीन्द्रकुम्भस्थलानि गजेन्द्रगण्डस्थलानि तेभ्यो मुक्तानि पतितानि यानि मुक्ताकुलानि मौक्तिकसमूहास्तैः सिकतिलं सिकतायुक्तम्, वनविहरणेन काननविहारेण विश्रान्ता प्राप्तखेदाः अतएव निमज्जन्त्योऽवगाहमाना याः पुलिन्दसुन्दर्यः शबर्यस्तासां वदनाम्भोजैर्मुखकमलैः परिष्कृतं सहितम्, गभीरश्चासौ महाह्रदश्चेति तम् अगाधजलाशयम्, कुत्रचित्क्वचित्, वलीमुखानां वानराणां करैर्हस्तैः कम्पिता वेपिता या महीरुहशाखा वृक्षलतास्ताभ्यो निपतिताः स्खलिता ये पर्णौघाः पत्रनिचयास्तेषां समाघातेन प्रहारेण कुपिताः क्रुद्धा ये सुप्तसमुत्थिताः शयनानन्तरं कृतोत्थानाः शार्दूलाः सिंहास्तैर्धाव्यमाना अनुगम्यमाना ये शबरजना वनचरजनास्तैः सरभसं सवेगं यथा स्यात्तथारूढः समधिष्ठितो योऽभ्रंलिहानोकहचयस्तुङ्गपादपसमूहस्तम्, क्वचित्कुत्रचित्, तरुमूलेषु वनस्पतितलेषु सुखसुप्तानि सुखेन कृतशयनानि, तमालस्तोमनिभानि तापिच्छसमूहसदृशानि, भल्लूककुलानि ऋक्षनिकुरम्बानि, क्वचित् कुत्रचित्, तपनस्य सूर्यस्य किरणैर्मयूखैः सन्तप्ता सम्प्राप्ततापा या वशा हस्तिनी ताम्, पद्माकरसमीपं कासारनिकटम्, आनीय प्रापय्य, निजकरेण स्वकीयशुण्डादण्डेन निर्मूलितं समुत्पाटितं यद् बालमृणालवलयं कोमलबिस-

संसिच्य शुण्डादण्डविधृतविशालपद्मपत्रमातपत्रीकुर्वन्तं वशावल्लभम्, कुत्रचित्सावज्ञं लोचनयुगलं क्षणमुन्मील्य पुनः सुषुप्सुं पञ्चवदनसञ्चयम्, सविस्मयमवलोकमानाः, क्वचन तापसजनसङ्कुल-प्रदेशे प्रविशमानाः, क्रमेण किञ्चित्तरुमूलमावसन्तीं पुण्यमातरं पश्यामः स्म ।

यस्या मूर्तिर्मलिनवसनावेष्टिता क्षामभूता
चन्द्रस्यैका कृशतमकला ध्वान्तरुद्धेव भाति ।
वक्त्रं शुष्यत्सरसिजनिभं शोकदीना च वाणी
चिन्तादीर्घश्वसितमनिशं मूर्ध्नि बद्धा जटा च ॥ ४० ॥

तया मात्रा दृष्टमात्रेण कुत्रत्या इति पृष्टा एवमुत्तरं वक्तुमुपक्रम्य,
"कश्चिज्जीवकविख्यातो विपश्चिद्वृन्दशेखरः ।
अभाद्राजपुरे सोऽयमस्माकं जीवनौषधम् ॥ ४१ ॥

अहं खलु राजश्रेष्ठिनः सुभद्रायां जातः पद्मास्यः, अयं सत्यन्धरमहाराजसचिवात्सागरदत्तायां जातः श्रीदत्तः, अयं पुनरचलात्तिलोत्तमायां जातो बुद्धिषेणः, एष किल विजयदत्तात्पृथ्वीमत्यां जातो देवदत्तः, इमौ पुनर्जीवन्धरानुजस्य नन्दाढ्यस्यानुजौ नपुलविपुलौ, इत्यादिक्रमेण सर्वेषां नामधेयान्यभिधाय,

---

मण्डलम्, तदङ्गे तच्छरीरे, निक्षिप्य निधाय, पयोजरजोभिः कमलपरागैः सुगन्धिनः सुरभियुक्ता ये शीतल-जलशीकरनिकराः शिशिरसलिलकणकलापास्तान्, तन्मुखे तद्वक्त्रे, संसिच्य समुक्ष्य, शुण्डादण्डेन करेण विधृतं गृहीतं यद् विशालपद्मपत्रं दीर्घकमलपर्णम् तत्, आतपत्रीकुर्वन्तं छत्रीकुर्वन्तम्, वशावल्लभं हस्तिनीपतिम्, कुत्रचित्क्वचित्, सावज्ञं सानादरम्, यथा स्यात्तथा, लोचनयुगलं नयनयुगम्, क्षणमल्पकालं यावत्, उन्मील्य समुद्घाट्य, पुनर्भूयः, सुषुप्सुं स्वपितुमिच्छुम्, पञ्चवदनसञ्चयं, पञ्चाननसमूहम्, सविस्मयं साश्चर्यं यथा स्यात्तथा, अवलोकमानाः पश्यन्तः, क्वचन कुत्रचित्, तापसजनसंकुले तपस्विजनव्याप्ते, प्रदेशे स्थाने, प्रविशमानाः प्रविशन्तः, वयम्, क्रमेण क्रमशः, किञ्चित्तरुमूलं किञ्चिद्वृक्षस्याधस्तात्, आवसन्तीं कृतनिवासाम्, पुण्यमातरं पुण्यजननीम्, पश्यामः स्मः समवालोकयाम ।

यस्या इति—यस्याः पुण्यजनन्याः, मलिनवसनेन मलीमसवस्त्रेणावेष्टिता परिवृता, क्षामभूता कृशीभूता, मूर्तिः शरीरम्, ध्वान्तरुद्धा तिमिरावृता, चन्द्रस्य शशिनः, एकाऽद्वितीया, कृशतमकलेव क्षीणतम-षोडशभाग इव, भाति शोभते । वक्त्रं वदनं शुष्यच्छुष्कीभवद् यत्सरसिजं कमलं तेन निभं सदृशम्, वाणी च भारती च, शोकदीना खेदप्राप्तदैन्या, श्वसितं श्वासोच्छ्वासः, चिन्तादीर्घमाधिविस्तृतम्, जटा च केशसमूहश्च, मूर्ध्नि शिरसि, अनिशं निरन्तरम्, बद्धा संयता, अस्तीति शेषः । मन्दाक्रान्ताच्छन्दः ॥४०॥

तयेति—तया पूर्वोक्तया, मात्रा जनन्या, दृष्टमात्रेण, कुत्रभवाः कुत्रत्याः स्थ्याः, यूयमिति, पृष्टा अनुयुक्ताः, वयम्, एवमनेन प्रकारेण, उत्तरं प्रतिवचनम्, वक्तुं निगदितुम्, उपक्रम्य प्रारभ्य ।

कश्चिदिति—राजपुरे एतन्नामनगरे, जीवकविख्यातो जीवन्धरनामप्रसिद्धः विपश्चिद्वृन्दशेखरो विद्वद्वृन्दशिरोमणिः, कश्चित् कोऽपि जनः, अभात् शुशुभे, सोऽयं जनः, अस्माकं सर्वेषाम्, जीवनौषधं सञ्जीवनौषधम्, आसीदिति शेषः ॥४१॥

अहं खल्विति—अहं खलु निश्चयेन, राजश्रेष्ठिनो राजवणिक्पतेः, सुभद्रायां तन्नामपत्न्याम्, जातः समुत्पन्नः, पद्मास्य एतन्नामा, अयमेषः, सत्यन्धरमहाराजस्य सचिवो मन्त्री तस्मात्, सागरदत्ताया-मेतन्नामपत्न्याम्, जातः समुद्भूतः श्रीदत्त एतन्नामा, अयं पुनः, अचलात् एतन्नाम्नः, तिलोत्तमायामेत-न्नामपत्न्याम्, जातः समुत्पन्नः, बुद्धिषेण एतन्नामा, एष किल, विजयदत्तात् एतन्नामधेयात्, पृथ्वीमत्यामेत-न्नाम्न्याम्, जातः समुत्पन्नः, देवदत्त एतन्नामा, इमौ पुनः, जीवन्धरानुजस्य जीवकलघुभ्रातुः, अनुजौ कनिष्ठौ, नपुलविपुलावेतन्नामधेयौ, इत्यादिक्रमेण इतिप्रभृतिक्रमेण, सर्वेषां निखिलानाम्, नामधेयानि नामानि अभिधाय निगद्य ।

तदुत्पत्तिदिने जाता वयं सर्वे महात्मना।
तेन सार्धं विशाम्पत्या पोषिताश्च निजालये ॥ ४२ ॥

तदनु सकलविद्याः शीलयन्व्याधयूथं
पशुगणविनिवृत्त्यै चापपाणिर्व्यजेष्ट।
तदनु खचरकन्यां प्राप्य गन्धर्वदत्तां
परिषदि वरवीणाविद्यया कीर्तिमाप ॥४३॥

ततश्च वासन्तिकेषु वासरेषु वनविहारान्निवर्तमानेषु पौरेषु, दुरन्तमददुरासदस्य काष्ठाङ्गार-पट्टदन्तावलस्य मदभङ्गं विधाय गुणमालां परिपालयन्नचिरेणैव तां परिणिन्ये।

तमेनं कोपवशतः काष्ठाङ्गारः खलाग्रणीः।

हन्तुं,

इत्यर्धोक्ते, 'तत्क्षणं हा दावपावकदग्धायां वनवल्लर्यां कुठारमर्पयन्ति भवन्तः' इति दम्भोलिनिहता भुजगीव मूर्च्छोन्मीलितचेतना भुवि पेतुषी सा माता क्रमेण कथञ्चिल्लब्धसंज्ञा,

व्यवसितः सोऽयं निजभून्नैव रक्षितः ॥ ४४ ॥

इति निरवशेषमुक्तापि, शोकरणरणिकाक्रान्तचित्ता प्रलापमेवमातेने।

तदुत्पत्तिदिन इति—वयं सर्वे, तस्योत्पत्तेर्दिनं तदुत्पत्तिदिनं तस्मिन्, जाताः समुत्पन्नाः, तेन महात्मना महापुरुषेण, सार्धं समम्, विशांपत्या गन्धोत्कटेन, निजालये निजभवने, पोषिताश्च पालिताश्च ॥४२॥

तदन्विति—तदनु तदनन्तरम्, सकलविद्या निखिलविद्याः शीलयन् समभ्यस्यन्, चापपाणिर्धनुर्हस्तः पशुगणस्य गवादिसमूहस्य विनिवृत्त्यै प्रत्यावर्तनाय, व्याधयूथं वनचरसमूहम्, व्यजेष्ट विजितवान्, 'विपराभ्यां जेः' इत्यात्मनेपदम्, तदनु तदनन्तरम्, गन्धर्वदत्तामेतन्नामधेयाम्, खचरकन्यां विद्याधरपुत्रीम्, प्राप्य लब्ध्वा, परिषदि सभायाम्, वरवीणाविद्यया श्रेष्ठतमपरिवादिनीवादनकौशलेन, कीर्तिं यशः, आप लेभे। मालिनीच्छन्दः ॥४३॥

ततश्चेति—ततश्च तदनन्तरञ्च, वासन्तिकेषु वसन्तसम्बन्धिषु, वासरेषु दिवसेषु, पौरेषु नागरिकेषु, वनविहारात् काननपर्यटनात्, निवर्तमानेषु प्रत्यागच्छत्सु सत्सु, दुरन्तेन मदेन दुरासदस्तस्य दुष्टदानदुष्प्राप्यस्य, काष्ठाङ्गारपट्टदन्तावलस्य राजप्रमुखवारणस्य, मदभङ्गं गर्वनाशम्, विधाय कृत्वा, गुणमालामेतन्नाम्नीं श्रेष्ठिपुत्रीम्, परिपालयन् रक्षन्, अचिरेणैवाल्पेनैव कालेन, तां गुणमालाम्, परिणिन्ये परिणीतवान्।

तमेनमिति—खलाग्रणी दुर्जनाग्रेसरः, काष्ठाङ्गारस्तन्नामनृपः, कोपवशतः क्रोधावेशेन, एनं तम् जीवन्धरम्, हन्तुं मारयितुम्—

इत्यर्धोक्त इति—इति पूर्वोक्तप्रकारेण, अर्धोक्ते सामिभाषिते, तत्क्षणं तत्कालम्, 'हा' इति खेदे, दावपावकेन वनाग्निना दग्धायां प्लुष्टायाम्, वनवल्लर्यां गहनलतायाम्, भवन्तो यूयम्, कुठारं परशुम्, अर्पयन्ति ददति, इतीत्थं निवेदयन्तीति शेषः, दम्भोलिनिहता वज्रताडिता, भुजगीव पन्नगीव, मूर्च्छया मोहातिरेकेणोन्मीलिता निरस्ता चेतना संज्ञा यस्यास्तथाभूता, भुवि पृथिव्याम्, पेतुषी पतिता, सा पूर्वदर्शिता, माता पुण्यजननी, क्रमेण क्रमशः कथञ्चित्केनापि प्रकारेण, लब्धसंज्ञा प्राप्तचैतन्या, सती।

व्यवसित इति—व्यवसितः कृतोद्योगः, आसीदिति शेषः, किन्तु सोऽयं जीवन्धरः, निजभून्नैव स्वकीयमाहात्म्येनैव, रक्षितस्त्रातः ॥४४॥

इतीति—इत्येवम्, निरवशेषं समग्रं यथा स्यात्तथा, उक्तापि कथितापि, शोकरणरणिका शोकोत्कण्ठा तयाऽऽक्रान्तं व्याप्तं चित्तं मनो यस्याः सा, एवं वक्ष्यमाणप्रकारेण, प्रलापं परिदेवनम्, आतेने विस्तारयामास।

हा हा हा बत हा हतास्मि किमिदं दुःश्राव्यमत्याहितं
हा पुत्र क्व गतोऽसि हा हतविधे क्रूरोऽसि मत्पुत्रके ।
हा नाथ त्वमुदारपुण्यचरितो यस्मादिमां दुर्दशा-
मज्ञात्वा सुरलोकसौख्यलहरीं विन्दंश्चिरं मोदसे ॥४५॥

हा पुत्र, हा कुरुवंशमित्र, सुलक्षणगात्र, हा पयोजविशालनेत्र, एतावन्तं कालं तव मुखचन्द्रदर्शनमपि दुर्लभमभून्मम मन्दभाग्यायाः । अपि च ।

पत्युर्वियोगमधिकं दववह्निकल्पं
वासं च काननतले स्वपुरं विसृज्य ।
यस्योदयादनुभवाम्यथ जीवितं च
सोऽयं यदीदृशकथः कथमद्य वर्ते ॥४६॥

सत्यन्धरस्तव पिता खलशेखरेण
व्यापादितो युधि कृतघ्नवरेण येन ।
तेनैव पुत्र गमितस्त्रिदिवं यदि त्वं
हा हन्त सैष कुरुवंशलताकुठारः ॥४७॥

पत्युर्वियोगो विपिने निवासो राज्यं च नष्टं तनयस्य शोकः ।
तदद्य दौर्भाग्यहुताशनो मे विनिर्दहेदेव करालवह्निम् ॥४८॥

हा हेति—हा हा हा बत हा इति दुःखसूचकान्यव्ययानि, हतास्मि नष्टास्मि, इदमेतत्, किं किन्नाम, दुःश्राव्यमश्रवणीयम्, अत्याहितमापतितम्, हा पुत्र हा सुत, क्व कुत्र, गतोऽसि यातोऽसि, हा हतविधे दुर्दैव, मत्पुत्रके मत्सुते, क्रूरो नृशंसोऽसि, हा नाथ हा स्वामिन्, त्वं भवान्, उदारमुत्कृष्टं पुण्यचरितं सुकृतप्रभावो यस्य तथाभूतोऽसि, यस्मात् कारणात्, इमां मदनुभूयमानाम्, दुर्दशां दुष्टावस्थाम्, अज्ञात्वा अविदित्वा, सुरलोकस्य स्वर्गस्य सौख्यलहरीं सातपरम्पराम्, विन्दन् लभमानः, चिरं दीर्घकालेन, मोदसे हृष्यसि । शार्दूलविक्रीडितच्छन्दः ॥४५॥

हा पुत्रेति—हा पुत्र हा सुत, हा कुरुवंशमित्र हा कुरुकुलसूर्य, सुलक्षणं गात्रं यस्य तत्सम्बुद्धौ हे सुलक्षणगात्र हे सुचिह्नशरीर, हा पयोजे इव कमले इव विशाले दीर्घे नेत्रे यस्य तत्सम्बुद्धौ हे पयोजविशालनेत्र, एतावन्तमियत्परिमाणम्, कालं समयं यावत्, मन्दमल्पं भाग्यं सुकृतं यस्यास्तस्याः क्षीणपुण्याया इति यावत्, तव भवतः, मुखचन्द्रदर्शनं वदनविधुविलोकनमपि दुर्लभं दुष्प्राप्यम्, अभूत् जातम् । अपि च किञ्च ।

पत्युरिति—यस्य पुत्रस्य तव उदयाज्जन्मनः, दववह्निकल्पं दावानलतुल्यम्, अधिकं प्रभूतम्, पत्युर्वल्लभस्य, वियोगं विरहम्, स्वपुरं स्वनगरम्, विसृज्य त्यक्त्वा, काननतलेऽरण्यभूमौ, वासञ्च निवासञ्च, अथ, जीवितं च जीवनञ्च, अनुभवामि दधामि, सोऽयं सुतः, यदि चेत्, ईदृशी कथा यस्य स ईदृग्वृत्तान्तः, अस्ति, तर्हि, अद्येदानीम्. कथं केन प्रकारेण, वर्ते जीवामि ॥४६॥

सत्यन्धर इति—कृतघ्नवरेण कृतघ्नशिरोमणिना, खलशेखरेण दुर्जनश्रेष्ठेन येन काष्ठाङ्गारेण, युधि समरे, तव भवतः, पिता सत्यन्धर एतन्नामधेयः, व्यापादितो मारितः, तेनैव काष्ठाङ्गारेणैव, हे पुत्र हे वत्स, यदि चेत्त्वम्, त्रिदिवं स्वर्गम्, गमितः प्रापितः, तर्हि, हा हन्त, सैषः काष्ठाङ्गारः 'सोऽचि लोपे चेत्पादपूरणम्' इति सोर्लोपे सन्धिः, कुरुवंशलतायां कुलगोत्रवल्लर्यां कुठारः परशुरिति कुरुवंशलताकुठारः, जात इति शेषः । वसन्ततिलकावृत्तम् ॥४७॥

पत्युरिति—यद्यस्मात्कारणात्, पत्युर्वल्लभस्य, वियोगो विरहः, विपिने वने, निवासोऽधिष्ठानम्, राज्यं साम्राज्यम्, नष्टं हृतम्, तनयस्य पुत्रस्य, शोकश्च मृत्युश्च, प्राप्त इति शेषः, तत्तस्मात्कारणात्, अद्येदानीम्, मे मम, दौर्भाग्यमेव दुर्दैवमेव हुताशनो वह्निरिति दौर्भाग्यहुताशनः, करालवह्निं भयङ्करानलम्, विनिर्दहेदेव भस्मसात्कुर्यादेव । करालवह्नेरपि भयङ्करो मम दौर्भाग्यानल इति भावः ॥४८॥

स्वप्नो निष्फलतां गतस्त्वयि सुत व्यर्थं वपुर्लक्षणं
सत्यार्थं न बभूव पुण्यवपुषस्तद्देवताया वचः ।
हा भर्तृव्यसनाम्बुधिर्हि सुतरो नैव त्वया पुत्रक
त्वं यद्येवमवेहि मामपि भवल्लोकं प्रति प्रस्थिताम् ॥४९॥

इत्यादिप्रलापवशेन शोकलहरीं देवोदन्तं चाम्भोदावलिमिव दम्भोलिममृतं च मुञ्चन्तीं पुण्यमातरं बहुधा समाश्वास्य, तन्मुखादुत्पन्नां देवोक्तिं नभसो निपतितां रत्नवृष्टिमिव बहुमन्यमाना वयं, पुनः पुनस्तामाश्वास्यापृच्छ्य च श्रीमत्सन्निधिमुपागताः, इति ।”

जीवन्मृतां तां जननीं विदित्वा जीवन्धरोऽखिद्यत रक्तचित्तः ।
मातुर्गुरुस्नेहवशेन सोऽयं द्रष्टुं क्षणात्तामिह तत्वरे च ॥५०॥

तदनु कुरुकुमुदिनीकान्तस्तत्क्षणमेव सकलबन्धून्विशेषतो भार्यामापृच्छ्यानुनीय च, अनुगमनकलितकुतुकनृपतनयनिचयं क्रमेण विसृज्य, सहचरमण्डलमण्डितो दण्डकारण्यमाजगाम ।

क्षामक्षामतनुं विवर्णवदनां निःश्वासधूमोत्करै-
श्चिन्तादन्तुरितान्तरामविरलैर्बाष्पैर्मिलल्लोचनाम् ।
ताम्बूलादिविहीनविस्तृतमलप्रोतद्विजालिं जटा-
वल्लीवेल्लितमस्तकां कुरुपतिर्देवीं लुलोके पुरि ॥ ५१ ॥

स्वप्न इति—हे सुत हे पुत्र, त्वयि भवति, स्वप्नो मुकुटबद्धकङ्केलिदर्शनरूपः, निष्फलतां व्यर्थताम्, गतः प्राप्तः, वपुषो देहस्य, लक्षणं मकरिकादिचिह्नम्, व्यर्थं निष्प्रयोजनम्, पुण्यवपुषः पुण्याकारायाः, देवताया देव्याः, तद्वच् मशोभोक्तम्, वचोऽपि वचनमपि, सत्यार्थं तथ्यार्थम्, न बभूव नाजायत, हे सुत, त्वया भवता, विनेति शेषः, भर्तृव्यसनं पतिमरणमेवाम्बुधिः सागर इति भर्तृव्यसनाम्बुधिः, हि निश्चयेन, सुतरः सुखेन तरितुं शक्यः, नैव, हा खेदे, यद्येवम्, तर्हि, त्वम्, मामपि विजयामपि, भवल्लोकं प्रति त्वजन्मक्षेत्रं प्रति, प्रस्थितां प्रयाताम्, अवेहि जानीहि । अहमपि त्वामनुम्रिये इति भावः । शार्दूलविक्रीडितच्छन्दः ॥४९॥

इत्यादिप्रलापवशेनेति—इति प्रभृति विलापपरवशतया, शोकलहरीं दुःखपरम्पराम्, देवोदन्तं च भवद्वृत्तान्तञ्च, दम्भोलिं वज्रम्, अमृतं पीयूषं च, अम्भोदावलिमिव मेघमालामिव, मुञ्चन्तीं त्यजन्तीं प्रकटयन्तीमिति यावत्, पुण्यमातरं पुण्यजननीम्, बहुधा नानाप्रकारेण, समाश्वास्य सन्तोष्य, तस्या मुखं तस्मात्तन्मुखात्तद्वक्त्रात्, उत्पन्नां प्रकटाम्, देवोक्तिं भवद्राजवंशवार्ताम्, नभसो गगनात्, निपतितां भ्रष्टाम्, रत्नवृष्टिमिव मणिवर्षामिव, बहुमन्यमाना श्रेष्ठां जानानाः, वयम्, पुनः पुनर्भूयोभूयः, तां मातरम्, आश्वास्य सन्तोष्य, आपृच्छ्य च पृष्ट्वा च, श्रीमत्सन्निधिं भवन्निकटम्, उपागताः प्राप्ताः, इति ।

जीवन्मृतामिति—रक्तमनुरागपूर्णं चित्तं मनो यस्य तथाभूतः, जीवन्धरो जीवकः, तां जननीं मातरम्, जीवन्त्यपि मृतेति जीवन्मृता ताम्, विदित्वा ज्ञात्वा, अखिद्यत खेदयुक्तो बभूव, सोऽयं जीवन्धरः, मातुर्जनन्याः, गुरुस्नेहवशेन प्रचुरप्रीतिवशेन, तां मातरम्, द्रष्टुमवलोकयितुम्, क्षणादल्पेनैव कालेन, इह लोके, तत्वरे च त्वरायुक्तो जातश्च ॥ ५० ॥

तदन्विति—तदनु तदनन्तरम्, कुरुकुमुदिनीकान्तः कुरुवंशचन्द्रः, जीवन्धरः, तत्क्षणमेव तत्कालमेव, सकलबन्धून् निखिलेष्टजनान्, विशेषतः प्रमुखतया, भार्यां वल्लभाञ्च, आपृच्छ्य आमन्त्र्य, अनुनीय च समाश्वास्य च, अनुगमने सहगमने कलितं धृतं कुतुकं येन तथाभूतो यो नृपतनयनिचयो राजपुत्रसमूहस्तम्, क्रमेण क्रमशः, विसृज्य प्रत्यावर्त्य, सहचरमण्डलमण्डितो मित्रसमूहसुशोभितः सन्, दण्डकारण्यं दण्डकवनम्, आजगाम आययौ ।

क्षामक्षामतनुमिति—कुरुपतिर्जीवन्धरः, पुरि पुरस्तात्, क्षामक्षामातिकृशा तनुः शरीरं यस्यास्ताम्, निःश्वासा दीर्घोष्णश्वासा एव धूमोत्करा धूमसमूहास्तैः, विवर्णं म्लानं वदनं वक्त्रं यस्यास्ताम्, चिन्तया शोकेन दन्तुरितं व्याप्तमन्तरं हृदयं यस्यास्ताम्, अविरलैर्निरन्तरायैः, बाष्पैरश्रुभिः, मिलती मुकुले लोचने नयने यस्यास्ताम्, ताम्बूलादिविहीना नागवल्लीदलादिभक्षणशून्या विस्तृतमलप्रोता विततमलयुक्ता च

सा पुत्रमालोक्य पयःप्रवाहिघनस्तनी बाष्पनिरुद्धनेत्रा ।
शुशोच तं चेतसि रुक्मिणीव प्रसूनबाणं चिरकालदृष्टम् ॥ ५२ ॥

पदाम्बुजाते प्रणतं कुमारमाशीर्भिराकीर्य तदा भुजाभ्याम् ।
आश्लिष्टवत्याः प्रबभूव तस्या आदेशवच्छोकपदे प्रमोदः ॥ ५३ ॥

तावद्यक्षाध्यक्षोऽपि, तयोः समक्षमागत्य, स्नानसुगन्धिलेपनप्रसूनमालिकामणिभूषणदुकूलवसनादिभिः सम्पूज्य, प्राज्यतमस्नेहेन कुमारप्रमुखान्देवीं च तैस्तैर्मधुरालापैः समाश्वास्य, बाभास्यमानेन विमानेन क्रमेण निजास्पदमाससाद ।

अगण्यपुण्यं तनयं वरेण्यमुवाच मातानघशीलपूता ।
पितुः पदं ते किमु वत्सरान्ते भवेन्निपातेन रिपोः कृतेन ॥ ५४ ॥

प्रसूगिरमिमां श्रुत्वा प्रसूतपृथुकौतुकः ।
एवमुत्तरमादत्त भावं तस्या विदन्नसौ ॥ ५५ ॥

कुम्भीन्द्रशैलविगलद्घनदानधारा-
सन्निर्झराणि चलखड्गसमावृतानि ।

द्विजालिर्दन्तपङ्क्तिर्यस्यास्ताम्, जटावल्लीभिरसंस्कृतकेशलताभिर्वेल्लितं वेष्टितं मस्तकं शिरो यस्यास्ताम्, देवीं विजयाम्, लुलोके ददर्श । शार्दूलविक्रीडितच्छन्दः ॥ ५१ ॥

सा पुत्रमिति—सा विजया, पुत्रं सुतम्, जीवन्धरमिति यावत्, आलोक्य दृष्ट्वा, पयःप्रवाहिनौ क्षीरप्रवाहिणौ घनस्तनौ पीनवक्षोजौ यस्याः सा, बाष्पैरश्रुभिर्निरुद्धे व्याप्ते नेत्रे नयने यस्यास्तथाभूता, सती, चिरकालदृष्टं दीर्घकालावलोकितं तम् जीवन्धरम्, प्रसूनबाणं कामं प्रद्युम्नमिति यावत्, रुक्मिणीव श्रीकृष्णपट्टराज्ञीव, चेतसि मनसि, शुशोच शोचति स्म ॥ ५२ ॥

पदाम्बुजात इति—तदा तस्मिन् काले, पदाम्बुजाते चरणकमले, प्रणतं विनतम्, कुमारं जीवन्धरम्, आशीर्भिराशंसावचनैः, आकीर्य व्याप्तं कृत्वा, भुजाभ्यां बाहुभ्याम्, आश्लिष्टवत्या आलिङ्गितवत्याः, तस्या विजयायाः, शोकपदे शोकस्थाने, आदेशवत् व्याकरणशास्त्रप्रसिद्धादेश इव, प्रमोदो हर्षः, प्रबभूव समजायत । यथा व्याकरणे 'अस्तेर्भूः' इत्यादिभिः सूत्रैरस्तिप्रभृतिषु स्थानेषु भूप्रभृतय आदेशा भवन्ति तद्वदेव्याः शोकस्थाने हर्षादेशो बभूवेति भावः ॥ ५३ ॥

तावदिति—तावत् तावता कालेन, यक्षाध्यक्षोऽपि कुक्कुरचरः सुदर्शनयक्षोऽपि, तयोर्मातापुत्रयोः, समक्षं पुरस्तात्, आगत्य समेत्य, स्नानञ्च सुगन्धिलेपनञ्च प्रसूनमालिका च मणिभूषणानि च दुकूलवसनानि चेति स्नानसुगन्धिलेपनप्रसूनमालिकामणिभूषणदुकूलवसनानि तान्यादौ येषां तैः अभिषेकसुगन्धितद्रव्यलेपनपुष्पमालारत्नालङ्कारक्षौमवस्त्रप्रभृतिभिः, सम्पूज्य समर्च्य, प्राज्यतमस्नेहेन प्रकृष्टतमप्रेम्णा, कुमारप्रमुखान् जीवन्धरप्रधानान्, देवीञ्च विजयामातरञ्च, तैः प्रसिद्धैः, मधुरालापैर्मधुराभाषणैः, समाश्वास्य सम्बोध्य, बाभास्यमानेनातिशयेन शोभमानेन, विमानेन व्योमयानेन, क्रमेण क्रमशः, निजास्पदं स्वस्थानम्, आससाद प्राप ।

अगण्यपुण्यमिति—अनघेन निर्दोषेण शीलेन सदाचारेण पूता पवित्रा, माता विजया, अगण्यं पुण्यं यस्य तमपरिमितसुकृतम्, वरेण्यं श्रेष्ठतमम्, तनयं पुत्रम्, उवाच जगाद, कृतेन विहितेन, रिपोः शत्रोः, निपातेन मृत्युना, वत्सरान्ते वर्षान्ते, किमु, ते तव, पितुर्जनकस्य, पदं स्थानं राज्यमिति यावत्, भवेत् स्यात् ॥ ५४ ॥

प्रसूगिरमिति—इमां पूर्वोक्ताम्, प्रसूगिरं जननीवाणीम् 'मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ' इत्यमरः, श्रुत्वा समाकर्ण्य, प्रसूतं समुत्पन्नं पृथुकौतुकं विशालकौतूहलं यस्य सः, असौ जीवन्धरः, तस्या मातुः, भावमाशयम्, विदन् जानन्, एवमित्थम्, उत्तरं प्रतिवचनम्, आदत्त जग्राह ॥५५॥

कुम्भीन्द्रेति—कुम्भीन्द्रा गजेन्द्रा एव शैलाः पर्वतास्तेभ्यो विगलन्त्यः पतन्त्यो या दानधारा मदसन्ततयस्ताभिः सन्निर्झराणि निर्झरयुक्तानि, चलखड्गैश्चञ्चलकृपाणैरेव चञ्चलखड्गविशेषैः समावृतानि

कूजद्रथाङ्गकलितानि शराञ्चितानि
सेनावनानि मम बाणदवा दहन्ति ॥ ५६ ॥

मदीयकरकुण्डली कृतशरासनादुद्गता
पृषत्कभुजगावली रिपुमहीशवामभ्रुवाम् ।
दरस्मितपयोझरीं सुरभिलां निपीय क्षणाद्
ददाति हृदयान्तरे पृथुलशोकहालाहलम् ॥ ५७ ॥

अथवा ।

रजोऽन्धकारप्रथिते रिपूणां वक्त्राब्जकोशीकरणप्रवीणे ।
संयन्निशीथे सति मे कृपाणी शत्रुश्रियं नेतुमुदारदूती ॥ ५८ ॥

गुणाकरे रणाजिरे मयि स्वनच्छरासने
पलायितो बलाधिपो निराकृतो धरापतिः ।
स गूर्जरोऽपि जर्जरो भयाकरश्च खेचरो
धृतव्रणश्च कोङ्कणः क्षणे क्षणे भविष्यति ॥ ५९ ॥

इत्यादितनयवचनेन हस्तस्थमिव राज्यं मन्यमानाया जनन्या रक्षणाय कञ्चन परिवारं तद्योग्यवस्तुसञ्चयं च तत्सन्निधाववस्थाप्य, कञ्चन कालं वीतशोकया भवत्यात्र स्थीयताम्,

---

परिवृतानि, कूजद्रथाङ्गैः शब्दायमानचक्रैरेव शब्दायमानचक्रवाकपक्षिभिः कलितानि सहितानि, शरैर्बाणैरेव तृणैरञ्चितानि सहितानि, सेना एव वनानि सेनावनानि पृतनाकाननानि, मम जीवकस्य, बाणदवाः शरदावानलाः, 'वने वनवह्नौ च दवौ दाव इहेष्यते' इत्यमरः । दहन्ति भस्मसात्कुर्वन्ति । श्लिष्टविशेषणो-त्थापितरूपकालङ्कारः । वसन्ततिलकावृत्तम् ॥५६॥

मदीयेति—मदीयकरेण मामकीनहस्तेन कुण्डलीकृतं वक्रीकृतं यच्छरासनं धनुस्तस्मादुद्गता निःसृता, पृषत्कभुजगावली बाणसर्पसन्ततिः, रिपुमहीशानां शत्रुपार्थिवानां वामभ्रुवो वनितास्तासाम्, सुरभिलां सुगन्धिम्, दरस्मितपयोझरीं मन्दहास्यदुग्धनिर्झरम्, क्षणादल्पेनैव कालेन, निपीय पीत्वा, हृदयान्तरे चित्तमध्ये, पृथुलशोकः प्रचुरखेद एव हालाहलविषम्, ददाति समर्पयति । रूपकालङ्कारः । पृथ्वीछन्दः ॥५७॥

अथवेति—अथवा पक्षान्तरे ।

रजोऽन्धकारप्रथित इति—रज एव सैन्यसमुत्थितधूलिरेवान्धकारस्तेन प्रथितं प्रसिद्धं तस्मिन्, रिपूणां शत्रूणाम्, वक्त्राब्जानां मुखकमलानां कोशीकरणे कुड्मलीकरणे प्रवीणं दक्षं तस्मिन्, संयदेव-निशीथं तस्मिन्युद्धरात्रौ, सति भवति, मे मम, कृपाणी खड्गवल्लरी, शत्रुश्रियं रिपुलक्ष्मीम्, नेतुं समाकृष्टुम्, उदारदूती श्रेष्ठसन्देशहरा, अस्तीति शेषः ॥५८॥

गुणाकर इति—गुणानां शौर्यादीनामाकरस्तस्मिन् गुणखनौ, रणाजिरे युद्धाङ्गणे, मयि त्वत्पुत्रे, स्वनत् शरासनं यस्य तथाभूते शब्दायमानकोदण्डे सति, बलाधिपः सेनापतिः, पलायितः प्रधावितः, धरापती राजा, निराकृतस्तिरस्कृतः, स प्रसिद्धः, गूर्जरोऽपि गूर्जरजनाधिपोऽपि जर्जरो जीर्णः, खेचरो विद्याधरः, भयाकरश्च भीतिखनिश्च, कोङ्कणश्च कोङ्कणजनपतिश्च, धृतव्रणो धृतेर्मः, क्षणे क्षणे प्रतिक्षणम्, भविष्यति । मम पुरस्तात् कः स्थातुं शक्नुयादिति भावः । पञ्चचामरं छन्दः 'जरौ जरौ ततो जगौ च पञ्चचामरं वदेत्' इति लक्षणात् ॥५९॥

इत्यादीति—इत्यादितनयवचनेन पूर्वोक्तप्रभृतिपुत्रगिरा, राज्यं साम्राज्यम्, हस्तस्थमिव स्वपाणि-स्थितमिव, मन्यमानाया जानानायाः, जनन्याः सवित्र्याः, रक्षणाय त्राणाय, कञ्चन कमपि, परिवारं परि-जनम्, तद्योग्यवस्तुसञ्चयञ्च तदर्हवस्तुसमूहञ्च, तत्सन्निधौ तत्समीपे, अवस्थाप्य स्थितं कृत्वा, कञ्चन कालं कमपि समयं यावद्, भवत्या, वीतशोकया निर्गतविषादया सत्या, अत्र दण्डकारण्यस्थतपोवने, स्थीयताम्

कतिपयैरेव दिवसैस्त्वामानेतुं नन्दाढ्यं प्रहेष्यामि, इति प्रसवित्रीमाश्वास्यापृच्छ्य च, वयस्य-मण्डलैः सह प्रस्थाय राजपूरोपवनमाजगाम ।

मित्राणि तत्र विनिवेश्य स वैश्यवेष-
माबाय राजनगरीं प्रविवेश धीरः ।
रथ्यासु तत्र विचरन्नवरत्नराशि-
सम्पूरितां प्रविततां विपणिं जगाहे ॥ ६० ॥

तत्र हर्म्याङ्गणे सखीभिः सह कन्दुकविहारमनुभवन्त्याः कस्याश्चिल्लोलाक्ष्या हेलावशेन भुवि पातितं कन्दुकमालक्ष्याश्चर्यविलसः कुरुहर्यक्षः प्रासादाग्रावलम्बिनीं नितम्बिनीमुन्नमितवदनो विलोकयामास ।

तां कोमलाङ्गीं कुतुकेन पश्यन्कुरङ्गनेत्रीं कुरुवंशकेतुः ।
उन्मीलदाभां नवयौवनेन पुन्नागसङ्काशकुचाममुह्यत् ॥ ६१ ॥

एवं तस्याः सौन्दर्यलहरीनिमग्नमानसः कन्दुकमालोक्यैवमुवाच ।

भाले क्रीडति नीलकुन्तलचये गण्डस्थले कुण्डले
वेण्यां पृष्ठतले स्तनद्वयमुखे हारे चकोरीदृशः ।
हस्ताब्जे मृदुले च कन्दुक भवांश्चिक्रीड वल्गन्मणी-
चञ्चत्कङ्कणशब्दशोभिनि निजस्पर्शारुणश्रीपुषि ॥६२॥

कृतनिवासया भूयताम्, कतिपयैरेव दिवसैः अल्पैरेव वासरैः, त्वां भवतीम्, आनेतुं स्वस्थानं प्रापयितुम्, नन्दाढ्यं निजानुजम्, प्रहेष्यामि प्रेषयिष्यामि, इत्येवम्, प्रसवित्रीं मातरम्, आश्वास्य सम्बोध्य, आपृच्छ्य च आमन्त्र्य च, वयस्यमण्डलैर्मित्रसमूहैः, सह सार्धम्, प्रस्थाय प्रस्थानं कृत्वा, राजपुरोपवनं राजपुरनगरोद्यानम्, आजगाम सम्प्राप ।

मित्राणीति—तत्रोपवने, मित्राणि सर्वान्, विनिवेश्य स्थापयित्वा, धीरो गम्भीरः, स जीवन्धरः, वैश्यवेषं वणिग्वेषम्, आदाय गृहीत्वा, राजनगरीं स्वपुरीम्, प्रविवेश प्रविष्टो बभूव, तत्र राजपुर्याम्, रथ्यासु प्रधानमार्गेषु, विचरन् विहरन्, नवरत्नराशिभिर्नवरत्नसमूहैः सम्पूरिता सम्भृता ताम्, प्रविततां विस्तृताम्, विपणिमापणम्, जगाहे प्रविवेश । वसन्ततिलकावृत्तम् ॥६०॥

तत्रेति—तत्र विपणौ, हर्म्याङ्गणे भवनाङ्गणे, सखीभिर्वयस्याभिः, सह सार्धम्, कन्दुकविहारं गेन्दुकक्रीडाम्, अनुभवन्त्याः कुर्वन्त्याः, कस्याश्चित्, लोलाक्ष्याश्चपललोचनायाः, हेलावशेन क्रीडावशेन, भुवि पृथिव्याम्, पातितं मोचितम्, कन्दुकं गेन्दुकम्, आलक्ष्य दृष्ट्वा, आश्चर्येण विस्मयेन, विलसो विभ्रान्तचित्तः, कुरुहर्यक्षः कुरुसिंहः, जीवन्धर इति यावत्, प्रासादाग्रावलम्बिनीं भवनाग्रभागस्थायिनीम्, नितम्बिनीं नारीम्, उन्नमितं वदनं यस्य तथाभूतः उन्मुखः सन्, विलोकयामास ददर्श ।

तां कोमलाङ्गीमिति—कुरुवंशकेतुः कौरववंशध्वजः जीवन्धरः, कोमलाङ्गीम् मृदुलशरीराम्, कुरङ्गनेत्रीम् हरिणाक्षीम्, नवयौवनेन नूतनतारुण्येन, उन्मीलन्ती प्रकटीभवन्ती आभा दीप्तिर्यस्यास्ताम्, पुन्नागसङ्काशौ पुन्नागसदृशौ कुचौ स्तनौ यस्यास्ताम्, तां नारीम्, कुतुकेन कौतूहलेन, पश्यन् विलोकयन् सन्, अमुह्यत् मुग्धो बभूव ॥ ६१ ॥

एवमिति—एवमनेन प्रकारेण, तस्या नितम्बिन्याः सौन्दर्यलहर्यां लावण्यसन्ततौ निमग्नं निलीनं मानसं चित्तं यस्य तथाभूतः, कुरुवतंसः कुरुवंशालङ्कारः, कन्दुकं गेन्दुकम्, आलोक्य दृष्ट्वा, एवं वक्ष्यमाणप्रकारेण, उवाच जगाद ।

भाले क्रीडतीति—चकोरीदृशो जीवंजीवलोचनायाः, भाले ललाटे, नीलकुन्तलचये श्यामलालककलापे, गण्डस्थले कपोलतले, कुण्डले कर्णाभरणे, पृष्ठतले पृष्ठभागे, वेण्यां कबर्याम्, स्तनद्वयमुखे वक्षोजयुगल-

---

१-२. कन्तुक—ब० ।

एषा बिम्बाधरी कन्तोः सन्ततं शरवर्षिणः ।
नामभाक्त्वमितीवाङ्ग कन्दुक त्वामताडयत् ॥६३॥

वदनकमलोन्मीलत्स्वेदाम्बुशीकरकोरका
सुरभिलगलच्छ्वासा नासाग्रचञ्चलमौक्तिका ।
स्फुरदुरुकुचा रामा वामालकाकुलितानना
सरसमतनोत्पाण्याघातं यतस्त्वयि तत्कृती ॥६४॥

एवं वदन्मुदा स्वामी तत्सौधाग्रवितर्दिकाम् ।
अलञ्चकार पुण्यश्रीकूलङ्कषगुणाकरः ॥६५॥

तदानीं कोऽपि वैश्येशः सम्मुखमागत्य सम्मदपूरविस्तारितनयनः प्रसन्नवदनः कुशलप्रश्नकोरकितवचनः क्रमेण निजप्रस्तावं वितस्तार ।

श्रीमन्सागरदत्त इत्यभिहितः सोऽहं ममेदं गृहं
पत्नी मे कमला सुता च विमला सूत्या किलैषाभवत् ।
विक्रीयेत यदागमे मणिगणः पूर्वस्थितोऽभ्यन्तरं
तं तस्याः पतिमभ्यधुर्जननसल्लग्ने हि कार्तान्तिकाः ॥६६॥

वदने, हारे मौक्तिकलतायाम्, क्रीडति सति, हे कन्दुक हे गेन्दुक, भवान्, मृदुले कोमले, वलान्मणिभिः शुम्भद्रत्नैश्चञ्चन् दंदीप्यमानो यः कङ्कणः करवलयस्तस्य शब्देन ध्वनिना शोभिनि शोभमाने, निजस्पर्शेन स्वामर्शेनारुणश्रियं रक्तलक्ष्मीं पुष्णातीति निजस्पर्शारुणश्रीपुट् तस्मिन्, मृदुले कोमले, हस्ताब्जे च पाणिपद्मे च, विक्रीड क्रीडाञ्चकार । शार्दूलविक्रीडितच्छन्दः ॥ ६२ ॥

एषेति—हे कन्दुक हे गेन्दुक, त्वम्, सन्ततं निरन्तरम्, शरवर्षिणो बाणवर्षिणः, कन्तोः कामस्य, नामभाक् नामधेययुक्तः, असीति शेषः, इतीव हेतोः, एषा बिम्बाधरी बिम्बोष्ठी, त्वां भवन्तम्, अताडयत् हस्तेनापीडयत् । उत्प्रेक्षा ॥ ६३ ॥

वदनकमलोन्मीलदिति—वदनकमले मुखारविन्दे उन्मीलन्तः प्रकटीभवन्तः स्वेदाम्बुशीकरा एव स्वेदसलिलपृषता एव कोरकाः कुड्मला यस्याः सा, सुरभिलः सुगन्धिर्गलन् निःसरन् श्वासो यस्याः सा, नासाग्रे घ्राणाग्रभागे चञ्चलं चपलं मौक्तिकं मुक्ताफलं यस्याः सा, स्फुरन्तौ शोभमानावुरुकुचौ पीनपयोजौ यस्याः सा, वामालकैः कुटिलकेशैराकुलितं समाकीर्णमाननं मुखं यस्याः सा, एवम्भूता रामा ललना, हे कन्दुक, यतः कारणात्, त्वयि भवति, सरसं स्नेहपुरस्सरम्, पाण्याघातं हस्तप्रहारम्, अतनोत् चकार, तत् तस्मात्कारणात्, त्वम् कृती सुकृतवान्, असीति शेषः । हरिणीच्छन्दः ॥ ६४ ॥

एवमिति—एवमनेन प्रकारेण, वदन् कथयन्, पुण्यश्रियाः सुकृतलक्ष्म्याः कूलङ्कषास्तटोद्घर्षिणो ये गुणाः सौन्दर्यादयस्तेषामाकरः खनिः, स्वामी जीवन्धरः, स चासौ सौधश्चेति तत्सौधस्तद्भवनं तस्याग्रवितर्दिकां पुरःस्थितवेदिकाम्, अलञ्चकार भूषयामास । तत्रोपविष्ट इति यावत् ॥६५॥

तदानीमिति—तदानीं तस्मिन् काले, कोऽपि कश्चन, वैश्येशो वणिग्वरः, सम्मुखं पुरस्तात्, आगत्य समेत्य, सम्मदपूरेण हर्षसमूहेन विस्तारिते नयने यस्य सः, प्रसन्नं प्रफुल्लं वदनं वक्त्रं यस्य सः, कुशलप्रश्नेन क्षेमानुयोगेन कोरकितं व्याप्तं वचनं यस्य तथाभूतः सन्, क्रमेण क्रमशः, निजप्रस्तावं स्वकार्यनिवेदनम्, वितस्तार वितताम ।

श्रीमन्निति—हे श्रीमन् हे लक्ष्मीमन्, सोऽहं भवत्पुरो वर्तमानः, सागरदत्त इत्यभिहितः सागरदत्तनाम्ना प्रसिद्धः, इदमेतत्, मम गृहं निकेतनम्, कमला एतन्नामवती, मे मम, पत्नी वल्लभा, विमला एतन्नामधेया च, सुता पुत्री, वर्तते इति शेषः, एषा किल विमला, सूत्या युवतिः, अभवत् अजायत । हि निश्चयेन, जननसल्लग्ने जन्मशुभवेलायाम्, कार्तान्तिका दैवज्ञाः, यदागमे यदागमने अभ्यन्तरं मध्ये, पूर्वस्थितः पूर्वविद्यमानः, मणिगणो रत्नसमूहः, विक्रीयेत विक्रीतो भवेत्, तं तस्या विमलायाः, पतिं वल्लभम्, अभ्यधुः कथयामासुः । शार्दूलविक्रीडितच्छन्दः ॥६६॥

इह खलु भवति प्रविष्टमात्रे पूर्वं कदाप्यविक्रीतं बहुलरत्नजालं विक्रीतम् । अतो भवतैव प्रपञ्चातिशायिगुणगुम्भितेन[1] पञ्चशरवञ्चनचञ्चुरूपेण काञ्चनसच्छायकान्तिकोमलेन मदीयनन्दिनीकन्दलितभाग्यकृतावतारेण तस्याः परिणययोग्येन भवितव्यम् । इति तन्निर्बन्धेन, कौरवः कथं कथंचिदनुमेने ।

शुभे मुहूर्ते विमलां कुमारीं जीवन्धरः सागरदत्तदत्ताम् ।
सौदामिनीसंनिभगात्रवल्लीं जग्राह पाणौ[2] सति हव्यवाहे ॥६७॥

मूर्तां चमत्कृतिमिव स्फुटदिव्यरूपां
आयामिवाम्बुजशरस्य चकोरनेत्रीम् ।
उन्मीलदुज्ज्वलघनस्तनशोभिताङ्गीं
रागादिमामनुबभूव कुरुप्रवीरः ॥६८॥

इति महाकविहरिचन्द्रविरचिते श्रीमति जीवन्धरचम्पूकाव्ये
विमलालम्भो नाम सप्तमो लम्भः ।

इह खल्विति—खलु निश्चयेन, इह भवने, भवति त्वयि, प्रविष्टमात्रे समागत एव, पूर्वं प्राक्, कदापि जात्वपि, अविक्रीतं न विक्रीतम्, बहुलरत्नजालं प्रभूतमणिमण्डलम्, विक्रीतं क्रेतृभिर्गृहीतम्, अतोऽस्मात्कारणात्, प्रपञ्चातिशायिभिर्विस्तारातिशायिभिर्गुणैर्गुम्भितो युक्तस्तेन, पञ्चशरस्य कामस्य वञ्चनचुञ्चु प्रतारणपटु रूपं सौन्दर्यं यस्य तेन, काञ्चनसच्छाया सुवर्णसदृशी या कान्तिर्दीप्तिस्तया कोमलेन मृदुलेन, मदीयनन्दिन्या मत्पुत्र्याः कन्दलितभाग्येन वृद्धिंगतपुण्यातिशयेन कृतो विहितोऽवतारः समागमो यस्य तेन, भवतैव त्वयैव, तस्या विमलायाः, परिणययोग्येन विवाहार्हेण, भवितव्यम्, इतीत्थम्, तन्निर्बन्धेन सागरदत्ताग्रहेण, कौरवो जीवन्धरः, कथञ्चित् केन केनापि प्रकारेण, अनुमेने स्वीकृतिं ददौ ।

शुभे मुहूर्त इति—जीवन्धरः स्वामी, शुभे मुहूर्ते मङ्गलमयवेलायाम्, हव्यवाहे वह्नौ, सति विद्यमाने, सौदामिनीसन्निभा विद्युत्सदृशी गात्रवल्ली शरीरलता यस्यास्ताम्, सागरदत्तेन तत्पित्रा दत्ता समर्पिता ताम्, विमलामेतदभिधानाम्, कुमारीं कन्याम्, पाणौ हस्ते, जग्राह गृह्णाति स्म । उद्बोधेति यावत् ॥६७॥

मूर्तामिति—मूर्तां सशरीराम्, चमत्कृतिमिव चमत्कारमिव, स्फुटं प्रकटं दिव्यरूपमलौकिकसौन्दर्यं यस्यास्ताम्, अम्बुजशरस्य कन्दर्पस्य, जायामिव प्रियामिव, चकोरनेत्रीं जीवंजीवलोचनाम्, उन्मीलद्भ्यामुत्तिष्ठद्भ्यामुज्ज्वलाभ्यां निर्मलाभ्यां घनस्तनाभ्यां कठोरकुचाभ्याम् शोभितं समलङ्कृतमङ्गं शरीरं यस्यास्ताम्, इमां विमलाम्, कुरुप्रवीरो जीवन्धरः, रागान्मदनोद्रेकात्, अनुबभूव समन्वभूत् । वसन्ततिलकावृत्तम् ॥६८॥

इति महाकविहरिचन्द्रविरचिते श्रीमति 'कौमुदी' जीवन्धरचम्पूव्याख्याधरे
विमलालम्भो नामाष्टमो लम्भः

---

१. गुम्फितेन ब० । २ पाणावुपहव्यवाहम् ब० ।

नवमो लम्भः

ततो लताङ्गीमनुनीय रामां हित्वा स मित्रैः समगच्छताय्यम् ।
शशीव पाकारिदिशावधूटीं नक्षत्रवृन्दैः कमनीयरूपः ॥१॥
वरचिह्नमेनमवलोक्य बान्धवा मणिभूषणाञ्चिततनुं कुरूद्वहम् ।
बहुमेनिरे मधुमिवाङ्कुरस्फुरस्फुटचूतपल्लवकुलं वनप्रियाः ॥२॥
तत्र कोऽपि सहसाब्रवीदिदं बुद्धिषेणविदितो विदूषकः ।
सप्रहासमतिविस्तृतेक्षणं फुल्लगण्डयुगलं कुरूद्वहम् ॥३॥

अन्यैरुपेक्षितां कन्यां पाणीकृत्य प्रमोदतः ।
सखे निर्लज्जयात्मानं कृतार्थमिव मन्यसे ॥४॥
भवाञ्श्लाघ्यस्तदामित्र व्यूढा चेत्सुरमञ्जरी ।
नरविद्वेषगम्भीरी नवतारुण्यमञ्जरी ॥५॥

इति तद्वचनभङ्गीं निशम्य मन्दस्मितकोरकितवदनः कुरुपुङ्गवदनः, [1]श्व एव तामत्रत्यकाम-

---

ततो लताङ्गीमिति—ततस्तदनन्तरम्, कमनीयं मनोहरं रूपं सौन्दर्यं यस्य तथाभूतः, सोऽयं जीवन्धरः, पाकारिदिशावधूटीं प्राचीप्रियाम्, हित्वा त्यक्त्वा, नक्षत्रवृन्दैरुडुसमूहैः, शशीव चन्द्र इव, लताङ्गीं कृशाङ्गीम्, रामां विमलाभिधानां प्रियाम्, अनुनीय प्रेम्णा सन्तोष्य, हित्वा त्यक्त्वा, मित्रैर्वयस्यैः, समगच्छत संगतो बभूव ॥ १ ॥

वरचिह्नमिति—बान्धवाः सखायः, वरचिह्नं वरचिह्नोपेतम्, मणिभूषणै रत्नालंकारैरञ्चिता शोभिता तनुः शरीरं यस्य तम्, कुरूद्वहं जीवन्धरम्, अवलोक्य दृष्ट्वा, अङ्कुरेषु नवप्ररोहेषु स्फुरं यथा स्यात्तथा स्फुटाः प्रकटा ये चूतपल्लवा आम्रकिसलयास्तैः कुलं व्याप्तम्, मधुं वसन्तम्, वनप्रिया इव कोकिला इव, बहुमेनिरे श्रेष्ठं मन्यन्ते स्म । मञ्जुभाषिणीवृत्तम् ॥ २ ॥

तत्रेति—तत्र मित्रेषु, बुद्धिषेण इति विदितो बुद्धिषेणविदितो बुद्धिषेणनामा, कोऽपि कश्चिदपि, विदूषकः प्रहसनशीलः, सप्रहासं सव्यङ्ग्यम्, अतिविस्तृते दीर्घतरे ईक्षणे यस्मिन् कर्मणि यथा स्यात्तथा, फुल्लं हर्षेण विकसितं गण्डयुगलं कपोलयुग्मं यस्य तम्, कुरूद्वहं जीवकम्, इदं वक्ष्यमाणम्, सहसा झटिति, अब्रवीज्जगाद । छन्दः पूर्ववत् ॥ ३ ॥

अन्यैरिति—हे सखे हे मित्र, अन्यैरितरैः, उपेक्षितामनङ्गीकृताम्, कन्यां पतिंवराम्, प्रमोदतो हर्षेण, पाणीकृत्य स्वीकृत्य निर्लज्जं निस्त्रपम्, आत्मानं स्वम्, कृतार्थमिव कृतकृत्यमिव, मन्यसे वेत्सि ॥४॥

भवानिति—नरविद्वेषेण मनुष्यमात्रद्वेषेण गम्भीरी प्रगल्भा, नवतारुण्यमञ्जरी प्रत्यग्रयौवनमञ्जरी, सुरमञ्जरी एतदभिधाना वणिक्पुत्री, व्यूढा परिणीता, चेदपि, तदा तर्हि, भवान् त्वम्, श्लाघ्यः प्रशंसार्हः, भवेदिति शेषः ॥ ५ ॥

इति तद्वचनभङ्गीमिति—इति पूर्वोक्ताम्, तस्य बुद्धिषेणस्य वचनभङ्गीं वाणीपरम्पराम्, निशम्य श्रुत्वा, मन्दस्मितेन मन्दहास्येन कोरकितं कुड्मलितं वदनं वक्त्रं यस्य सः, *कुरुपुङ्गवदनः कुरुवंशसिंहः*, जीवन्धर इति यावत्, श्व एव भविष्यति दिवस एव, तां सुरमञ्जरीम्, अत्र भवोऽत्रत्यः स चासौ कामकोष्ठ-

---

[1] त्वया या प्रतिपादिता व० ।

कोष्ठमानेष्यामीति प्रतिज्ञाय, प्रज्ञाग्रेसरस्तत्परिणयोपायं मनसा चिन्तयन्, क्रमेण यक्षमन्त्रमेव तत्समर्थापनतन्त्रं निश्चिकाय।

निर्याय तस्मादारामान्मर्यादातीतकौशलः।
वार्धकं रूपमास्थाय विवेश पुरि कौरवः ॥६॥

विरलदशनपङ्क्तिः कम्पमानाङ्गयष्टिः
प्रतिकलनिमिषेणास्पष्टदृष्टिः स वृद्धः।
गलविकसितकासः श्लेष्मखण्डं वमन्सन्
पलितविरलकेशो दण्डचारी चचार ॥७॥

तत्र रथ्यासु प्रविशन्तम्, भुजगनिर्मुक्तनिर्मोकनिकाशचर्मविचित्रम्, पुरो हस्तावलम्बितदण्डेन पश्चादतिकुब्जतनुदण्डेन समौर्वीकं कार्मुकं तुलयन्तम्, शुक्तिकाभस्मधवलपलितकेशपाशेन तिरोवेपथुकलितेन मस्तकेन पूर्वतनरूपस्मरणाधुनातनरूपनिरीक्षणजनिताद्भुतवशेन मनुमाहात्म्यं शिरसा श्लाघमानमिव विराजमानम्, गलरन्ध्रनिरुद्धश्लेष्मखण्डान्यतिप्रयत्नेन कुहकुहारावेण सहानवरतमुद्वमन्तम्, स्थाविरं रूपमादधानमपि शनैः शनैर्गच्छन्तम्, सुरमञ्जरीप्राप्तिदूतीभूतायां जरायामभीकमपि जराभीकम्, इमं स्थविरमवलोक्य, पौरेषु केचिद्वैराग्यपरायणाः, इतरे विलसत्करुणाः, सम्बभूवुः।

ष्येति तम्, आनेष्यामि प्रापयिष्यामि, इतीत्थम्, प्रतिज्ञाय प्रतिज्ञां कृत्वा, प्रज्ञाग्रेसरो विद्वच्छ्रेष्ठः, तस्याः सुरमञ्जर्याः, परिणयस्य विवाहस्योपायः साधनं तम्, मनसा चेतसा, चिन्तयन् विचारयन्, क्रमेण क्रमशः, यक्षमन्त्रमेव सुदर्शनप्रदत्तमन्त्रमेव, तत्समर्थापने तत्प्रापणे तन्त्रं साधनभूतम्, निश्चिकाय निरणैषीत् 'विभाषा चेः' इति कुत्वम्।

निर्यायेति—मर्यादां सीमानमतीतं मर्यादातीतं तथाभूतं कौशलं चातुर्यं यस्य सः, कौरवो जीवन्धरः, तस्मात्पूर्वोक्तात्, आरामादुपवनात्, निर्याय निर्गत्य, वार्धकं वृद्धसम्बन्धि, रूपं वेषम्, आस्थाय धृत्वा, पुरि नगरे, विवेश प्रविष्टः ॥ ६ ॥

विरलदशनपङ्क्तिरिति—विरला सान्तरा दशनपङ्क्तिर्दन्तपङ्क्तिर्यस्य सः, कम्पमाना वेपमानाङ्गयष्टिः शरीरलता यस्य सः, प्रतिकलनिमिषेण प्रतिक्षणपक्ष्मपातेन, अस्पष्टानुद्घाटितप्राया दृष्टिर्यस्य सः, गलात्कण्ठाद्विकसितः प्रकटितः कासो 'खांसी' इति प्रसिद्धो यस्य सः, श्लेष्मखण्डं कफशकलम्, वमन् प्रकटयन्, पलिताः शुक्ला विरलाश्च सान्तराश्च केशाः कचा यस्य तथाभूतः स कृत्रिमः, वृद्धः स्थविरः, दण्डेन चरतीत्येवं शीलो दण्डचारी यष्टिचारी सन्, चचार चलति स्म। मालिनीच्छन्दः ॥ ७ ॥

तत्र रथ्यास्विति—तत्र नगरे, रथ्यासु मार्गेषु, प्रविशन्तं प्रवेशं कुर्वन्तम्, भुजगेन सर्पेण निर्मुक्तस्त्यक्तो यो निर्मोकः कञ्चुकस्तेन निकाशं सदृशं यच्चर्म त्वक् तेन विचित्रितं विचित्रां दशां प्राप्तम्, पुरोऽग्रे, हस्तेन पाणिनावलम्बितो धृतो दण्डो येन, पश्चात्पृष्ठभागे, अतिकुब्जः कुटिलीभूतो यस्तनुदण्डः शरीरदण्डस्तेन, समौर्वीकं सप्रत्यञ्चम्, कार्मुकं धनुः, तुलयन्तं सदृशीकुर्वन्तम्, शुक्तिकाभस्मेव मुक्तास्फोटभूतिरिव धवलो वलक्षः पलितकेशपाशो जराशुक्लकचसमूहो यस्मिंस्तेन, तिरोवेपथुना तिर्यक्कम्पनेन, कलितं सहितं तेन, मस्तकेन शिरसा, पूर्वतनरूपस्य वार्धक्यपूर्वकालोत्पन्नसौन्दर्यस्य स्मरणं ध्यानम्, अधुनातनरूपस्य वर्तमानकालिकसौन्दर्यस्य निरीक्षणं समवलोकनञ्च ताभ्यां जनितं समुत्पन्नं यदद्भुतमाश्चर्यं तस्य वशेन निघ्नतया, मनुमाहात्म्यं देवप्रदत्तरूपपरिवर्तनमन्त्रप्रभावम्, शिरसा मूर्ध्ना, श्लाघमानमिव प्रशंसन्तमिव, विराजमानं शोभमानम्, गलरन्ध्रे कण्ठविवरे निरुद्धानि प्रतिहतगतीनि यानि श्लेष्मखण्डानि कफशकलानि तानि, अतिप्रयत्नेन भूरिप्रयासेन, कुहकुहारावेण कासजन्याव्यक्तशब्दविशेषेण, सह साकम्, अनवरतं निरन्तरम्, उद्वमन्तं प्रकटयन्तम्, स्थाविरं स्थविरस्येदं स्थाविरं वृद्धसम्बन्धि, रूपं वेषम्, आदधानमपि धारयन्तमपि, शनैः शनैर्मन्दं मन्दम्, गच्छन्तं व्रजन्तम्, सुरमञ्जर्या एतन्नामवल्लभायाः प्राप्तौ दूतीभूतायां चेटीरूपायाम्, जरायां वृद्धावस्थायाम्, अभीकमपि निर्भयमपि पक्षे कामुकमपि, जराभीरुं वार्धक्यभययुक्तम्, इममेतम्, स्थविरं

क्रमेण सोऽयं कपटद्विजातिवृद्धो गृहद्वारभुवं प्रपेदे ।
यस्यान्तराले सुरमञ्जरी सा चकास्ति चञ्चन्मणिदीपिकेव ॥८॥

तत्र दौवारिकाभिः किमत्रागमनफलमिति पृष्टः कुमारीतीर्थमागमनफलमिति प्रत्युत्तरेणाट्टहासमेदुरवदनान्प्रातिहारिकाजनान् विदधानः कृपया ताभिरनिरुद्धोऽपि कामदेवस्तन्मन्दिरान्तरमगाहिष्ट ।

अन्तः कासाञ्चन स्त्रीणां मा मेति प्रतिषेधनम् ।
अशृण्वन्निव बाधिर्यादाविवेश शनैः शनैः ॥९॥

तदनु भयाकुलाः काश्चन कमललोचनाः झणझणात्कारिनूपुररवमुखरितदिगन्तराः सत्वरगमनवशेन वल्गत्कुचकलशसन्ताड्यमानव्यालोलमुक्ताहाररुचिवीचिप्रकाशितसदनभागाः परिचलितकचनिचयरुचिरसुममालिकानिषण्णोड्डीनमिलिन्दमञ्जुझङ्कारवाचालाः कूजत्काञ्चीकलापाः सुरमञ्जरीसमक्षमेत्य सगद्गदमेवमवादिषुः ।

वृद्धद्विजः कश्चिदपूर्वदृष्टो रुद्धोऽपि गेहान्तरमाविवेश ।
इतीयमालीवचनं निशम्य तं द्रष्टुमागात्कुतुकेन मुग्धा ॥१०॥

वृद्धम्, अवलोक्य दृष्ट्वा, पौरेषु नागरिकेषु, केचित् केऽपि, वैराग्यपरायणा विरक्तितत्पराः, इतरेऽन्ये, विलसन्ती शोभमाना करुणा दया येषां तथाभूताः सन्तः, मन्थमुद्बुरजायन्त ।

क्रमेण सोऽयमिति—सोऽयं पूर्वोक्तः, कपटेन व्याजेन द्विजेषु विप्रेषु अतिवृद्धः स्थविरतरः, वृद्धब्राह्मणवेषधारी जीवन्धर इति यावत्, क्रमेण क्रमशः, गृहद्वारभुवं भवनप्रवेशमार्गभूमिम्, प्रपेदे प्राप, यस्य गृहस्य, अन्तराले मध्ये, सा महनीयकान्तिमण्डिता, सुरमञ्जरी काम्यमाना प्रियतमा, चञ्चन्मणिदीपिकेव देदीप्यमानमणिदीपिका यथा, चकास्ति शोभते ॥८॥

तत्र दौवारिकाभिरिति—तत्र सुरमञ्जरीभवने, द्वारे भवा दौवारिका द्वारपालिन्यस्ताभिः, अत्र भवनाभ्यन्तरे, आगमनफलमागतिप्रयोजनम्, किम् किमात्मकम्, इत्येवं प्रकारेण, पृष्टोऽनुयुक्तः, कुमारीतीर्थं तीर्थक्षेत्रविशेषः, पक्षे कुमारी सुरमञ्जर्येव तीर्थमिति कुमारीतीर्थम्, आगमनफलमागतिप्रयोजनम्, ममास्तीति शेषः, इति प्रत्युत्तरेण प्रतिवचनेन, अट्टहासेन सशब्दहसितेन मेदुरं मिलितं वदनं मुखं येषां तथाभूतान्, प्रातिहारिकाजनान् द्वारपालिकालोकान्, विदधानः कुर्वाणः, कृपया दयया, ताभिर्दौवारिकाभिः, अनिरुद्धोऽपि अनिवारितप्रवेशोऽपि, कामदेवो जीवन्धरः पक्षेऽनिरुद्धोऽपि अनिरुद्धपुत्ररहितोऽपि, कामदेवः प्रद्युम्नः इति विरोधः परिहारस्तूक्तः, तन्मन्दिरान्तरं तद्भवनमध्यम्, अगाहिष्ट प्रविवेश ।

अन्तरमिति—अन्तर्मध्ये, कासाञ्चन कासामपि, स्त्रीणां नारीणाम्, मा मा अत्र प्रवेशं मा कुरु, इति, प्रतिषेधनं निषेधाक्षरम्, बाधिर्यात् श्रवणशक्तिरहितत्वात्, अशृण्वन्निवानाकर्णयन्निव, शनैः शनैर्मन्दं मन्दम्, आविवेश प्रविष्टोऽभूत् ॥९॥

तदन्विति—तदनु तदनन्तरम्, भयेन त्रासेनाकुला व्यग्राः, काश्चन का अपि, कमललोचनाः पद्माक्ष्यः, झणझणात्कारिणां झणझणशब्दकारिणां नूपुराणां मञ्जीरकाणां रवेण शब्देन, मुखरितं वाचालितं दिगन्तरं काष्ठान्तरालं याभिस्ताः, सत्वरगमनवशेन शीघ्रगतिनिघ्नतया, वल्गद्भ्यां चलद्भ्यां कुचकलशाभ्यां स्तनघटाभ्यां सन्ताड्यमानाः पीड्यमाना ये व्यालोलाश्चञ्चला मुक्ताहारा मौक्तिकदामानि तेषां रुचिवीचिभिः कान्तिपरम्पराभिः प्रकाशिताः शोभिताः सदनभागा भवनप्रदेशा याभिस्ताः, परिचलितेषु कम्पितेषु कचनिचयेषु केशसमूहेषु रुचिरा मनोहरा या सुममालिकाः पुष्पस्रजस्तासु पूर्वं निषण्णाः स्थिताः पश्चादुड्डीना उत्पतिता ये मिलिन्दा भ्रमरास्तेषां मञ्जुझङ्कारेण मनोहरझङ्कारेण वाचालाः कृतशब्दाः, कूजन्तोऽव्यक्तशब्दं कुर्वन्तः काञ्चीकलापा मेखलासमूहा यासां तास्तथाभूताः सत्यः, सुरमञ्जरीसमक्षं सुरमञ्जर्याः समक्षं पुरस्तात्, एत्य मत्वा, सगद्गदं गद्गदस्वरसहितं यथा स्यात्तथा, एवं वक्ष्यमाणप्रकारेण, अवादिषुर्निवेदितवत्यः ।

वृद्धद्विज इति—पूर्वं न दृष्ट इत्यपूर्वदृष्टोऽनवलोकितपूर्वः, कश्चित्कोऽपि वृद्धद्विजः स्थविरविप्रः,

द्विजातिवृद्धं पुरतो निषण्णं बुभुक्षितं वीक्ष्य सरोरुहाक्षी ।
समादिदेशाथ सखीसमाजं तद्भोजनाय प्रचुरादरेण ॥११॥

तदनु यथाविधि सहर्षं भुक्तवन्तं सखीजनैरन्तिकमानीतं तमेनमग्रासनमधिरोप्य, 'कुतो भवानागतः पुनः कुत्र गमिष्यसि' इति, सा सुरमञ्जरी मञ्जुलवचनचातुरीविजितपिकस्वरमाधुरी सकौतुकं पप्रच्छ ।

इति गिरं समवेत्य कथञ्चन स्थविर एवमुवाच शनैः शनैः ।
सुरुचिराधरि पृष्ठत आगतः पुरत एव गमिष्यति मानिनि ॥१२॥

इति वचनं निशम्य, विशालतरहासविशदवदनान् पार्श्ववर्तिजनानवलोक्य, द्विजातिवृद्धः 'किमिति मामकीनवार्धक्यजनितविपरीततां हसन्ति भवत्यः, क्रमेण भवतीनामप्येषा भविष्यति' इत्यवादीत् ।

पुनः पप्रच्छ मोदेन क्व गन्तव्यं त्वयेति सा ।
यत्र कन्यापरिप्राप्तिस्तत्रेत्ययमभाषत ॥१३॥
वयसा वपुषा च वृद्ध एषो मनसा नेति गिरापि मेदुरा ।
स्वयमभ्यवहृत्य सा कुमारी पुनरागत्य बभाण सादरम् ॥१४॥

रुद्धोऽपि वारितगमनोऽपि, गेहान्तरं भवनमध्यम्, आविवेश प्रविष्टः, इति एवं प्रकारम्, आलीवचनं सखीवचः, निशम्य श्रुत्वा, कुतुकेन कुतूहलेन, नुन्ना प्रेरिता, इयं सुरमञ्जरी, तं वृद्धद्विजम्, द्रष्टुमवलोकयितुम्, आगाद् आजगाम ॥१०॥

द्विजातिवृद्धमिति—अथागमनानन्तरम्, पुरतोऽग्रे, निषण्णं समासीनम्, बुभुक्षा सञ्जाता यस्य तं क्षुधायुक्तम्, द्विजातिवृद्धं विप्रस्थविरतरम्, वीक्ष्य दृष्ट्वा, सरोरुहाक्षी कमलनयना, सुरमञ्जरी, प्रचुरादरेण महाविनयेन, तद्भोजनाय तं भोजयितुम्, सखीसमाजं वयस्यावृन्दम्, समादिदेश समाज्ञातवती ॥११॥

तदनु यथाविधीति—तदनु तदनन्तरम्, यथाविधि विध्यनुसारेण, सहर्षं सानन्दम्, भुक्तवन्तं कृतभोजनम्, सखीजनैः सहचरीसमूहैः, अन्तिकं निकटम्, आनीतं प्रापितम्, एनं तं पूर्वोक्तवृद्धम्, अग्रासनं श्रेष्ठासनम्, अधिरोप्याधिष्ठाप्य, भवान्, कुतः कस्मात्स्थानात्, आगतः समायातः, पुनर्भूयः, कुत्र कस्मिन् स्थाने, गमिष्यसि व्रजिष्यसि, इत्येवं प्रकारेण, मञ्जुलवचनचातुर्या मनोहरवचोवैदग्ध्या जिता पराभूता पिकस्वरमाधुरी कोकिलालापमधुरिमा यया तथाभूता, सुरमञ्जरी, सकौतुकं कुतूहलसहितं यथा स्यात्तथा, पप्रच्छ पृच्छति स्म ।

इति गिरमिति—स्थविरो वृद्धरूपधरो जीवन्धरः, इति पूर्वोक्तप्रकाराम्, गिरं सुरमञ्जरीभारतीम्, कथञ्चन केनापि प्रकारेण, समवेत्य निश्चित्य, शनैः शनैर्मन्दं मन्दम्, एवं वक्ष्यमाणप्रकारेण, उवाच जगाद । हे सुरुचिराधरि ! हे शोभनदशनच्छदे ! हे मानिनि हे मानवति, एष जनः, पृष्ठतः पश्चात्प्रदेशात्, आगतः सम्प्राप्तः, पुरतोऽग्रे च गमिष्यति व्रजिष्यति ॥१२॥

इति वचनमिति—इति पूर्वोक्तं, वचनं वाणीम्, निशम्य समाकर्ण्य, विशालतरहासेन सुविस्तृतहसितेन विशदानि धवलानि वदनानि वक्त्राणि येषां तथाभूतान्, पार्श्ववर्तिजनान् निकटस्थजनान्, अवलोक्य दृष्ट्वा, द्विजातिवृद्धो विप्रातिस्थविरः, 'भवत्यो यूयम्, मामकीनेन मदीयेन वार्धक्येन स्थविरत्वेन जनिता समुत्पन्ना या विपरीतता विपर्यस्तबुद्धिता ताम्, इतीत्थम्, किं केन कारणेन, हसन्ति हसथ', क्रमेण क्रमशः, भवतीनामपि युष्माकमपि, एषा विपरीतता, भविष्यति, इत्येवम्, अवादीत् जगाद ।

पुनः पप्रच्छेति—सा सुरमञ्जरी, त्वया भवता, क्व कुत्र, गन्तव्यं यातव्यम्, इतीत्थम्, मोदेन हर्षेण, पुनर्भूयः, पप्रच्छ अनुयुयुजे स्म, अयं वृद्धः, यत्र यस्मिन् स्थाने, कन्यापरिप्राप्तिः कन्यकालाभः, भवेदिति शेषः, तत्र तस्मिन् स्थाने, गन्तव्यम्, इतीत्थम्, अभाषत जगाद ॥१३॥

वयसा वपुषेति—एष जनः, वयसा दशया, वपुषा च शरीरेण च, वृद्धो जीर्णः, अस्ति, मनसा

इदानीं भवतो यत्र वाञ्छावल्लयधिरोहति ।
तत्राशु गम्यतां भद्र द्विजवर्य महामते ॥१५॥

इति तस्या मन्दस्मितचन्द्रिकामेदुरवदनचन्द्रिरसुधासारायमाणवचोधारां 'साधु-साधु सुष्ठूक्तम्' इति प्रशंसमानः, करेण यष्टिमालम्ब्य कृच्छ्रादुत्थाय प्रस्खलन्, तदीयविकचविचकिलकुसुमकुलसुरभिलहंसतूलशयनाधिरोहाय प्रयतमानः, तत्र हस्तावलम्बनवशेन तन्निवारणपरं चेटीनिकरं निवारयन्त्या सुरमञ्जर्या सहर्षमनुमतः, स द्विजवृद्धः क्रमेण सुष्वाप ।

वृद्धं तं तरुणीविलासरसिकं वीक्ष्येव भासां पति-
र्वृद्धः सन्चरमक्ष्माधरगुहाकेलीगृहं प्राविशत् ।
वारुण्याः किलसंगमाय रसिकः स्फाराङ्गरागाञ्चितः
कन्दर्पोऽपि शरासनं करतले चक्रे पृषत्कैः सह ॥ १६ ॥

तदनु सकलजनतादृष्टिरोधकरे तिमिरनिकरे विजृम्भिते, तमालन्ति सकलतरवः, पिकजालन्ति विहंगमाः, नीलाचलन्ति भूमिधराः, भल्लूकन्ति निखिलवनमृगाः, कालिन्दीमनुकुर्वन्ति निम्नगाः, इति लोकस्य विभ्रमो बभूव ।

चेतसा, न, इति गिरापि वाण्यापि, मेदुरा मिलिता, तथा निवेदयन्तीति यावत्, सा कुमारी सुरमञ्जरी, स्वयम्, अभ्यवहृत्य भोजनं कृत्वा, पुनर्भूयः, आगत्य समेत्य, सादरं ससम्मानं यथा स्यात्तथा, बभाण जगाद ॥१४॥

इदानीमिति—इदानीमधुना, भवतः श्रीमतः, वाञ्छावल्ली इच्छालता, यत्र यस्मिन् स्थाने, अधिरोहति समधिरूढा भवति, हे महामते हे महाप्राज्ञ, द्विजवर्य विप्रप्रधान, भद्र साधो, तत्र तस्मिन् स्थाने, आशु शीघ्रम्, गम्यताम् व्रज्यताम्, भवतेति शेषः ॥१५॥

इति तस्या इति—तस्याः सुरमञ्जर्याः, इति पूर्वोक्तप्रकाराम्, मन्दस्मितं मन्दहसितमेव चन्द्रिका ज्योत्स्ना तया मेदुरो मिलितो यो वदनचन्द्रिरो मुखचन्द्रमास्तस्य सुधासारायमाणा पीयूषसारवदाचरन्ती या वचोधारा वाणीसन्ततिस्ताम्, साधु साधु श्रेष्ठं श्रेष्ठम्, सुष्ठूक्तं शोभनं गदितम्, इतीत्थं प्रशंसमानः श्लाघमानः, करेण हस्तेन, यष्टिं लगुडिकाम्, आलम्ब्य समाश्रित्य, कृच्छ्राद् दुःखात्, उत्थाय समुत्थितो भूत्वा, प्रस्खलन् प्रपतन्, हंसतूलस्य शयनं हंसतूलशयनं, विकचानि प्रस्फुटानि यानि विचकिलकुसुमकुलानि मृदुलदलपुष्पविशेषनिकुरम्बाणि तैः सुरभिलं सुगन्धि, तदीयं सुरमञ्जरीसम्बन्धि विकचविचकिलकुसुमकुलसुरभिलं यद् हंसतूलशयनं तस्मिन्नधिरोहस्तस्मै, प्रयतमानः प्रयत्नं कुर्वाणः, तत्र तस्मिन् कार्ये, हस्तावलम्बनवशेन हस्ताश्रयनिमित्तेन, तन्निवारणपरं तत्प्रतिषेधतत्परम्, चेटीनिकरं दासीसमूहम्, निवारयन्त्या निषेधयन्त्या, सुरमञ्जर्या, सहर्षं सप्रमोदम्, अनुमतः प्राप्ताज्ञः, स पूर्वोक्तः, द्विजवरो विप्रोत्तमः, जीवन्धर इति यावत्, क्रमेण क्रमशः, सुष्वाप शिश्ये ।

वृद्धं तं तरुणीति—तं पूर्वोक्तम्, वृद्धं स्थविरम्, तरुणीविलासे युवतिसम्भोगे रसिकं सस्नेहम्, वीक्ष्येव समवलोक्येव, वृद्धः परिणतः, भासां पतिः सूर्यः, वारुण्याः पश्चिमदिगङ्गनायाः, संगमाय समुपभोगाय, रसिको रसयुक्तः, स्फारेण महताङ्गरागेण विलेपनेनाञ्चितः शोभितः सन्, चरमक्ष्माधरस्यास्ताचलस्य गुहैव दर्येव केलीगृहं क्रीडाभवनम्, प्राविशत् प्रविवेश, किलेति सम्भावनायाम्, कन्दर्पोऽपि कामोऽपि, पृषत्कैर्बाणैः, सह साकम्, शरासनं धनुः, करतले हस्ततले, चक्रे कृतवान्, धरति स्मेति यावत् ॥१६॥

तदन्विति—तदनु तदनन्तरम्, सकलजनताया निखिलजनसमूहस्य दृष्टिरोधकरे दृगवरोधविधायके, तिमिरनिकरे ध्वान्तसमूहे, विजृम्भिते वृद्धिङ्गते सति, सकलतरवो निखिलवृक्षाः तमालन्ति तापिच्छवृक्षा इवाचरन्ति, विहंगमाः शकुनयः पिकजालन्ति कोकिलकलापा इवाचरन्ति, भूमिधराः पर्वताः, नीलाचलन्ति अञ्जनगिरय इवाचरन्ति, निखिलवनमृगा अखिलविपिनजन्तवः, भल्लूकन्ति ऋक्षा इवाचरन्ति, निम्नगाः सरितः, कालिन्दीं यमुनाम्, अनुकुर्वन्ति विडम्बयन्ति, इतीत्थम्, लोकस्य जनस्य, विभ्रमः सन्देहः, बभूव ।

ततः पूर्वाचलप्रान्ते बभौ कुमुदबान्धवः ।
ध्वान्तसिन्धुरसंक्षोभमृगेन्द्रः कुन्दनिर्मलः ॥ १७ ॥

ततो वृद्धः सोऽयं भुवनमहितां गानपदवी-
मतानीत्सानन्दं मधुररसनिष्यन्दभरिताम् ।
[1]खगेशः कन्यायाः परिणयकलाकालकलितां
निशम्यायं जीवन्धर इति शशङ्के सुनयना ॥ १८ ॥

तदनु सा सुरमञ्जरी सहर्षमुत्थाय, अकूजत्काञ्चीकलापमगुञ्जन्मञ्जीरमचलितकरवलयं सखीजनान्पुरोधाय मन्दं मन्दं [2]तदीयशयनोपकण्ठमासाद्य, प्रवयसः पुरतो वयस्याजनं विधाय, स्वयमपि पश्चाद्भागमलङ्कुर्वन्ती, मालतीलतानां पृष्ठतो रत्नवल्लीव विराजमाना, चकोरनयना भुवनमोहनं गानं शुश्राव ।

तावत्समाप्य चतुरः कलगानलीलां
द्राक्सामगीतमुदयुङ्क्त स मञ्जु गातुम् ।
श्रुत्वा कुरङ्गनयनाः कुतुकेन पूर्वं
गीतं पठेति परितः परिवव्रुरेनम् ॥ १९ ॥

कुमारीं मम तोषाय भवत्यः कल्पयन्ति चेत् ।
गायते मधुरं गानमिति वाचमुवाच सः ॥ २० ॥

ततः पूर्वाचलप्रान्त इति—ततस्तदनन्तरम्, पूर्वाचलप्रान्ते पूर्वगिरिसमीपे, ध्वान्तं तिमिरमेव सिन्धुरो गजस्तस्य संक्षोभाय त्रासाय मृगेन्द्रः सिंहः, कुन्दनिर्मलो माध्यकुसुमावदातः, कुमुदबान्धवो रजनीकरः, बभौ शुशुभे ॥१७॥

ततो वृद्ध इति—ततस्तदनन्तरम्, सोऽयं पूर्वोक्तः, वृद्धः स्थविरः, खगानामीट् खगेट् तस्य खगेशो विद्याधरेन्द्रस्य गरुडवेगस्य, कन्यायाः पतिंवराया गन्धर्वदत्ताया इति यावत्, परिणयकलाया विवाहोत्सवस्य काले समये कलितां कृताम्, भुवनमहितां लोकप्रशंसिताम्, मधुररसस्य निष्यन्देन द्रवेण भरितां पूर्णाम्, गानपदवीं संगीतपद्धतिम्, सानन्दं सप्रमोदं यथा स्यात्तथा, अतानीत् विस्तारयामास, तां गानपदवीम् निशम्य समाकर्ण्य, अयमेष वृद्धः, जीवन्धरो गन्धोत्कटसूनुः, अस्तीति, सुनयना सुदृष्टिः सुरमञ्जरी, शशङ्के शङ्कितवती । शिखरिणीच्छन्दः ॥१८॥

तदनु सा सुरमञ्जरीति—तदनु तदनन्तरम्, चकोरनयना जीवंजीवलोचना, सा सुरमञ्जरी, सहर्षं सानन्दं यथा स्यात्तथा, उत्थाय समुत्थिता भूत्वा, अकूजन् शब्दमकुर्वाणः काञ्चीकलापो मेखलादाम यस्मिन् कर्मणि तत्, अगुञ्जत् शिञ्जानमकुर्वत् मञ्जीरं यस्मिन् कर्मणि तत्, अचलितः सुस्थिरः करवलयो हस्तकटको यस्मिन् कर्मणि तत् यथा स्यात्तथा, सखीजनान् वयस्याजनान्, पुरोधायाग्रेकृत्वा, मन्दं मन्दं यथा स्यात्तथा, तदीयशयनोपकण्ठं वृद्धशय्यासमीपम्, आसाद्य प्राप्य, प्रवयसो वृद्धस्य, पुरतः पुरस्तात्, वयस्याजनं सखीसमूहम्, विधाय कृत्वा, स्वयमपि स्वतोऽपि, पश्चाद्भागं पृष्ठप्रदेशम्, अलङ्कुर्वन्ती शोभयन्ती, मालतीलतानां मल्लीवल्लीनाम्, पृष्ठतः पश्चात्, रत्नवल्लीव मणिवल्लरीव, विराजमाना शोभमाना, सती, भुवनमोहनं जगन्मोहनकारणम्, गानं संगीतम्, शुश्राव शृणोति स्म ।

तावत्समाप्येति—तावत् यावत्सुरमञ्जरीतच्छय्यासमीपमाजगाम तावत्, चतुरो विदग्धः, स वृद्धः, कलगानकलां मधुरसङ्गीतवैदग्धीम्, समाप्य समाप्तां कृत्वा, द्राग् झटिति, मञ्जु मनोहरम्, सामगीतं सामरूपगानम्, गातुम्, उदयुङ्क्त उद्यतो बभूव, कुरङ्गनयना मृगलोचनाः, श्रुत्वा निशम्य, पूर्वं प्राग्गीतम्, पठ निगद, इति ब्रुवाणा इति शेषः, एनम् जीवन्धरम्, कुतुकेन कुतूहलेन, परिवव्रुः परितो वृण्वन्ति स्म । वसन्ततिलकावृत्तम् ॥ १९ ॥

कुमारीमिति—भवत्यो यूयम्, चेद्यदि, मम वृद्धस्य, सन्तोषाय तोषाय, कुमारीं काञ्चित्पतिंवराम्,

१ विद्याधरस्य । २ तदीयशयनसदनोपकण्ठं च० ।

तदनन्तरं तद्वचनं निशम्य हसन्तीषु सकलासु वामनयनासु यथायथं निवृत्य निद्रामुद्रां दधानासु, सा सुरमञ्जरी जीवन्धरस्मरणजनितसन्तापेनाक्रान्ततनुलता क्रमेण पल्लवशयनमधिशिश्ये ।

तदनु पूषणि पूर्वधराधरे विलसति प्रचुरारुणमण्डले ।
द्विजवरस्य समीपमुपागता मधुरवागवदत्सुरमञ्जरी ॥२१॥

शास्त्रेषु केषु भवतः कुशलत्वमार्य
सङ्गीतशास्त्रवदमन्दगुणाम्बुराशे ।
गाने मनोज्ञमधुरे भवतः[1] समानो
लोकत्रये न हि विना खलु जीवकेन ॥२२॥

इति तस्या अनुयोगं द्विजवृद्धोऽप्येवमुत्तरयामास—

प्रज्ञासिर्मम सर्वशास्त्रनिकषप्रोल्लीढधाराधरो
दुष्यद्वादिमदाङ्कुरं न सहते नैर्मल्यनर्मालयः ।
किञ्चास्माभिरदृष्टपूर्वमिह यच्छास्त्रं तदेतज्जग-
त्याकाशाम्बुजतुल्यमब्जवदने बिम्बानुबिम्बाधरि ॥ २३ ॥

कल्पयन्ति समर्थयन्ति, तर्हि, मधुरं मनोहरम्, गानं गीतम्, गायते निगद्यते, इत्येवम्, वाचं वाणीम्, स वृद्धः, उवाच जगाद ॥ २० ॥

तदनन्तरमिति—तदनन्तरं तदनु, तद्वचनं तद्वृद्धवाक्यम्, निशम्य श्रुत्वा, हसन्तीषु हासं कुर्वाणासु सकलासु निखिलासु, वामनयनासु सुन्दरलोचनासु, यथायथं यथाक्रमम्, निवृत्य प्रत्यावृत्य, निद्रामुद्रां स्वापाकृतिम्, दधानासु धृतवतीषु, सतीषु, सा पूर्वोक्ता, सुरमञ्जरी, जीवन्धरस्य सात्यन्धरेः स्मरणेन निध्यानेन जनितः समुत्पन्नो यः सन्तापः खेदस्तेन, आक्रान्ता व्याप्ता तनुलताशरीरवल्लरी यस्यास्तथाभूता सती, क्रमेण क्रमशः पल्लवशयनं किसलयशय्याम्, अधिशिश्ये शयनञ्चकार ।

तदनु पूषणीति—तदनु तदनन्तरम्, प्रचुरमत्यन्तमरुणं रक्तं मण्डलं बिम्बं यस्य तस्मिन्, पूषणि सूर्ये, पूर्वधराधरे उदयशैले, विलसति दीप्यमाने सति, द्विजवरस्य विप्रोत्तमस्य, समीपमभ्यर्णम्, उपगता प्राप्ता, मधुरवाग् मिष्टभाषिणी, सुरमञ्जरी, अवदत् जगाद ॥ २१ ॥

शास्त्रेषु केष्विति—हे आर्य हे पूज्य ! अमन्दानां श्रेष्ठानां गुणानां दयादाक्षिण्यादीनामम्बुराशिः सागरस्तत्सम्बुद्धौ हे अमन्दगुणाम्बुराशे ! संगीतशास्त्रवद् गान्धर्वागम इव, भवतस्तव, केषु किन्नामधेयेषु, शास्त्रेषु सिद्धान्तेषु, कुशलत्वं नैपुण्यम्, अस्तीति शेषः । मनोज्ञमधुरेऽतिप्रिये, गाने सङ्गीते, विषयेऽर्थे सप्तमी, खलु निश्चयेन, जीवकेन जीवन्धरेण विना, भवतस्तव, समानस्तुल्यः, लोकत्रये जगत्त्रये, नहि न वै विद्यते इति शेषः । वसन्ततिलकावृत्तम् ॥ २२ ॥

इतीत्थम्—तस्याः सुरमञ्जर्याः, अनुयोगं प्रश्नम्, द्विजवृद्धोऽपि ब्राह्मणस्थविरोऽपि, एवं वक्ष्यमाणप्रकारेण, उत्तरयामास समादधे ।

प्रज्ञासिरिति—हे अब्जवदने हे कमलमुखि ! हे बिम्बानुबिम्बाधरि बिम्बफलतुलितरदनच्छदे ! सर्वशास्त्राण्येव निखिलागमा एव निकषाः शाणास्तेषु प्रोल्लीढाः प्राप्तकषणा या धारास्तीक्ष्णाग्रभागास्तासां धरो धारकः, नैर्मल्यस्य स्वच्छताया नर्मालयः केलिभवनम्, मम वृद्धस्य, प्रज्ञासिर्बुद्धिकृपाणः दुष्यद्वादिनामहङ्कारिवादिनाम् मदाङ्कुरं गर्वप्ररोहम्, न सहते न तितिक्षति, सद्य एव प्रवादिनां गर्वमपहरतीति यावत् । किञ्च अन्यच्च, इह लोके, यच्छास्त्रं यः सिद्धान्तः, अस्माभिः, पूर्वं न दृष्टमित्यदृष्टपूर्वम् अनवलोकितपूर्वम्, भवेदिति शेषः, तदेतच्छास्त्रम्, जगति भुवने, आकाशाम्बुजतुल्यं गगनारविन्दसदृशम्, अस्तीति शेषः । अखिलागमेषु मम प्रावीण्यमस्तीति भावः ॥ २३ ॥

---

१ भवतां ब० ।

इति तद्वाणीं निशम्य कौतुककोरकितान्तरङ्गा सा सुरमञ्जरी, 'निखिलनयनोत्पलानन्द-सन्दायकमुखचन्द्रिरो जीवन्धरः पूर्वं धैर्येण सह मदीयमानसमपहृत्य निर्गतः क्वापि न ज्ञायते, तत्प्राप्तिर्मम कथं भविष्यति' इति पृच्छाञ्चक्रे ।

इति वाचमसौ श्रुत्वा क्षणं तूष्णीमवस्थितः ।
द्विजातिवृद्धो मधुरमुवाच वदतां वरः ॥२४॥

अयि पयोजनयने, बाह्योद्यानविराजमानस्य कामदेवस्य पूजया प्रसन्नस्य कृपाकटाक्षैः साक्षात्कृतो जीवन्धरस्तव मनोरथलतामङ्कुरयिष्यति ।

विचिकित्सा विशालाक्षि नात्र कार्या निरङ्कुशा ।
कामकोष्ठस्य गमने त्वरैव तनुमध्यमे ॥२५॥

तदनु हृदि विदित्वा कामितार्थं करस्थं
कमलविमलनेत्री संगता सा सखीभिः ।
सपदि मधुरशिञ्जन्मञ्जुमञ्जीरपादा
मणिमयमधिरूढा याप्ययानं प्रतस्थे ॥२६॥

ततश्च चकितसारङ्गविलोचना सा सुरमञ्जरी द्विजवृद्धं पुरोधाय कामालयमेत्य वामालकाभिरालीभिः समानीतसुरभिकुसुमादिभिस्तत्पूजां निर्वर्तयामास ।

इति तद्वाणीमिति—इति पूर्वोक्तप्रकाराम्, तद्वाणीं वृद्धगिरम्, निशम्य श्रुत्वा, कौतुकेन स्वेप्सित-पृच्छाजन्यकुतूहलेन कोरकितं कुड्मलितं व्याप्तमन्तरङ्गं मनो यस्यास्तथाभूता, सा सुरमञ्जरी, निखिलानां सकलजनानां नयनोत्पलेभ्यो नेत्रकुवलयेभ्य आनन्दसन्दायको हर्षोत्पादको मुखचन्द्रिरो वदनचन्द्रो यस्य तथाभूतः, जीवन्धरो गन्धोत्कटसुतः, पूर्वं प्राक्, धैर्येण धीरत्वेन, सह साकम्, मदीयमानसं मच्चित्तम्, अपहृत्य चोरयित्वा, क्वापि कुत्रापि, निर्गतः प्रयातः, इति न ज्ञायते बुध्यते, तत्प्राप्तिस्तदुपलब्धिः, मम, कथं केन प्रकारेण, भविष्यति, इत्येवम्, पृच्छाञ्चक्रे पृच्छति स्म ।

इति वाचमिति—इति पूर्वोक्ताम्, वाचं वाणीम्, श्रुत्वा निशम्य, क्षणमल्पकालपर्यन्तम् तूष्णीमवस्थितो निःशब्दं विद्यमानः, वदतां वक्तृणाम्, वरः श्रेष्ठः, द्विजातिवृद्धो ब्राह्मणातिस्थविरः, असौ, मधुरं मनोहरं यथा स्यात्तथा, उवाच जगाद ॥ २४ ॥

अयि पयोजनयने इति—हे पयोजनयने हे कमललोचने, बाह्योद्यानविराजमानस्य बाह्योपवनविशोभमानस्य, पूजया सपर्यया, प्रसन्नस्य प्रसन्नचेतसः, कामदेवस्य मदनस्य, कृपाकटाक्षैर्दयापाङ्गैः, साक्षात्कृतः प्रत्यक्षं निरीक्षितः, जीवन्धरो गन्धोत्कटसूनुः, तव भवत्याः, मनोरथलतामीप्सितवल्लरीम्, अङ्कुरयिष्यति समुत्पादयिष्यति ॥

विचिकित्सेति—हे विशालाक्षि हे दीर्घलोचने ! अत्र कार्ये, निरङ्कुशा स्वच्छन्दा, विचिकित्सा संशयः, न कार्या न विधातव्या, हे तनुमध्यमे हे कृशावलग्ने, कामकोष्ठस्य मदनागारस्य, गमनेऽभियाने, त्वरैव शीघ्रतैव साधीयसी विद्यत इति शेषः ॥ २५ ॥

तदनु हृदीति—तदनु तदनन्तरम्, कमलविमलनेत्री नीरजनिर्मलनयना, सा सुरमञ्जरी, हृदि स्वकीयचेतसि, कामितार्थमभिलषितपदार्थम्, करस्थं हस्तस्थितम्, विदित्वा ज्ञात्वा, सखीभिः सहचरीभिः, संगता संयुता, मधुरं मनोहरं यथा स्यात्तथा शिञ्जन्ति शब्दं कुर्वाणानि मञ्जीराणि तुलाकोटयो ययोस्तथाभूतौ पादौ चरणौ यस्याः सा, मणिमयं रत्नमयम्, याप्ययानं शिबिकाम्, अधिरूढाधिष्ठिता, सती प्रतस्थे प्रययौ । मालिनीच्छन्दः ॥ २६ ॥

ततश्चेति—ततश्च तत्पश्चाच्च, चकितसारङ्गस्य भीतकुरङ्गस्येव विलोचने नयने यस्यास्तथाभूता । सा पूर्वोक्ता, सुरमञ्जरी, द्विजवृद्धं विप्रप्रवयसम्, पुरोधायाग्रेकृत्वा, कामालयं मदनमन्दिरम्, एत्य प्राप्य, वामा मनोहरा अलकाश्चूर्णकुन्तला यासां ताभिः, आलीभिः सखीभिः, समानीता आलम्भिता ये सुरभिकुसुमादयः सुगन्धिपुष्पप्रभृतयस्तैः, तत्पूजां कामार्चाम्, निर्वर्तयामास चकार ।

रहसि कुसुमबाणं प्रार्थयामास तन्वी
मुकुलितकरपद्मा त्वं तथा कल्पयेति ।
मलयजरसलिप्ते मौक्तिकस्फारहारे
मदुरसि कुचभागे जीवकोऽसौ यथा स्यात् ॥२७॥

इति प्रार्थनामनुसरन्तीं क्वचिदन्तर्हितस्य बुद्धिषेणस्य 'लब्धो वरः' इति वाणीमेणाक्षी कामदेवस्य कृपासारविलसितवचोधारां मत्वा, प्रमोदमेदुरमानसा, किञ्चित्कन्धरां विनिवृत्य, पुरतो विराजमानम्, बहिरागतमिव साक्षात्कामदेवम्, जङ्गममिव कनकगिरिशृङ्गम्, सञ्चरन्तमिव नयनानन्दम्, साङ्गमिव शृङ्गाररसम्, साकारमिवाद्भुतरसप्रकारम्, सरूपधेयमिव निजभागधेयम्, लक्ष्मीविश्रान्त्यर्थमाकलितहैमशिलातलायमानललाटफलकम्, विशालविवृद्धिरोधाय बद्धसेतुवदायतनासावंशम्, श्रु[1]ताङ्गालीलाडोलायमानमणिकुण्डलमण्डितश्रवणयुगलं लक्ष्मीविहारधारागृहशङ्कावदान्यमुक्ताहारकान्तिस्वच्छजलशोभितवक्षःस्थलं रम्भातरुसम्भावनासम्पादकसुवृत्तोरुयुगलं कोकनदमदहरपदपल्लवं कुरुवीरं विलोकयामास ।

तन्वां रोमाञ्चकम्पौ नयनकलयोः संमदाश्रुप्रवाहं
वक्त्रेन्दौ मन्दहासं घनजघनतटे घर्मतोयप्रचारम् ।
चित्ते ह्रीभीतिमोदाद्भुतरसमयतां मारसंतापमङ्गे
सेयं सारङ्गनेत्री कुरुकलभमिमं वीक्ष्य तूर्णं बभार ॥२८॥

रहसीति—रहसि विजने, तन्वी कृशाङ्गी, सा सुरमञ्जरी, मुकुलितकरपद्मा कुड्मलितहस्तारविन्दा सती कुसुमबाणं मदनम्, त्वं मदनः, तथा तेन प्रकारेण, कल्पय कुरु, यथा येन प्रकारेण, असौ प्रसिद्धः, जीवको जीवन्धरः, मलयजरसलिप्ते चन्दनलिप्ते, मौक्तिकस्फारहारे मुक्तामयविशालहारे, मदुरसि मदीयवक्षसि, कुचभागे स्तनप्रदेशे, स्याद्भवेत्, इति, प्रार्थयामास ययाचे । मालिनीच्छन्दः ॥२७॥

इति प्रार्थनामिति—इति पूर्वोक्तप्रकाराम्, प्रार्थनां याच्ञाम्, अनुसरन्तीमनुगच्छन्तीम्, क्वचित् क्वापि, अन्तर्हितस्य तिरोहितस्य, बुद्धिषेणस्य तन्नाममित्रस्य, वरो जीवन्धरः, लब्धः प्राप्तः, इत्येवम्, वाणीं भारतीम्, कामदेवस्य कन्दर्पस्य, कृपासारेण दयासारेण विलसिता शोभिता या वचोधारा वचनपङ्क्तिस्ताम्, मत्वा ज्ञात्वा, प्रमोदेन प्रहर्षेण मेदुरं व्याप्तं मानसं चित्तं यस्याः सा, एणाक्षी मृगलोचना, सुरमञ्जरी, कन्धरां ग्रीवाम्, किञ्चिन्मनाक्, विनिवृत्य वक्रीकृत्य, पुरतोऽग्रे, विराजमानं शोभमानम्, बहिरागतं बहिः प्राप्तम्, साक्षात् स्वयम्, कामदेवमिव प्रद्युम्नमिव, जङ्गमं गतियुक्तम्, कनकगिरिशृङ्गमिव सुमेरुशिखरमिव, सञ्चरन्तं प्रचलन्तम्, नयनानन्दमिव चक्षुःप्रमोदमिव, साङ्गं सशरीरम्, शृङ्गाररसमिव प्रथमरसमिव, साकारं सविग्रहम्, अद्भुतरसप्रकारमिव विस्मयरससंस्थानमिव, सरूपधेयं रूपसहितम्, निजभागधेयमिव स्वकीयभाग्यमिव, लक्ष्मीविश्रान्त्यर्थं कमलाविश्रमाय, आकलितं धृतं हैमशिलातलायमानं सुवर्णशिलासदृशं ललाटफलकं निटिलतटं येन तम्, विशाला प्रभूता या विवृद्धिस्तस्या रोधाय निवारणाय, बद्धो रचितो यः सेतुः पुलिनं तद्वत्, आयतो दीर्घो नासावंशो यस्य तम्, श्रुताङ्गनायाः सरस्वत्याः लीलाडोलायमानाभ्यां क्रीडान्दोलिकावदाचरद्भ्यां मणिकुण्डलाभ्यां रत्नमयकर्णालङ्काराभ्यां मण्डितं शोभितं श्रवणयुगलं कर्णयुगं यस्य तम्, लक्ष्म्याः श्रिया विहारधारागृहस्य क्रीडाधारामन्दिरस्य शङ्कायां संदेहे वदान्य उदारो यो मुक्ताहारो मौक्तिकयष्टिस्तस्य कान्तिर्दीप्तिरेव स्वच्छं निर्मलं यज्जलं सलिलं तेन शोभितं समुद्भासितं वक्षःस्थलमुरःस्थलं यस्य तम्, रम्भातरुसम्भावनायाः कदलीपादपोत्प्रेक्षायाः सम्पादकं विधायकं सुवृत्तोरुयुगलं वर्तुलस्थूलसक्थियुगं यस्य तम्, कोकनदस्य रक्तकमलस्य मदहरौ गर्वापहारकौ पदपल्लवौ चरणकिसलयौ यस्य तम्, कुरुवीरं जीवन्धरम्, विलोकयामास अद्राक्षीत् ।

तन्वां रोमाञ्चकम्पाविति—सारङ्गस्येव नेत्रे यस्यास्तथाभूता मृगलोचना, इयं सा सुरमञ्जरी,

---

[1] श्रुताङ्गानां व० ।

तदनु पार्श्वतो वृद्धमसमीक्ष्य निरर्गलव्रीलतरलनयनां नमितवदनां जीवन्धरस्तत्क्षणमालिङ्ग्य, कपोले परिचुम्ब्य, निजाङ्कमारोप्य, चाटुवचनपरिपाटीभिश्चूर्णवासादिकथाभिश्च प्रीतेः परां काष्ठां प्रापयामास ।

विकचकुसुमतल्पे वृद्धरूपः शयानः
कुरु पदयुगलीसंवाहमित्यब्रवीत्ताम् ।
हृदि विलसितरागां तां तथा कुर्वतीं द्राक्
सहचरकुलमेतं वीक्ष्य तुष्टाव हृष्टम् ॥ २९ ॥

ततश्चतुरन्तयानमारुह्य सखीभिः सह निजमन्दिरान्तरं प्रविष्टायां सुरमञ्जर्यां वयस्याजनमुखविदितवृत्तान्तौ मातापितरौ सुमतिकुबेरदत्तनामधेयौ तत्क्षणकन्दलितानन्दमन्थरौ विवाहमङ्गलं विस्तारयितुमारभेताम् ।

ततः कुबेरदत्तेन मुहूर्ते शुभसंगते ।
विश्राणितां वरश्रेणीं करे जग्राह कौरवः ॥३०॥

इमं पूर्वोक्तम्, कुरुकलभं जीवन्धरम्, वीक्ष्य विलोक्य, तूर्णं क्षिप्रम्, तन्व्याः शरीरे रोमाञ्चश्च कम्पश्चेति रोमाञ्चकम्पौ पुलकवेपथू, नयनकमलयोर्नेत्रारविन्दयोः, संमदाश्रुप्रवाहं हर्षाश्रुपूरम्, वक्त्रेन्दौ मुखचन्द्रमसि, मन्दहासं मनाग्हसितम्, घनजघनतटे स्थूलनितम्बप्रान्ते, घर्मतोयप्रचारं स्वेदजलसंचारम्, चित्ते मनसि, ह्रीर्लज्जा भीतिर्भयं मोदो हर्षः अद्भुतं विस्मयः, एत एव रसास्तन्मयतां तद्रूपताम्, अङ्गे देहे, मारसन्तापं मदनदाहम्, च, बभार दधार । स्रग्धराच्छन्दः ॥२८॥

तदन्विति—तदनु तदनन्तरम्, पार्श्वतः समीपे, वृद्धं द्विजस्थविरम्, असमीक्ष्यानवलोक्य, निरर्गलेन निष्प्रतिबन्धेन व्रीलेन लज्जया तरले चपले नयने यस्यास्ताम्, व्रीडव्रीलादिशब्दयोर्यथेच्छं प्रयुज्यन्ते । तथाहि 'गण्डूषगर्जभुजजागरहारकीलज्वालाभटारभसवर्तकगर्द्धशृङ्गाः । व्रीडादयश्च वरटश्च वराटकश्च उत्कण्टवाणकरकाश्च समावयाश्च' । इति स्त्रीपुंलिङ्ग कथने रभसः । नमितवदनां नम्रवक्त्राम्, तां सुरमञ्जरीम्, जीवन्धरः, तत्क्षणं तत्कालम्, आलिङ्ग्य समाश्लिष्य, कपोले गण्डे, परिचुम्ब्य परितश्चुम्बनं विधाय, निजाङ्कं स्वकीयोत्सङ्गम्, आरोप्याधिष्ठाप्य, चाटुवचनपरिपाटीभिः प्रियवाक्परम्पराभिः, चूर्णवासादिकथाभिश्च चतुर्थलम्बवर्णितचूर्णामोदादिचर्चाभिश्च, प्रीतेः प्रेम्णः, परामन्तिमाम्, काष्ठामवधिम्, प्रापयामास लम्भयामास ।

विकचकुसुमतल्प इति—विकचकुसुमानां प्रस्फुटितपुष्पाणां तल्पे शयने, शयानः शयनं कुर्वाणः, वृद्धरूपः स्थविरवेषः, जीवन्धरः, पदयुगलीसंवाहं चरणयुगसंमर्दनम्, कुरु विधेहि, इति, तां सुरमञ्जरीम्, अब्रवीत् अगाद । अथ च, हृदि चेतसि, विलसितरागां प्रकटितप्रीतिम्, तथा तादृशाम्, द्राक् सत्वरम्, कुर्वतीं विदधतीम्, तां सुरमञ्जरीम्, वीक्ष्य विलोक्य, सहचरकुलं मित्रसमूहः, हृष्टं प्रहर्षोपेतं सत्, एतं स्वामिनम्, तुष्टाव स्तौति स्म । मालिनीच्छन्दः ॥२९॥

ततश्चतुरन्तयानमिति—ततस्तदनन्तरम्, सुरमञ्जर्याम्, चतुरन्तयानं शिबिकावाहनम्, आरुह्य समधिष्ठाय, सखीभिरालीभिः, सह सार्धम्, निजमन्दिरान्तरं स्वकीयभवनाभ्यन्तरम्, प्रविष्टायां कृतप्रवेशायां सत्याम्, वयस्याजनमुखादालीजनवदनाद्विदितो ज्ञातो वृत्तान्तः समाचारो याभ्यां तौ सुमतिकुबेरदत्तनामधेयौ, मातापितरौ, 'आनङृतो द्वन्द्वे' इति पूर्वपदस्यानङ्, तत्क्षणकन्दलितानन्दमन्थरौ तत्कालोद्भूतप्रमोदभारौ, सन्तौ, विवाहमङ्गलं परिणयोत्सवम्, विस्तरयितुं प्रपञ्चयितुम्, आरभेताम् प्रक्रमं चक्रतुः ।

ततः कुबेरदत्तेनेति—ततस्तदनन्तरम्, कौरवो जीवन्धरः, शुभसंगते कल्याणप्रदे, मुहूर्ते समये, कुबेरदत्तेन एतन्नाम्ना वैश्यपतिना, विश्राणितां प्रदत्ताम्, वरश्रेणीं श्रेष्ठनितम्बाम्, तां सुरमञ्जरीमिति यावत्, करे पाणौ, जग्राह स्वीकृतवान्, परिणिनायेति यावत् ॥३०॥

बालां शम्बरशत्रुशास्त्रपदवीशालां रसाम्भोनिधे-
वेलां श्लाघ्यतमोल्लसद्गुणमणीशीलां मरालीगतिम् ।
नीलाम्भोरुहलोचनां शशिलसत्फालां सुमुक्तावली-
मालां तां रमयन्नयं स्मितसुधालीलापदं प्राप सः ॥३१॥

इति महाकविहरिचन्द्रविरचिते श्रीमति जीवन्धरचम्पूकाव्ये
सुरमञ्जरीलम्भो नाम नवमो लम्भः ।

बालामिति—पदव्यां मार्गे विद्यमाना शाला भवनं पदवीशाला, शम्बरशत्रुशास्त्रस्य कामशास्त्रस्य पदवीशाला ताम्, रस एवाम्भोनिधिस्तस्य स्नेहसागरस्य, वेलां तीरभूमिम्, श्लाघ्यतममतिशयेन प्रशंसनीय-मुल्लसच्छोभमानं गुणमणीशीलं श्रेष्ठगुणमयनिसर्गो यस्यास्ताम्, मरालीगतिं हंसगमनाम्, नीलाम्भोरुहलोचनां नीलोत्पलनयनाम्, शशीव चन्द्र इव लसच्छोभमानः फालो भालो यस्यास्ताम्, सुष्ठु मुक्तावलीमाला यस्यास्ताम्, तां पूर्वोक्ताम्, बालां सुरमञ्जरीम्, रमयन् क्रीडयन्, उपभुञ्जान इति यावत्, सोऽयं जीवन्धरः, स्मितसुधाया मन्दहसितपीयूषस्य लीलापदं क्रीडास्थानम्, प्राप लेभे ॥३१॥

इति महाकविहरिचन्द्रविरचिते श्रीमति 'कौमुदी' व्याख्याधरे जीवन्धरचम्पूकाव्ये
सुरमञ्जरीलम्भो नाम नवमो लम्भः ।

दशमो लम्भः

ततः कुरुकुमारः सुरमञ्जरीवदनात्कथञ्चिदुदञ्चितानुमतिः, तत्सदनान्निर्गत्य सकलसहचरनिकरपरिमेदुरपार्श्वभागः स्वकीयनिकाय्यमासाद्य, पित्रोर्नेत्राणि पीयूषाञ्जनैरिव रञ्जयामास।

नतं पादाम्भोजे नयनसुभगं वीक्ष्य तनुजं
परिष्वज्य प्रेम्णा शिरसि पुनराघ्राय च मुहुः।
दृशा पायं पायं तनयवदनाम्भोरुहसुधां
श्रवोभ्यां वाङ्माध्वीं सुखममितमातेनतुरिमौ ॥ १ ॥

वाचामभूमिं मुदमाससाद गन्धर्वदत्ता तमिमं समीक्ष्य।
उपागतं गेहमुदारसत्त्वमुवाच चैवं कमलायताक्षी ॥ २ ॥

आर्यपुत्र, सा खलु गुणमाला भवदीयविरहाशुशुक्षणिकृशिततनुलता, क्षणे क्षणे ताम्यति मुह्यति मूर्च्छति च; अतस्तामम्भोरुहाक्षीं प्रथमतः सम्भाव्यात्रागन्तुमर्हसीति।

विवेश गुणमालायास्ततो गेहं कुरूद्वहः।
एकान्ते तां विलोक्यायमालिलिङ्ग च संगतः ॥ ३ ॥

आर्यपुत्र मन्निमित्तं खल्वेतावद्दुःखमनुभूतवानस्यतो मन्दभाग्यां मां मा संस्पृशेति सविषादमुक्तो

तत इति—ततस्तदनन्तरम्, कुरुकुमारो जीवन्धरः, सुरमञ्जरीवदनात्तद्वक्त्रात्, कथञ्चित्केनापि प्रकारेण, उदञ्चिता प्राप्तानुमतिराज्ञा येन स तथाभूतः सन्, तस्याः सुरमञ्जर्याः सदनाद्भवनात्, निर्गत्य निःसृत्य, सकलसहचरनिकरेण निखिलमित्रमण्डलेन परिमेदुरो मिलितः पार्श्वभागः समीपप्रदेशो यस्य तथाभूतः सन्, स्वकीयनिकाय्यं निजनिकेतनम्, आसाद्य प्राप्य, पित्रोर्मातापित्रोः नेत्राणि नयनानि, पीयूषाञ्जनैरिव सुधाञ्जनैरिव, रञ्जयामास रञ्जयति स्म रागयुक्तानि चकारेति भावः।

नतं पादाम्भोज इति—अथाऽ इत्यन्वेतामिमौ मातापितरौ, पादाम्भोजे चरणकमले, नतं नम्रम्, नयनसुभगं नेत्रप्रियम्, तनुजं पुत्रम्, वीक्ष्य समवलोक्य, प्रेम्णा प्रीत्या, परिष्वज्य समालिङ्ग्य, पुनरनन्तरम्, मुहुर्भूयोभूयः, शिरसि मूर्ध्नि, आघ्राय च घ्राणविषयीकृत्य च, तनयवदनाम्भोरुहसुधां पुत्रमुखकमलपीयूषम्, दृशा दृष्ट्या, वाङ्माध्वीं वचनमधु, श्रवोभ्यां श्रवणाभ्याम्, पायं पायं पीत्वा पीत्वा, अमितमपरिमितम्, सुखं शर्म, आतेनतुर्विस्तारयामासतुः। शिखरिणीच्छन्दः ॥ १ ॥

वाचामभूमिमिति—कमले इवायते अक्षिणी यस्याः सा, गन्धर्वदत्ता खचरेन्द्रपुत्री, गेहं गृहम्, उपागतं प्राप्तम्, उदारसत्त्वमुत्कृष्टबलयुक्तम्, तमिमं प्रसिद्धम्, जीवन्धरम्, समीक्ष्य दृष्ट्वा, वाचां वचनानाम्, अभूमिमपात्रम्, मुदमानन्दम्, आससाद प्राप, एवं वक्ष्यमाणप्रकारेण, उवाच च अगाद् च ॥ २ ॥

आर्यपुत्रेति—खलु निश्चयेन, सा प्रसिद्धा, गुणमाला भवद्वल्लभा, भवदीयविरहाशुशुक्षणिना त्वद्विरहानलेन कृशिता क्षीणा तनुलता शरीरवल्लरी यस्यास्तथाभूता सती, क्षणे क्षणे प्रतिसमयम्, ताम्यति दुःखीभवति, मुह्यति मोहं करोति, मूर्च्छति च मूर्च्छां प्राप्नोति च। अतः कारणात्, तां प्रसिद्धां, अम्भोरुहाक्षीं कमललोचनाम्, प्रथमतः पूर्वम्, सम्भाव्य सन्तोष्य, अत्रेह, आगन्तुम् अर्हसीति योग्योऽसीति।

विवेशेति—ततस्तदनन्तरम्, कुरूद्वहः सत्यन्धरसुतः, गुणमालाया द्वितीयपत्न्याः, गेहं भवनम्, विवेश प्रविशति स्म, एकान्ते रहसि, तां गुणमालाम्, विलोक्य दृष्ट्वा, अयं संगतः सम्प्राप्तः सन्, आलिलिङ्ग च समाश्लेषणं चकार च ॥ ३ ॥

आर्यपुत्र मन्निमित्तमिति—हे आर्यपुत्र हे हृदयवल्लभ, मन्निमित्तं मत्कारणम्, खलु निश्चयेन, एतावत् इयत्परिमाणम्, दुःखमशर्म, अनुभूतवानसि समनुबभूविथ, अतोऽस्मात्कारणात्, मन्दभाग्यामभा-

जीवन्धरः, तरुणि तरुणारुणकिरणविकसदम्बुजवदने भवदीयपूर्वकृतसुकृतप्रभावेनैवैतादृशः संवृत्तो-ऽन्यथा पुनर्बहुतरदुःखमनुभवेयमिति तां समाश्वास्य, क्रमेण गन्धर्वदत्तानिलयं निजालयं चागत्य, तत्र मन्त्रविदामग्रणीर्गन्धोत्कटेन साकं मन्त्रयित्वा, वयस्यवलयविलसितपार्श्वभागो मनोजवगन्धर्ववन्धनेन स्यन्दनेन कामनीयकसीमाकोशं विदेहदेशमशिश्रियत् ।

धरणीतिलकाख्यया प्रतीतां नगरीं तत्र जगाम कौरवः ।
अधितिष्ठति यां स्वमातुलः स पतिर्गोविन्दमहीपचन्द्रमाः ॥ ४ ॥

तावद्विदितोदन्तेन गोविन्दमहीकान्तेन प्रशासितपुरुषपरिष्कृतासु विकीर्णविमलकुसुमकुलसौगन्ध्यसमाहूतपुष्पन्धयझङ्कारमेदुरविविधवाद्यरवमुखरासु दिदृक्षापरवशपौरजनसंमर्दनिवारणपरराजचरकरचपलकनकवेत्रलताकान्तिबालातपशीलासु हर्म्याग्रनिबद्धपताकापटवितानच्छत्रचामरादिभिर्निवारितदिनकरकरजालासु प्रतोलीषु संक्रीडद्भिः शताङ्गैः प्रविशमानः वेलातीतविलोकनकुतूहलचन्द्रशालासंमिलितलोलाक्षीजनकटाक्षखेलाकलितनीलोत्पलमालामादधानास्ते जीवन्धरपुरःसराः कुमाराः क्रमेण राजमन्दिरमाविविशुः । तत्र च ।

सुकृताम्, मां गुणमालाम्, मा संस्पृश नो स्पृष्टां कुरु, इति, सविषादं सखेदं यथा स्यात्तथा, उक्तो निवेदितः, जीवन्धरो जीवकः, तरुणारुणस्य मध्याह्नसूर्यस्य किरणैर्मयूखैर्विकसत्प्रस्फुटद् यदम्बुजं कमलं तद्वद्वदनं मुखं यस्यास्तत्सम्बुद्धौ हे तरुणारुणकिरणविकसदम्बुजवदने, तरुणि युवति, भवदीयं त्वदीयं यत्पूर्वकृतसुकृतं पुराविहितपुण्यं तस्य प्रभावेणैव माहात्म्येनैव, एतादृश ईदृक्प्रकारः, संवृत्तो भूतः, अन्यथा इतरथा, पुनर्भूयः, बहुतरदुःखं विपुलासातम्, अनुभवेयम्, इतीत्थम्, तां गुणमालाम्, समाश्वास्य सम्बोध्य, क्रमेण क्रमशः, गन्धर्वदत्तानिलयं खेचरसुतासद्मम्, निजालयं स्वभवनञ्च, आगत्य समेत्य, तत्र स्वभवने, मन्त्रविदां मन्त्रज्ञानाम्, अग्रणीः प्रधानः, सः, गन्धोत्कटेन वैश्येशेन, साकं सार्धम्, मन्त्रयित्वा विमर्शं कृत्वा, वयस्यवलयेन मित्रसमूहेन विलसितः शोभितः पार्श्वभागो यस्य तथाभूतः सन् , मनोजवस्य मानसरयस्य गन्धर्वस्य हयस्य बन्धनं नहनं यस्य तेन, स्यन्दनेन रथेन, कामनीयकसीमायाः सौन्दर्यावधेः कोशो निधानं तम्, विदेहदेशं विदेहजनपदम् । अशिश्रियत् श्रयति स्म, तत्र जगामेति भावः ।

धरणीतिलकाख्ययेति—कौरवो जीवन्धरः, तत्र विदेहदेशे, धरणीतिलकाख्यया धरणीतिलकेति नाम्ना, प्रतीतां प्रसिद्धाम्, तां नगरीं पुरीम्, जगाम वव्राज, याम्, स्वमातुलः स्वकीयमामः, सः प्रसिद्धः, पतिश्चासौ गोविन्दमहीपचन्द्रमाश्चेति पतिर्गोविन्दमहीपचन्द्रमाः स्वामिगोविन्दराजश्रेष्ठः, अधितिष्ठति समधिवसति ॥ ४ ॥

तावदिति—तावत् तावत्कालपर्यन्तम्, विदितोदन्तेन ज्ञातसमाचारेण, गोविन्दमहीकान्तेन गोविन्दराजेन, प्रशासिता आज्ञापिता ये पुरुषास्तैः परिष्कृताः सहितास्तासु, विकीर्णानि यत्र तत्र प्रक्षिप्तानि यानि विकचविमलकुसुमकुलानि प्रस्फुटितनिर्मलप्रसूनसमूहास्तेषां सौगन्ध्येन सौरभ्येण समाहूता आकारिता ये पुष्पन्धया भ्रमरास्तेषां झङ्कारेण गुञ्जनशब्देन मेदुरा मिलिता ये विविधवाद्यरवा नैकविधवादित्रशब्दास्तैर्मुखराः शब्दायमानास्तासु, द्रष्टुमिच्छा दिदृक्षा तस्याः परवशा आयत्ता ये पौरजना नागरिकनरास्तेषां संमर्दस्य संघातस्य निवारणे निराकरणे परा लीना ये राजचरा नृपतिदूतास्तेषां करैर्हस्तैश्चपलाश्चञ्चला या कनकवेत्रलताः सुवर्णवेत्रयष्टयस्तासां कान्तिभिर्दीप्तिभिर्बालातपशीलासु प्रातःकालिकलोहितघर्मयुक्तासु, हर्म्याग्रेषु भवनाग्रभागेषु निबद्धा निस्यूता याः पताका वैजयन्त्यस्तासां पटा वस्त्राणीति हर्म्याग्रनिबद्धपताकापटाः, ते च वितानानि चोल्लोचाश्च छत्राणि चातपवारणानि च चामराणि च प्रकीर्णकानि चेति द्वन्द्वस्तान्यादौ येषां तैः, निवारितं दूरीकृतं दिनकरकरजालं मार्तण्डमरीचिमण्डलं यासु तासु, प्रतोलीषु रथ्यासु, संक्रीडद्भिश्चलद्भिः, शताङ्गै रथैः, प्रविशमानाः प्रवेशं कुर्वाणाः, विलोकनस्य कुतूहलमिति विलोकनकुतूहलं दर्शनकौतुकम्, वेलातीतं निर्मर्यादं यद् विलोकनकुतूहलं तेन, चन्द्रशालासु भवनोपरिभागेषु संमिलिताः समुपस्थिता ये लोलाक्षीजना ललनासमूहास्तेषां कटाक्षखेलाभिरपाङ्गसंचारैः कलिता समुत्पादिता

गोविन्दभूपतिरिमं कुरुवंशकेतु-
माशिलष्य मोदविवशः स्फुटरोमहर्षः ।
आपृच्छ्य सौख्यमखिलांश्च यथोचितं तान्
संमान्य साधु विदधे विविधोपचारान् ॥ ५ ॥

अथ सचिवकुलेन जीवन्धरेण च सहितो गोविन्दमहीपतिः कुरुवीरं पञ्चाननचञ्चदासने काष्ठाङ्गारं च मृत्युवदने कदनेन निधित्सुर्मन्त्रशालामधिष्ठितो मितजनपरिवृतोऽपि रत्नभित्तिसंक्रान्तप्रतिमाभिरनेकपुरुषपरिवृत इव शोशुभ्यमानः संमन्त्रयितुमारेभे ।

ततो विदितमेदिनीकमनभावकूलङ्कषा
नयाम्बुनिधिपारगा जगदुरञ्जसा मन्त्रिणः ।
महीश स हि वञ्चनाकलितचित्तवृत्ती रिपुः
प्रतारयितुमद्य नो विनयपत्रिकां प्राहिणोत् ॥ ६ ॥

कदाचिन्मत्तदन्तावलः पाटितालानो निर्मूलितनिगलः संक्षुभितकटकः सकलभटघटादुरासदः सत्यन्धरवसुन्धरापतिमन्दिरोपकण्ठसञ्चारः, कोपान्निर्गतं तमेनमस्मत्प्राणायमानं निहत्य, निखिलपौरलोकं शोकपारावारे मामकीर्तिपूरे च निमज्जयामास ।

या नीलोत्पलमाला कुवलयपङ्क्तिस्ताम्, आदधाना धृतवन्तः, ते पूर्वोक्ताः, जीवन्धरपुरःसरा जीवकप्रमुखाः, कुमाराः, क्रमेण क्रमशः, राजमन्दिरं नृपेन्द्रनिकेतनम्, आविविशुः प्रविशन्ति स्म । तत्र च राजभवने ।

गोविन्दभूपतिरिति—गोविन्दमहाराजः, इमं पूर्वोक्तम्, कुरुवंशकेतुं जीवन्धरम्, आश्लिष्य समाश्लिष्य, मोदविवशो हर्षपरवशः, स्फुटरोमहर्षः प्रकटितरोमाञ्चः सन्, सौख्यं कुशलम्, आपृच्छ्य समन्तात् पृष्ट्वा, अखिलान् समग्रान्, तान् कुमारान्, यथोचितं यथायोग्यं यथा स्यात्तथा, संमान्य सत्कृत्य, साधु सुष्ठु यथा स्यात्तथा, विविधोपचारान् नैकविधसत्कारान्, विदधे चक्रे ॥५॥

अथ सचिवकुलेनेति—अथोपचारानन्तरम्, सचिवकुलेन मन्त्रिसमूहेन, जीवन्धरेण स्वकीयभागिनेयेन च, सहितो युक्तः, गोविन्दमहीपतिर्विदेहधरावल्लभः, कुरुवीरं जीवन्धरम्, पञ्चाननैः सिंहैश्चञ्चच्छोभमानं यदासनं विष्टरं तस्मिन्, काष्ठाङ्गारञ्च सत्यन्धरनृपतिघातकञ्च, मृत्युवदने यमवक्त्रे, समरेण, निधातुमिच्छुर्निधित्सुः, मन्त्रशालां मन्त्रागारम्, अधिष्ठितस्तत्र स्थितः सन्, मितजनैरल्पनरैः परिवृतोऽपि परीतोऽपि, रत्नभित्तिषु मणिकुड्येषु संक्रान्ताः प्रतिफलिता याः प्रतिमाः प्रतिकृतयस्ताभिः, अनेकपुरुषपरिवृतनानाजनपरीत इव, शोशुभ्यमानोऽतिशयेन भ्राजमानः, सन्, संमन्त्रयितुं गुप्तमन्त्रणां कर्तुम्, आरेभे तत्परो बभूव ।

ततो विदितमेदिनीति—ततस्तदनन्तरम्, विदिता ज्ञाता मेदिनीकमनस्य राज्ञो भावकूलङ्कषाभिप्रायतरङ्गिणी यैस्ते, नय एवाम्बुनिधिरिति नयाम्बुनिधिर्नीतिपारावारस्तस्य पारं गच्छन्तीति नयाम्बुनिधिपारगाः मन्त्रिणः सचिवाः, अञ्जसा याथार्थ्येन, जगदुः कथयामासुः, हे महीश हे नृपाल, वञ्चनाकलिता प्रतारणायुता चित्तवृत्तिर्मनोवृत्तिर्यस्य तथाभूतः, स रिपुः काष्ठाङ्गारः, हि निश्चयेन, नोऽस्मान्, प्रतारयितुं छलयितुम्, अद्येदानीम्, विनयपत्रिकां नम्रतासूचकदलम्, प्राहिणोत् प्रेषितवान् । पृथ्वीच्छन्दः ॥६॥

कदाचिदिति—कदाचिज्जातुचित्, पाटितालान उन्मूलितबन्धनस्तम्भः, निर्मूलितनिगलो दूरीकृतनिगडः, संक्षुभितकटकः सञ्चलितसैन्यः, सकलभटघटया निखिलयोद्धृसमूहेन दुरासदो धर्तुमशक्यः, सत्यन्धरवसुन्धरापतेः सत्यन्धरभूपालस्य मन्दिरोपकण्ठे भवनसमीपे संचारो गमनं यस्य तथाभूतः, मत्तदन्तावलो मत्तगजेन्द्रः, कोपात्क्रोधात्, निर्गतं भवनाद् बहिर्यातम्, अस्मत्प्राणायमानं मत्प्राणवदाचरन्तम्, एनं तं प्रसिद्धम्, सत्यन्धरवसुधारमणम्, निहत्य मारयित्वा, निखिलपौरलोकं सकलनागरिकजनम्, शोकपारावारे विषादसागरे, मां काष्ठाङ्गारञ्च, अकीर्तिपूरे 'सत्यन्धरोऽनेन मारित' इति दुर्यशसि, निमज्जयामास निमग्नं चकार ।

अघेन मयि विस्तृतां मिलदकीर्तिमेतां भवान्
प्रभाकर इवाम्बुजाकरवरे हिमानीं तताम् ।
विनाशयितुमर्हति क्षितिपते दयावारिधे
ततःपुरमुपागतो मम च मित्रतां लालय ॥ ७ ॥

इति शात्रवसन्देशमाकर्ण्य कन्दलितमन्दहासो गोविन्दमहीपतिर्जीवन्धरवदनारविन्दनर्तितनयनखञ्जनो बभूव ।

नृप मातुल निःशङ्कं मद्भुजोष्मा निरङ्कुशः ।
इमं न सहते शत्रुं तत्कालस्तु प्रतीक्ष्यते ॥ ८ ॥

इति कुरुवीरवचनचातुरीनिशमनधीरधीरमना धरापतिश्चतुरङ्गबलेन राजपुरीं प्रति गमनं तत्र निजनन्दिनीस्वयंवरततनं[1] नानादेशनरपतिसंमेलनमरातिनिधनं च निश्चित्य काष्ठाङ्गारेण संजातसख्यं प्रख्यापयन्डिण्डिमं सन्ताडयामास ।

चलन्तमिव सागरं निजबलं नराणां पति-
र्विलोक्य स समादिशन्निखिलतः प्रयाणोद्यमम् ।
चकार च जिनेशिनः पदपयोजपूजां मुदा
बहूनि कुतुकान्वितः सपदि पात्रदानानि च ॥ ९ ॥

अघेन मयीति—हे दयावारिधे हे कृपाकूपार, हे क्षितिपते हे राजन्, भवान्, अम्बुजाकरवरे कमलाकरश्रेष्ठे, ततां व्याप्ताम्, हिमानीं हिमसमूहम्, प्रभाकर इव सूर्य इव, अघेन पापेन, मयि काष्ठाङ्गारे, विस्तृतां विततामू, एतां मयानुभूयमानाम्, मिलदकीर्तिं प्राप्यमाणदुर्यशः, विनाशयितुं दूरीकर्तुम्, अर्हति योग्योऽस्ति, यतः, ततस्तस्मात्कारणात्, पुरं राजपुरनगरम्, उपागतः प्राप्तः सन्, मम मित्रतां च सौहार्दञ्च, लालय पालय । मैत्रीं रचितुं मन्नगरीमागत्य तदपवादो दूरीक्रियतामिति भावः । पृथ्वीच्छन्दः ॥७॥

इति शात्रवसंदेशमाकर्ण्येति—इतीत्थम्, शत्रुरेव शात्रवस्तस्य सन्देशस्तम्, अथवा शत्रोरयं शात्रवः स चासौ सन्देशश्चेति तं शात्रवसन्देशं रिपुवाचिकम्, आकर्ण्य निशम्य, कन्दलितो धृतो मन्दहासो मन्दहसितं येन सः, गोविन्दमहीपतिः, जीवन्धरस्य वदनारविन्दे लपनपद्मे नर्तितौ संचारितौ नयनखञ्जनौ नेत्रखञ्जरीटौ यस्य तथाभूतो बभूव ।

नृप मातुलेति—हे नृप हे राजन्, हे मातुल हे मातृभ्रातः, निरङ्कुशो निष्प्रतिबन्धः, मद्भुजोष्मा मद्बाहुनिदाघता, इममेतम्, शत्रुं सपत्नम्, न सहते न तितिक्षति, तु किन्तु, तत्कालस्तस्य मृत्युस्तद्योग्यसमयो वा, प्रतीक्ष्यतेऽपेक्ष्यते ॥ ८ ॥

इति कुरुवीरवचनेति—इत्येवम्, कुरुवीरस्य जीवन्धरस्य वचनचातुर्या वाग्दक्षताया निशमने समाकर्णने धीर्बुद्धिर्यस्य तथाभूतः, अधीरं क्षुभितं मनो हृदयं यस्य तथाभूतः, धरापतिर्गोविन्दभूपालः, चतुरङ्गबलेन चतुरङ्गसैन्येन, राजपुरीं प्रति हेमाङ्गदजनपदराजधानीं प्रति, गमनं प्रयाणम्, तत्र राजपुर्याम्, निजनन्दिन्याः स्वसुतायाः स्वयंवरततनं स्वयंवरविस्तारम्, नानादेशनरपतीनां नैकजनपदराजानां संमेलनं समुपस्थापनम्, अरातिनिधनं काष्ठाङ्गारहतिञ्च, निश्चित्य समवधार्य, काष्ठाङ्गारेण सह, संजातसख्यं समुत्पन्नसौहार्दम्, प्रख्यापयन् प्रथयन्, डिण्डिमं भेरीम्, सन्ताडयामास समन्ताताडयति स्म ।

चलन्तमिव सागरमिति—निखिलतः समन्ततः, चलन्तं क्षुभ्यन्तम्, सागरमिव समुद्रमिव, निजबलं स्वसैन्यम्, विलोक्य दृष्ट्वा, प्रयाणोद्यमं प्रस्थानोपक्रमम्, समादिशन् समाज्ञापयन्, नराणां पतिर्गोविन्दनरेन्द्रः, मुदा हर्षेण, जिनेशिनो जिनेन्द्रदेवस्य, पदपयोजयोश्चरणकमलयोः पूजा सपर्या ताम्, कुतुकान्वितः कौतुककलितः सन्, सपदि झटिति, बहूनि भूयांसि, पात्रदानानि च योग्यमनुजेभ्यो विहापितानि च, चकार विदधे । पृथ्वीच्छन्दः ॥९॥

---

[1] ततनं ब० ।

शुभे लग्ने धीरस्तदनु विचचाल क्षितिपती
रथारूढो जीवन्धरमुखकुमारैः परिवृतः ।
विदूरे सैन्येशाः प्रणतशिरसस्तं परिगताः
पुरस्तात्तत्सैन्यं मुकुलितधराभोगमगमत् ॥ १० ॥

तदा भेरीघोषैर्हयनिचयहेषापटुरवै
रथानां चीत्कारैर्मदगजघटाबृंहितभरैः ।
जगत्सर्वं तूर्णं स्थगितमभवद्भास्कररथो
रथैरीर्ष्यावेशादिव स पिहितो रेणुनिकरैः ॥११॥

तदानीं धवलातपत्रडिण्डीरविचित्रा रङ्गत्तुरङ्गमतरङ्गसंगता मत्तद्विपपृथुयादःकुलकलिता विलोलासिलतामत्स्यव्रातपरिवृता तद्वाहिनी वाहिनीव प्रजवं निर्जगाम ।

चलति निखिले सैन्ये यद्रेणुपुञ्जमजृम्भत
प्रसृतममितं व्योम्नि स्फारेभयूथमदाम्बुभिः ।
तदिदमगमच्छान्तिं शुण्डोद्धृतैर्जलशीकरै-
र्हयमुखगलल्लालामालाजालैश्च समन्ततः ॥ १२ ॥

तदनु दुरासदमदाकुलतया ईषदामीलितलोचनैर्दन्तकोटिनिषण्णशुण्डादण्डैरुभयपार्श्वाव-

---

शुभे लग्न इति—तदनु तदनन्तरम्, धीरो गभीरः, रथारूढः स्यन्दनस्थितः, जीवन्धरमुखकुमारैर्जीवकप्रमुखकुमारैः, परिवृतः पर्यागतः, क्षितिपती राजा, शुभे उत्तमे, लग्ने समये, विचचाल चलति स्म, प्रणता शिरसो विनतमूर्धानः, सैन्येशाः सेनापतयः, विदूरे किञ्चिद्दूरे, तं नृपम्, परिगताः परीत्य जग्मुः, पुरस्तादग्रे, तत्सैन्यं तद्बलम्, मुकुलितः संकोचितो धराभोगो वसुन्धराविस्तारो येन तथाभूतं सत्, अगमत् जगाम । शिखरिणीच्छन्दः ॥१०॥

तदा भेरीघोषैरिति—तदा गोविन्दभूपालसंप्रयाणकाले, हयनिचयस्य वाजिवृन्दस्य हेषापटुरवैर्हेषणोच्चशब्दैः, रथानां शताङ्गानाम्, चीत्कारैरव्यक्तशब्दविशेषैः, मदेनोपलक्षिता गजघटेति मदगजघटा मदोन्मत्तहस्तिपङ्क्तिस्तस्या बृंहितभरा गर्जितसमूहास्तैः, सर्वं निखिलम्, जगद् भुवनम्, तूर्णं शीघ्रम्, स्थगितं समाच्छादितम्, अभवद् बभूव, स प्रसिद्धः, भास्कररथः सूर्यस्यन्दनम्, ईर्ष्यावेशादिव मात्सर्यावेशादिव, रथैः स्यन्दनैः, रेणुनिकरैर्धूलिसमूहैः, पिहितः समाच्छादितः । उत्प्रेक्षा । शिखरिणीवृत्तम् ॥११॥

तदानीमिति—तदानीं तस्मिन् काले, धवलातपत्राण्येव श्वेतच्छत्राण्येव डिण्डीराः फेनास्तैर्विचित्रा विलक्षणा, रङ्गत्तुरङ्गमा एव चलदश्वा एव तरङ्गा भङ्गास्तैः संगता सहिता, मत्तद्विपा एव मत्तगजा एव पृथुयादांसि स्थूलजलजन्तवस्तेषां कुलेन समूहेन कलिता युक्ता, विलोलासिलता एव चञ्चलकृपाणवल्लर्य एव मत्स्यव्राता मकरसमूहास्तैः परिवृता परीता, तद्वाहिनी तत्पृतना, वाहिनीव सरिदिव, प्रजवं प्रकृष्टवेगसहितं यथा स्यात्तथा, निर्जगाम निश्चक्राम ।

चलति निखिल इति—निखिले समग्रे, सैन्येऽनीके, चलति गच्छति, सति, व्योम्नि नभसि, स्फाराणि प्रचुराणि यानीभयूथस्य हस्तिसमूहस्य मदाम्बूनि दानवारीणि तैः, प्रसृतं व्याप्तम्, अमितं परिमाणातीतम्, यद् रेणुपुञ्जं धूलिसमूहः, अजृम्भत वर्धते स्म, तदिदं रेणुपुञ्जम्, शुण्डोद्धृतैर्गजकरसमुच्छलितैः, जलशीकरैर्वारिकणैः, हयमुखेभ्यो वाजिवदनेभ्यो गलन्त्यो निःसरन्त्यो या लालामाला लालासमूहास्तासां जालैश्च नीरैश्च, समन्ततः परितः, शान्तिं समाप्तिम्, अगमत्प्रापत् । हरिणीच्छन्दः ॥ १२ ॥

तदन्विति—तदनु तदनन्तरम्, दुरासदो दुष्प्राप्यो यो मदो दानं तेनाकुला व्यग्रास्तेषां भावस्तया तया, ईषद् मनाग् आमीलितानि मुद्रितानि लोचनानि नयनानि येषां तैः, दन्तकोट्यां रदनाग्रभागे निषण्णाः स्थापिताः शुण्डादण्डाः करदण्डा येषां तैः, उभयपार्श्वावलम्बितौ पार्श्वद्वयलंसमानौ घण्टायुगलौ एककुथपटौ

लम्बितवर्णकम्बलतया गैरिकधातुसान्द्रान् गिरीन्द्रांस्तुलयद्भिः कर्णान्तावलम्बिकनकाङ्कुशतया कृतकर्णपूरैरिव जङ्गमैरिव कुलाचलैः संख्यातीतैर्दन्तावलैराक्रान्तसकलदिशावकाशम्, मुखभागकलितकनकखलिनैः संमुखागतमाकाशमापिबद्भिरिव चलाचलोष्ठपुटैर्मुहुर्मुहुः कम्पितोदररन्ध्रेण परिपूरितभुवनोदरेण हेषारवेण वेगगर्वधूर्वहं गरुत्मन्तं निर्भर्त्सयद्भिरिव सादिजनकृतजवनिरोधक्रोधघुर्घुरायमाणघोणैः परिस्फुरत्प्रोथपुटेन पदे पदे मुक्तपूत्कारेण जवनिपीतमनिलमिव नासिकाविवरेणोद्वमद्भिर्मूर्तिमद्भिरिव रंहःसमूहैर्गन्धर्वैर्बन्धुरम्, सन्दानितघण्टाघणघणात्कारमुखरैश्चक्रक्षुण्णक्षोणीतलैः स्यन्दनैः परिशोभितम्, भिण्डिपालमण्डलाग्रपट्टिसपरश्वधद्रुघणप्रमुखायुधधारिणा पादातेन सनाथम्, मायूरातपत्रसहस्रान्धीकृताष्टदिङ्मुखमनीकं पुरोधाय, कैश्चित्प्रयाणैर्गोविन्दराजः क्वचन राजपुरीं निकषा निषसाद।

> तदनु विदितवार्तो माययाऽसौ कृतघ्नो
>
> दधदिव बहु सख्यं प्राहिणोत्प्राभृतानि।
>
> अयमपि नरपालो लालयंस्तानि सद्य-
>
> स्तदतिशायितमेतत्प्रेषयामास तस्मै ॥ १२ ॥

येषां तेषां भावस्तत्ता तया, गैरिकधातुभिर्लोहितमृत्तिकाविशेषैः सान्द्रा निबिडास्तान्, गिरीन्द्रान् महापर्वतान् तुलयद्भिरुपमिन्वद्भिः, कर्णान्तावलम्बिनः श्रवणसमीपावलम्बिनः कनकाङ्कुशाः सुवर्णाङ्कुशा येषां तेषां भावस्तत्ता तया, कृतकर्णपूरैरिव धृतकर्णाभरणैरिव, जङ्गमैर्गतिशीलैः, कुलाचलैरिव कुलपर्वतैरिव, संख्यातीतैरसंख्यैः, दन्तावलैर्हस्तिभिः, आक्रान्तो व्याप्तः सकलदिशावकाशो निखिलकाष्ठान्तरालं येन तत्, मुखभागे वदनप्रदेशे कलितो धृतः कनकखलिनः सुवर्णकविका येषां तैः, संमुखागतं पुरस्तात्प्राप्तम्, आकाशं गगनम्, आपिबद्भिरिव धयद्भिरिव, चलाचलोष्ठपुटैरतिचपलदशनच्छदपुटैः, मुहुर्मुहुर्भूयोभूयः कम्पितोदररन्ध्रेण वेपितजठरविवरेण, परिपूरितं सम्भरितं भुवनोदरं जगन्मध्यं येन तेन, हेषारवेण हेषणशब्देन, वेगगर्वधूर्वहं रयाहङ्कारभारधारिणम्, गरुत्मन्तं गरुडम्, निर्भर्त्सयद्भिरिव तिरस्कुर्वद्भिरिव, सादिजनैरारोहिपुरुषैः कृतो विहितो यो जवननिरोधो वेगप्रतिबन्धस्तेन समुत्पन्नो यः क्रोधः कोपस्तेन घुर्घुरायमाणा अव्यक्तशब्दविशेषं कुर्वाणा घोणा नासा येषां तैः, परिस्फुरत्प्रोथपुटेन प्रकम्पमानघ्राणाग्रभागेन, पदे पदे प्रतिपदमिति यावत्, मुक्तपूत्कारेण प्रकटितपूत्कारध्वनिना, नासिकाविवरेण घ्राणरन्ध्रेण, जवनिपीतं वेगगृहीतम्, अनिलं पवनम्, उद्वमद्भिरिव प्रकटयद्भिरिव, मूर्तिमद्भिः शरीरधारिभिः, रंहःसमूहैरिव वेगकलापैरिव, गन्धर्वैर्वाहैः 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः, बन्धुरं मनोहरम्, अतिदूरोन्नता अतिदूरोत्क्षिप्ता ये पताकापटा वैजयन्तीवस्त्राणि तैस्तिरोहितः पिहितो रविरथः सूर्यस्यन्दनं यैस्तैः, सैन्यमेव सागरः सैन्यसागरः पृतनापारावारस्तस्यावर्तायमानैरम्भसां भ्रमैरिवाचरद्भिः, सन्दानिता बद्धा या घण्टास्तासां घणघणात्कारेणाव्यक्तशब्दविशेषेण मुखरैर्वाचालैः, चक्रै रथाङ्गैः क्षुण्णं चूर्णीकृतं क्षोणीतलं महीतलं यैस्तैः, स्यन्दनैः शताङ्गैः, परिशोभितं समुद्भासितम्, भिन्दिपालश्च खड्गश्च मण्डलाग्रश्च कृपाणश्च, पट्टिसश्च शस्त्रविशेषश्च परश्वधश्च कुठारश्च, द्रुघणश्च मुद्गरश्चेति भिण्डिपालमण्डलाग्रपट्टिसपरश्वधद्रुघणाः ते प्रमुखाः प्रधाना येषु तथाभूतानि यान्यायुधानि शस्त्राणि तेषां धारिणा धारकेण, पदातेन पदातिसमूहेन, सनाथं सहितम्, मायूराणि शिखण्डिपिच्छनिर्मितानि यान्यातपत्रसहस्राणि छत्रसहस्राणि तैरन्धीकृतानि श्यामीकृतान्यष्टदिङ्मुखानि येन तथाभूतम्, अनीकं सैन्यम्, पुरोधाय पुरस्तात् कृत्वा, कैश्चित्कतिपयैः, प्रयाणैः प्रस्थानैः गोविन्दराजो विदेहवसुधारमणः, राजपुरीं निकषा राजपुर्याः समीपे, 'अभितःपरितःसमया निकषाहाप्रतियोगेऽपि' इति द्वितीया, क्वचन कुत्रापि स्थाने, निषसाद निषण्णो बभूव।

तदनु विदितवार्त इति—तदनु तदनन्तरम्, विदिता वार्ता यस्य स ज्ञातसमाचारः, असौ कृतघ्नः काष्ठाङ्गारः, मायया छलेन, बहु प्रभूतम्, सख्यं मैत्रीम्, दधदिव बिभ्रदिव, प्राभृतानि समुपायनानि, प्राहिणोत् प्रेषयामास। तानि प्राभृतानि, लालयन् स्वीकुर्वन्, अयमेषः, नरपालोऽपि गोविन्दभूपालोऽपि,

ततः काष्ठाङ्गारेण निजबलशबलेनाभ्यागत्य बहुधा सम्मानितो गोविन्दमहीपतिः, राजराजपुरीनिकाशां राजपुरीं प्रविश्य, तत्र विविधरत्नचयविचित्रस्वयंवरशालां परिकल्प्य, वराहत्रयशोभितचन्द्रकयन्त्रभेदं कन्याशुल्कतया सकलदेशेषु घोषयामास ।

परःसहस्रं प्रथिता महीपाः प्रापुस्तदा तां नगरीं गरिष्ठाम् ।
भेरीरवाल्लोलसमस्तलोकाः सेनारजोभिः पिहिताभ्रभागाः ॥ १४ ॥

स्वयंवरगृहे तत्र महीशाः सानुयायिनः ।
मञ्चेषु मिलिता मेरुशृङ्गेष्विव सुरेश्वराः ॥ १५ ॥

तत्र मध्यनिबद्धसंभ्रमयन्त्रभेदिनमतिमानमहिमानं युवानमस्मन्नन्दिनी शशिकलेव प्रदोषं शचीदेवीव पुरन्दरमलंकरिष्यतीति गोविन्दराजेन कारितमारावं निशम्याहमहमिकया चलितेन, वक्षःस्थलविलसितपाटीरपङ्कसंगतकुङ्कुमस्थासकरजःपुञ्जपिञ्जरितदशदिशेन, आक्षेपडोलायमानमुक्ताकलापेन चलितनवमालिकोड्डीनभृङ्गसङ्घसंस्तूयमानयशोविभवेन, अर्धावलम्बितकर्णपूरचुम्ब्यमानगण्डस्थलेन राजकेन स्वयंवरमण्डपं स्वयमुच्छलितमिवाभवत् ।

तस्मै काष्ठाङ्गाराय, सद्यो झटिति, तदतिशयितं काष्ठाङ्गारप्रहितप्राभृतेभ्योऽपि समुत्कृष्टम्, एतत् प्राभृतम्, प्रेषयामास प्रजिघाय । मालिनीवृत्तम् ।। १३ ।।

ततः काष्ठाङ्गारेणेति—ततस्तदनन्तरम्, निजबलेन स्वकीयसैन्येन शबलो मिश्रितस्तेन, काष्ठाङ्गारेण कृतघ्नेन, अभ्यागत्य सम्मुखमागत्य, बहुधा नैकधा, संमानितः समादृतः, गोविन्दमहीपतिर्विदेहाधीशः, राजराजस्य कुबेरस्य पुरी नगरी राजराजपुरी तस्या निकाशा सदृशी ताम् अलकासंनिभाम्, राजपुरीं हेमाङ्गदविषयराजधानीम्, प्रविश्य प्रवेशं विधाय, तत्र पुर्याम्, विविधरत्नचयैरनेकप्रकारमणिमण्डलैर्विचित्रा विस्मयकरी या स्वयंरशाला स्वयंवरसभा ताम्, परिकल्प्य कारयित्वा, वाराहत्रयेण कृत्रिमसूकरत्रितयेन शोभितं समलङ्कृतं यच्चन्द्रकयन्त्रं चन्द्रकवेधयन्त्रं तस्य भेदं विदारणम्, कन्याशुल्कतया स्वसुताशुल्कत्वेन, सकलदेशेषु निखिलजनपदेषु, घोषयामास डिण्डिमध्वनिना प्रकटयामास ।

परः सहस्रमिति—भेरीरवेण दुन्दुभिनादेनाल्लोकाः चलाः सतृष्णा वा समस्तलोका निखिलनरा यैस्ते, 'लोलश्चलसतृष्णयोः' इत्यमरः, सेनारजोभिः पृतनापरागैः, पिहितः समाच्छादितोऽभ्रभागो गगनप्रदेशो यैस्ते, प्रथिताः प्रसिद्धाः, परःसहस्रं सहस्रादप्यधिकाः, महीपा राजानः, तदा तस्मिन् काले, गरिष्ठां श्रेष्ठाम्, तां नगरीं राजपुरीम्, प्रापुः प्राप्तवन्तः, तत्र समाजग्मुरिति यावत् । उपजातिवृत्तम् ॥१४॥

स्वयंवरगृह इति—मेरुशृङ्गेषु सुराद्रिशिखरेषु, सुरेश्वरा इव देवेन्द्रा इव, सानुयायिनः सानुचराः, महीशा राजानः, तत्र तस्मिन्, स्वयंवरगृहे स्वयंवरशालायाम्, मञ्चेषु पर्यङ्केषु, मिलिताः संगताः बभूवुरिति शेषः ॥१५॥

तत्र मध्यनिबद्धेति—तत्र स्वयंवरगृहे, मध्यनिबद्धमन्तःस्थापितं संभ्रमच्च घूर्णमानं च यद्यन्त्रं तद् भिनत्तीत्येवं शीलम्, अतिमानो लोकोत्तरो महिमा प्रभावो यस्य तथाभूतम्, युवानं तरुणम्, अस्मन्नन्दिनी मत्पुत्री, प्रदोषं रजनीमुखम्, शशिकलेव चन्द्रकलेव, पुरन्दरं शक्रम्, शचीदेवीव पुलोमजेव, अलङ्करिष्यति शोभयिष्यति, इत्येवम्, गोविन्दराजेन गोविन्दभूपालेन, कारितं विधापितम्, आरावं घोषणाम्, निशम्य समाकर्ण्य, अहमहमिकयाऽहंपूर्वभावेन, चलितेन स्वस्थानात्प्रयातेन, वक्षःस्थलेषु बाहुमध्यस्थलेषु विलसिताः शोभिता ये पाटीरपङ्कसंगतकुङ्कुमस्थासकाश्चन्दनद्रवयुक्तघुसृणतिलकास्तेषां रजःपुञ्जेन परागसमूहेन पिञ्जरिताः पिङ्गलवर्णीकृता दश दिशा दश काष्ठा येन तेन, आक्षेपेण प्रकम्पेन डोलायमान आन्दोलिकावदाचरन् मुक्ताकलापो मौक्तिकस्रक् यस्य तेन, चलिताभ्यां नवमालिकाभ्यो नूतनकुसुमस्रग्भ्य उड्डीना उत्पतिता ये भृङ्गसङ्घाः षट्पदसमूहास्तैः संस्तूयमानाः सन्नूयमाना विभवा ऐश्वर्याणि यस्य तेन, अर्धावलम्बितेन मनाक् स्रंसमानेन कर्णपूरेण कर्णाभरणेन चुम्ब्यमानं गण्डस्थलं कपोलभागो यस्य तेन, राजकेन राजकुमारसमूहेन, स्वयंवरमण्डपं स्वयंवरभवनम्, स्वयं स्वतः, उच्छलितमिव समुद्गच्छदिव, अभवत् बभूव ।

---

१. संभ्रमसंतत ब० ।

वराहयन्त्रमभितो धराधीशाश्चकाशिरे ।
कुलाद्रिं परितः कीर्णाः शिलाखण्डलवा इव ॥ १६ ॥

ततश्च मगधाधिपे विदितशक्तिलोपे भृशं
कलिङ्गनरनायके विषयमस्पृशत्सायके ।
नृपे च विनतापुरो निहितलक्ष्यधूलीहरे
शरव्यचलनोदरे प्रथितपौदनाधीश्वरे ॥ १७ ॥

अयोध्याभूपाले भुवि पतति धैर्येण विकले
तथावन्तीनाथे वितथभुजशौर्ये मितकथे ।
नृपेष्वन्येष्वेवं कुवलयदृशां हासविषये-
ष्वयं काष्ठाङ्गारः कुतुकवशचित्तः प्रचलितः ॥ १८ ॥

तदनु काष्ठाङ्गारो दर्पदुर्ललिताकारः कलभनिभचारः, तद्यन्त्राधोभागभ्रमच्चक्रे पादं निधाय पारवश्येन भुवि पतितः, क्षितिपतिवलयस्य कमलाक्षीजनस्य च हास्यवदान्यो बभूव ।

कुमारेऽस्मिन्धीरे सहचरघटामध्यलसिते
यथा प्रोद्यत्तारागणपरिवृते शीतकिरणे ।
तदानीं गोविन्दक्षितिपतिरदाद्दृष्टिमधिका-
मुदस्थात् सोऽप्येष स्मितविशदवक्त्रः कुरुवरः ॥ १९ ॥

वराहयन्त्रमभित इति—वराहयन्त्रं यन्त्रविशेषम्, अभितः परितः, धराधीशा राजानः, कुलाद्रिं कुलाचलम्, परितः समन्तात्, कीर्णाः व्याप्ताः, शिलाखण्डलवा इव, चकाशिरे शुशुभिरे ॥१६॥

ततश्चेति—ततश्च तदनन्तरञ्च, मगधाधिपे मगधेश्वरे, भृशमत्यर्थम्, विदितः प्रज्ञातः शक्तिलोपोऽसामर्थ्यं यस्य तथाभूते, कलिङ्गनरनायके, कलिङ्गभूपाले, विषयं शरव्यम्, अस्पृशन् स्पर्शमकुर्वन् सायको बाणो यस्य तथाभूते, विनतापुर एतन्नामनगरस्य, नृपे च राजनि च, निहितं धृतं यल्लक्ष्यं शरव्यं तस्य धूलीहरे रजोहरे न तु घातके, प्रथितपौदनाधीश्वरे प्रख्यातपोदनपुराधिपे, शरव्यचलनं लक्ष्यभ्रंशकमुदरं यस्य तथाभूते सति, अत्र सर्वत्र 'यस्य च भावे भावलक्षणम्' इति सप्तमी, अग्रश्लोकेन सम्बन्धः । पृथ्वीच्छन्दः ॥ १७ ॥

अयोध्याभूपाल इति—धैर्येण स्थैर्येण, विकले शून्ये, अयोध्याभूपाले साकेताधिपे, भुवि पृथिव्याम्, पतति स्खलति, सति, तथा तेनैव प्रकारेण, अवन्तीनाथेऽवन्तीदेशाधिपे, वितथं व्यर्थं भुजशौर्यं बाहुपराक्रमो यस्य तथाभूते, मितकथेऽल्पभाषणे च सति, एवमनेन प्रकारेण, अन्येष्वपि नृपेषु राजसु, कुवलयदृशां नीलोत्पललोचनानाम्, हासविषयेषु हास्यस्थानेषु सत्सु, कुतुकवशं कौतूहलायत्तं चित्तं यस्य तथाभूतः, काष्ठाङ्गारो राजघः, प्रचलितो वराहयन्त्रं भेत्तुं प्रचलितवान् ॥ १८ ॥

तदन्विति—तदनु तदनन्तरं दर्पेण गर्वेण दुर्ललितो विषम आकारः संस्थानं यस्य तथाभूतः, कलभनिभचारो गजशावकसदृशगमनः, काष्ठाङ्गारः कृतघ्नः, तद्यन्त्रस्य पूर्वोक्तवराहत्रयोपलक्षितयन्त्रस्याधोभागे निम्नप्रदेशे, भ्रमच्चक्रे घूर्णमानरथाङ्गे, पादं चरणम्, निधाय निक्षिप्य, पारवश्येन पारतन्त्र्येण, भुवि पृथिव्याम्, पतितो भ्रष्टः सन्, क्षितिपतिवलयस्य राजसमूहस्य, कमलाक्षीजनस्य च ललनासमूहस्य च, हास्यवदान्यो हसितोदारः, बभूव । तं पतितं दृष्ट्वा सर्वे हसन्ति स्मेति भावः ।

कुमारेऽस्मिन्निति—तदानीं तस्मिन् काले, गोविन्दक्षितिपतिर्गोविन्दमहाराजः, प्रोद्यत्तारागणेन समुदीयमाननक्षत्रनिचयेन परिवृते परीते, शीतकिरणे चन्द्रमसि, यथा, धीरे गम्भीरे, सहचरघटाया मित्रमण्डलस्य मध्येऽलसितः शोभितस्तस्मिन्, अस्मिन् कुमारे जीवन्धरे, अधिकां विपुलाम्, दृष्टिं दृशम्, अदात् दत्तवान्, स्मितेन मन्दहसितेन विशदं धवलं वक्त्रं वदनं यस्य तथाभूतः, स एष लोकोत्तरकौशलनिकेतनीभूतः, कुरुवरोऽपि जीवन्धरोऽपि उदस्थात् उदतिष्ठत् 'ष्ठा गतिनिवृत्तौ' इत्यस्य लुङि रूपम् 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुक् । शिखरिणीच्छन्दः ॥ १९ ॥

तदनु सखेलं भुवि पदानि निदधानं जयलक्ष्मीनिबन्धननिगलकटकशङ्कावहमरकताङ्गद-शोभितं सञ्चरणसञ्चलन्मुक्तादामबाभास्यमानवक्षःस्थलं जीवन्धरमवलोक्य तत्रत्या एवमेवं विदामासुः।

कुमारं भूपालाः कतिचन विदुर्भूपतिलकं
परे मर्त्याकारस्थगितममरं संजगदिरे।
सदेहं कन्दर्पं कुवलयदृशोऽवादिषुरमुं
तथा काष्ठाङ्गारप्रमुखमहिपा[1] मृत्युमविदन् ॥ २० ॥

एवं सर्वैर्विलोक्यमानो जीवन्धरो यन्त्रसमीपमासाद्य विद्याजलधिसुधाकरश्चन्द्रकलानु-कारिदंष्ट्राविराजितवराहयन्त्रं चिरं विलोकमानस्तच्छेदनावसरमीक्षमाणः क्षणादधिचक्रमुत्प्लुत्य सज्जीकृतधनुष्टङ्कारकम्पितवसुधातलस्तद्यन्त्रं महीभुजां दर्पं मानिनां खेदं गोविन्दपार्थिवस्य शङ्कां च युगपच्चापसमारोपितरोपेण विव्याध।

आनन्दोद्रिक्तहृदयो गोविन्दमहिपस्तदा।
राज्ञां धुरि जगादोच्चैः प्राज्ञानामग्रणीरिदम् ॥ २१ ॥

तदनु सखेलमिति—तदनु तदनन्तरम्, सखेलं सक्रीडं यथा स्यात्तथा, भुवि मह्याम्, पदानि चरणानि, निदधानं निक्षिपन्तम्, जयलक्ष्म्या विजयश्रिया निबन्धनायावरोधनाय यो निगलकटको निगड-वलयस्तस्य शङ्कावहं संशयोत्पादकं यन्मरकताङ्गदं हरिन्मणिमयकेयूरं तेन शोभितं समलङ्कृतम्, सञ्चरणेन सङ्गमनेन सञ्चलत् चपलीभवद् यन्मुक्तादाम मौक्तिकस्रक् तेन बाभास्यमानमतिशयेन शोभमानं वक्षःस्थलं बाहुमध्यं यस्य तथाभूतम्, जीवन्धरं सात्यन्धरिम्, अवलोक्य दृष्ट्वा, तत्रत्या तत्र स्थिता जनाः, एवमेवम् इत्थमित्थम्, विदामासुर्जज्ञुः।

कुमारं भूपाला इति—कतिचन केऽपि, भूपाला राजानः, कुमारं जीवन्धरम्, भूपतिलकं नृपति-श्रेष्ठम्, विदुर्जज्ञुः, परेऽन्ये भूपालाः, मर्त्याकारेण मनुजवेषेण, स्थगितः पिहितस्तम्, अमरं निर्जरम्, संजगदिरे कथितवन्तः, कुवलयदृशो नीलोत्पललोचना ललनाः, अमुं कुमारम्, सदेहं शरीरसहितम्, कन्दर्पं मीनकेतनम्, अवादिषुरगदिषुः, तथा किञ्च, काष्ठाङ्गारः कृतघ्नः प्रमुखो मुख्यो येषु तथाभूताश्च ते महिपाश्च राजानश्चेति काष्ठाङ्गारप्रमुखमहिपाः मृत्युं यमम्, अविदन् जज्ञुः, अत्र 'अविदन्' इति प्रयोगश्चिन्त्यः, 'सिजभ्यस्तविदिभ्यश्च' इत्यनेन झस्य जुसादेशे 'अविदुः' इति स्यात्। शिखरिणीच्छन्दः ॥२०॥

एवं सर्वैरिति—एवमनेन प्रकारेण सर्वैर्निखिलैः विलोक्यमानो दृश्यमानः, विद्याजलधिसुधाकरो विद्यार्णवरजनीकरः, जीवन्धरो जीवकः, यन्त्रसमीपं वराहयन्त्राभ्यर्णम्, आसाद्य प्राप्य, चन्द्रकलानुकारि-दंष्ट्राभ्यां शशिकलासदृग्दंष्ट्राभ्यां विराजितं शोभितं यद् वराहयन्त्रं तत्, चिरं दीर्घकालं यावत्, विलोकमानः पश्यन्, तस्य च्छेदनस्यावसरमिति तच्छेदनावसरं तद्वराहयन्त्रभेदनकालम्, ईक्षमाणो विलोकमानः, क्षणादल्पकालेनैव, चक्र इत्यधिचक्रं चक्रोपरीति यावत्, उत्प्लुत्य समुद्गत्य, सज्जीकृतं सप्रत्यञ्चीकृतं यद्धनुः कोदण्डं तस्य टङ्कारेणाव्यक्तध्वनिना कम्पितं वेपितं वसुधातलं महीतलं येन तथाभूतः सन्, तद्यन्त्रं पूर्वो-क्तवराहयन्त्रम्, महीं भूमिं भुञ्जन्ति रक्षन्तीति महीभुजस्तेषाम्, दर्पं गर्वम्, मानिनामहङ्कारिणाम्, खेदं द्वेषम् 'खेदो द्वेषोऽपहर्षश्च' इति धनञ्जयः, गोविन्दपार्थिवस्य स्वकीयमातुलस्य, शङ्कां च यन्त्रभेदनवि-दग्धोऽयं न वेति सन्देहञ्च, युगपदेककालावच्छेदेन, चापे धनुषि समारोपितो धृतो यो रोपो बाणस्तेन, विव्याध चिच्छेद।

आनन्दोद्रिक्तहृदय इति—तदा तस्मिन्काले, प्राज्ञानामवसरज्ञानाम्, अग्रणीः प्रधानः, आनन्देन हर्षेणोद्रिक्तं सम्भृतं हृदयं चेतो यस्य तथाभूतः, गोविन्दमहिपो गोविन्दमहाराजः, महि-मही-भूमि-भूर्या,

---

१ महिपा ब०।

धीरो वारिधिमेखलां वसुमतीं प्राक्पालयामास य-
स्तस्य श्लाघ्यगुणस्य मान्ययशसः सत्यन्धरस्यात्मजः ।
एष द्वेषिमहीपदावदहनः प्रख्यातदोर्विक्रमः
श्रीमान् मे भगिनीसुतो विजयते वीरश्रिया वल्लभः ॥ २२ ॥

वसुधाधिपा धनुषि पाटवात्तथा
वपुषि स्फुरद्विशदलक्षणात्क्षणात् ।
क्षितिपालसूनुरयमित्यथास्मर-
न्नवलोक्य तं ललितमभ्यनन्दिषुः ॥ २३ ॥

एवंविधगोविन्दनरपतिवचनेनाशनिगर्जनेन भुजग इव भीतमानसविकारः काष्ठाङ्गारो मनसि चिन्तामेवं तरङ्गयामास ।

सत्यन्धरस्य सूनुश्चेदयं हन्त हता वयम् ।
जागरूका भवन्त्यस्मिन् वीर्यशौर्यपराक्रमाः ॥ २४ ॥

पुरास्मदीयामाज्ञां मालामिव शिरसा समादधानो मथनो वणिक्पाशमेनं कथमवधीत् । अतः सर्वः स्वार्थपरो लोक इति सत्यमेतत् । किं वास्य मातुलः समाहूतः । धिङ्मां मूढपरिवृढ-

वलिल-वल्ली अवनि-अवनीत्यादयः शब्दा ह्रस्वदीर्घाभ्यां यथेच्छं प्रयुज्यन्ते कविभिः, राज्ञां भूपालानाम्, पुरि पुरस्तात्, उच्चैरुच्चस्वरेण, इदं वक्ष्यमाणम्, जगाद समुवाच ॥२१॥

धीरो वारिधिमेखलामिति—प्राक् पूर्वम्, धीरो गम्भीरः, यः, वारिधिरेव मेखला रशना यस्या-स्तां समुद्रान्तामिति यावत्, वसुमतीं पृथिवीम्, पालयामास ररक्ष, श्लाघ्याः प्रशंसनीया गुणा यस्य तस्य, मान्यं समादरणीयं यशः कीर्तिर्यस्य तस्य, सत्यन्धरस्य तन्नामनरेन्द्रस्य, आत्मजः पुत्रः, द्वेषिमहीपा एव प्रत्यर्थिपार्थिवा एव दावा वनानि तेषां दहनोऽनलः 'वने च वनवह्नौ च दवो दाव इहेष्यते' इति विश्वः, प्रख्यातः प्रसिद्धो दोर्विक्रमो भुजपौरुषं यस्य तथाभूतः, श्रीमान् शोभासम्पन्नः, वीरश्रिया वीरलक्ष्म्याः, वल्लभः स्वामी, एष सर्वेषां भवतां पुरस्तादासीनः, मे मम, भगिनीसुतः स्वस्रीयः, विजयते सर्वोत्कर्षेण वर्तते । शार्दूलविक्रीडितच्छन्दः ॥२२॥

वसुधाधिपा इति—अथ गोविन्दभूपोक्त्यनन्तरम्, वसुधाधिपा राजानः, ललितं मनोहरम्, तं जीव-न्धरम्, अवलोक्य दृष्ट्वा, धनुषि कोदण्डे, तथा सत्यन्धरमहाराजस्य यथाभूतादृशात्, पाटवाच्चातुर्यात्, वपुषि देहे, स्फुरत्प्रकाशमानं विशदं निर्मलं यल्लक्षणं चिह्नं तस्मात्, क्षणादचिरेण, अयमेषः, क्षितिपालस्य सत्यन्धरभूपालस्य सूनुः पुत्रः, इतीत्थम्, अस्मरन् निध्यायन्ति स्म, ललितं मनोहरं तं पुत्रम्, अभ्यनन्दिषु-रभिनन्दितवन्तः । मञ्जुभाषिणीवृत्तम् ॥२३॥

एवंविधेति—एवं विधं पूर्वोक्तप्रकारम् यद् गोविन्दनरपतिवचनं गोविन्दभूपालवचस्तेन, अशनि-गर्जनेन वज्रगर्जितेन, भुजग इव पन्नग इव, भीतस्त्रस्तो मानसविकारश्चेतोविकारो यस्य तथाभूतः काष्ठा-ङ्गारः, मनसि चेतसि, एवं वक्ष्यमाणप्रकाराम्, चिन्तां तर्कपरम्पराम्, तरङ्गयामास वर्धयमास ।

सत्यन्धरस्य सूनुरिति—चेद् यदि, अयमेषः, सत्यन्धरस्य महाराजस्य, सूनुः पुत्रः, अस्ति तर्हीति शेषः, वयम्, हता नष्टाः, हन्तेति खेदे, अस्मिन् नरेन्द्रनन्दने, वीर्यं च शौर्यं च पराक्रमश्चेति वीर्यशौर्य-पराक्रमाः शक्तिसुभटत्वपौरुषाणि, जागरूका जागृतिशीलाः, भवन्ति विद्यन्ते ॥२४॥

पुरास्मदीयामाज्ञामिति—पुरा पूर्वम्, अस्मदीयां मामकीनाम्, आज्ञामादेशम्, मालामिव स्रजमिव, शिरसा मूर्ध्ना, समादधानो धरन्, मथन एतन्नामा मच्छ्यालः, एनमेतम्, वणिक्पाशं दुष्टवणिजम्, कथं केन प्रकारेण, अवधीत् अघ्नात् । अतोऽस्मात्कारणात्, सर्वो निखिलः, लोको जनः, स्वार्थपरः स्वप्रयोजन-साधननिपुणः, इत्येतदाभाणकम्, सत्यं तथ्यम् । अस्यैतस्य, मातुलो मामो गोविन्दमहीपाल इति यावत्, किं वा केन कारणेन वा, समाहूतः समाकारितः । मूढपरिवृढं मूर्खस्वामिनम्, अतएव, आत्मवधाय स्वविना-

मात्मवधाय कृत्योत्थापनमाचरन्तम् । किं करिष्यति वा किंकुर्वाणराजसन्दोहेन गोविन्दमहीपालेन कृतसाहाय्यकोऽयं समीरपुरस्कृत इव समीरसखः ।

इति चिन्तां कुर्वाणः खर्वेतरगर्वविजृम्भितक्रोधेन तुमुलसमीकेन कन्यामाहर्तुमना मनागितरबलमेदुरेण क्षुद्रक्षितीशनिकरेण साकं संमन्त्रयितुं स दुर्मेधसामग्रणीर्निजनिवेशमाविवेश ।

पराशयविदा ततः कुरुवरेण राज्ञा सहा-
स्थितेन नयकोविदाः सपदि सोपदाः केचन ।
पितुर्विषयसंगतान्नरपतीन्प्रति प्रेषिता-
स्तथा परिचितान्नृपान्विशदपत्रिकाभिः सह ॥ २५ ॥

सत्यन्धरक्षितिपतेर्विजयामहिष्यां
सञ्जात एष खलु जीवकनामधेयः ।
दैवात्तदा विरहितः कुटिलात्पितृभ्यां
वैश्याधिपस्य समवर्धिषि मन्दिरेऽहम् ॥ २६ ॥

अयं किल दुराचारः काष्ठाङ्गारः काष्ठाङ्गारादिविक्रयेण प्राणसन्धारणं कुर्वाणः क्रमेण युष्मदुर्वीपतिना मन्त्रिपदवीमारोपितस्तमेव निहतवानिति विदितमेव हि भवताम् ।

अतो मम यथा सोऽयमुच्छेद्यो भवतामपि ।
शत्रुत्वाद्राजघत्वाच्च कृतघ्नत्वाद्दुराशयः ॥ २७ ॥

शाय, कृत्योत्थापनं कार्योपस्थापनम्, आचरन्तं कुर्वन्तम्, माम्, धिक् । वाथवा किंकुर्वाणः किङ्करायमाणो राजसन्दोहो नृपतिसमूहो यस्य तथाभूतेन, गोविन्दमहीपालेन गोविन्दभूभुजा, कृतं साहाय्यकं यस्य विहितसाहाय्यः, अयं जीवन्धरः, समीरपुरस्कृतो वायूद्दीपितः समीरसख इव पावक इव, किं करिष्यति किं विधास्यति ।

इति चिन्तामिति—इति पूर्वोक्ताम्, चिन्तां निध्यानम्, कुर्वाणो विदधानः, कन्यां लक्ष्मणाम्, आहर्तुमना आहरणोद्युक्तः दुर्मेधसां दुर्बुद्धीनाम्, अग्रणीरग्रेसरः, स काष्ठाङ्गारः, खर्वेतरश्चासौ गर्वश्चेति खर्वेतरगर्वो दीर्घाहङ्कारस्तेन विजृम्भितो वर्धितः क्रोधो रोषो यस्य तेन, तुमुलं भयङ्करं समीकं युद्धं यस्य तेन, मनागितरबलेन दीर्घसैन्येन मेदुरो मिलितस्तेन, क्षुद्रक्षितीशानां तुच्छप्रकृतिकपार्थिवानां निकरेण समूहेन, साकं सार्धम्, समन्त्रयितुं गुप्तमन्त्रणां कर्तुम्, निजनिवेशं स्वनिकेतनम्, आविवेश प्राविशत् ।

पराशयविदेति—ततस्तदनन्तरम्, पराशयविदा पराभिप्रायज्ञेन, राज्ञा गोविन्दभूपालेन, सह सार्धम्, आस्थितेन विद्यमानेन, कुरुवरेण जीवन्धरेण, सपदि शीघ्रम्, नयकोविदा नीतिनिपुणाः, सोपदाः सोपायनाः, केचन केऽपि पुरुषाः, पितुः सत्यन्धरस्य, विषयसंगतान् देशस्थितान्, नरपतीन् नृपान्, तथा किञ्च, परिचितानभिज्ञातान्, नृपान् भूपान्, प्रति, विशदपत्रिकाभिः स्पष्टोदन्तदलैः, सह साकम्, प्रेषिताः प्रहिताः । पृथ्वीछन्दः ॥२५॥

सत्यन्धरक्षितिपतेरिति—खलु निश्चयेन, जीवकनामधेयो जीवन्धरनाम्ना विश्रुतः, एषोऽहम्, सत्यन्धरक्षितिपतेः सत्यन्धरमहीभृतः, विजयामहिष्यां विजयाराज्ञ्याम्, सञ्जातः समुत्पन्नः, तदा जन्मवेलायाम्, कुटिलाद् वक्रात्प्रतिकूलादिति यावत्, दैवाद् भाग्यात्, पितृभ्यां मातापितृभ्याम्, विरहितो वियुक्तः, सन्, वैश्याधिपस्य गन्धोत्कटस्य, मन्दिरे भवने, समवर्धिषि संवृद्धोऽभूवम् । वसन्ततिलकावृत्तम् ॥ २६ ॥

अयं किलेति—अयं किल एष किल, दुराचारो दुर्वृत्तः, काष्ठाङ्गार एतन्नामकृतघ्नः, काष्ठाङ्गारादीनां भामिङ्गालादीनां विक्रयेण, प्राणसन्धारणं जीविकाम्, कुर्वाणो विदधानः, क्रमेण क्रमशः, युष्मदुर्वीपतिना भवद्भूपालेन सत्यन्धरमहाराजेनेति यावत्, मन्त्रिपदवीं सचिवास्पदम्, आरोपितोऽधिष्ठापितः, सन्, तमेव भूपालमेव, निहतवान् मारयामास, इति हि भवतां युष्माकम्, विदितमेव ज्ञातमेव ।

अतो ममेति—अतोऽस्मात्कारणात्, सोऽयं कृतघ्नशिरोमणिः, यथा येन प्रकारेण, मम सत्पुरुषस्य,

रसातले वा वसुधातले वा महीधरे वा विपिनान्तरे वा ।
तिरोहितश्चेदपि हन्यतेऽसौ ततः समागच्छत वाहिनीभिः ॥ २८ ॥
संदेशमेवं कुरुकुञ्जरस्य सामन्तभूपाः शिरसा दधानाः ।
सत्यन्धरे भक्तिवशेन नुन्नाः सेनासमेता मिलिता बभूवुः ॥ २९ ॥

तावन्नयविशालो नाम कुरुवीरदूतः, सचिववृद्धस्य नयपारगस्य धर्मदत्तस्य निकेतने प्रविश्य, तेन विदितोदन्तेन सन्धानाय नरेन्द्रमन्दिरं नीयमानः, तत्र परिमितैर्नरपालैः परिवृतम्, अनतिदूरावस्थितेन सविनयमवनमितपूर्वकायेन मथनेन सविस्रम्भमालपन्तम्, क्रोधकृशानुविस्फुरन्निश्वासधूमविवर्णमुक्ताहारं काष्ठाङ्गारमुपजगाम । तत्र धर्मदत्त एवं जगाद ।

जानाति देवः सकलं तथापि श्रोतव्यवाचः सचिवा नृपेण ।
नाकाधिराजोऽपि निरीक्ष्यकृत्यो बृहस्पतेर्वाग्विसरं शृणोति ॥ ३० ॥

इदानीमुदारसत्त्वैर्गरुडवेगगोविन्दपल्लववल्लभप्रभृतिभिः खेचरतदितरमहीपालैर्नन्दाढ्यप्रमुखैर्महावीरैः सहचरैश्च परिवृतः कल्पान्तजलधिरिव निरर्गलप्रसरः सकलजगतीतलविख्यातवीरो जीवन्धरकुमारः क्रुद्धो युद्धाय बद्धादरो वर्तते ।

उच्छेद्यो विनाशनीयः, अस्तीति शेषः, तथा तेन प्रकारेण, शत्रुत्वाद्रिपुत्वात्, राजघ्नत्वात् नृपतिघातकत्वात्, कृतघ्नत्वाच्चाकृतज्ञत्वाच्च, दुराशयो दुष्टाभिप्रायः, सः, भवतामपि युष्माकमपि, उच्छेद्योऽस्तीति सम्बन्धो योजनीयः ॥२७॥

रसातले वेति—असौ काष्ठाङ्गारः, रसातले वा पाताले वा, वसुधातले वा भूतले वा, महीधरे वा पर्वते वा, विपिनान्तरे वा वनमध्ये वा तिरोहितोऽन्तर्हितः, चेदपि यद्यपि, भवेदिति शेषः, तथापि, हन्यते मार्यते, ततः कारणात्, यूयं, वाहिनीभिः पृतनाभिः, सह, समागच्छत समायात ॥२८॥

सन्देशमेवमिति—एवं पूर्वोक्तप्रकारम्, कुरुकुञ्जरस्य जीवन्धरस्य, सन्देशं वाचिकम्, शिरसा मूर्ध्ना, दधाना धरन्तः, सामन्तभूपा मण्डलेश्वराः, सत्यन्धरे जीवन्धरजनके, भक्तिवशेन प्रीत्यतिशयेन, नुन्नाः प्रेरिताः, सन्तः, सेनासमेताः पृतनायुताः, मिलिताः संगताः, बभूवुरासन् ॥२९॥

तावन्नयविशालो नामेति—तावत्–यावत् सामन्तभूपाः समागतास्तावत्, नयविशाल एतन्नामधेयः कुरुवीरदूतो जीवन्धरसंदेशहरः, सचिवेषु मन्त्रिषु वृद्धो ज्येष्ठस्तस्य, नयस्य पारं गच्छतीति नयपारगस्तस्य महानीतिज्ञस्य, धर्मदत्तस्य तन्नामामात्यस्य, निकेतने भवने, प्रविश्य प्रवेशं कृत्वा, विदितोदन्तेन विज्ञातसमाचारेण, तेन धर्मदत्तेन, सन्धानाय सन्धिं कर्तुम्, नरेन्द्रमन्दिरं काष्ठाङ्गारनिकेतनम्, नीयमानः सन्, प्राप्यमाणः सन्, तत्र नरेन्द्रमन्दिरे, परिमितैः कतिपयैः, नरपालै राजभिः, परिवृतं परीतम्, अनतिदूरावस्थितेन निकटस्थितेन, सविनयं विनयोपेतं यथा स्यात्तथा, अवनमितो नीचैः कृतः पूर्वकायः पूर्वशरीरभागो यस्य तेन, मथनेन तन्नामस्वश्यालेन सविस्रम्भं सप्रत्ययं यथा स्यात्तथा, आलपन्तं भाषमाणम्, क्रोधकृशानोः कोपवैश्वानरस्य विस्फुरन्निर्गच्छन्यो निःश्वास एव धूमस्तेन विवर्णो मलिनो मुक्ताहारो मौक्तिकदाम यस्य तम्, काष्ठाङ्गारं कृतघ्नशिरोमणिम्, उपजगाम समुपयाति स्म । तत्र धर्मदत्तः सचिववृद्धः, एवमनेन प्रकारेण, जगाद प्रोवाच ।

जानातीति—यद्यपि देवो भवान्, सकलं कृत्स्नम्, जानाति बुध्यते, तथापि, नृपेण राज्ञा, सचिवा मन्त्रिणः, श्रोतव्या आकर्णनीया वाक् येषां तथाभूताः, सन्ति, निरीक्ष्यं कृत्यं कार्यं यस्य तथाभूतः, नाकाधिराजोऽपि पुरन्दरोऽपि, बृहस्पतेर्वाचस्पतेः, वाग्विसरं वचनसमूहम्, शृणोति समाकर्णयति ॥ ३० ॥

इदानीमिति—इदानीं साम्प्रतम्, उदारसत्त्वैरुत्कृष्टपराक्रमैः, गरुडवेगश्च गोविन्दश्च पल्लववल्लभश्चेति गरुडवेगगोविन्दपल्लववल्लभास्ते प्रभृति येषां तैः, खेचरतदितरमहीपालैर्विद्याधरतदितरभूपतिभिः, नन्दाढ्यप्रमुखैर्नन्दाढ्यप्रधानैः, महावीरैर्महासुभटैः, सहचरैश्च वयस्यैश्च, परिवृतः परिवेष्टितः, कल्पान्तजलधिरिव प्रलयपाथोनिधिरिव, निरर्गलः स्वच्छन्दः प्रसरो यस्य तथाभूतः, सकलजगतीतले निखिलभूमितले विख्यात-

व्याधान्दुःसाधबाधान्गजतुरगमुखैर्मद्बलैः सम्प्रवृत्तै-
  र्हेलामात्रेण जित्वा निखिलपशुगणं मोचयामास यः प्राक् ।
वीणाशुल्के च दृप्यन्नरपतिनिचयं धावयामास संख्ये
  सोऽयं नैकोऽपि जय्यः किमुत खगनराधीश्वरैः संगतश्चेत् ॥ ३१ ॥

अत इदमनिदं प्रथमप्रवृत्तं त्वदीयराजपदं तद्भुजे समर्प्य यथापुरं सचिवपदमधिष्ठातुमर्हति देव इति ।

एवं मन्त्रिगिरं निशम्य समयं तूष्णीं स्थितः सोऽवदत्
  कर्णे लग्नमुखेन तत्र मथनेनादीपितक्रोधनः ।
रे रे केन ससाध्वसं बहुतरं पृष्टोऽसि वक्तुं पुरो
  भीरुस्त्वं यदि तिष्ठ वेश्मनि मुधा क्लीबोऽसि किं भाषितैः ॥ ३२ ॥

माद्यद्दन्तिघटापटुस्फुटनटद्घोटप्रहृष्यद्भटा-
  टोपाच्छादितदिक्तटे रणतले खड्गोल्लसद्धारया ।
आहृत्य श्रियमाहवोद्यतरिपुक्षोणीभृतामुज्ज्वलां
  कीर्त्या कोमलया दिशां धवलयाम्युत्फुल्लकुन्दश्रिया ॥ ३३ ॥

श्चासौ प्रसिद्धश्चासौ वीरश्चेति सुभटश्चेति सकलजगतीतलविख्यातवीरः, जीवन्धरकुमारः सात्यन्धरिः; क्रुद्धो रुष्टः सन्, युद्धाय समराय, बद्धादरो बद्धसन्मानस्तत्पर इति यावत्, वर्तते विद्यते ।

व्याधानिति—यो जीवन्धरः, प्राक् पूर्वम्, गजतुरगमुखैर्हस्तिहयप्रधानैः, सम्प्रवृत्तैः सञ्चलितैः, मद्बलैरस्मत्सैन्यैः, दुःसाधबाधान् विकटान्, व्याधान् शबरान्, हेलामात्रेण लीलामात्रेण, जित्वा पराभूय, निखिलपशुगणं सकलपशुसमूहम्, मोचयामास मोचयति स्म, वीणाशुल्के च गन्धर्वदत्तापरिणयवेलायां वीणावादनशुल्के च, दृप्यन्तोऽहङ्कुर्वन्तो ये नरपतयो राजानस्तेषां निचयः समूहस्तम्, संख्ये समरे, धावयामास विद्रावयामास, सोऽयं जीवन्धरः, एकोऽप्येकाक्यपि, न जय्यो न जेतुं शक्यः, चेद्यदि, खगनराधीश्वरैः विद्याधरधरावल्लभैः, संगतः सहितः, तर्हि, किमुत किम्पुनर्वक्तव्यम् ? स्रग्धराच्छन्दः ॥ ३१ ॥

अत इदमिति—अतोऽस्मात्कारणात्, अनिदं, प्रथमप्रवृत्तं प्राक्प्रवृत्तम्, इदमेतत्, त्वदीयराजपदं त्वत्सम्बन्धिराज्यभारः, तद्भुजे तद्बाहौ, समर्प्य निक्षिप्य, यथापुरं पूर्ववत्, सचिवपदममात्यस्थानम्, अधिष्ठातुमधिवसितुम्, देवो भवान्, अर्हति योग्योऽस्ति, इति धर्मदत्तामात्यः काष्ठाङ्गारं जगादेति सम्बन्धः ।

एवं मन्त्रिगिरमिति—एवमित्थम्, मन्त्रिगिरं सचिवभारतीम्, निशम्य श्रुत्वा, समयं क्षणं यावत्, तूष्णीं निर्वचनम्, स्थितो विद्यमानः, तत्र स्थाने, कर्णे श्रवसि, लग्नमुखेन संयोजितवदनेन, मथनेन तन्नामशालेन, आदीपितं प्रज्वलितं क्रोधनं क्रोधो यस्य तथाभूतः सन्, अवदत् जगाद, रे रे वृद्धापसद, ससाध्वसं सभयम्, बहुतरं प्रभूतम्, पुराऽग्रे, वक्तुं निगदितुम्, केन पृष्टोऽसि पृच्छाविषयीकृतोऽसि, त्वं यदि भीरुः कातरस्तर्हि, वेश्मनि भवने, तिष्ठ स्थितो भव, क्लीबोऽसि नपुंसकोऽसि, मुधा व्यर्थम्, भाषितैः कथनैः, किं किंप्रयोजनं न किमपीति यावत् ॥ ३२ ॥

माद्यद्दन्तिघटेति—माद्यतां दन्तिनां घटा इति माद्यद्दन्तिघटा गन्धगजगणाः, पटुस्फुटं चातुर्यप्रकाशं यथा स्यात्तथा नटन्तो नृत्यन्तो ये घोटा हया इति पटुस्फुटनटद्घोटाः, प्रहृष्यन्तश्च ते भटाश्चेति प्रहृष्यद्भटाः प्रमोदमानशूराः; माद्यद्दन्तिघटाश्च पटुस्फुटनटद्घोटाश्च प्रहृष्यद्भटाश्चेति माद्यद्दन्तिघटापटुस्फुटनटद्घोटप्रहृष्यद्भटाः तेषामाटोपेन विस्तारेणाच्छादितानि पिहितानि दिक्तटानि काष्ठान्तभागा यस्मिंस्तस्मिन्, रणतले समराङ्गणे, खड्गस्य कृपाणस्योल्लसन्ती शोभमाना या धारा तीक्ष्णाग्रभागस्तया, आहवे समर उद्यता तत्परा इत्याहवोद्यता स्ते च ते रिपुक्षोणीभृतश्च शत्रुराजाश्चेति तेषाम्, उज्ज्वलां निर्मलाम्, श्रियं लक्ष्मीम्, आहृत्य समाक्षिप्य, कोमलया मृदुलया, उत्फुल्लानां विकसितानां कुन्दानां माघ्यानां श्रीरिव श्रीर्यस्यास्तया, कीर्त्या यशसा, दिशः काष्ठाः, धवलयामि धवलाः करोमि ॥ ३३ ॥

किञ्च ।

आ जन्मतो न लिखितं भुवनाधिपत्यं
यत्फालसीमनि परं तु वणिक्क्रियैव ।
तेनाधमेन वणिजस्तनयेन किंवा
सन्धानमद्य नरपालमणीशिनां नः ॥ २४ ॥

ध्वजिनीरुद्धपार्श्वस्य मथनस्य शरावलेः ।
विघसोऽजनि यः पूर्वं कवलीक्रियतेऽधुना ॥ ३५ ॥

इति दर्पदुर्ललितवचनविलसितमाकर्ण्य कोपारुणीकृतभालो नयविशालो गम्भीरमिमां गिरमुज्जगार ।

पुलिन्दवृन्देन गवां कुले हृते बलेन साकं मथने पलायिते ।
पिधाय वेगेन कवाटमन्ततो धृतो वधूभिस्तनुकम्पमत्यजः ॥ ३६ ॥

एवंविधपराक्रममण्डितभुजदण्डमण्डितस्य न युक्तमेव कौरवेण सन्धानम् ।

किं धर्मदत्तेन हि षण्डवृत्त्या प्रचण्डवृत्त्या भवतापि किं वा ।
कुरुप्रवीरस्य करामनुन्नं राज्यश्रियं चक्रमलं प्रदातुम् ॥ ३७ ॥

इति निगद्य जवान्निर्गत्य यथावृत्तं कुरुवीरं विज्ञापयति नयविशाले विशालतरसमीकसंनाहः

किञ्च—किञ्चान्यत् किमपि ।

आ जन्मत इति—यत्फालसीमनि यत्ललाटावधौ, आ जन्मतो जन्मन आरभ्य, भुवनाधिपत्यं लोकसाम्राज्यम्, न लिखितं नाङ्कितम्, परन्तु किन्तु, वणिक्क्रियैव सार्थवाहकृतिरेव, लिखिता विहिता, अधमेन नीचेन, तेन पूर्वोक्तेन, वणिजो वैश्यस्य, तनयेन पुत्रेण, नरपालमणीशिनां नरपालमणिषु श्रेष्ठराजेषु ईशास्ते ऐश्वर्ययुक्ता भवन्तीत्येवं शीलास्तेषाम्, नोऽस्माकम्, अद्य साम्प्रतम्, किं वा सन्धानं सन्धिकरणम्, सर्वथाऽशक्यं तदिति भावः ॥ ३४ ॥

ध्वजिनीरुद्धेति—यो वणिक्तनयः, पूर्वं प्राक्, ध्वजिन्या पृतनया रुद्धं परीतं पार्श्वं समीपप्रदेशो यस्य तस्य, मथनस्य काष्ठाङ्गारश्यालस्य, शरावलेर्बाणसमूहस्य, विघसो भुक्तावशिष्टः, अजनि बभूव, स इति शेषः, अधुना साम्प्रतम्, कवलीक्रियते ग्रस्यते ॥ ३५ ॥

इति दर्पेति—इतीत्थम्, दर्पेण गर्वेण दुर्ललितानि विसंष्ठुलानि यानि वचनानि वचांसि तेषां विलसितं विलासम्, आकर्ण्य निशम्य, कोपेन रुषारुणीकृतो लोहितीकृतो भालो निटिलो यस्य तथाभूतः, नयविशाल एतन्नाम जीवन्धरसुहृत्, गम्भीरं यथा स्यात्तथा, इमां वक्ष्यमाणाम्, गिरं वाणीम्, उज्जगार प्रकटयामास ।

पुलिन्दवृन्देनेति—पुलिन्दवृन्देन शबरसमूहेन, गवां सौरभेयीणाम्, कुले समूहे, हृते मुषिते, बलेन सैन्येन, साकं सार्धम्, मथने भवच्छ्याले, पलायिते दर्शितपृष्ठे, सति, अन्ततोऽन्ते, वेगेन रयेण, कवाटमररम्, पिधाय मेलयित्वा, वधूभिर्ललनाभिः, धृतो दत्तालम्बनः कृताश्वासश्च सन्, तनुकम्पं शरीरवेपथुम्, अत्यजस्त्यक्तवान्, एवं नु भो महाशूरस्त्वमिति सोत्प्रासवाक्यम् ॥ ३६ ॥

एवंविधेति—एवंविधपराक्रमेण पूर्वोक्तप्रकारविक्रमेण मण्डितौ शोभितौ यौ भुजदण्डौ बाहुदण्डौ ताभ्यां मण्डितस्य शोभितस्य, तव, कौरवेण जीवकेन, सह सन्धानं सन्धिकरणं मेलनमिति यावत्, न युक्तमेव नोचितमेव, सुष्ठूक्तं त्वयेति भावः ।

किं धर्मदत्तेनेति—षण्डवृत्त्या क्लीबवृत्त्या, उपलक्षितेन, धर्मदत्तेन तन्नामवृद्धामात्येन, हि निश्चये, किं किं प्रयोजनम्, प्रचण्डवृत्त्या तीक्ष्णव्यवहारेण, उपलक्षितेन, भवतापि त्वयापि, वा किं किं प्रयोजनम्, न किमपीति यावत्, कुरुप्रवीरस्य जीवन्धरस्य, करप्रणुन्नं हस्ताग्रप्रेरितम्, चक्रं शस्त्रविशेषः, राज्यश्रियं राज्यलक्ष्मीम्, प्रदातुं समर्पयितुम्, अलं पर्याप्तं समर्थमिति यावत् ॥ ३७ ॥

इति निगद्येति—इत्येवम्, निगद्य नितरां कथयित्वा, जवाद्वेगात्, निर्गत्य निष्क्रम्य, यथावृत्तं यथाभूतम्, कुरुवीरं जीवन्धरम्, विज्ञापयति निवेदयति, नयविशाले तदभिधानसुहृदि, विशालतरो विपुलतरः

कुरुकुमारः पद्मास्यं वरूथिनीनामाधिपत्ये विधाय यथायोग्यं गरुडवेगगोविन्दलोकपालपल्लवमही-पालप्रभृतीनापृच्छ्य रणाङ्गणावतरणाय सेनामादिदेश।

काष्ठाङ्गारोऽपि सेनायाः पतिं मथनमादिशत्।
पृतनायाः प्रयाणाय रणरङ्गस्थलं प्रति॥ ३८॥

तदनु विकटकटविगलद्दानधाराप्रवाहानुभयतः सृजद्भिः सनिर्झरैरिव नीलाचलैर्विशददन्त-प्रभादन्तुरिताङ्गतया रजनिकरकरनिकरचुम्बितसंवर्तकालाम्बुदविडम्बकैः कर्णद्वयसन्दानितधवल-चामरशोभिततया पद्मिनामसाम्येन समागतमरालशङ्कामङ्कुरयद्भिः पादन्यासेन महीं कम्पयद्भिः घनाघनघनगर्जितानुकारिबृंहितरवेण गिरिदरीसुखसुप्तपञ्चास्यान् कोपेनोत्पत्य कुत्रत्योऽयं करिशब्द इति निरीक्षमाणान् कुर्वाणैर्वारणैः सञ्छादितदिग्भागाः, सूर्याश्वशिरस्ताडनायेवोर्ध्वप्रसारितपूर्वचरण-युगलैः प्रलयजलधरविमुक्तवर्षोपलासारपरुषेण जर्जरयतेव वसुधातलमतिनिष्ठुरेण खरखुरपुट-विन्यासेन जनितपांसुपारम्परीभिः सकलजगदन्धङ्करणधुरीणैर्हेषितरवेण गगनतलं पूरयद्भिः प्रति-पक्षैरिव मारुतस्य प्रत्यादेशैरिवोच्चैःश्रवसो निदर्शनैरिव मनसो मूर्तैरिव जवैर्गन्धर्वैरुपशोभिताः,

---

सर्मीकसंनाहो युद्धाभिनिवेशो यस्य तथाभूतः, कुरुकुमारो जीवकः, पद्मास्यं तन्नामसखम्, वरूथिनीनां पृतनानाम्, आधिपत्ये स्वामित्वे, विधाय कृत्वा, तं सेनापतिं कृत्वेति यावत्, यथायोग्यं यथार्हम्, गरुडवेगश्च गोविन्दश्च लोकपालश्च पल्लवमहीपालश्चेति गरुडवेगगोविन्दलोकपालपल्लवमहीपालाः, ते प्रभृतिर्येषां तान्, आपृच्छ्यामन्त्र्य, रणाङ्गणे समरचत्वरेऽवतरणं प्रवेशस्तस्मै, सेनां चमूम्, आदिदेश समादिष्टवान्।

काष्ठाङ्गारोऽपीति—काष्ठाङ्गारोऽपि राजघोऽपि, पृतनायाः सेनायाः, रणरङ्गस्थलं प्रति समररङ्गभूमि-मुद्दिश्य, प्रयाणाय प्रस्थानाय, मथनं तन्नामधेयम्, सेनायाः पतिं ध्वजिन्या नाथम्, आदिशत् आज्ञा-पयामास॥ ३८॥

तदन्विति—तदनु तदनन्तरम्, उभयतः पार्श्वद्वये, विकटकटाभ्यां विशालगण्डाभ्यां विगलन्तः पतन्तो ये दानधारा प्रवाहा मदधारास्रोतांसि तान्, सृजद्भी रचयद्भिः, सनिर्झरैर्निर्झरोपेतैः, नीलाचलैरिव नील-पर्वतैरिव, विशददन्तप्रभाभिर्धवलरदनदीप्तिभिर्दन्तुरितं व्याप्तमङ्गं देहो येषां तेषां भावस्तत्ता तया, रजनि-करस्य चन्द्रमसः करनिकरेण किरणकलापेन चुम्बिताः संयुक्ता ये संवर्तकालाम्बुदाः प्रलयकालवारिदास्तेषां विडम्बका अनुकर्तारस्तैः, कर्णद्वये श्रवणयुग्मे सन्दानिताभ्यां बद्धाभ्यां चामराभ्यां बालव्यजनाभ्यां शोभिततया समलङ्कृततया, पद्मेति नाम पद्मनाम तस्य साम्यं सादृश्यं तेन 'पद्मोऽस्त्री पद्मके व्यूहनिधिसङ्ख्यान्तरेऽम्बुजे। ना नागे स्त्री फञ्जिकाश्रीचारटीपन्नगेषु च' इति मेदिनी, समागताः समायाता ये मराला हंसास्तेषां शङ्का सन्देहम्, अङ्कुरयद्भिः प्रादुर्भावयद्भिः, पादन्यासेन चरणनिक्षेपेण, महीं भूमिम्, कम्पयद्भिर्वेपयद्भिः, घनाघनस्य मेघस्य यद् घनगर्जितं विकटगर्जनं तस्यानुकारि यद् बृंहितं गजशब्दस्तस्य रवो नादस्तेन, गिरिदरीषु शैलगुहासु सुखेन शर्मणा सुप्ताः कृतशयना ये पञ्चास्याः सिंहास्तान्, कोपेन रोषेण, उत्पत्योत्क्रम्य, कुत्रत्योऽयं कुत्रभवोऽयम्, करिशब्दो गजगर्जितम्, इति हेतोः, निरीक्षन्त इति निरीक्षमाणा अवलोकमाना-स्तान्, कुर्वाणैर्विदधानैः, वारणैर्गजैः, सञ्छादिताः पिहिता दिग्भागाः काष्ठाप्रदेशा येषां ते, सूर्याश्वानामर्क-हयानां शिरसि मूर्ध्नि ताडनं प्रहरणं तस्मा इव, ऊर्ध्वप्रसारितमुन्नमितं चरणयुगलं येषां तैः, प्रलयजलधरैः प्रलयमेघैर्विमुक्तस्त्यक्तो यो वर्षोपलानां करकाणामासारो धारासंपातस्तद्वत् परुषः कठोरस्तेन, वसुधातलं भूतलम्, जर्जरयतेव जीर्णं कुर्वतेव, अतिनिष्ठुरेण कठोरातिशयेन, खरखुरपुटानां तीक्ष्णखुरपुटानां विन्यासो निक्षेपस्तेन, जनिताः समुत्पादिता याः पांसुपारम्पर्यो धूलिसन्ततयस्ताभिः, सकलजगतो निखिलभुवनस्या-न्धङ्करणे सतिमिरीकरणे धुरीणा निपुणास्तैः, हेषितरवेण हेषाध्वनिना, गगनतलं व्योमतलम्, पूरयद्भिः सम्भरद्भिः, गरुत्मतो गरुडस्य प्रतिपक्षैरिव प्रतिद्वन्द्विभिरिव, मारुतस्य पवनस्य, पक्षैरिव प्रतिकृतिभिरिव, उच्चैःश्रवसो देवराजवाजिनः प्रत्यादेशैरिव निराकरणैरिव, मनसश्चेतसः, निदर्शनैरिव दृष्टान्तैरिव, मूर्तैः शरीरधारिभिः, जवैरिव वेगैरिव, गन्धर्वैर्वाहैः, 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः, उपशोभिता

सुरविमानसकाशैश्चक्रक्षुण्णक्षोणीतलैर्मनोरथैरिवाभिलषितरथैः परिपूर्णाः, क्ष्वेलारवबधिरीकृतलोकैर्विविधायुधैर्विचित्रैर्विधृततनुत्रैः पदातिभिः परिवृताः, उभयेऽपि सैनिकाः, क्रमेणाजिराङ्गणमगाहन्त । तत्र च,

> अभ्रंलिहानां पटमन्दिराणां पङ्क्तिर्बभौ शारदमेघशुभ्रा ।
> विचित्रयुद्धस्य विलोकनाय समागता राजपुरीव साक्षात् ॥ ३१ ॥

तदनु विनिर्मितविशालशिबिरसहस्रविराजमानम्, मदमेदुरसिन्धुरघटान्धकारितदिङ्मुखतया जलधरदिवसायमानम्, अभ्रङ्कषैरपहसितरजताचलशोभैरमलसुधाधवलैर्मन्थानगिरिमथ्यमानदुग्धसिन्धुगर्भविलुठत्तरङ्गायमानानिलडोलायितसितध्वजतया उपरिपरिपतदभ्रगङ्गाप्रवाहैरिव तुषारगिरिशिखरैः पटमन्दिरैर्विभ्राजितम्, नीलकवचावगुण्ठितदेहैः सितोष्णीषैरत्युन्नतवेत्रासनोपरिविष्टैर्धर्ममयैरिव धर्माधिकारिभिर्महापुरुषैस्तन्तन्यमानसेनासंविभागसंविधानम्, स्फुरितनिशितकरधृतकरवालप्रतिबिम्बप्ररोहकरालितातपेनोर्ध्वावरुद्धमौक्तिकलापेन धवलचन्दनलिप्तभुजदण्डेन सेवकजनेनाध्यासितद्वारदेशम्, विविधवस्तुविचित्रितैः पण्याहरणसंमर्दनपरक्रयिकविक्रयिकलोकैर्महाविपणिपथैरुपशोभितम्, यौवनमदमत्ततरुणजनानुसार्यमाणतरुणीजननिरन्तरवेशवाटम्, विविधायुधसंस्कारपरजनसंभ्राम्यमाणशाणचक्रप्रभृतिसंस्कारसाधनसंकुलादितं तद्रङ्गस्थलमशोभत ।

विराजिताः, सुरविमानसकाशैर्देवयानसन्निभैः, चक्रै रथाङ्गैः क्षुण्णं विदीर्णं क्षोणीतलं भूतलं यैस्तैः, मनोरथैरभिलषितैरिव, अमितरथैरसंख्यस्यन्दनैः, परिपूर्णा युक्ताः, क्ष्वेलारवेण सिंहनादेन बधिरीकृताः श्रवणशक्तिरहितीकृता लोका जना यैस्तैः, विविधानि विविधप्रकाराणि यान्यायुधानि शस्त्राणि तैर्विचित्रैर्विस्मयकारिभिः, विधृततनुत्रैर्धृतकवचैः, पदातिभिः पत्तिभिः, परिवृताः परीताः, उभयेऽपि पक्षद्वयसम्बन्धिनः, सैनिका योद्धारः, क्रमेण क्रमशः, आजिराङ्गणं समरचत्वरम्, अगाहन्त प्रविविशुः । तत्र च तस्मिन्नजिराङ्गणे च ।

अभ्रंलिहानामिति—अभ्रंलिहानां गगनचुम्बिनाम्, पटमन्दिराणां पटभवनानाम्, शारदमेघशुभ्रा शारदजलधरधवला, पङ्क्तिस्ततिः, विचित्रयुद्धस्य विलक्षणसाम्परायस्य, विलोकनाय दर्शनाय, समागता सम्प्राप्ता, साक्षात्, राजपुरीव हेमाङ्गदराजधानीव, बभौ शुशुभे ॥ ३१ ॥

तदन्विति—तदनु तदनन्तरम्, तद्रङ्गस्थलं तत्समरक्षेत्रम्, अशोभत व्यराजत, कथंभूतं तदिति तदेव विशेषयितुमाह—विनिर्मिता रचिता या विशालशिबिरा विस्तीर्णस्कन्धावारास्तासां सहस्रैर्दशशतैर्विराजमानं शोभमानम्, मदमेदुरा दानमिलिता या सिन्धुरघटा गजपङ्क्तिस्तयान्धकारितं तिमिरितं दिङ्मुखं काष्ठान्तो यस्मिंस्तस्य भावस्तत्ता तया, जलधरदिवसायमानं प्रावृड्वदाचरत्, अभ्रंकषैर्मेघस्पर्शिभिः अपहसिता पराभूता रजताचलशोभा विजयार्धश्रीर्यैस्तैः, अमलसुधाधवलैर्निर्मलचूर्णोज्ज्वलैः, मन्थानगिरिर्मन्दरपर्वतस्तेन मथ्यमानो विलोड्यमानो यो दुग्धसिन्धुः क्षीरार्णवस्तस्य गर्भे मध्ये विलुठन्तः सञ्चलन्तो ये तरङ्गा कल्लोलास्तद्वदाचरन्ति, अनिलडोलायितानि पवनप्रकम्पितानि सितध्वजानि शुक्लपताका यस्मिंस्तस्य भावस्तत्ता तया, उपरि परिपतन्तः स्खलन्तोऽभ्रगङ्गाप्रवाहा मन्दाकिनीस्रोतांसि येषां तैः, तुषारगिरिशिखरैर्हिमालयशृङ्गैरिव, पटमन्दिरैर्वस्त्रनिकेतनैः, विभ्राजितम्, नीलकवचैः श्यामतनुत्रैरवगुण्ठितः संवृतो देहो येषां तैः, सितोष्णीषैर्धवलशिरोवेष्टनैः, अत्युन्नतानि तुङ्गतमानि यानि वेत्रासनानि वेत्रविष्टराणि तेषामुपरिविष्टैरुपरिस्थितैः, धर्ममयैरिव धर्मनिर्मितैरिव, धर्माधिकारिभिर्धर्माधिकारयुक्तैः, महापुरुषैर्महाजनैः, तंतन्यमानं विस्तार्यमाणं सेनासंविभागस्य पृतनाविभागस्य संविधानं करणं यस्मिंस्तत्, स्फुरितः सञ्चलितो निशितस्तीक्ष्णो यः करधृतो हस्तावलम्बितः करवालः कृपाणस्तस्मिन् प्रतिबिम्बं प्रतिफलनं तस्य प्ररोहैः किरणाङ्कुरैः करालितो व्याप्तः आतपो घर्मो येन तथाभूतेन, ऊर्ध्वमुपरि अवरुद्ध आवृतो मौक्तिकलापो मुक्तासमूहो येन तेन, धवलचन्दनेन शुक्लमलयजेन लिप्तो दिग्धो भुजदण्डो बाहुदण्डो यस्य तेन, सेवकजनेन सेवकसमूहेन अध्यासितोऽधिष्ठितो द्वारदेशो यस्य तत्, विविधवस्तुभिरनेकविधपदार्थैर्विचित्रिताः शबलानि तैः, महाविपणिपथैर्विस्तीर्णहट्टमार्गैः, उपशोभितं समलङ्कृतम्, यौवनमदेन तारुण्यातिरेकेण मत्ता मदयुक्ता ये तरुणजना युवजनास्तैरनुसार्यमाणोऽनुगम्यमानो यस्तरुणीजनो युवतिसमूहस्तेन निरन्तरः सङ्कीर्णो

युद्धप्रारम्भकेलीपिशुनजयमहावाद्यघोषैरशेषै-
हेषारावैर्हयानां मदमुदितकरिबृंहितैर्जृम्भमाणैः ।
रथ्याध्वानैः पदातिप्रचुरतरगलत्सिंहनादैरमन्दैः
शब्दैकाम्भोधिमग्नं जगदिदमभवत्कम्पमानं समन्तात् ॥ ४० ॥

रणान्तरायं कुर्वाणा धूल्यो या व्योम्नि जृम्भिताः ।
तन्नाशाय ध्वजा मृत्युसंमार्जन्य इवारुचन् ॥ ४१ ॥

उद्यन्निस्साणराणप्रसरमथ सुरा जृम्भमाणं निशम्य
क्षीबक्षोणीपतीनां कदनविलसितं वीक्षितुं संप्रवृत्तम् ।
पुष्पाण्याहृत्य कल्पक्षितिरुहवनतः सौरभाकृष्टभृङ्ग-
व्यूहव्याराबपूराण्यधिककुतुकतः संगता व्योमसीम्नि ॥ ४२ ॥

सेनापयोधी समदाट्टहासौ शनैः शनैः संघटितौ व्यभाताम् ।
कल्पावसाने खलु वर्धमानावम्भोनिधी यद्वदमन्दवेगौ ॥ ४३ ॥

पदातिं पदातिस्तुरङ्गं तुरङ्गो मदेभं मदेभो रथस्थं रथस्थः ।
इयाय क्षणेन स्फुरद्युद्धरङ्गे ध्वनज्जैत्रवाद्यैःस्वनच्छिञ्जिनीके ॥ ४४ ॥

वेशवाटो वेश्यावासाभोगो यस्मिंस्तत्, विविधायुधानां नैकविधशस्त्राणां संस्कारपराः समुत्तेजनलीना ये जनाः पुरुषास्तैर्भ्राम्यमाणानि संचार्यमाणानि शाणचक्रप्रभृतीनि निकषचक्रादीनि यानि संस्कारसाधनानि समुत्तेजनोपायास्तैः सम्वाधितं व्याप्तम् ।

युद्धप्रारम्भकेलीति—युद्धप्रारम्भकेल्याः समरप्रारम्भक्रीडायाः पिशुनाः सूचका ये जयमहावाद्यघोषा विजयमहावादित्रशब्दास्तैः, अशेषैः सम्पूर्णैः, हयानामश्वानाम्, हेषारवैर्हेषितशब्दैः, जृम्भमाणैर्वर्धमानैः मदेन दानेन मुदिताः प्रसन्ना इति मदमुदितास्ते च ते करिणो हस्तिनश्चेति मदमुदितकरिणस्तेषां बृंहितानि गर्जितानि तैः, रथ्याध्वानैः रथसमूहशब्दैः, अमन्दैः प्रचुरैः, पदातीनां पद्गानां प्रचुरतरं प्रभूततरं यथा स्यात्तथा गलन्तः प्रकटीभवन्तो ये सिंहनादाः क्ष्वेडितरवास्तैः, शब्दैकाम्भोधिमग्नं शब्दैकार्णवनिमग्नम्, इदमेतत्, जगद् भुवनम्, समन्तात्परितः कम्पत इति कम्पमानं वेपथुसहितम्, अभवत् आसीत् । शार्दूलविक्रीडितच्छन्दः ॥ ४० ॥

रणान्तरायमिति—रणान्तरायं समरप्रत्यूहम्, कुर्वाणा विदधानाः, याः धूल्यो रजांसि, व्योम्नि नभसि, जृम्भिता विततानि, तन्नाशाय तदपहाराय, ध्वजाः पताकाः, मृत्युसंमार्जन्य इव यमावकरापहारिण्य इव, अरुचन् व्यशोभन्त ॥ ४१ ॥

उद्यन्निस्साणेति—अथ युद्धप्रारम्भानन्तरम्, सुरा अमराः, जृम्भमाणं वर्धमानम्, उद्यन्तः प्रकटीभवन्तो ये निस्साणराणा रणवादित्रशब्दास्तेषां प्रसरः समूहस्तम्, निशम्य समाकर्ण्य, संप्रवृत्तं प्रारब्धम्, क्षीबा पराक्रमातिरेकेणोन्मत्ता ये क्षोणीपतयो राजानस्तेषाम्, कदनविलसितं सम्पराचेष्टितम्, वीक्षितुं द्रष्टुम्, कल्पक्षितिरुहवनतः कल्पवृक्षविपिनात्, सौरभेण सौगन्ध्येनाकृष्टा वशीकृता ये भृङ्गा भ्रमरास्तेषां व्यूहस्य समूहस्य यो व्याराबो गुञ्जनशब्दस्तस्य पूरं सन्ततिर्येषु तानि, पुष्पाणि कुसुमानि, आहृत्य समादाय, अधिककुतुकतः प्रभूतकौतुकातिशयेन, व्योम्नि विहायसि, संगताः संमिलिताः, आसन्निति शेषः । स्रग्धरावृत्तम् ॥ ४२ ॥

सेनापयोधी इति—समदाट्टहासौ सगर्वाट्टहाससहितौ, शनैः शनैर्मन्दं मन्दम्, संघटितौ संमिलितौ, सेनापयोधी पृतनापारावारौ, तद्वत् तथा व्यभाताम् व्यशोभेताम्, यद्वत् यथा, कल्पावसाने प्रलयवेलायाम्, वर्धमानौ समेधमानौ, अमन्दवेगौ प्रभूतरयौ, अम्भोनिधी सागरौ, खलु निश्चयेन ॥ ४३ ॥

पदातिमिति—ध्वनज्जैत्रवाद्ये शब्दायमानविजयवादित्रे, स्वनच्छिञ्जिनीके शब्दायमानमौर्वीके, स्फुरद्युद्धरङ्गे प्रकाशमानरणाजिरे, पदातिः पत्तिः, पदातिं पत्तिम्, तुरङ्गोऽश्वः, तुरङ्गं हयम्, मदेभो मद-

दृप्यद्दन्तिकरोद्यता जलकणा व्योम्नि स्फुरत्तारका-
कारा रेजुरभूच्च नाकसुदतीवक्त्रं निशानायकः ।
धूलीभिः पिहिते च चण्डकिरणे संग्रामलीला बभौ
निर्दोषापि विभावरीव सततं क्रीडद्रथाङ्गापि च ॥ ४५ ॥

यावन्नाक्षिपति क्षणेन करिणो वक्त्रच्छदं विस्तृतं
हस्त्यारोहवरः प्रतिद्विपगतो वीरः शरैस्तावता ।
शुण्डां तस्य मदं च लोपमनयत्कोपेन सोऽप्युद्धतः
छिन्नेनैव करेण तं प्रतिभटं मूर्च्छास्पदं द्राग्व्यधात् ॥ ४६ ॥

भल्लैः प्रतिद्विरदमल्लधनुर्विमुक्तैः
कुम्भेषु मग्नशिखरैर्व्यलसन् गजेन्द्राः ।
आरावहीनवदनैः शिखिनां समूहै-
रारूढतुङ्गशिखरा इव शैलवर्गाः ॥ ४७ ॥

इह खलु, कौचन मत्तदन्तावलौ क्रोधतरलौ समीककलाकुशलौ परस्परदण्डसंघट्टनजनितगम्भीरारावेण बृंहितभरेण च गगनतलं पूरयन्तौ, गण्डतलविसृत्वरमदधारासौरभप्रचुरकर्णतालविगलत्समीरैराजिरङ्गतले मूर्च्छितान् भटान् प्रबोधयन्तौ, भुग्नवालौ, सक्थिजवघटितरदविन्यासेन वसुन्धरां

मतङ्गजः, मदेभं मत्तमतङ्गजम्, रथस्थः स्यन्दनस्थः, रथस्थं स्यन्दनस्थम्, क्षणेन शीघ्रम्, इयाय प्राप । भुजङ्गप्रयातच्छन्दः ॥ ४४ ॥

दृप्यद्दन्तिकरोद्यता इति—दृप्यतां समदानां दन्तिनां करिणां करेभ्यः शुण्डाभ्य उद्यता उत्पतिताः, जलकणाः सलिलसीकराः, व्योम्नि गगने, स्फुरत्तारकाकारा देदीप्यमाननक्षत्रसंनिभाः, रेजुः शुशुभिरे, नाकसुदतीवक्त्रं देवीवदनम्, निशानायकश्चन्द्रमाः, अभूच्च बभूव च । धूलीभिः परागैः, चण्डकिरणे सूर्ये पिहिते च समाच्छादिते च सति, संग्रामलीला समरक्रीडा, निर्दोषापि रात्रिरहिताऽपि, सततं सर्वदा क्रीडन्तो रथाङ्गाश्चक्रवाका यस्यां तथाभूता सत्यपि च, विभावरीव रात्रिरिव, बभौ शुशुभे, पक्षे निर्दोषा पङ्ककण्टकादिदोषरहिता, क्रीडन्ति संभ्रमन्ति रथाङ्गानि चक्राणि यस्यां तथेति च ॥ ४५ ॥

यावन्नाक्षिपतीति—यावत् यावत्कालपर्यन्तम् हस्त्यारोहवरो गजाधिष्ठातृवरः, क्षणेन सत्वरम्, विस्तृतं विततम्, करिणो गजस्य वक्त्रच्छदं मुखावरणम्, नाक्षिपति न दूरीकरोति, तावता कालेन, प्रतिद्विपगतः प्रतिगजस्थितः, वीरः शूरः, शरैः सायकैः, तस्य करिणः, शुण्डां करम्, मदं च दानञ्च गर्वं वा, लोपं विनाशम्, अनयत् प्रापयामास, कोपेन क्रोधेन, उद्धतः समुद्दण्डः, सोऽपि छिन्नशुण्डः शुण्डालोऽपि, छिन्नेनैव कृत्तेनैव, करेण शुण्डया, तं प्रतिभटं प्रतिवीरम्, द्राग् झटिति, मूर्च्छास्पदं चैतन्यातीतम्, व्यधाच्चकार ॥४६॥

भल्लैरिति—प्रतिद्विरदमल्लानां विपक्षगजस्थितशूराणां धनुर्भ्यः कोदण्डेभ्यो विमुक्तास्त्यक्तास्तैः कुम्भेषु गण्डस्थलेषु मग्नं निखातं शिखरं मुखं येषां तैः, भल्लैः प्रासैः गजेन्द्रा हस्तिप्रमुखाः आरावहीनं केकारहितं वदनं मुखं येषां तैः, शिखिनां केकिनां समूहैः कलापैः, आरूढानि समधिष्ठितानि तुङ्गशिखराणि समुन्नतशृङ्गाणि येषां तथाभूताः शैलवर्गा इव पर्वतसमूहा इव, व्यलसन् शुशुभिरे । उपमा । वसन्ततिलकावृत्तम् ॥४७॥

इह खलु कौचनेति—इह समराङ्गणे, खलु निश्चयेन, क्रोधेन कोपेन तरलौ चपलाविति क्रोधतरलौ, समीककलायां समरवैदग्ध्यां कुशलौ निपुणौ, कौचन कावपि, मत्तदन्तावलौ मत्तगजौ, परस्परमन्योऽन्यं दन्तसंघट्टनेन रदनाघातेन जनितः समुत्पादितो यो गम्भीरारावो गम्भीरशब्दस्तेन, बृंहितभरेण च गर्जितसमूहेन च, गगनतलं नभस्तलम्, पूरयन्तौ सम्भरन्तौ गण्डतलाभ्यां कटप्रदेशाभ्यां विसृत्वराः प्रसरणशीला या मदधारा दानसन्ततयस्तासां सौरभेण सौगन्ध्येन प्रचुराः प्रपूर्णाः, तथाभूताः कर्णतालविगलन्तश्च श्रवणव्यजननिःसरन्तश्च ये समीराः पवनास्तैः, आजिरङ्गतले समररङ्गभूमौ, मूर्च्छितान् सम्प्राप्तमोहान्,

स्थपुटितामादधानौ, पूर्वपश्चिमसमीरसमीरितौ सजलजलदाविवापतन्तौ, सकललेखजनतनूरुहसौख्य-शायनिकं भयानकं समीकमातेनतुः ।

आयोधनं विदधतोर्गजयोः कयोश्चिद्
दन्तप्रघट्टजनिताग्निकणाः स्फुरन्तः ।
हैमप्रदीप्रवलयावलिखण्डतुल्या
माञ्जिष्ठचामरगताः सुभटैर्नु दृष्टाः ॥ ४८ ॥

कश्चिद्गजः प्रतिभटं चरणे गृहीत्वा
सम्भ्रामयन्दिवि रुषा परुषप्रचारः ।
चिक्षेप दूरतरमूर्ध्वमयं च मानी
द्रागेत्य कुम्भयुगलीमसिना बिभेद ॥ ४९ ॥

इभोद्गतानां नवमौक्तिकानां वर्षेण संख्ये निरवग्रहेण ।
मुक्तामयत्वं दधती च रङ्गस्थली गदाढ्या बत संबभूव ॥ ५० ॥
निपात्य कंचिद्भुवि शुण्डयारिं दन्तेन हन्तुं करिणि प्रवृत्ते ।
दन्तान्तरालं प्रविशन्स धीरश्चिच्छेद शुण्डां करवालवल्लया ॥ ५१ ॥

भटान् योद्धॄन्, प्रबोधयन्तौ सचेतनान्कुर्वन्तौ भृशं आकुञ्चितौ वालौ वालधियंयोस्तौ 'बालः पुंसि शिशौ केशे वाजिवारणवालधौ' इति विश्वलोचनः । सक्थिजवघटित ऊरुरयसहितो यः पदविन्यासश्चरणनिक्षेपस्तेन, वसुन्धरां वसुधाम्, स्थपुटितां नतोन्नताम्, आदधानौ कुर्वाणौ, पूर्वपश्चिमसमीराभ्यां प्राचीप्रतीचीपवनाभ्यां समीरितौ प्रेरितौ, सजलजलदाविव सतोयतोयदाविव, आपतन्तौ समागच्छन्तौ, सकलाश्च ते लेखजनाश्चेति सकललेखजना रणकौतुकदर्शनाय समापतिता निखिलामरसमूहास्तेषां तनूरुहाणां रोम्णाम् सौख्य-शायनिकं सुखशयनसमाचारपृच्छकं रोमहर्षणमिति यावत्, भयानकं भयङ्करम्, समीकं युद्धम्, आतेनतुः विस्तारयामासतुः ।

आयोधनमिति—आयोधनं युद्धम्, विदधतोः कुर्वतोः, कयोश्चित् कयोरपि द्वयोः, गजयोः करिणोः, स्फुरन्तः समुत्पतन्तः, माञ्जिष्ठचामरगता मञ्जिष्ठरागरक्तबालव्यजनप्राप्ताः, दन्तयो रदनयोः प्रघट्टेन समाघातेन जनिताः समुत्पन्ना येऽग्निकणा अनलस्फुलिङ्गास्ते, सुभटैः शूरैः, हैमाः सुवर्णनिर्मिताः प्रदीप्राः प्रभास्वरा ये वलयाः कटकास्तेषामावलिः पङ्क्तिस्तस्याः खण्डैः शकलैस्तुल्याः सन्निभाः, नु वितर्के, दृष्टाः समवलोकिताः ॥४८॥

कश्चिद्गज इति—परुषः कठोरः प्रचारः प्रभ्रमणं यस्य तथाभूतः, कश्चित्कोऽपि, गजः करी, प्रतिभटं विपक्षशूरम्, चरणे पादे, गृहीत्वाऽऽदाय, दिवि गगने, संभ्रामयन् संघूर्णयन्, रुषा रोषेण, दूरतरमतिविप्रकृष्टम्, ऊर्ध्वमुपरि, चिक्षेप क्षिपति स्म, मानी गर्वोपेतः, अयञ्च प्रतिभटः, द्राग् झटिति, एत्य समागत्य, असिना कृपाणेन, कुम्भयुगलीं गण्डयुग्मम्, बिभेद विदारयामास ॥४९॥

इभोद्गतानामिति—संख्ये समरे, इभोद्गतानां गजोत्पतितानाम्, नवमौक्तिकानामभिनवमुक्ताफलानाम्, निरवग्रहेण प्रतिबन्धरहितेन, वर्षेण वृष्ट्या, 'वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ' इत्यमरः, मुक्तामयत्वं मौक्तिकप्रचुरताम्, विरोधपक्षे नीरोगताम्, दधती बिभ्रती, रङ्गस्थली रणभूमिः, गदाढ्या गदाभिधानशस्त्रसहिता विरोधपक्षे गदै रोगैराढ्या सहिता संबभूव समजायत, बतेति खेदे । विरोधाभासालङ्कारः, उपजातिवृत्तम् ॥५०॥

निपात्य कश्चिदिति—करिणि गजे, कञ्चित्कमपि, अरिं शत्रुम्, शुण्डया करेण, भुवि पृथिव्याम्, निपात्य समास्फाल्य, दन्तेन रदनेन, हन्तुं मारयितुम्, प्रवृत्ते तत्परे, सति, दन्तान्तरालं रदनमध्यम्, प्रविशन् प्रवेशं कुर्वन्, धीरो धैर्योपेतः, सोऽरिः, करवालवल्लया कृपाणलतया, शुण्डां करम्, चिच्छेद छिनत्ति स्म ॥५१॥

चक्रेण कृत्तं निजमेव हस्तमग्रप्रदेशाद्धरणौ पतन्तम् ।
पिपेष पादेन रुषा परीतः करेणुराजः क्षुतरक्तपङ्कम् ॥ ५२ ॥

गृहीतो नागेन प्रतिभटवरः पुष्करगतो
वितन्वानो दोलामसिनिहृतहस्तेन करिणा ।
पद्‌ा पेष्टुं नीतः सपदि पदमध्ये प्रचलितो
गृहीत्वा वालाग्रे व्यसुममुमधान्मुष्टिहतिभिः ॥ ५३ ॥

तत्र फुल्लकुन्दकुसुमावदाता जितवातजवना वाजिनो गगनतलोत्क्षिप्ताग्रपादतया नभःस्थलमाक्रमितुमिव प्रवृत्ताः, पुरतः पतितानि महाशैलकुलानीव दन्तावलशरीराणि लङ्घयन्तः, संगरसागरे परस्परं कलहायमानाः कल्लोला इव विरेजिरे ।

खुराघातैः कश्चिज्जवनहयः कम्पितधरः
पृषत्कैः कीर्णाङ्गोऽप्यविरहितशिक्षानुसरणः ।
पदे खड्‌गच्छिन्नोऽप्यहितसुभटेनापतदसौ
न तावद्यावत्तं न निजवरसादी जिहतवान् ॥ ५४ ॥

छिन्नेऽपि दक्षिणभुजे करवालवल्लीं
वामे करे विचलयन् रिपुमाप सादी ।
वीरस्य तस्य रिपुखण्डनकेलिकाया-
मक्षीणशक्तिरगमत् स हि दक्षिणत्वम् ॥ ५५ ॥

चक्रेण कृत्तमिति—रुषा कोपेन, परीतो व्याप्तः, करेणुराजो गजेन्द्रः, चक्रेण शस्त्रविशेषेण, कृत्तं छिन्नम्, अग्रप्रदेशाच्छुण्डाग्रभागात्, धरणौ पृथिव्याम्, पतन्तं स्खलन्तम्, क्षुतः क्षरितो रक्तपङ्को रुधिरकर्दमो यस्मात्तम्, निजमेव स्वकीयमेव, हस्तं शुण्डाम्, पादेन चरणेन, पिपेष पिनष्टि स्म । क्रोधे को विवेक इति भावः ॥५२॥

गृहीतो नागेनेति—नागेन गजेन, गृहीत आत्तः, पुष्करगतः शुण्डाग्रभागस्थितः प्रतिभटवरो विपक्षयोद्धा, असिना खड्‌गेन निहतः खण्डितो हस्तो यस्य तेन, करिणा गजेन, दोलां हिन्दोलिकाम्, वितन्वानः कुर्वाणः सन्, पद्‌ा चरणेन, पेष्टुं चूर्णयितुम्, पदमध्ये चरणमध्ये, नीतः प्रापितः, किन्तु, सपदि झटिति, प्रचलितः प्रकर्षेण चलितः सः, वालाग्रे पिच्छाग्रे, गृहीत्वा समालम्ब्य, मुष्टिहतिभिर्मुष्टिप्रहारैः, अमुं गजम्, विगता विनष्टा असवः प्राणा यस्य तं मृतमिति यावत्, व्यधात् अकार्षीत् । शिखरिणीछन्दः ॥५३॥

तत्र फुल्लकुन्देति—तत्र तस्मिन्, संगरसागरे समरपयोनिधौ, फुल्लकुसुमानीव प्रस्फुटितमाध्यपुष्पाणीवावदाताः समुज्ज्वलाः, जितवातजवनाः पराभूतपवनवेगाः, वाजिनो हयाः, गगनतले नभस्तल उत्क्षिप्तावुत्थापितावग्रपादौ पुरश्चरणौ येषां तेषां भावस्तत्ता तया, नभःस्थलं गगनतलम्, आक्रमितुमुल्लङ्घयितुम्, प्रवृत्ता इव तत्परा इव, पुरतः पुरस्तात्, पतितानि भ्रष्टानि, महाशैलकुलानीव महाचलकदम्बकानीव, दन्तावलशरीराणि गजेन्द्रकायान्, लङ्घयन्तः समुत्क्राम्यन्तः, परस्परं मिथः, कलहायमानाः कलहं कुर्वाणाः, कल्लोला इव तरङ्गा इव, विरेजिरे शुशुभिरे ।

खुराघातैरिति—खुराणां शफानामाघाताः प्रहारास्तैः कम्पिता वेपिता धरा पृथिवी येन तथाभूतः, कश्चित् कोऽपि जवनशाली हयश्चेति जवनहयः प्रकृष्टवेगवाहः, पृषत्कैर्बाणैः, कीर्णाङ्गोऽपि व्याप्तशरीरोऽपि, अहितसुभटेन शत्रुशूरेण, पदे चरणे, खड्‌गच्छिन्नोऽपि कृपाणकृत्तोऽपि, अविरहितमत्यक्तं शिक्षानुसरणं येन तथाभूतः, असौ हयः, तावत् तावत्कालपर्यन्तम्, न अपतत् नो पपात, यावत् यावत् कालपर्यन्तम्, निजवरसादी स्वारोहिजनः, तमाहितसुभटम्, न निहतवान् नो जघान । शिखरिणीछन्दः ॥५४॥

छिन्नेऽपि दक्षिणभुज इति—सादी हयारोही, दक्षिणभुजे वामेतरबाहौ, छिन्नेऽपि कृत्तेऽपि सति

अश्वारोहैः कृत्तदण्डानि भूमौ पर्यस्तानि स्फारच्छत्राणि रेजुः ।
रूप्यस्थालानीव क्लृप्तानि मृत्योराहाराय प्रौढचन्द्रद्युतीनि ॥ ५६ ॥

खड्गैः कृत्ता वाजिनां वक्त्रभागा रक्तस्रोतोनीयमाना जवेन ।
मग्नाङ्गानामुन्मुखानां हयानां भ्रान्तिं तेनुः पश्यतामाजिरङ्गे ॥ ५७ ॥

भटानां रोषेण प्रतिभटसमीपं प्रचलतां
समुद्धाता रेजुश्चलदसिलताः पाणिकलिताः ।
भुजश्रीखण्डद्रुमकरकुहरोद्यद्विषधरा
रिपूणां प्राणालिं कवलयितुकामा इव तदा ॥ ५८ ॥

समीकपदवीविदः समदसिंहनादा भटा
ववल्गुरमितैः शरै रचितमण्डपाः पुष्करे ।
निरस्ततपनातपश्रमभराः क्षणाद्भङ्गुरैः
शरीरनिकरैर्यशःस्थिरतनूर्भुवि प्रेप्सवः ॥ ५९ ॥

तत्र समीककलाविपश्चिदाश्चर्यवृत्तिः पदातिः, केनचित्पदगेन भुजध्वजतिर्यगर्पितवैजयन्ती-

---

वामे सव्ये, करे पाणौ, करवालवल्लीं कृपाणलताम्, विचलयन् कम्पयन्, रिपुं वैरिणम्, आप प्राप, तदभिमुखं जगामेति यावत् । तस्य पूर्वोक्तस्य, वीरस्य शूरस्य, रिपुखण्डनकेलिकायां शत्रुशकलनक्रीडायाम्, अक्षीणा शक्तिर्यस्य तथाभूतोऽहीनसामर्थ्यः, सः वामो बाहुः, हि निश्चयेन, दक्षिणत्वं वामेतरत्वम्, पक्षे कौशलम्, अगमत्प्राप । वसन्ततिलकावृत्तम् ॥५५॥

अश्वारोहैरिति—अश्वारोहैः सादिभिः, कृत्ताश्छिन्ना दण्डा येषां तानि, अतएव भूमौ पृथिव्याम्, पर्यस्तानि विकीर्णानि, स्फारच्छत्राणि विशालातपत्राणि, मृत्योर्यमस्य, आहाराय भोजनाय, क्लृप्तानि रचितानि, प्रौढचन्द्रस्येव द्युतिर्येषां तानि तरुणहिमरश्मिकान्तीनि रूप्यस्थालानीव रजतपात्राणीव, रेजुः शुशुभिरे । शालिनीछन्दः ॥५६॥

खड्गैरिति—खड्गैः कृपाणैः, कृत्ताश्छिन्नाः, वाजिनां वाहानाम् 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः, वक्त्रभागा मुखप्रदेशाः, जवेन वेगेन, रक्तस्रोतोनीयमाना रुधिरप्रवाहनीयमानाः सन्तः, आजिरङ्गे समराजिरे, पश्यतामवलोकयताम्, जनानामिति शेषः, मग्नाङ्गानां ब्रुडितदेहानाम्, उन्मुखानाम् उत्थितवक्त्राणाम्, हयानां वाहानाम्, भ्रान्तिं भ्रमम्, तेनुः विस्तारयामासुः । शालिनीछन्दः ॥५७॥

भटानामिति—तदा तस्मिन् काले, रोषेण कोपेन, प्रतिभटसमीपं प्रतियोद्धृनिकटं यथा स्यात्तथा, प्रचलतां गच्छताम्, भटानां शूराणाम्, समुद्धाताः समुत्थापिताः, पाणिकलिता हस्तधृताः, चलदसिलताश्चञ्चलकृपाणवल्लर्यः, रिपूणां वैरिणाम्, प्राणालिं जीवितसमूहम्, कवलयितुकामा ग्रस्तुमनसः, भुजा एव बाहव एव श्रीखण्डद्रुमकराश्चन्दनवृक्षसमूहास्तेषां कुहरेभ्यो विवरेभ्य उद्यन्तः समुत्तिष्ठन्तो ये विषधरा नागास्त इव, रेजुः शुशुभिरे । रूपकोत्प्रेक्षे । शिखरिणीछन्दः ॥ ५८ ॥

समीकपदवीविद इति—समीकपदवीं युद्धपदवीं विदन्ति जानन्तीति समीकपदवीविदः समदः साहङ्कारः सिंहनादः क्ष्वेडा येषां ते समदसिंहनादाः, अमितैरसंख्यातैः, शरैर्बाणैः, पुष्करे गगने, रचितो विहितो मण्डपो वस्त्रभवनं यैस्त इति रचितमण्डपाः, तपनस्य सूर्यस्यातपेन घर्मेण जन्यः श्रमभरः खेदातिशय इति तपनातपश्रमभरः निरस्तो दूरीकृतस्तपनातपश्रमभरो यैस्त इति निरस्ततपनातपश्रमभराः, क्षणादल्पेनैव कालेन, भङ्गुरैर्विनश्वरैः, शरीरनिकरैर्देहसमूहैः, यशांस्येव कीर्तय एव स्थिरतन्वः स्थायिशरीराणि सा इति यशःस्थिरतनूः, भुवि पृथिव्याम्, प्रेप्सवः प्राप्तुमिच्छवः, भटाः शूराः, ववल्गुः समक्रान्ति स्म । पृथ्वीवृत्तम् ॥ ५९ ॥

तत्र समीककलेति—तत्र समरे, समीककलाविपश्चित्सु युद्धकलाकोविदेष्वाश्चर्यवृत्तिर्विस्मयावहचरित इति समीककलाविपश्चिदाश्चर्यवृत्तिः, पदातिः पत्तिः, भुजध्वजेन बाहुध्वजेन तिर्यगर्पिता तिर्यग्गाता या

तुलितां कृपाणीलतां बिभ्राणेन 'इदं मदीयनामधेयपूर्वभागं बिभर्ति' इति रोषादिव पदद्वये निकृत्तोऽपि, अखण्डितमात्मसत्त्वमिव घनवंशजातं चापमालम्ब्य, शूरो न पपात ।

नीलाभ्रतुल्ये कवचे भटस्य नीते प्रभेदं करवालवल्ल्या ।
तत्र प्रवृत्ता घनशोणितालिः सौदामिनीसाम्यमवाप दीर्घा ॥ ६० ॥

कश्चिद्भटः शत्रुशरैः परीतसमस्तदेहः समिति व्यलासीत् ।
यथा महीजः प्रचुरप्ररोहो यथा च नागाततचन्दनद्रुः ॥ ६१ ॥

वीराग्रेसरः पदचरः प्रथितरिपुमण्डलाग्रखण्डितमस्तकविगलदसृग्धाराभयङ्करमुखभागतया बहिः प्रसृतया क्रोधपरम्परया परीत इव मृत्युमूर्धानं दृढतरमुष्णीषेण प्रभुकार्योपरिसमाप्तौ प्राणोत्क्रमणं निरोद्धुमिव निबध्य करे कृपाणं मनसि धैर्यं सपत्ने दृष्टिं महीतले रिपुशिरःसहस्रपतनं च युगपदातन्वानः क्रतुभुजां श्लाघानां पुष्पवृष्टीनां च पात्रमजायत ।

सैन्यद्वये तत्र विमिश्रितेऽपि विशेष एष व्यलसद्रणाग्रे ।
स्वीयाः पराश्च पदगाः पुरस्ताद्ये संमुखास्ते रिपुसैन्यवर्गाः ॥६२॥

वैजयन्ती पताका तया तुलिता सन्निभा ताम्, कृपाणीलतां खड्गवल्लरीम्, बिभ्राणेन धृतवता, केनचित् केनापि, पदगेन पदातिना, 'इदं पदद्वयम्, मदीयनामधेयस्य मामकनाम्नः पूर्वभागं पूर्वावयवम्, बिभर्ति दधाति' इति रोषादिव इति क्रोधादिव, पदद्वये चरणयुगले, निकृत्तोऽपि छिन्नोऽपि, शूरो योद्धा अखण्डितमत्रुटितं पक्षेऽस्खलितम्, आत्मसत्त्वमिव स्वकीयधैर्यमिव, घनवंशजातं सुदृढवेणुसमुत्पन्नं पक्षे सुकुलोत्पन्नम्, चापं धनुः, आलम्ब्य समाश्रित्य, न पपात न पतति स्म, छिन्नपादोऽपि धनुर्यष्टिसाहाय्येन भुवि तस्थाविति भावः ।

नीलाभ्रतुल्य इति—नीलाभ्रतुल्ये श्यामपयोदप्रतिमे, भटस्य शूरस्य, कवचे वारबाणे, करवालवल्ल्या कृपाणलतया, प्रभेदं प्रभिन्नतां नीते प्रापिते सति, तत्र कवचे, प्रवृत्ता प्रादुर्भूता, दीर्घा विशाला, घनशोणितालिः सान्द्ररुधिरपङ्क्तिः, सौदामिनीसाम्यं विद्युत्सादृश्यम्, अवाप लेभे ॥ ६० ॥

कश्चिद्भट इति—समिति समरे, शत्रुशरैः रिपुबाणैः, परीतो व्याप्तः समस्तदेहो निखिलशरीरो यस्य तथाभूतः, कश्चित् कोऽपि, भटो योद्धा, प्रचुरा भूयांसः प्ररोहा अङ्कुरा यस्य तथाभूतः, महीजो यथा वृक्ष इव, नागैः पन्नगैराततो व्याप्त इति नागाततः स चासौ चन्दनद्रुश्च मलयजमहीरुहश्चेति नागाततचन्दनद्रुः, यथा च इव च, व्यलासीच्छोभते स्म ॥ ६१ ॥

वीराग्रेसर इति—वीराग्रेसरः शूरप्रधानः, पदचरः पदातिः, प्रथितरिपोः प्रसिद्धशत्रोः मण्डलाग्रेण कृपाणेन खण्डितं निकृत्तं यन्मस्तकं शिरस्तस्माद्विगलन्ती पतन्ती या सृग्धारा रुधिरसन्ततिस्तया भयङ्करो भीत्युत्पादको मुखभागो यस्य तस्य भावस्तत्ता तया, बहिःप्रसृतया बहिर्निःसृतया, क्रोधपरम्परया रोषसन्तत्या, परीत इव व्याप्त इव, मृत्युनोपलक्षितो मूर्धा मृत्युमूर्धा तम्, मृतशिरः, उष्णीषेण शिरोवेष्टनवस्त्रेण, प्रभुकार्यस्य स्वामिकृत्यस्योपरिसमाप्तावनवसाने प्राणोत्क्रमणं जीवननिःसरणम्, निरोद्धुमिव निवारयितुमिव, दृढतरं सुदृढं यथा स्यात्तथा, निबध्य निबद्धं कृत्वा, करे हस्ते, कृपाणं करवालकं, मनसि चेतसि, धैर्यं धीरताम्, सपत्ने शत्रौ दृष्टिं दृशम्, महीतले भूपृष्ठे, रिपुशिरःसहस्रपतनञ्च शत्रुमस्तकसहस्रावपातञ्च, युगपदेककालावच्छेदेन, आतन्वानः कुर्वाणः, क्रतुभुजां देवानाम्, श्लाघानां प्रशंसानाम्, पुष्पवृष्टीनाञ्च सुमनोवर्षाणाञ्च, पात्रं भाजनम्, अजायत बभूव ।

सैन्यद्वय इति—तत्र रणाग्रे तस्मिन् समरमुखे, सैन्यद्वये पक्षद्वयसैन्ये, विमिश्रितेऽपि सम्मिलितेऽपि एष एव विशेषः एतावदेव वैशिष्ट्यम्, व्यलसद् व्यशोभत्, यद् स्वीयाः स्वकीयाः परा वा परकीया वा ये पदगाः पत्तयः, पुरस्तादग्रे, संमुखा अभिमुखाः आसन् , त एव, रिपुसैन्यवर्गाः शत्रुसैनिकवर्गाः, आसन्निति शेषः, सैन्यद्वये परस्परं मिलिते सति शत्रुमित्रपक्षाभिज्ञानं नावशिष्टं किन्तु यो यस्य पुरस्तादासीत् स एव तस्य शत्रुरासीदिति भावः ॥६२॥

तदानीं रिपुशरनिकृत्तचापलताश्चपलकरवालैर्भग्नकरवालाः पाणिभिश्छिन्नपाणयश्चरणैर्भिन्नचरणा दुर्वचनैः कोपपरीता योधाः परस्परमाजघ्नुः । एवं शब्दपूरितगगनजयानके भयानके समीके विजृम्भिते मथननिर्मुक्तनाराचधारापातेन दीनां निजसेनामालोक्य करकलितकार्मुकलताविस्फारघोषेण द्विविधानपि महीभृतः कम्पयन्कोपारुणास्यः पद्मास्यो वेगविततचक्रस्पन्देन स्यन्दनेन विपक्षवाहिनीं दिधक्षुरिवाभिदुद्राव ।

पद्मास्यप्रहिताः प्रभूतविशिखाः सेनान्तराले रिपो-
र्योधांस्तत्र सहस्रशो निपतितान्भूमौ व्यधुः पङ्क्तिशः ।
घोटान् पाटितविग्रहान् गजघटाः प्राणालिभिर्दुर्घटाः
कूजच्चापधरान् बहून्शरधिकांश्चक्रुर्व्यसून् संयुगे ॥ ६३ ॥

तस्यामितैः शरगणैर्गगनं रिपूणां
सैन्यं च पूरितमभूद्घनसंप्रहारे ।
भूमिश्च भग्नभटवाजिगजैः परीता
हाहारवैररिबलस्य दिशावकाशाः ॥ ६४ ॥

द्विषतां तत्पतीनां च नवास्रैर्निम्नगाः सृजन् ।
पद्मास्यः प्रीणयामास निजसैन्यनदीपतिम् ॥ ६५ ॥

तदानीमिति—तदानीं तस्यां वेलायाम्, रिपुशरैः शत्रुबाणैर्निकृत्ता छिन्ना चापलता धनुर्वल्ली येषां ते, योधा भटाः, चापलकरवालैः चञ्चलकृपाणैः, भग्नकरवालाः खण्डितखड्गाः, पाणिभिर्हस्तैः, छिन्नपाणयः कृत्तकराः, चरणैः पादैः, भिन्नचरणाः शकलितपादाः, दुर्वचनैर्दुष्टवचोभिः, कोपपरीताः कोपव्याप्ताः, सन्तः, परस्परमन्योऽन्यम्, आजघ्नुः प्रजह्रुः । एवमनेन प्रकारेण, शब्दैः पूरितं गगनं येन स शब्दपूरितगगनः, तथाभूतो जयानको विजयदुन्दुभिर्यस्मिंस्तस्मिन् , भयानके भयङ्करे, समीके युद्धे, विजृम्भिते सति वृद्धिंगते सति, मथनेन काष्ठाङ्गारश्यालेन निर्मुक्तास्त्यक्ता या नाराचधारा बाणसन्ततयस्तासां पातेन पतनेन, दीनां दुःखीभूताम्, निजसेनां स्वकीयपृतनाम्, आलोक्य दृष्ट्वा, करकलिता हस्तधृता या कार्मुकलता धनुर्व्रततिस्तस्या विस्फारघोषेण प्रचुरशब्देन, द्विविधानपि द्विप्रकारानपि महीभृतो राज्ञः पर्वतांश्च, कम्पयन् वेपयन्, कोपारुणास्यः क्रोधलोहितवदनः, पद्मास्यो जीवकसुहृद्विशेषः, वेगेन जवेन विततं विस्तृतं चक्रस्पन्दनं रथाङ्गसञ्चरणं यस्य तेन, स्यन्दनेन रथेन, विपक्षवाहिनीं शत्रुसेनाम्, दिधक्षुरिव दग्धुमिच्छुरिव, अभिदुद्राव सम्मुखमाजगाम ।

पद्मास्यप्रहिता इति—पद्मास्येन प्रहिताः प्रेरिता इति पद्मास्यप्रहिताः, प्रभूतविशिखाः प्रचुरबाणाः, तत्र तस्मिन् , सेनान्तराले पृतनामध्ये, सहस्रशः सहस्रसंख्याकान् , रिपोररातेः, योधान् योद्धॄन् , भूमौ रणपृथिव्याम्, पङ्क्तिशः श्रेणिक्रमेण, निपतितान् स्खलितान् , व्यधुश्चक्रुः, घोटानश्वान्, पाटितो विदारितो विग्रहो देहो येषां तान् , गजघटाः करिपङ्क्तिः प्राणालिभिः प्राणसमूहैः, दुर्घटा वियुक्ताः, कूजच्चापधरान् शब्दायमानधनुर्धारकान् , शरधिकान्बाणधारकान्, बहून्प्रभूतान् , जवानिति शेषः, संयुगे समरे, विगता निष्क्रान्ता असवः प्राणा येषां तथाभूतान् मृतानीति यावत् , चक्रुर्विदधुः ॥६३॥

तस्यामितैरिति—घनसंप्रहारे विकटयुद्धे, तस्य पद्मास्यस्य, अमितैरपरिमितैः, शरगणैर्बाणसमूहैः, गगनं नभः, रिपूणां शत्रूणाम्, सैन्यञ्च पृतना च, पूरितं सम्भृतम्, अभूदासीत् । भटाश्च वाजिनश्च गजाश्चेति भटवाजिगजा योद्धृहयहस्तिनः, भग्नाश्च ते खण्डिताश्च ते भटवाजिगजाश्चेति भग्नभटवाजिगजास्तैः, भूमिश्च समरभूश्च, परीता व्याप्ता, अरिबलस्य शत्रुमण्डलस्य, हाहारवैर्हाहाशब्दैः, दिशावकाशाः काष्ठान्तरालम्, परीतो व्याप्तः, अभूत् ॥६४॥

द्विषतामिति—द्विषतामरातीनाम्, तत्पतीनाञ्च तत्स्वामिनाञ्च, नवास्रैर्नूतनरुधिरैः निम्नगाः नदीः, सृजन् रचयन् , पद्मास्यस्तन्नामा जीवकसुहृद्, निजसैन्यमेव स्वकीयपृतनैव नदीपतिः सागरस्तम् प्रीणयामास संप्रीतञ्चकार ॥६५॥

शरास्तदानीं जलजाननस्य नामाक्षराणां मलिता न भूयात् ।
इतीव राज्ञां हृदये प्रविष्टाः प्राणानगृह्णन्न न रक्तलेशम् ॥ ६६ ॥

एवं निजध्वजिनीक्षोभमालोक्य तत्क्षणकन्दलितकोपौ मगधमागधभूपौ कुटिलीकृतचापौ निर्निरोधप्रचारेण रथेन क्षोणीतलं क्षोभयन्तौ निजसैनिकशिखावलघनगर्जितायमानसिंहनादेन वैरिजनधैर्यमुन्मूलयन्तौ जवेन पद्मास्यमापतताम् ।

तं मागधमहीपालं स्वर्भानुरिव भास्करम् ।
दुधाव रथिनं वीरो देवदत्तो धनुर्धरः ॥ ६७ ॥

तदनु करलाघवकोरकितधनुर्लतानिरन्तरनिर्मुक्तशरनिकरदूरोत्सारितनभःस्थलसंमिलितामरलोकं पाणिपात्रस्थकीलालपाननिरुत्सुकैर्विस्मयस्तिमितलोचनैस्तपोतालैर्वेतालैर्विलोक्यमानशरसन्धानमोक्षणमन्योऽन्यास्त्रसंघट्टसञ्जातप्रोच्चलत्प्रचुरविस्फुलिङ्गपरम्परावित्रासितकुञ्जरकुलं वैमानिकजनसीमातीतश्लाघाविषयभूमाञ्चितं सकलवीरजनोत्साहदानशौण्डं प्रचण्डतरदोर्दण्डयोर्मगधपद्मास्ययोर्मागधदेवदत्तयोश्च वाचामगोचरं समरमुदजृम्भत ।

मथनदलितान्बाणान्दृष्ट्वा निजान्बहुशस्तदा कमलवदनः सोऽयं कर्णान्तनर्तितशिञ्जिनिः ।
विततविशिखैः सूतं केतुं च तस्य विभेदयन्निजगलगलत्सिंहध्वानैर्नभः समभेदयत् ॥ ६८ ॥

शरास्तदानीमिति—तदानीं तस्मिन् काले, नामाक्षराणां नामधेयवर्णानाम्, मलिता मालिन्यम्, न भूयाद् न भवेदितीव हेतोः, जलजाननस्य पद्मास्यस्य, शरा बाणाः, राज्ञां क्षितिपतीनाम्, हृदये मनसि, प्रविष्टाः सन्तः, प्राणान् जीवान् , अगृह्णन्त गृह्णन्ति स्म, रक्तलेशं रुधिरबिन्दुम्, नागृह्णन्त । तदीयाः शरा वेगेन विपक्षपार्थिवविग्रहान् छित्वा बहिर्निष्क्रान्ता इति भावः ॥६६॥

एवमिति—एवमनेन प्रकारेण, निजध्वजिनीक्षोभं स्ववाहिनीचाञ्चल्यम्, आलोक्य दृष्ट्वा, तत्क्षणं तत्कालं कन्दलितः समुत्पन्नः कोपो ययोस्तौ, मगधमागधभूपौ मगधमागधराजौ, कुटिलीकृतचापौ वक्रीकृतकार्मुकौ, निर्निरोधोऽप्रतिबन्धः प्रचारो गमनं यस्य तेन, रथेन शताङ्गेन, क्षोणीतलं महीपृष्ठम्, क्षोभयन्तौ, सञ्चलयन्तौ, निजसैनिका एव स्वकीयवीरा एव शिखावला मयूरास्तेषां घनगर्जितायमानो मेघगर्जनसन्निभो यः सिंहनादः क्ष्वेडा तेन, वैरिजनधैर्यं शत्रुसमूहधीरताम्, उन्मूलयन्तावुत्पाटयन्तौ, जवेन वेगेन, पद्मास्यम्, आपतताम् अभ्यगच्छताम् ।

तं मागधेति—स्वर्भानु राहुः, भास्करमिव सूर्यमिव, धनुर्धरः कोदण्डधारकः, देवदत्त स्तन्नामा, वीरो भटः, रथिनं स्यन्दनचारिणम्, तं प्रसिद्धम्, मागधमहीपालं मागधराजम्, दुधाव धावति स्म ॥६७॥

तदन्विति—तदनु तदनन्तरम्, करलाघवेन हस्तक्षिप्रकारित्वेन कोरकिता कुड्मलिता धनुर्लता कृपाणवल्ली येषां तथाभूता येऽश्वाः शत्रवस्तैर्निर्मुक्तस्त्यक्तो यः शरनिकरो बाणसमूहस्तेन दूरोत्सारिता विप्रकृष्टोत्सारिता नभःस्थलसंमिलिता गगनतलसमागता अमरलोका देवसमूहा यस्मिंस्तत्, पाणिपात्रस्थं करभाजनस्थितं यत्कीलालं रुधिरं तस्य पाने धयने निरुत्सुकैर्निरुत्कण्ठितैः विस्मयस्तिमितानि लोचनानि येषां तैराश्चर्यचलनयनैः, तपोतालैरुद्भ्योत्कटैः, वेतालैः प्रेतविशेषैः, विलोक्यमाने दृश्यमाने शराणां बाणानां सन्धानमोक्षणे धारणत्यजने यस्मिंस्तत् , अन्योऽन्यस्य परस्परस्यास्त्रसंघट्टेन शस्त्रसंमर्दनेन सञ्जाताः समुत्पन्नाः प्रोच्चलन्तः समुत्पतन्तः प्रचुराः प्रभूता ये विस्फुलिङ्गा अग्निकणास्तेषां परम्पराभिः सन्ततिभिर्वित्रासितं सन्त्रासितं कुञ्जरकुलं हस्तिसमूहो यस्मिंस्तत्, विमानेन चरन्तीति वैमानिकास्ते च ते जनाश्चेति वैमानिकजना देवसमूहास्तेषां सीमातीता असंख्याता याः श्लाघाः प्रशंसास्तासां विषयभूम्ना विषयबाहुल्येनाञ्चितं शोभितम्, सकलवीरजनानां निखिलवीरपुरुषाणामुत्साहदाने शौण्डं समर्थम्, प्रचण्डतरौ तीक्ष्णतरौ दोर्दण्डौ भुजदण्डौ ययोस्तयोः, मगधपद्मास्ययोः मागधदेवदत्तयोश्च, वाचां वाणीनाम्, अगोचरं विषयातीतम्, समरं युद्धम्, उदजृम्भत वर्धते स्म ।

मथनदलितानिति—तदा तस्मिन् काले, कर्णान्ते श्रवणाभ्यर्णे नर्तिता चालिता शिञ्जिनी मौर्वी

ततश्च दुर्धर्षामर्षपाटलवदनेन मथनेनार्धचन्द्रेण निकृत्ते निजकार्मुकगुणे, पद्मास्यः, करतलताण्डवितकोदण्डान्तरसमारोपितकाण्डप्रकाण्डै रिपुमण्डलानि खण्डयन्, तस्य सपत्नस्य शरासनं समरोत्साहं च युगपद्विदारयामास ।

तत्तादृग्देवदत्तप्रचलकरतलात्पत्रिणो युद्धरङ्गे
पेतुः प्रोद्धूतपक्षाः कतिचन गगने तस्थुरुद्यद्भयाढ्याः ।
लेखानां मेघमार्गे पिहितपरिलसत्सौरभाणि प्रकामं
तस्थुः पेतुश्च जीवन्धरनिखिलबले कानिचित्पुष्पकाणि ॥ ६९ ॥

यत्र तत्र रिपुवाहिनीतले पुण्डरीकमुदयत्कबन्धके ।
आविरास बहुधा शिलीमुखास्तत्र तस्य जयिनः समापतन् ॥ ७० ॥

एवं देवदत्तस्य रणमत्तस्य दुर्ललितदोर्दर्पविलसितमसहमानः किरीटखचितकुरुविन्दमणिवृन्दप्रभापुनरुक्तवदनवनजकोपारुणकान्तिप्रसरः परन्तपप्रतापो मागधभूपः करनर्तितचापलता-

---

येन तथाभूतः, सोऽयं प्रसिद्धः, कमलवदनः पद्मास्याभिधानः सुहृद्, बहुशोऽनेकवारान्, निजान् स्वकीयान्, बाणान् शरान्, मथनदलितान् कृतान्तरयालखण्डितान्, दृष्ट्वा विलोक्य, विततविशिखैर्विस्तारितबाणैः, तस्य मथनस्य, सूतं सारथिम्, केतुञ्च पताकाञ्च, विभेदयन् खण्डयन्, निजगलात्स्वकण्ठाद् गलन्तो निःसरन्तो ये सिंहध्वानाः क्ष्वेडितरवास्तैः, नभो गगनम्, समभेदयत् भिनत्ति स्म । स्वोद्गाक्षकदैरम्बरं पूरयामासेति भावः । हरिणीच्छन्दः ॥६८॥

ततश्चेति—ततश्च तदनन्तरञ्च, दुर्धर्षश्चासावमर्षश्चेति दुर्धर्षामर्षो विकटक्रोधस्तेन पाटलं श्वेतरक्तं वदनं मुखं यस्य तेन, मथनेन राजश्यालेन, अर्धचन्द्रेण अर्धचन्द्राकारबाणेन, निजकार्मुकगुणे स्वकीयकोदण्डप्रत्यञ्चायाम्, निकृत्ते छिन्ने, सति, पद्मास्यो जीवकसुहृत्प्रधानः, करतले हस्ततले ताण्डवितं नर्तितं यत्कोदण्डं धनुस्तस्यान्तरे मध्ये, समारोपिताः समधिष्ठापिता ये काण्डप्रकाण्डा बाणश्रेष्ठास्तैः, रिपुमण्डलानि शत्रुसमूहान्, खण्डयन् विदारयन्, तस्य सपत्नस्य पूर्वोक्तस्यारातेः, शरासनं धनुः, समरोत्साहञ्च युद्धोल्लासञ्च, युगपदेककालावच्छेदेन, विदारयामास खण्डयामास ।

तत्तादृगिति—प्रोद्धूतपक्षाः प्रकम्पितगरुतः, कतिचन केऽपि, पत्रिणो बाणाः पक्षिणश्च, तत्तादृग्देवदत्तस्य तथाविधदेवदत्तस्य प्रचलं चपलं यत्करतलं हस्ततलं तस्मात्, युद्धरङ्गे समराङ्गणे, पेतुः पतन्ति स्म, कतिचन केऽपि च उद्यद्भयेन समुत्पद्यमानभीत्याढ्या युक्ताः पक्षे उद्यद्भया समुत्पद्यमानदीप्त्या आढ्याः सहिताः, सन्तः, गगने नभसि, तस्थुस्तिष्ठन्ति स्म । पिहितमाच्छादितं परिलसच्छोभमानं सौरभं मानोज्ञकं यैस्तथाभूतानि, लेखानां देवानाम्, पुष्पकाणि व्योमयानानि, प्रकाममत्यर्थं यथा स्यात्तथा, मेघमार्गे गगने, तस्थुस्तिष्ठन्ति स्म, कानिचिच्च कान्यपि च, पिहितं व्याप्तं परिलसच्छोभमानं सौरभं सौगन्ध्यं येषां तानि, लेखानां विजयावलोकनप्रहृष्टदेवानाम्, पुष्पाण्येव पुष्पकाणि कुसुमानि, जीवन्धरनिखिलबले जीवकसमग्रसैन्ये, पेतुः पतन्ति स्म ॥ ६९ ॥

यत्र यत्रेति—यत्र यत्र यस्मिन् यस्मिन्, उद्यन्त उत्पतन्तः कबन्धाः शिरोहीनमृतकदेहा यस्मिंस्तस्मिन्, पक्षे उद्यत्समुच्छलत्कबन्धं पाथो यस्मिंस्तस्मिन्, रिपुवाहिनीतले शत्रुसैन्यमध्ये पक्षे शत्रुनदीमध्ये, 'वाहिनी स्यात्तरङ्गिण्यां सेनासैन्यप्रभेदयोः' इति मेदिनी, पुण्डरीकं सितच्छत्रं पक्षे सिताम्भोजञ्च 'पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे' इति मेदिनी, आविरास प्रकटीबभूव, तत्र तत्र, जयिनो विजयवतः तस्य देवदत्तस्य, शिलीमुखाः शराः पक्षे भ्रमराश्च, 'शिलीमुखोऽलिकाण्डयोः' इति मेदिनी, समापतन् पतन्ति स्म । श्लेषः ॥ ७० ॥

एवं देवदत्तस्येति—एवमनेन प्रकारेण, रणेन समरेण मत्तः प्रगर्वितस्तस्य, देवदत्तस्य तन्नामसुभटस्य, दुर्ललितयोरास्फाल्यमानयोर्दोषो भुजयोर्यो दर्पो गर्वस्तस्य विलसितं चेष्टितम्, असहमानोऽक्षाम्यन्, किरीटखचितानां मकुटनिस्यूतानां कुरुविन्दमणीनां पद्मरागरत्नानां वृन्दः समूहस्तस्य प्रभया दीप्त्या पुनरुक्तो वदनवनजस्य मुखकमलस्य कोपारुणकान्तिप्रसरो रोषलोहितदीप्तिसमूहो यस्य सः, परन्तपः शत्रुसन्ताप-

निर्मुक्तचापलताचान्तविपक्षपक्षदुर्मदः पञ्चषैः पृषत्कैर्देवदत्तस्य रथघोटान्पाटयामास ।

निशितविशिखवर्यैर्विश्रुतो देवदत्तः
कवचमथ विभिन्दन्मागधेशस्य कोपात् ।
उरसि निहितशक्तिस्तस्य शक्तिं विलुम्पन्-
समिति विमलकीर्तिः पातयामास शत्रुम् ॥ ७१ ॥

ततश्च प्रभोः प्रतापमिव भुवि पातितं महावीरं मगधभूपालमवलोक्य क्रोधसंज्वलन्नयनविगलद्विस्फुलिङ्गकलिङ्गभूपालः कुटिलितभ्रूभङ्गभीषणवदनः कर्णान्ताकृष्टचापचोदितरोपवर्षेण धर्षितपरमदो हर्षितनिजचतुरङ्गबलः पाटितघोटगजघटाभटपटलः सरभसमेव कौरवसेनां क्षोभयामास ।

विहायसि विहारिभिः शरगणैः कलिङ्गेशितु-
र्भयाद् द्रुतमपासरन्न परमाकुला निर्जराः ।
क्षितौ च रिपुसैनिका दिशि दिशि क्षणाद्धाविताः
स्वसैनिकभयोद्यमा निजयशस्तरङ्गास्तथा ॥ ७२ ॥

विस्फारघोषैर्गगनं पूरयन्हर्षयन्बलम् ।
श्रीदत्तोऽभिजगामैतं मृगेन्द्र इव कुञ्जरम् ॥ ७३ ॥

वर्धकः प्रतापो यस्य तथाभूतः, मागधभूपो मगधजनपदेशः, करनर्तिता हस्तकम्पिता या चापलता धनुर्वल्लरी तस्या निर्मुक्ता निष्पतिता ये बाणगणाः शरसमूहास्तैराचान्तो गृहीतो विपक्षपक्षस्य शत्रुसैन्यस्य दुर्मदो दुरहंकारो येन तथाभूतः सन्, पञ्च षड् वा पञ्चषास्तैः पृषत्कैर्बाणैः, देवदत्तस्य तन्नामसुभटस्य, रथघोटान् स्यन्दनहयान्, पाटयामास विदारयामास ।

निशितविशिखवर्यैरिति—अथानन्तरम्, विश्रुतो विख्यातः देवदत्तः, कोपात् क्रोधात्, विशिखेषु वाणेषु वर्याः श्रेष्ठा इति विशिखवर्याः, निशितास्तीक्ष्णाश्च ते विशिखवर्याश्चेति निशितविशिखवर्यास्तैः, मागधेशस्य मगधराजस्य, कवचं वारबाणम्, विभिन्दन् विदारयन्, उरसि वक्षसि, निहिता निखाता शक्तिः शस्त्रविशेषो येन तथाभूतः, तस्य मगधेशस्य, शक्तिं सामर्थ्यम्, विलुम्पन् नाशयन्, विमलकीर्तिरवदातयशाः, सन्, समिति समरे, शत्रुं सपत्नम्, पातयामास पातयति स्म । मालिनीच्छन्दः ॥ ७१ ॥

ततश्च प्रभोरिति—ततश्च तदनन्तरञ्च, प्रभोः स्वामिनः, प्रतापमिव तेज इव, भुवि पृथिव्याम्, पातितं महावीरं महाभटम्, मगधभूपालं मगधेशम्, अवलोक्य दृष्ट्वा, क्रोधेन कोपेन संज्वलन्त्यां सरक्तीभवद्भ्यां नयनाभ्यां चक्षुर्भ्यां विगलन्तो विस्फुलिङ्गा अग्निकणा यस्य सः, कलिङ्गभूपालः कलिङ्गविषयनरपतिः, कुटिलितयोर्वक्रीकृतयोर्भ्रुवोर्भङ्गेन भीषणं भयावहं वदनं मुखं यस्य सः, कर्णान्तं श्रवणान्तमाकृष्टेन चापेन धनुषा चोदिताः प्रेरिता ये रोपा बाणास्तेषां वर्षेण वृष्ट्या, धर्षितो विध्वस्तः परमदः शत्रुगर्वो येन सः, हर्षितं प्रसादितं निजचतुरङ्गबलं स्वकीयचतुरङ्गसैन्यं येन सः, पाटितं विदारितं घोटगजघटाभटानां हयहस्तिसमूहशूराणां पटलं समूहो येन तथाभूतः सन्, सरभसमेव सवेगमेव, कौरवसेनां जीवकपृतनाम्, क्षोभयामास क्षोभितां चकार ।

विहायसीति—विहायसि नभसि, विहारिभिर्विहरणशीलैः, कलिङ्गेशितुः कलिङ्गभूपालस्य, शरगणैर्बाणसमूहैः, भयाद् भीतेः, परमत्यन्तम्, आकुला व्यग्राः, निर्जरा देवाः, द्रुतं सत्वरम्, नापासरन् नापसरन्ति स्म, किन्तु, क्षितौ पृथिव्याम्, रिपुसैनिकाश्च शत्रुभटा अपि, स्वसैनिकानां स्वसैन्यानां भयोद्यमाश्चेष्टितानि, निजयशस्तरङ्गास्तथा स्वकीययशोभङ्गा अपि, क्षणादल्पेनैव कालेन, दिशि दिशि प्रतिकाष्ठम्, धाविताः प्रसृताः, कलिङ्गेशस्य शरगणैर्नभसि स्थिता अमरा द्रुतमपसरन्ति स्म, शत्रुसैनिका भीत्वा प्रतिकाष्ठं धाविताः, स्वकीयसैनिकानां भयचेष्टितानि पलायितानि, स्वयशःसमूहश्च प्रसृता बभूवुरिति भावः ॥ ७२ ॥

विस्फारघोषैरिति—विस्फारघोषैर्धनुरास्फालनशब्दैः, गगनं व्योम, पूरयन्, सम्भरन् । बलं सैन्यम्,

तदानीं सकलवीरजनकर्णाभरणायमानभुजप्रतापयोः श्रीदत्तकलिङ्गभूपयोः परस्परनिकृत्तविशिखमनिमेषैरप्यलक्ष्यशरसन्धानमोक्षणमगोचरजयपराजयमदृष्टपूर्वं त्रिदिवदामद्भुततरं समरमुदजृम्भत ।

श्रीदत्त एष करनर्तितचापदण्डमाकृष्य संयति तथा विशिखान्मुमोच ।
एको यथा दशगुणक्रमतः प्रवीरानाक्रम्य कृतन्ति जवाद्रिपुसैन्यवर्गे ॥ ७४ ॥

श्रीदत्तो रन्ध्रमन्विष्य शरैस्तस्य महीपतेः ।
पातयामास मकुटं प्रगर्जञ्छिरसा सह ॥ ७५ ॥

तदीयमकुटोद्गतैरमितमौक्तिकैः पातितै रराज समराजिरं पतितभूमिभृन्मस्तकम् ।
कलिङ्गवसुधापतिप्रथितराज्यलक्ष्म्यास्तदा विकीर्णमिव विस्तृतैर्नयनबाष्पबिन्दूत्करैः ॥७६॥

तदनु भासां निधौ पश्चिमपाथोनिधौ निमज्जति शोकहर्षपारावारनिमग्नाः, कमलेषु मुकुलीभवत्सु मुकुलीकृतसमरविलासाः, जगदेकवीरे मारे समधिरोपितशरासनगुणे क्षणादवरोपितचापगुणाः, उभयेऽपि सैनिकाः स्वकटकमुखमासेदुः । अपरेद्युः काष्ठाङ्गारेण रिपुजनगहनाङ्गारेण बहुधा प्रोत्साहितविजयकथनो मथनः प्रतिफलिततपनबिम्बप्रभापिञ्जरितदिशावकाशः कवलयन्निव रिपुसेनासमुद्रमाजिरङ्गमाजगाम ।

हर्षयन् प्रमोदयन्, श्रीदत्त एतन्नामा सुभटः, मृगेन्द्रः सिंहः, कुञ्जरमिव गजमिव, एतं कलिङ्गभूपालम्, अभिजगाम तत्सम्मुखमाजगाम ॥ ७३ ॥

तदानीमिति—तदानीं तस्मिन् काले, सकलवीरजनानां निखिलशूराणां कर्णाभरणायमानः श्रवणालङ्कारायमाणो भुजप्रतापो बाहुतेजो ययोस्तयोः, श्रीदत्तकलिङ्गभूपयोः श्रीदत्तकलिङ्गेशयोः परस्परं मिथो निकृत्ताश्छिन्ना विशिखा बाणा यस्मिंस्तत्, अनिमेषैरपि देवैरपि, अलक्ष्ये अदृश्ये शराणां बाणानां सन्धानमोक्षणे धारणत्यजने यस्मिंस्तत्, अगोचरावविषयौ जयपराजयौ यस्मिंस्तत्, त्रिदिवदां देवानाम्, अदृष्टपूर्वमनवलोकितपूर्वम्, अद्भुततरमाश्चर्यजनकम्, समरं युद्धम्, उदजृम्भत वर्धते स्म ।

श्रीदत्त एषेति—एष श्रीदत्तः, संयति समरे, करनर्तितचापदण्डं हस्तचालितकोदण्डदण्डम्, आकृष्य समाकृष्टं कृत्वा, तथा तेन प्रकारेण, विशिखान् बाणान्, मुमोच तत्याज, यथा येन प्रकारेण, एको विशिखः दशगुणक्रमतो दशगुणितान्, प्रवीरान् योद्धॄन्, आक्रम्य रिपुसैन्यवर्गे विपक्षपृतनासमूहे, जवात् वेगात्, कृन्तति छिनत्ति ॥ ७४ ॥

श्रीदत्तो रन्ध्रमिति—प्रगर्जन् गर्जितं कुर्वन्, श्रीदत्तः, रन्ध्रं छिद्रम्, अन्विष्य मार्गयित्वा, शरैर्बाणैः, तस्य महीपते राज्ञः, शिरसा सह मूर्ध्ना साकम्, मकुटं मौलिम्, पातयामास पातयति स्म ॥ ७५ ॥

तदीयमकुटोद्गतैरिति—तदा तस्मिन् काले पतितानि स्खलितानि भूमिभृतां राज्ञां मस्तकानि शिरांसि यस्मिंस्तत्, समराजिरं युद्धाङ्गणम्, तदीयमकुटोद्गतैस्तन्मौलिसमुत्पतितैः, पातितैः भ्रंसितैः, मौक्तिकैर्मुक्ताफलैः कलिङ्गवसुधापतेः कलिङ्गभूपालस्य प्रथिता प्रसिद्धा या राज्यलक्ष्मीः साम्राज्यश्रीस्तस्याः, विस्तृतैर्विततैः, नयनबाष्पबिन्दूत्करैरश्रुपृषतासमूहैः, विकीर्णमिव व्याप्तमिव, रराज शुशुभे ॥ ७६ ॥

तदनु भासां निधाविति—तदनु तदनन्तरम्, भासां निधौ सूर्ये, पश्चिमपाथोनिधौ पश्चिमसागरे, निमज्जति सति निमग्नीभवति, शोकहर्षपारावारे विषादप्रमोदसागरे निमग्ना बुडिताः, कमलेषु पद्मेषु, मुकुलीभवत्सु निमीलत्सु, मुकुलीकृतः सङ्कोचितः समरविलासो युद्धचेष्टितं यैस्ते, जगदेकवीरे त्रिलोकप्रधानसुभटे, मारे मदने, समधिरोपितः समधिष्ठापितः शरासने धनुषि गुणो मौर्वी येन तथाभूते सति, क्षणादल्पेनैव कालेन, अवरोपितो विमोचितश्चापगुणो धनुःप्रत्यञ्चा यैस्ते तथाभूताः, उभयेऽपि पक्षद्वयसम्बन्धिनोऽपि, सैनिकाः सुभटाः, स्वकटकमुखं निजशिबिरभूमिर्वाम्, आसेदुः प्रापुः । अपरेद्युरन्यस्मिन् दिवसे, रिपुजन एव शत्रुलोक एव गहनं वनं तस्याङ्गारस्तेन, काष्ठाङ्गारेण राजवेन, बहुधा विविधप्रकारेण, प्रोत्साहितानि प्रवर्धितानि विजयकथनानि यस्य तथाभूतः, मथनस्तन्नामकः, प्रतिफलितं प्रतिबिम्बितं तपनबिम्बं सूर्यमण्डलं

अनीकिनीं पुरोधाय पद्मास्योऽपि रणाङ्गणम् ।
आससाद धराधीशखेचराधीशसंगतः ॥ ७७ ॥

तदनु मथनपद्मास्याभ्यां तिलकितमुखसङ्गमाः कोणताडितनिस्साणप्रभृतिविविधवाद्यरवाहूतनिर्जरनिरन्तरान्तरिक्षप्रदेशाः, क्ष्वेडारवविजृम्भितसिंहगर्जनभयतर्जितदिशावशावल्लभाः, नूतननिकषकषणनिर्मलीकृतकरचलितकरवालवल्लिकाप्रतिबिम्बितरविबिम्बतया मूर्तीकृतमिव निजप्रतापमाविभ्राणाः, उभयेऽपि वीराः श्लाघायोग्यं युद्धं विधातुमारभन्त ।

कदनदुर्दिनमत्तशिखावलः करतलोद्धृतकार्मुकभीकरः ।
स मथनः प्रचचाल रणाजिरे विपिनदेश इवोद्धतकेसरी ॥ ७८ ॥
विपाट्य घोटान्गजतां निपात्य भटान्विभिद्य क्षितिपैः सहायम् ।
संक्षोभयामास कुरूद्वहस्य बलाम्बुधिं मन्दरवत्पयोधिम् ॥ ७९ ॥
प्रधाव्य वेगाद्रथमाजिसीम्नि पद्माननस्तस्य पुरो बभूव ।
काम्पिल्यकेशस्य स पल्लवेशो लाटाधिराजस्य च बुद्धिषेणः ॥ ८० ॥
महाराष्ट्रमहीशस्य गोविन्दधरणीपतिः ।
अन्येषां पुरतस्तस्थुर्नन्दाढ्यविपुलादयः ॥ ८१ ॥

तस्य प्रभया दीप्त्या पिञ्जरिताः पिङ्गलवर्णीकृता दिशावकाशाः काष्ठान्तरालानि येन तथाभूतः सन्, रिपुसेनासमुद्रं प्रत्यर्थिपृतनापारावारम्, कवलयन्निव ग्रसन्निव, आजिरङ्गं युद्धभूमिम्, आजगाम समापतति स्म ।

अनीकिनीमिति—धराधीशखेचराधीशैर्भूमिभृद्विद्याधरराजैः संगतः सहितः, पद्मास्योऽपि जीवकसुहृत्प्रधानोऽपि, अनीकिनीं पृतनाम्, पुरोधायाग्रे कृत्वा, रणाङ्गणं समराजिरम्, आससाद प्राप ॥ ७७ ॥

तदन्विति—तदनु तदनन्तरम्, मथनः काष्ठाङ्गारस्यालः पद्मास्यो जीवन्धरसुहृत् ताभ्याम्, तिलकितः स्थासकयुतो मुखभागो येषां ते, कोणैर्वादनदण्डैस्ताडितानि समाहतानि यानि निस्साणप्रभृतिविविधवाद्यानि निःसाणप्रमुखानेकवादित्राणि तेषां रवैः शब्दैराहूता आकारिता ये निर्जरा देवास्तैर्निरन्तरो निरवकाशोऽन्तरिक्षप्रदेशो गगनभागो यैस्ते, क्ष्वेडारवैः सिंहनादैर्विजृम्भितं वर्धितं यत् सिंहगर्जनभयं मृगेन्द्रगर्जितभीतिस्तया तर्जिता भर्त्सिता दिशावशावल्लभा दिग्गजा यैस्ते, नूतननिकषेषु प्रत्यग्रनिकषोपलेषु कषणेन घर्षणेन निर्मलीकृताः स्वच्छीकृताः करचालिताः पाणिप्रकम्पिता याः करवालवल्लिकाः कृपाणलतास्तासु प्रतिबिम्बितं प्रतिफलितं यद्रविबिम्बं सूर्यमण्डलं तस्य भावस्तत्ता तया, मूर्तीकृतमिव सदेहीकृतमिव निजप्रतापं स्वतेजः, आविभ्राणा दधानाः, उभयेऽपि पक्षद्वयसम्बन्धिनोऽपि, वीरा योद्धारः, श्लाघायोग्यं प्रशंसार्हम्, युद्धं विधातुं कर्तुम्, आरभन्त तत्परा बभूवुः ।

कदनदुर्दिनेति—कदनं युद्धमेव दुर्दिनं मेघच्छन्नं दिनं तस्मिन् मत्तशिखावलो मत्तमयूरः, 'मेघच्छन्नेऽह्नि दुर्दिनम्' इत्यमरः । करतले हस्ततले उद्धृतमुत्थापितं यत्कार्मुकं धनुस्तेन भीकरो भयङ्करः, स पूर्वोक्तः, मथनो राज्ञश्यालः, विपिनदेशे गहनप्रान्ते, उद्धतकेसरीव दृप्तमृगेन्द्र इव, रणाजिरे समराङ्गणे, प्रचचाल प्रचलति स्म । द्रुतविलम्बितवृत्तम्, 'द्रुतविलम्बितमाह नभौ भरौ' इति लक्षणात् ॥७८॥

विपाट्येति—अयं मथनः, क्षितिपैः राजभिः, सह सार्धम्, घोटान् वाहान् , विपाट्य विदार्य, गजतां हस्तिसमूहम्, निपात्य पातयित्वा, भटान् योद्धॄन् , विभिद्य खण्डयित्वा, पयोऽब्धिम् क्षीरसागरम्, मन्दरवत् सुमेरुरिव, कुरूद्वहस्य जीवन्धरस्य, बलाम्बुधिं पृतनापारावारम्, संक्षोभयामास क्षुभितं चकार ॥७९॥

प्रधाव्येति—आजिसीम्नि युद्धाजिरे, वेगात् प्रजवात् , रथं स्यन्दनम्, प्रधाव्य धावयित्वा, पद्माननः पद्मास्यः, तस्य मथनस्य, पुरोऽग्रे, बभूव, स प्रसिद्धः; पल्लवेशः पल्लवजनपदेशः काम्पिल्यकेशस्य काम्पिल्यनगरनाथस्य, पुरो बभूव, बुद्धिषेणश्च तन्नामा जीवकसुहृत् , लाटाधिराजस्य लाटदेशस्वामिनः, पुरो बभूव ॥८०॥

महाराष्ट्रेति—गोविन्दधरणीपतिर्जीवन्धरमातुलः, महाराष्ट्रमहीशस्य महाराष्ट्रभूपालस्य, नन्दाढ्य-

समापतन्तीः सहसा समन्तादनीकिनीः पद्ममुखप्रवीरः ।
प्रत्यग्रहीदेष शरप्रचारैः स्रोतस्विनीरेष इवाम्बुराशिः ॥ ८२ ॥

सौजन्यमानते कुर्वञ्जन्यमुद्धतशात्रुषु ।
शरान्मुमोच पद्मास्यो न परान्मापि लाघवम् ॥ ८३ ॥

मथनेन शरावलिं तमिस्रां सृजता तत्र निशामुखायितम् ।
विशिखैः किरणैर्विभिन्दता तां जलजास्येन निशाकरायितम् ॥८४॥

एवं परस्परशरखण्डनेन व्रणकथानभिज्ञगात्रयोः, विस्मयविस्तारितलोचनैः श्लाघोन्मुखैर्बहिर्मुखैर्निरन्तरं निरीक्ष्यमाणयोः, दिगन्तविसारिभिः शरासारैराकाशं मूर्तमिवादधानयोः, प्रवीराभिलाषेणोभयोः समीपं मुहुर्मुहुर्गतागतक्लेशमविगणय्योत्सर्पन्त्या जयश्रिया दृढमालिङ्गितवपुषोः, साहसविलोकनसमयसुरवृष्टकल्पतरुकुसुमसुरभिलभुजयुगलयोः, चक्रीकृतचापलीलामध्यविराजमानशरीरतया परिवेषमध्यगयोः परस्परसंमुखयोरिव दिवाकरयोः, प्रवीरयोरनयोः समरक्रीडामातन्वतोः, कुपितवदनो मथनः, पद्माननस्य कार्मुकगुणं विभिद्य हर्षेण प्रगर्जन् , इमं व्याहारमुररीचकार ।

चापस्य जीवविच्छेदात्क धावसि भयाकुलः ।
ननु रे भवतोऽप्येवं जीवमेष हरिष्यति ॥ ८५ ॥

विपुलादयो नन्दाढ्यविपुलप्रमुखाः, अन्येषामितरेषाम्, पुरतोऽग्रे, तस्थुस्तिष्ठन्ति स्म ॥ ८१ ॥

समापतन्तीरिति—एकोऽद्वितीयः प्रधानो वा, अम्बुराशिः सागरः, स्रोतस्विनीरिव नदीरिव, एषोऽयम्, पद्ममुखप्रवीरः पद्मास्यप्रधानसुभटः, सहसा झटिति, समन्तात् सर्वतः, समापतन्तीः समागच्छन्तीः, अनीकिनीः पृतनाः, शरप्रचारैर्बाणप्रचारैः, प्रत्यग्रहीत् निवारयामास ॥८२॥

सौजन्यमिति—आनते आनम्रे, सौजन्यं साधुताम्, उद्धतशात्रुषु उद्धतारातिषु, जन्यं समरम् । कुर्वन् विदधत् , पद्मास्यः शरान्मुमोच बाणान् तत्याज, लाघवं क्षुद्रत्वम्, परानपि शत्रूनपि, न मुमोच न तत्याज ॥ ८३ ॥

मथनेन शरावलिमिति—तत्र युद्धे, तमिस्रां मलिनाम्, शरावलिं बाणपङ्क्तिम्, पक्षे बाणपङ्क्तिरूपां कृष्णरजनीम्, सृजता रचयता, मथनेन राजवरश्यालेन, निशामुखायितं रजनीमुखमिवाचरितम्, विशिखैर्बाणैः, किरणैर्मरीचिभिः, तां पूर्वोक्ताम्, तमिस्रां भिन्दता खण्डयता, जलजास्येन पद्मास्येन, निशाकरायितं चन्द्रवदाचरितम् ॥ ८४ ॥

एवं परस्परशरखण्डनेनेति—एवमनेन प्रकारेण परस्परशरखण्डनेन मिथोबाणशकलनेन, व्रणकथाया ईर्मचर्चाया अनभिज्ञमपरिचितं गात्रं शरीरं ययोस्तयोः, विस्मयेनाश्चर्येण विस्तारिते लोचने नयने येषां तैः, श्लाघोन्मुखैः प्रशंसातत्परैः, बर्हिर्मुखैरमरैः, निरीक्ष्यमाणयोरवलोक्यमानयोः दिगन्तविसारिभिः काष्ठान्तप्रसरणशीलैः, शरासारैर्बाणवर्षणैः, आकाशं गगनम्, मूर्तमिव सशरीरमिव, आदधानयोः कुर्वाणयोः, प्रवीराभिलाषेण प्रकृष्टयोद्धृप्राप्त्याकाङ्क्षया, उभयोर्द्वयोः, समीपं निकटम्, मुहुर्मुहुर्भूयोभूयः, गतागतक्लेशं यातायातदुःखम्, अविगणय्य समुपेक्ष्य, उत्सर्पन्त्या प्रवर्धमानया, जयश्रिया जयलक्ष्म्या, आलिङ्गितं समाश्लिष्टं वपुः शरीरं ययोस्तयोः, साहसविलोकनसमये अवदानावलोकनकाले सुरवृष्टानि देववृष्टानि यानि कल्पतरुकुसुमानि कल्पवृक्षपुष्पाणि तैः सुरभिलं सुगन्धितं भुजयुगलं बाहुयुगं ययोस्तयोः, चक्रीकृतं वर्तुलीकृतं यच्चापं धनुस्तस्य लीला शोभा तस्या मध्येऽभ्यन्तरे विराजमानं शोभमानं शरीरं ययोस्तयोर्भावस्तत्ता तया, परिवेषस्य परिधेर्मध्ये गच्छत इति परिवेषमध्यगौ तयोः, परस्परसम्मुखयोरन्योऽन्याभिमुखयोः, दिवाकरयोरिव सूर्ययोरिव, समरक्रीडां युद्धकेलिम्, आतन्वतोर्विस्तारयतोः, अनयोः प्रवीरयोः प्रकृष्टसुभटयोः, मध्ये कुपितवदनः क्रुद्धमुखः, मथनः काष्ठाङ्गारश्यालसनाभिः, पद्माननस्य पद्मास्यस्य, कार्मुकगुणं धनुर्ज्याम्, विभिद्य खण्डयित्वा, हर्षेण प्रमदेन, प्रगर्जन् गर्जितं कुर्वन् , इमं वक्ष्यमाणम्, व्याहारमालापम्, उररीचकार स्वीकृतवान् ।

चापस्येति—चापस्य धनुषः, जीवविच्छेदात् प्रत्यञ्चानाशात्, भयाकुलः भयव्यग्रः सन्, क्व धावसि

इति लपितमवेत्य पद्मवक्त्रः स्फुटतरमाह गिरं गभीरनादः ।
अयि मथन ममास्ति चन्द्रहासः परिहृतशत्रुसतीमुखेन्दुहासः ॥ ८६ ॥

इति कृपाणमुत्पाट्य करे विचलयन्, शताङ्गोत्सङ्गादुत्प्लुत्यामन्दतरलाघवाक्रान्तशात्रवानीकः पञ्चाननप्रत्यनीकपराक्रमः पद्माननः, कदनदुर्मदविलसितस्य मथनस्य शिरसि समुत्खातकरवालं निचखान ।

मथने भुवि पातिते रणाग्रे जलजास्ये निपपात पुष्पवृष्टिः ।
रिपुसैनिकनेत्रतोऽम्बुवृष्टिः कुपिताद्राजगणाच्च बाणवृष्टिः ॥ ८७ ॥

तदानीं कौरवबलकोलाहलमाकर्ण्य प्रवृद्धकोपौ कुटिलीकृतचापौ तपननिकाशप्रतापौ लाटकाम्पिल्यकभूपौ बुद्धिषेणपल्लवराजयोरभिमुखं तस्थिवांसौ दिशावकाशनिबिडितसायकं हर्षितनिजनायकं वैमानिकजनसीमातीताकुलहर्षदायकं भयानकं समीकमाकलय्य कल्पान्तदहनसकाशे तयोः शरनिकरहुताशे पतङ्गौ बभूवतुः ।

महाराष्ट्रविदेहेशोः समरं समजृम्भत ।
दारुणं शरसंभिन्नवारणं जयकारणम् ॥ ८८ ॥

कुत्र पलायसे, ननु निश्चयेन, रे शत्रो, एवमनेन प्रकारेण, एषोऽहम्, भवतोऽपि तथापि, जीवं प्राणम्, हरिष्यति अपनेष्यति ॥ ८५ ॥

इति लपितमिति—इति पूर्वोक्तम्, लपितं कथितम्, अवेत्य ज्ञात्वा, गभीरनादः उन्नतरशब्दः, पद्मवक्त्रः पद्मास्यः, स्फुटतरमतिस्पष्टं यथा स्यात्तथा, गिरं वाचम्, आह अगाद्, अयि मथन भो राजश्यालं, मम पद्मास्यस्य, परिहृतो दूरीकृतः शत्रुसतीनां शत्रुस्त्रीजनानां मुखेन्दुहासो वदनचन्द्रहासो येन तथाविधः, चन्द्रहासः खड्गः, अस्ति विद्यते, मम हस्ते चन्द्रहासे विद्यमाने कोदण्डमौर्वीच्छेदो हानिप्रदो नास्तीति भावः ॥ ८६ ॥

इति कृपाणमिति—इति पूर्वोक्तप्रकारेण, कृपाणं खड्गम्, उत्पाट्य कोशान्निःसार्य, करे हस्ते विचलयन् कम्पयन्, शताङ्गस्य रथस्योत्सङ्गस्तस्मात्, उत्प्लुत्य समुत्पत्य, अमन्दतरलाघवेन प्रभूतक्षिप्रत्वेनाक्रान्तं पराभूतं शात्रवानीकं शत्रुसैन्यं येन तथाभूतः, पञ्चाननप्रत्यनीकः सिंहसदृशः पराक्रमो वीर्यं यस्य सः, पद्माननः पद्मास्यः, कदनदुर्मदेन युद्धदुर्गर्वेण विलसितः शोभितस्तस्य, मथनस्य काष्ठाङ्गारश्यालस्य, शिरसि मूर्ध्नि, समुत्खातकरवालं समुत्पाटितकृपाणम्, निचखान निहितवान् ।

मथने भुवीति—मथने, भुवि रणवसुधायाम्, पातिते सति, रणाग्रे समरशिरसि, जलजास्ये पद्मास्ये, पुष्पवृष्टिः सुमनोवर्षणम्, पपात पतति स्म । रिपुसैनिकनेत्रतः शत्रुसुभटनयनात्, अम्बुवृष्टिर्जलवृष्टिः, निपपात, कुपितात् क्रोधयुक्तात्, राजगणाच्च नृपतिनिचयाच्च बाणवृष्टिः शरवर्षम्, पपात ॥ ८७ ॥

तदानीमिति—तदानीं मथनमरणकाले, कौरवबलस्य जीवन्धरसैन्यस्य कोलाहलं कलकलशब्दम्, आकर्ण्य श्रुत्वा, प्रवृद्धो वृद्धिङ्गतः कोपः क्रोधो ययोस्तौ, कुटिलीकृतौ वक्रीकृतश्चापो धनुर्ययोस्तौ, तपननिकाशः सूर्यसदृशः प्रतापस्तेजो ययोस्तौ, लाटकाम्पिल्यकयोर्देशविशेषयोर्भूपौ राजानौ, बुद्धिषेणपल्लवराजयोः सुभटविशेषयोः, अभिमुखं पुरस्तात्, तस्थिवांसौ तिष्ठन्तौ, दिशावकाशेषु काष्ठामध्येषु निबिडिताः सान्द्रीकृताः सायका बाणा यस्मिंस्तत्, हर्षिताः प्रमुदिता निजनायकाः स्वस्वामिनो यस्मिंस्तत्, वैमानिकजनेभ्यो निर्जरजनेभ्यः सीमातीतस्य निर्मर्यादस्याकुलहर्षस्य विचित्रप्रमोदस्य दायकं दातृ, भयानकं भीकरम्, समीकं युद्धम्, आकलय्य दृष्ट्वा, कल्पान्तदहनसकाशे प्रलयपावकसदृशे, तयोः बुद्धिषेणपल्लवराजयोः, शरनिकरहुताशे बाणसमूहवह्नौ, पतङ्गौ शलभौ, बभूवतुरास्ताम् । मृताविति भावः ।

महाराष्ट्रेति—महाराष्ट्रविदेहेशोर्महाराष्ट्रविदेहभूपालयोः, दारुणं भयंकरम्, शरैर्बाणैः संभिन्नाः खण्डिता वारणा गजा यस्मिंस्तत्, जयकारणं विजयनिमित्तम्, समरं युद्धम्, समजृम्भत वद्धे ॥ ८८ ॥

प्रदीप्रशरसङ्कुटं प्रचुरदीर्णदृप्यद्भटं निलिम्पजनलालितं निखिलशस्त्रलीलायितम् ।
प्रदर्शकनिदर्शनं प्रथितयुद्धविद्याविदां वितेनतुरिमौ तदा विविधसंगरं भीकरम् ॥ ८९ ॥

गोविन्दराजस्य शरेण लूनं शीर्षं रणे तस्य धराधिपस्य ।
राहुभ्रमं तीव्रकरस्य कुर्वंस्तत्कीर्तिनुत्यै दिवि केतुरासीत् ॥ ९० ॥

एवं निजपृतनायां महतां राज्ञां निधनं निशम्य विशालतरामर्षः काष्ठाङ्गारः, सर्वाभिसारेण निजबलं पुरोधाय, तेजोविभवविजितविकर्तनप्रतापान्भूपानहितजनमृत्युसरूपान्कौरवजनसंक्षोभाय प्रेषयामास ।

कारं कारं बलोत्साहं तेषां क्षोणीशिनां रुषा ।
पुरो बभूव नन्दाढ्यः करिणामिव केसरी ॥ ९१ ॥

ततश्च यदुचितं सकलवीरश्लाघानाम्, यद्युक्तं जीवन्धरानुजस्य, यदुदाहरणं पाण्डवयुद्धानाम्, यत्समुचितं नीतिमार्गाणाम्, यदासेचनकं लेखलोचनानाम्, यदानन्दनं निजसैनिकानाम्, यन्निदानं कुन्दनिर्मलकीर्तिकल्लोलानाम्, यद्रङ्गस्थलं जयलक्ष्मीताण्डवस्य, यदधिकरणं कल्पद्रुमानल्पपुष्पवृष्टीनाम्, यदगोचरपदं कविवचनविलासानाम्, तादृशमायोधनं नन्दाढ्यः कन्दलयामास ।

प्रदीप्रशरसङ्कुटमिति—तदा तस्मिन् काले, इमौ महाराजविदेहेशौ, प्रदीप्रैर्भास्वरैः शरैर्बाणैः सङ्कुटं व्याप्तम्, प्रचुरं प्रभूतं यथा स्यात्तथा दीर्णाः खण्डिता दृप्यद्भटा मत्तशूरा यस्मिंस्तम्, निलिम्पजनैरमरसमूहैर्लालितं प्रशंसितम्, निखिलशस्त्रलीलायितं सर्वायुधकेलितुल्यम्, प्रदर्शकाणां दर्शकजनानां निदर्शनमुदाहरणम्, युद्धविद्यां विदन्तीति युद्धविद्याविदः प्रथिताश्च ते प्रसिद्धाश्च ते प्रथितयुद्धविद्याविदश्च प्रसिद्धसमरविद्याज्ञातारश्चेति प्रथितयुद्धविद्याविदस्तेषाम्, भीकरं भयङ्करम्, विविधसंगरं नानाविधसमरम्, वितेनतुर्विस्तारयामासतुः । पृथ्वीछन्दः ॥८९॥

गोविन्दराजस्येति—रणे युद्धे, गोविन्दराजस्य जीवकमातुलस्य, शरेण बाणेन, लूनं छिन्नम्, तस्य धराधिपस्य राज्ञः, शीर्षं मस्तकम्, तीव्रकरस्य सूर्यस्य, राहुभ्रमं विधुन्तुदशङ्काम्, कुर्वन् विदधत्, तत्कीर्तिनुत्यै तदीययशःस्तुत्यै, दिवि गगने, केतुर्वैजयन्ती, आसीद् बभूव ॥९०॥

एवं निजपृतनायामिति—एवमनेन प्रकारेण, निजपृतनायां स्वसेनायाम्, महतां श्रेष्ठानाम्, राज्ञां नृपाणाम्,, निधनं मृत्युम्, निशम्य श्रुत्वा, विशालतरः प्रभूततमोऽमर्षः क्रोधो यस्य तथाभूतः, काष्ठाङ्गारः, सर्वाभिसारेण सर्वप्रयत्नेन, निजबलं स्वसैन्यम्, पुरोधायाग्रे कृत्वा, कौरवजनानां जीवकपक्षीयाणां संक्षोभस्तस्मै, तेजोविभवेन प्रतापसम्पत्त्या विजितः पराभूतो विकर्तनप्रतापस्तपनतेजो यैस्तान्, अहितजनमृत्युसरूपान् शत्रुजनकालप्रतिमान्, भूपान् राज्ञः प्रेषयामास प्रजिघाय ।

कारं कारमिति—बलोत्साहं सैन्योत्साहम्, कारं कारं कृत्वा कृत्वा, नन्दाढ्यो जीवकानुजः, करिणां गजानाम्, केसरीव सिंह इव, रुषा क्रोधेन, तेषां क्षोणीशिनां पृथ्वीपालानां, पुरोऽग्रे, बभूव ॥९१॥

ततश्च यदुचितमिति—ततश्च तदनन्तरम्, यद् आयोधनं सकलवीरश्लाघानां निखिलसुभटप्रशंसानाम्, उचितं योग्यम्, यद्, जीवन्धरानुजस्य जीवककनिष्ठस्य, युक्तमर्हम्, यत्, पाण्डवयुद्धानां पाण्डुपुत्रसमराणाम्, उदाहरणं निदर्शनम्, यत्, नीतिमार्गाणां सुनयवर्त्मनाम्, समुचितं योग्यम्, यत्, लेखलोचनानां निर्जरनयनानाम्, आसेचनकमतृप्तिकरम्, यत्, निजसैनिकानां स्वकीयसुभटानाम्, आनन्दनं प्रमोदकारणम्, यत्, कुन्दनिर्मलकीर्तिकल्लोलानां माध्यतुल्यविमलयशःपरम्पराणाम्, निदानमादिकारणम्, यत्, जयलक्ष्मीताण्डवस्य विजयश्रीनर्तनस्य, रङ्गस्थलं रङ्गभूमिः, यत्, कल्पद्रुमानल्पपुष्पवृष्टीनां कल्पानोकहविपुलकुसुमवर्षाणाम्, अधिकरणमाधारस्थानम्, यत्, कविवचनविलासानां कवितामौक्तिकानाम्, अगोचरपदम् अस्थानम्, तादृशं तथाभूतम्, आयोधनं युद्धम्, नन्दाढ्यः, कन्दलयामास वर्धयामास ।

वीरस्य तस्य निशितैर्घनकङ्कपत्रैः सम्पूरिते नभसि युद्धमपश्यमानाः ।
जोषं निषेदुरमरा युधि वीतदेहा वीराश्च सूर्यमनिरीक्ष्य चिरं चचलुः ॥ ६२ ॥

तस्य मार्गणविभिन्नशरीरैरुत्पलायितमरिव्रजवीरैः ।
शोणितप्रसृतवाहिनीगतैरुत्पलायितमिभावलिखण्डैः ॥ ६३ ॥

अनास्थया तेन निपीड्य मुक्ता विलक्षतां प्रापुररिप्रवीराः ।
न पत्रिणस्तत्र महाहवाग्रे सुरासुराणामपि दुर्निरीक्ष्ये ॥ ६४ ॥

तदानीं मन्थानाचलमिव रिपुबलजलधिं क्षोभयन्तमतिविस्मयनीयकरलाघवं रणरङ्गे निर्निरोधशताङ्गप्रचारं निस्तुलसेनासंपदमप्यद्वितीयम्, निरस्तदोषमपि महादोषम्, अमितगजतुरगादिसहायमपि चापैकसहायम्, रथगतमपि धनुषि निषण्णम्, समुत्सारितविद्विडिन्धनमपि ज्वलत्प्रतापानलम्, आयतलोचनमपि सूक्ष्मदर्शनम्, नन्दाढ्यं एकमपि द्विधा त्रिधा चतुर्धा च वीक्ष्य बहवो मेदिनीपतयस्तत्क्षणमभ्यसूययेव स्वयं पञ्चत्वमाजग्मुः ।

वीरस्येति—वीरयत इति वीरस्तस्य शूरस्य, तस्य नन्दाढ्यस्य, निशितैस्तीक्ष्णैः, घनकङ्कपत्रैर्निबिडबाणविशेषैः, नभसि गगने, सम्पूरिते सम्भृते सति, युद्धं समरम्, अपश्यमाना अनवलोकयन्तः, अपश्यमाना इत्यत्र परस्मैपदाच्छानच्प्रयोगश्चिन्त्यः, अमरा निलिम्पाः, जोषं तूष्णीं यथा स्यात्तथा, निषेदुस्तस्थुः, युधि समरे, वीतो विनष्टो देहो येषां ते, वीराश्च सुभटाश्च, सूर्यं दिवाकरम्, अनिरीक्ष्यानवलोक्य, चिरं दीर्घकालपर्यन्तम्, चचलुः सञ्चलन्ति स्म ॥६२॥

तस्य मार्गणैरिति—तस्य नन्दाढ्यस्य, मार्गणैर्बाणैर्विभिन्नं खण्डितं शरीरं येषां तैः, अरिव्रजवीरैः शत्रुसमूहसुभटैः, उत्पलायितमुपरिधावितम्, शोणितस्य रुधिरस्य प्रसृता या वाहिनी नदी तस्यां गतैः प्राप्तैः, इभावलिखण्डैः शुण्डालसमूहशकलैः, उत्पलमिव कुवलयमिवाचरितमित्युत्पलायितम् ॥ स्वागता रथोद्धतासम्मिश्रणादुपजातिवृत्तम् ।

अनास्थयेति—तेन नन्दाढ्येन, निपीड्य संमर्द्य, अनास्थया उपेक्षया, मुक्तास्त्यक्ताः, अरिप्रवीराः शत्रुसुभटाः, विलक्षतां श्रीविहतत्वम्, प्रापुर्लेभिरे, सुरासुराणामपि देवदानवानामपि, दुर्निरीक्ष्ये दुरवलोक्ये, तत्र तस्मिन्, महाहवाग्रे महायुद्धाग्रे, पत्रिणो बाणाः, विलक्षतां लक्ष्यभ्रष्टताम्, न प्रापुः ॥६४॥

तदानीमिति—तदानीं तस्मिन् काले, मन्थानाचलमिव मन्दरगिरिमिव, रिपुबलजलधिं शत्रुसैन्यसमुद्रम्, क्षोभयन्तं क्षुभितं कुर्वन्तम्, अतिविस्मयनीयमत्याश्चर्यकरं करलाघवं हस्तक्षिप्रकारित्वं यस्य तम्, रणरङ्गे समराजिरे निर्निरोधो निर्बाधः शताङ्गप्रचारो रथसञ्चारो यस्य तम्, निस्तुला निरुपमा सेनासंपत् पृतनासम्पत्तिर्यस्य तथाभूतमपि, अद्वितीयं द्वितीयरहितम्, यस्य पार्श्वे निरुपमा पृतना स्यात्स कथमद्वितीयो भवेदिति विरोधः, अद्वितीयः सादृश्यरहित इति परिहारः, निरस्ता दूरीकृता दोषा अवगुणा येन तथाभूतमपि महादोषं महावगुणसहितम्, यो निरस्तदोषः स महादोषयुतः कथं भवेदिति विरोधः, परिहारस्तु महादोषं महाबाहुम्, 'दोर्दोषौ च भुजो बाहुः' इत्यमरः, अमिता अपरिमिता गजतुरगादयो हस्त्यश्वप्रभृतयः सहाया यस्य तथाभूतमपि, चापैकसहायं कोदण्डैकसहायमिति विरोधः, कोदण्डप्रत्ययसहित इति परिहारः, रथगतमपि स्यन्दनस्थितमपि धनुषि चापे निषण्णं स्थितमिति विरोधः, धनुःप्रत्ययसहितमिति परिहारः, समुत्सारितं दूरीकृतं विद्विडिन्धनं शत्रुसमित् येन तथाभूतमपि ज्वलन् देदीप्यमानः प्रतापानलः प्रतापपावको यस्य तमिति विरोधः, भास्वत्प्रभावपावकमिति परिहारः, आयतलोचनमपि दीर्घचक्षुष्कमपि, सूक्ष्मदर्शनं सूक्ष्मलोचनमिति विरोधः, सूक्ष्मपदार्थदर्शकमिति परिहारः, एकमपि एकसंख्याविशिष्टमपि पक्षेऽसहितमपि, द्विधा त्रिधा चतुर्धा च द्विप्रकारेण, त्रिप्रकारेण चतुःप्रकारेण च, वीक्ष्य दृष्ट्वा, बहवो विपुलाः, मेदिनीपतयो राजानः, तत्क्षणं तत्कालम्, अभ्यसूययेव मत्सरेणेव, स्वयं स्वतः, पञ्चत्वं पञ्चसंख्याकत्वम् पक्षे मृत्युम्, आजग्मुः प्राप्नुवन्तः ।

नपुले विपुले च चापवल्लीं भृशमाकृष्य किरत्यतीव रोपान् ।
खगमण्डलमेदुरं बताभ्रं पिहितोद्यत्खगमण्डलं बभूव ॥ ६५ ॥

तावत्कोङ्कणभूपतिर्द्रुततरं धावद्रथेनागतः
क्रोधान्धो नपुले ववर्ष विशिखासारं महागर्जनः ।
यद्वद् दुर्धरवज्रपातमधिकं संवर्तकालोद्यतो
जीमूतो वसुधाधरस्य शिखरे निःसीमघोरारवः ॥ ६६ ॥

दिशं प्रतीचीमिव पद्मबन्धुं मूर्छां गतं मन्दतरप्रतापम् ।
अपासरत्संगरभूमिभागविहायसो वीरमिमं नियन्ता ॥ ६७ ॥

तदिदमाकर्ण्य शोककातरं निजजामातरं कोपारुणवदनं कुरुपङ्गववदनं समीक्ष्य विद्याधरक्षोणीपतिर्गरुडवेगः प्रथितनिजबलकोलाहलव्यालोललोकः स्तोकेतरपराक्रमः क्रमेण संग्रामसीमामवजगाहे ।

संग्रामोपरि जृम्भितः खगपतिः कोपात्करालाननः
शक्तीस्तोमरशूलजालपरिघान्कुन्तानसीन्पर्वतान् ।
वर्षन्भीमभदाट्टहासरभसक्षुभ्यद्दिशामण्डल-
श्चिक्रीडाम्बरसीम्नि संगरकलातुङ्गीभवद्दोर्मदः ॥ ६८ ॥

दृष्ट्वेमं रुधिराणि तत्र ववमुः केचिद्भटाः शत्रुषु
प्राणान्केचन तत्यजुर्भयभरात्पेतुः क्षितौ केचन ।

नपुले विपुले चेति—नपुले विपुले च एतन्नामके सुभटद्वये, चापवल्लीं धनुर्लताम्, भृशमत्यर्थम् आकृष्य, अतीवात्यन्तम्, रोपान् बाणान् , किरति वर्षति सति, खगमण्डलैः बाणसमूहैः, पक्षिसमूहैर्मेदुरं व्याप्तम्, अभ्रं गगनम्, बत खेदे, पिहितमाच्छादितमुद्यत्खगमण्डलमुदीयमानसूर्यबिम्बं यस्मिंस्तथाभूतम्, बभूव । 'खगः सूर्ये ग्रहे देवे मार्गणे च विहङ्गमे' इति मेदिनी ॥६५॥

तावत्कोङ्कणभूपतिरिति—तावत् तावत्कालपर्यन्तम् द्रुततरं शीघ्रतरम्, धावद्रथेन प्रगच्छत्स्यन्दनेन आगतः समायातः, क्रोधान्धः कोपान्धः, महागर्जनो विपुलध्वनिः, कोङ्कणभूपतिः कोङ्कणनृपतिः, नपुले एतन्नामधेयप्रत्यर्थिसुभटे, विशिखासारं बाणसमूहम्, तद्वत् ववर्ष वर्षति स्म, यद्वत् , येन प्रकारेण, संवर्तकालोद्यतः प्रलयकालोद्गतः, निःसीमघोरारवो निर्मर्यादभयङ्करस्तनितः, जीमूतो बलाहकः, वसुधाधरस्य शैलस्य, शिखरे कूटे, अधिकं विपुलम्, दुर्धरवज्रपातं प्रचण्ड पविपातम्, वर्षति । शार्दूलविक्रीडितवृत्तम् ॥६६॥

दिशं प्रतीचीमिवेति—प्रतीचीं दिशं पश्चिमाशाम्, गतं प्राप्तम्, पद्मबन्धुमिव सूर्यमिव, मन्दतरोऽतिशयेन क्षीणः प्रतापस्तेजो यस्य तम्, इमं वीरं सुभटं नपुलमिति यावत्, नियन्ता सारथिः, संगरभूमिभाग एव युद्धवसुधाभोग एव विहायो गगनं तस्मात् ; अपासरत् अपनिनाय ॥६७॥

तदिदमाकर्ण्येति—तदिदम् पूर्वोक्तम्, आकर्ण्य श्रुत्वा, शोककातरं विषाददीनम्, निजजामातरं स्वदुहितृपतिम्, कोपेन क्रोधेनारुणं रक्तं वदनं मुखं यस्य तथाभूतम्, कुरुपङ्गववदनं कुरुसिंहम्, समीक्ष्य समवलोक्य, विद्याधरक्षोणीपतिः खेचरेन्द्रः, प्रथितेन प्रसिद्धेन निजबलकोलाहलेन स्वसैन्यकलकलेन व्यालोलाश्चलिता लोका जना येन तथाभूतः, स्तोकेतरो विपुलः पराक्रमो यस्य तथाभूतः, गरुडवेगो विद्याधरपतिः, संग्रामसीमां युद्धक्षेत्रम्, अवजगाहे प्रविवेश ।

संग्रामोपरीति—संग्रामोपरि समराग्रे, जृम्भितः समापतितः, कोपात् क्रोधात् , करालाननो भयङ्करमुखः, शक्तीः, तोमरशूलजालपरिघान्, कुन्तान्, पर्वतान् पाषाणान् शैलान्वा, वर्षन्, भीमभदाट्टहासरभसेन भयावहगर्वप्रहासवेगेन क्षुभ्यद् दिशामण्डलं येन सः, संगरकलया युद्धचातुर्या तुङ्गीभवन् दोर्मदो भुजदर्पो यस्य तथाभूतः, समयतिर्गरुडवेगः, अम्बरसीम्नि गगनसीमायाम्, चिक्रीड क्रीडति स्म ॥६८॥

दृष्ट्वेममिति—तत्र समरे, इमं गरुडवेगम्, दृष्ट्वा, शत्रुषु वैरिषु मध्ये, केचिद्भटाः केचन शूराः,

केचिद्धावनलालसा वसुमतीपालाश्च दिङ्मोहतो
भ्राम्यन्तो रणसीम्नि शिक्षितहयाभ्यासप्रकर्षं दधुः ॥९९॥

रे रे कुत्र पलायितोऽसि समरे मा कम्पनं प्राप्नुया-
स्तिष्ठाग्रे हत कोङ्कणेश शमनस्त्वामीहते भक्षितुम् ।
शीर्षं ते विनिपात्य कर्णविगलद्रक्तप्रवाहैः परां
तृप्तिं कल्पयति क्षणात्क्षितिपतिर्भूतावलीनामिह ॥ १०० ॥

एवं जगर्जुः खचरसैनिकाः सिंहविक्रमाः । सपत्नकण्ठकदलीकाण्डताण्डवितासयः ॥ १०१ ॥

तदानीं पुष्पितकिंशुककाननमिव पल्लविताशोकवनमिव पारिभद्रद्रुमविपिनमिव च परितः क्षतं निजबलमवलोक्य कृताभिषेणनं कोङ्कणमहीपतिं कर्णपूरसौरभ्यसमाकृष्टभृङ्गावलिशङ्कावहशिञ्जिनीविगलद्विशिखधाराभिर्गगनतलं पूरयन्तमेनममन्दवेगो गरुडवेगः क्षणेन वक्षसि शक्त्या विव्याध ।

भेत्स्यन्ति मे मण्डलमद्य वीरा विद्याधरेन्द्रेण विदीर्णदेहाः ।
इतीव वेगेन पयोजबन्धुरस्ताचलोद्यद्दरीं विवेश ॥ १०२ ॥

तदनु गरुडवेगविक्षिप्तगण्डशैलखण्डिताङ्गेन हतशेषेण सैन्येन काष्ठाङ्गारसेनाधिपे कटकं

रुधिराणि रक्तानि, ववमुर्वमन्ति स्म, केचन केऽपि, प्राणान् जीवितानि, तत्यजुर्मुमुचुः, केचन केऽपि, भयभरात् त्रासाधिक्यात्, क्षितौ पृथिव्याम्, पेतुः पतन्ति स्म, धावनलालसाः पलायनोत्सुकाः, केचित् केऽपि, वसुमतीपालाश्च राजानश्च, दिङ्मोहतो दिशाभ्रान्त्या, रणसीम्नि समराभोगे, भ्राम्यन्तः पर्यटन्तः सन्तः, शिक्षितहयाभ्यासप्रकर्षं शिक्षिताश्वाभ्यासाधिक्यम्, दधुर्धरन्ति स्म ॥९९॥

रे रे कुत्रेति—रे रे हत कोङ्कणेश, नीच कोङ्कणधराधीश्वर ! कुत्र पलायितोऽसि क्व प्रधावितोऽसि, समरे युद्धे, कम्पनं वेपथुम्, मा प्राप्नुयाः मा लभेथाः, अग्रे पुरस्तात्, तिष्ठ निवृत्तगतिर्भव, शमनो यमः, त्वां भवन्तम्, भक्षितुमत्तुम्, ईहते चेष्टते, क्षितिपती राजा, इह समरे, ते तव, शीर्षं शिरः, विनिपात्य छित्त्वा, कर्णाभ्यां कण्ठप्रदेशाभ्यां विगलन्तो निःसरन्तो ये रक्तप्रवाहा रुधिरस्रोतांसि तैः भूतावलीनां पिशाचपङ्क्तीनाम्, तृप्तिं संतोषम्, क्षणादल्पेनैव कालेन, कल्पयति विदधाति ॥ शार्दूलविक्रीडितच्छन्दः ॥१००॥

एवं जगर्जुरिति—एवं पूर्वोक्तप्रकारेण, सिंहस्येव विक्रमो येषां ते सिंहविक्रमा मृगेन्द्रपराक्रमाः, सपत्नानां शत्रूणां कण्ठकदलीनां ग्रीवामोचातरूणाम् काण्डेषु प्रकाण्डेषु ताण्डविनो नृत्यं कुर्वाणोऽसिर्येषां ते, खचरसैनिका विद्याधरसेनामनुजाः, जगर्जुर्गर्जन्ति स्म ॥१०१॥

तदानीमिति—तदानीं तस्मिन् काले, पुष्पितं कुसुमितं यत्किंशुककाननं पलाशवनं तद्वत् पल्लवितं किसलयितं यदशोकवनं कङ्केलिकाननं तद्वद्, पारिभद्रद्रुमविपिनमिव च मन्दारमहीरुहवनमिव च 'पारिभद्रस्तु मन्दारे निम्बद्रौ देवदारुणि' इति मेदिनी, परितः समन्तात्, क्षतं खण्डितम्, निजबलं स्वसैन्यम्, अवलोक्य दृष्ट्वा, कृताभिषेणनं विहिताक्रमणम्, कर्णपूरयोः कर्णाभरणपुष्पयोः सौरभ्येण सौगन्ध्येन समाकृष्टा स्वसात्कृता या भृङ्गावलिर्भ्रमरपङ्क्तिस्तस्याः शङ्कावहा संशयधारिका या शिञ्जिनी मौर्वी तस्या विगलन्त्यः पतन्त्यो या विशिखधारा बाणसन्ततयस्ताभिः, गगनतलं नभस्तलम् पूरयन्तं सम्भरन्तम्, एनं कोङ्कणमहीपतिं पूर्वोक्तं कोङ्कणराजम्, अमन्दवेगः प्रकृष्टरयः, गरुडवेगो गन्धर्वदत्ताजनकः, क्षणेन, वक्षसि बाहुमध्ये, शक्त्या शक्तिनामकशस्त्रविशेषेण, विव्याध विध्यति स्म ।

भेत्स्यन्तीति—अद्येदानीम्, विद्याधरेन्द्रेण गरुडवेगेन, विदीर्णाः खण्डिता देहा विग्रहा येषां ते, वीरा योद्धारः, मे मम, मण्डलं बिम्बम्, भेत्स्यन्ति विदारयिष्यन्ति, रणे निहताः शूरा सूर्यमण्डलं भित्त्वा स्वर्गं यान्तीति प्रसिद्धेः, इतीव हेतोः, पयोजबन्धुः सूर्यः, वेगेन रयेण, अस्ताचलस्यापरशैलस्योद्यद्दरीं समुन्नतगुहाम्, विवेश प्रविष्टवान् । उपेन्द्रवज्रा ॥१०२॥

तदन्विति—तदनु सूर्यास्तानन्तरम्, गरुडवेगेन विद्याधरेन्द्रेण विक्षिप्तैर्विप्रकीर्णैर्गण्डशैलैः स्थूलोपलैः

प्रविष्टे, गरुडवेगमहीपालोऽपि समरावलोकनसंमुखबर्हिर्मुखकरमुक्तकल्पकतरुप्रसूनसुरभिलभुजदण्डघटितकोदण्डः, सहर्षपरस्परसल्लापकल्लोलकोरकितकुतुकेन समरकलाविलासविजयसंस्मरणजनितनिजस्वामिश्लाघापरेण सैनिकनिकरेण प्रतिक्षणमीक्ष्यमाणः, पल्लवक्षितिवल्लभगोविन्दमहीपाललोकपालप्रभृतिभिः संभाषमाणो, ग्रहोन्मुक्तेनेव चन्द्रेण मूर्च्छोन्मुक्तेन नपुलेन पुरस्कृतं स्वकटकभुवमाससाद ।

अपरेऽह्नि वाहिनीपतीनां मणिमालामकुटाङ्गदाम्बरादीन् ।
रथसूततुरङ्गकङ्कटादीन्प्रतिपाद्याशु कृतघ्नकः प्रतस्थे ॥ १०३ ॥

एवं पारितोषिकप्रदानपरिवर्धितोत्साहेनाहमहमिकापरवशेन सर्वाभिसारेण बलेन स्थगितक्षितितलाभोगः, पर्वतनिकाशं विजयगिरिनामधेयं गन्धसिन्धुरमधिरूढो, भाविचक्रपातसूत्रन्यासरेखाशङ्कावदान्यरेखात्रयशोभितं गलमभितो लम्बमानेव चक्रपतनसंप्रतीक्षस्य स्कन्धगतस्य मृत्योः करवितीर्णेनेव पाशेन मुक्ताहारेण भासुरवक्षःस्थलः, कोटीरमणिगणप्रतिबिम्बितमार्तण्डमण्डलतया 'कुरुवीरशरसमाच्छादिते गगने सोऽयं न मत्संनिधानमागन्तुमर्हति' इति करुणाकरेण पूर्वमेव गृहीतमस्तक इव बाभास्यमानः, कुटिलितभ्रुकुटीघटितवदनः काष्ठाङ्गारः स्वयमेव संग्रामाङ्गणमाजगाम ।

खण्डितं विदारितमङ्गं यस्य तेन, हताशेषेण भिक्षावशिष्टेन, सैन्येन पृतनया, सह, काष्ठाङ्गारसेनाधिपे राजबलैन्यपतौ, कटकं शिबिरम्, प्रविष्टेऽन्तर्गते, सति, गरुडवेगमहीपालोऽपि विद्याधरधरावल्लभोऽपि, समरावलोकने, युद्धदर्शने संमुखास्तत्परा ये बर्हिर्मुखा देवास्तेषां करेभ्यो हस्तेभ्यो मुक्तानि पातितानि यानि कल्पकतरुप्रसूनानि कल्पवृक्षपुष्पाणि तैः सुरभिलं सुगन्धियुक्तं यद्भुजदण्डं बाहुदण्डं तत्र घटितं धारितं कोदण्डं धनुर्येन सः, सहर्षः सप्रमोदो यः परस्परसल्लापकल्लोलो मिथोवार्तालापसन्ततिस्तेन कोरकितं कुड्मलितं कुतुकं कौतुकं यस्य तेन, समरकलाविलासे युद्धकलाविलासे यो विजयस्तस्य संस्मरणेन निध्यानेन जनिता समुत्पादिता या निजस्वामिश्लाघा स्वभर्तृस्तुतिस्तस्यां परेण दक्षेण, सैनिकनिकरेण सुभटसमूहेन, प्रतिक्षणं प्रतिसमयम्, ईक्ष्यमाणः समवलोक्यमानः, पल्लवक्षितिवल्लभश्च गोविन्दमहीपालश्च, लोकपालश्चेति पल्लवक्षितिवल्लभगोविन्दमहीपाललोकपालास्ते प्रभृतिर्येषां तैः, सह, संभाषमाणो वार्तालापं कुर्वाणः, ग्रहोन्मुक्तेन राहुत्यक्तेन, चन्द्रेणेव शशिनेव, मूर्च्छोन्मुक्तेन मोहातीतेन, नपुलेन तन्नामकसुभटार्धाशेन, पुरस्कृतं सहितम्, यथा स्यात्तथा, स्वकटकभुवं निजशिबिरभूमिम्, आससाद प्राप ।

अपरेऽह्नीति—अपरेऽह्नि द्वितीये दिवसे, कृतघ्नकः काष्ठाङ्गारः, वाहिनीपतीनां सेनापतीनाम्, मणिमालामकुटाङ्गदाम्बरादीन् रत्नस्रग्मौलिकेयूरवस्त्रादीन् , रथसूततुरङ्गकङ्कटादीन् स्यन्दनसारथिहयकवचप्रभृतीन्, प्रतिपाद्य वितीर्य, आशु झटिति, प्रतस्थे प्रस्थितो बभूव ॥१०३॥

एवं पारितोषिकेति—एवमनेन प्रकारेण, पारितोषिकस्य पुरस्कारस्य प्रदानेन वितरणेन परिवर्धितः समेधित उत्साहो यस्य तेन, अहमहमिकापरवशेन अहं पूर्वमहं पूर्वमित्यहमिका तस्याः परवशं तेन, सर्वाभिसारेण विश्वतोमुखेन, बलेन सैन्येन, स्थगितः समाच्छादितः क्षितितलाभोगः पृथ्वीतलविस्तारो येन सः, पर्वतनिकाशं गिरिसन्निभम्, विजयगिरिनामधेयमेतन्नामकम्, गन्धसिन्धुरं मत्तगजेन्द्रम्, अधिरूढोऽधिष्ठितः, भावी भविष्यंश्चक्रपातोऽरिनिक्षेपस्तस्य सूत्रन्यासस्य सूत्रपातस्य याः रेखा लेखास्तासां शङ्काया संदेहे वदान्यं समुदारं यत् रेखात्रयं लेखात्रयं तेन शोभितं समलङ्कृतम्, गलं कण्ठम्, अभितः समन्तात् , लम्बमानेन स्रंसमानेन, चक्रपतनस्यारिपातस्य संप्रतीक्षा यस्य तस्य, स्कन्धगतस्य भुजमूर्धस्थितस्य, मृत्योर्यमस्य करवितीर्णेन पाणिप्रदत्तेन, पाशेनेव बन्धनेनेव, मुक्ताहारेण मौक्तिकस्रजा, भासुरं देदीप्यमानं वक्षःस्थलं भुजमध्यस्थलं यस्य सः, कोटीरमणिगणे मौलिमणिगणे प्रतिबिम्बितं मार्तण्डमण्डलं सूर्यबिम्बं यस्य तस्य भावस्तत्ता तया, कुरुवीरस्य जीवन्धरस्य शरैर्बाणैः समाच्छादितं स्थगितं तस्मिन् , गगने नभसि सति, सोऽयं काष्ठाङ्गारः, मत्संनिधानं मन्निकटम्, आगन्तुमायातुम्, नार्हति न योग्योऽस्ति, इत्येवं करुणाकरेण दयालयेन, दिवाकरेण सूर्येण, पूर्वमेव प्रागेव, गृहीतमस्तक इवात्तशीर्ष इव, बाभास्यमानः शोशुभ्यमानः कुटिलित-

कुरूणां वीरोऽपि प्रचुरबलकोलाहलकलाविलासव्याप्ताशापतिसदनवातायनमुखः ।
क्रमात्कामन्नाम्नद्विपमशनिवेगाभिधमथं रणाग्रं संप्राप क्षितिविदितदोर्दण्डमहिमा ॥ १०४ ॥
जडीकृतश्रवःपुटे दिवौकसां जयानकारवे सुराचलोल्लसद्दरीर्विशत्यनेकशः ।
सुपर्वकामिनीजनप्रहर्षगीतकौशलं बभूव निष्फलं तदा प्रतिध्वनद्गुहारवैः ॥ १०५ ॥
रथक्षुण्णक्षोणीतलगलितपांसून्मुखगतान्दिशानागाः शुण्डोद्धृतजलकणैः शान्तिमनयन् ।
रहः स्त्रीणां रूप्याचलकुहरतल्पेषु खचराः विवस्त्राणामङ्गेष्वतिबहललग्नान्वसनतः ॥ १०६ ॥
अदृष्टचरमाहवं सुरगणैरथोज्जृम्भितं क्षणेन मदमेदुरं प्रचुरवीरवादोत्कटम् ।
चलाचलकृपाणिकाप्रतिफलद्विवस्वत्प्रभादुरीक्षमतुलं तदा जयरमातुलारोहणम् ॥ १०७ ॥

वीर्यश्रीप्रथमावतारसरणौ तस्मिन्कुरूणां पतौ
बाणान्मुञ्चति हस्तनर्तितधनुर्वल्लीसमारोपितान् ।
दीर्णच्छत्रभटच्छटाभिरभितः संभिद्यमानान्तरं
भास्वद्बिम्बमहो बभार गगनश्रेणीमधुच्छत्रताम् ॥ १०८ ॥

भ्रुकुटीभ्यां वक्रीकृतभ्रूभ्यां घटितं युक्तं वदनं मुखं यस्य तथाभूतः, कण्ठाकारः कृतप्रशिरोमणिः, स्वयमेव स्वत एव, संग्रामाङ्गणं समराजिरम्, आजगाम समाययौ ।

कुरूणामिति—प्रचुरेण प्रभूतेन बलस्य सैन्यस्य कोलाहलकलाविलासेन कलकलध्वनिसञ्चारेण व्याप्तानि सम्भरितानि आशापतिसद्मनानां दिक्पालभवनानां वातायनमुखानि गवाक्षविवराणि येन सः, क्षितौ पृथिव्यां विदितः प्रसिद्धो दोर्दण्डमहिमा बाहुदण्डप्रभावो यस्य तथाभूतः, अप्रमेयः, कुरूणां वीरोऽपि जीवन्धरोऽपि, क्रमात् क्रमशः, अशनिवेगोऽभिधा यस्य तम् अशनिवेगनामानम्, गन्धद्विपं मत्तहस्तिनम्, क्रामन् अधितिष्ठन् , रणाग्रं समराग्रम्, संप्राप ययौ । शिखरिणीच्छन्दः ॥१०४॥

जडीकृतश्रवःपुट इति—तदा तस्मिन् काले, जडीकृतश्रवःपुटे सम्भरितकर्णविवरे, दिवौकसां देवानाम्, जयानकारवे जयदुन्दुभिनादे, अनेकशो नैकवारान् , सुराचलस्य सुमेरोरुल्लसन्त्यः शोभमाना या दर्यो गुहास्तासु, विशति कृतप्रवेशे सति, प्रतिध्वनद्गुहारवैः प्रतिनदद्दरीशब्दैः, सुपर्वकामिनीजनानां देवाङ्गनानां प्रहर्षगीतस्यानन्दगायनस्य कौशलं चातुर्यम् निष्फलं निरर्थम्, बभूव, पञ्चचामरच्छन्दः ॥१०५॥

रथक्षुण्णक्षोणीति—दिशानागा दिग्गजाः; मुखगतान् संमुखायातान्, रथैः स्यन्दनैः क्षुण्णं चूर्णीकृतं यत्क्षोणीतलं भूमितलं तस्माद् गलिता निष्पतिता या पांसवो धूलयस्तान्, शुण्डोद्धृतजलकणैः करोत्पतितसलिलशीकरैः, शान्तिं शमनम्, अनयन् प्रापयन् । खचरा विद्याधराः, रहो विजने, रूप्याचलकुहरतल्पेषु विजयार्धगुहाशयनेषु, विवस्त्राणां वस्त्ररहितानाम्, स्त्रीणां वनितानाम्, अङ्गेषु देहेषु, अतिबहललग्नान् अतिनिषक्तान् उक्तविधपांसून्, वसनतो वस्त्रात् , शान्तिं शमनम्, अनयन् , प्रापयन् । वस्त्रखण्डैर्वनितादेहस्थपांसून् दूरीचक्रुरिति भावः । शिखरिणीच्छन्दः ॥१०६॥

अदृष्टचरमाहवमिति—अथानन्तरम्, तदा तस्मिन् काले, सुरगणैर्देवसमूहैः, अदृष्टचरमनवलोकितपूर्वम्, क्षणेनाल्पेनैव कालेन, मदमेदुरं गर्वयुक्तम्, प्रचुरवीरवादैः प्रभूतसुभटगर्जनैरुत्कटं सुयुक्तम्, चलाचलकृपाणिकासु चञ्चलखड्गेषु प्रतिफलन् प्रतिबिम्बितीभवन् यो विवस्वान् सूर्यस्तस्य प्रभया दीप्त्या दुरीक्षं दुरवलोक्यम्, अतुलमनुपमम्, जयरमातुलारोहणं विजयलक्ष्मीतुलारोहणम्, आहवं युद्धम्, उज्जृम्भितं वर्धितम् । पृथ्वीच्छन्दः ॥१०७॥

वीर्यश्रीप्रथमावतारसरणाविति—वीर्यश्रिया वीरलक्ष्म्याः प्रथमावतारस्य पूर्वावतरणस्य सरणिर्मार्गस्तस्मिन् , तस्मिन् पूर्वोक्ते, कुरूणां पतौ जीवन्धरे, हस्तयोः करयोर्नर्तिता कम्पिता या धनुर्वल्ली कोदण्डलता तस्यां समारोपिताः संधृतास्तान्, बाणान् शरान्, मुञ्चति त्यजति सति, अभितः परितः, दीर्णाः खण्डिता ये छत्रभटाः छत्रियशूरास्तेषां छटाः पङ्क्तयस्ताभिः, संभिद्यमानान्तरं खण्डितमध्यम्, भास्वद्बिम्बं

हृप्यत्सिन्धुरदीर्णकुम्भयुगलीप्रोन्मुक्तमुक्ताफलै-
वाणावासिजयश्रियः प्रविगलन्मोदाश्रुबिन्दुप्रभैः ।
लेखानां कुसुमोत्करं सुरभिलं द्राग्वर्षतां हर्षतां
प्रत्यर्चां चतुरश्चकार समरे सोऽयं कुरूणां पतिः ॥ १०९ ॥

एवं भिन्दन्बलं वीरः कृतघ्नमभियाय सः । वीरश्रियानुधावन्त्या समालिङ्गितविग्रहः ॥ ११० ॥

एवं जयश्रीताण्डवरङ्गस्थलायमानभुजयुगलं कुरुवीरमवलोक्य काष्ठाङ्गार एवमुवाच ।

क्व वैश्यपुत्रस्त्वमतीव भीरुर्वयं क्व चापागमपारनिष्ठाः ।
अथापि ते संयति संप्रवृत्तावनात्मवेदित्वमवेहि हेतुम् ॥ १११ ॥

तुलादण्डधृतौ वैश्य तव यत्करकौशलम् । विस्तारयसि तच्चापे धिक्चापलमहो तव ॥ ११२ ॥

साहसेन रणे तिष्ठन्मुमूर्षुरसि मुग्धधीः ।
त्वत्प्राणवायोः कः पाता मत्कृपाणाहिना विना ॥ ११३ ॥

इति काष्ठाङ्गारदर्पविलसितदुर्वचनमाकर्ण्य कुरुवीरोऽप्येवं जगाद ।

सूर्यमण्डलम्, गगनश्रेणीमधुच्छत्रताम् नभःश्रेणीक्षौद्रच्छत्रकताम्, बभार दधार, इत्यहो आश्चर्यम् ॥ शार्दूलविक्रीडितच्छन्दः ॥१०८॥

हृप्यत्सिन्धुरेति—समरे युद्धे, चतुरो विदग्धः, सोऽयं पूर्वोक्तः, कुरूणां पतिर्जीवन्धरः, बाणेषु शरेष्वावसन्त्येवं शीला बाणावासिनी सा चासौ जयश्रीश्च विजयलक्ष्मीश्चेति बाणावासिजयश्रियः, प्रविगलन्तः पतन्तो ये मोदाश्रुबिन्दवो हर्षाश्रुशीकरास्तेषां प्रभेव प्रभा येषां तैः, हृप्यन्तो माद्यन्तो ये सिन्धुरा हस्तिनस्तेषां दीर्णा खण्डिता या कुम्भयुगली गण्डयुगं तस्याः प्रोन्मुक्तानि पतितानि यानि मुक्ताफलानि मौक्तिकानि तैः, द्राग् झटिति, सुरभिलं, सुगन्धियुक्तम्, कुसुमोत्करं पुष्पप्रचयम्, वर्षतां मुञ्चताम्, हर्षतां मोदमानानाम्, लेखानां देवानाश्च प्रत्यर्चां प्रतिपूजाम्, चकार विदधे । देवैः पुष्पाणि वर्षितानि जीवन्धरेण च गजगण्डेभ्यो मुक्ताफलानीति भावः ॥१०९॥

एवं भिन्दन्बलमिति—एवमनेन प्रकारेण, बलं सैन्यम्, भिन्दन् विदारयन्, अनुधावन्त्या, समनुगच्छन्त्या, वीरश्रिया वीरलक्ष्म्या, समालिङ्गितः समाश्लिष्टो विग्रहो यस्य तथाभूतः, स पूर्वोक्तः, वीरो जीवन्धरः, कृतघ्नं काष्ठाङ्गारम्, अभियाय तदभिमुखं जगाम ॥११०॥

एवं जयश्रीति—एवमनेन प्रकारेण, जयश्रिया विजयलक्ष्म्यास्ताण्डवस्य नर्तनस्य रङ्गस्थलायमानं रङ्गभूमिवदाचरत् भुजयुगलं बाहुयुगं यस्य तथाभूतम्, कुरुवीरं जीवन्धरम्, अवलोक्य दृष्ट्वा, काष्ठाङ्गारः कृतघ्नः, एवमनेन प्रकारेण, उवाच जगाद ।

क्व वैश्य पुत्र इति—अतीव नितराम्, भीरुः कातरः, वैश्यपुत्रो वणिक्सुतः, त्वम्, क्व, चापागमस्य धनुःशास्त्रस्य पारेऽन्ते निष्ठा येषां तथाभूताः, वयं क्षत्रियपुत्राः, क्व च कुत्र च, द्वयोर्महदन्तरमस्तीति भावः, अथापि युद्धयोग्यताया अभावेऽपि, ते तव, संयति युद्धे, संप्रवृत्तौ संप्रवर्तने, अनात्मवेदित्वमनात्मज्ञताम्, हेतुं कारणम्, अवेहि जानीहि । स्वाज्ञानाभाव एव त्वं युद्धे प्रवर्तसे इति भावः ॥१११॥

तुलादण्डधृताविति—हे वैश्य हे वणिक्, तुलादण्डधृतौ तुलायष्टिधारणे, तव ते, यत्करकौशलं यद्धस्तचातुर्यम्, अस्ति, तत्, चापे धनुषि, विस्तारयसि वितानयसि, अहो आश्चर्यम्, तव ते चापलं क्षुद्रत्वम्, धिक् ॥११२॥

साहसेनेति—साहसेन धैर्येण, रणे समरे, तिष्ठन् विद्यमानः, मुग्धधीर्मन्दमतिः त्वम्, मुमूर्षुर्मर्तुमिच्छुरसि । मत्कृपाण एव मत्करवाल एवाहिः पन्नगस्तेन, विनान्तरेण, त्वत्प्राणवायोस्त्वज्जीवितपवनस्य, पाता पानकर्ता, कः, न कोऽपीति यावत् । रूपकम् ॥११३॥

इतीति—इत्येवं प्रकारेण, काष्ठाङ्गारस्य कृतघ्नस्य दर्पदुर्विलसितं गर्वचेष्टितं यद् दुर्वचनं दुर्वाक्यं तद् आकर्ण्य श्रुत्वा, कुरुवीरोऽपि, जीवन्धरोऽपि, एवमित्थम्, जगाद समुवाच ।

त्रपां विना मे पुरतः प्रजल्पसे कृतघ्न वीर्यं तव दृष्टपूर्वम् ।
त्वया समः कोऽपि न लक्ष्यते क्षितौ नूनं प्रभुद्रोहविधौ समर्थः ॥ ११४ ॥

विरम विरम शत्रो विश्रुतोऽसि त्वमेकस्त्रिजगति परिपूर्णः पातकिप्राग्रगण्यः ।
प्रसरति मम बाणः प्राणहारी पुरस्तात्त्वमपि कुरु समीके जीवरक्षाप्रयत्नम् ॥ ११५ ॥

इति वदतः कुरुवीरस्य विस्फारघोषेणाशनिगर्जनशङ्कावदान्येन दृढार्तिसंघटितं कम्पमानजीवं चापभुजगमाकृष्य विषज्वालायमानान्भल्लान्काष्ठाङ्गारः कौरवं प्रति दुर्धर्षामर्षेण ववर्ष ।

विच्छिद्य विच्छिद्य शराननेकानरिपोः शरासाद्गलितान्गभीरान् ।
अलक्ष्यसंधानविकर्षमोक्षान्बाणान्सपत्ने स ववर्ष वीरः ॥ ११६ ॥

गृहीतपक्षाः पटवः पुङ्खाः कौरवचापतः । प्रसस्रुः संगरे शब्दा वादिनो वदनादिव ॥ ११७ ॥

विपाठवर्षेण कुरूद्वहस्य नभःस्थली द्राक्पिहिताब्जबन्धुः ।
तिरोहितारिक्षितिपालसेना बभूव धात्री युगपद्रणाग्रे ॥ ११८ ॥

विपाठपञ्जरेणासौ विद्विषत्पक्षिणां कुलम् । बबन्ध स्पन्दनायोग्यं मन्देतरपराक्रमः ॥ ११९ ॥

त्रपामिति—कृतं हन्तीति कृतघ्नस्तत्सम्बुद्धौ हे कृतघ्न, त्रपां विना लज्जामन्तरेण, मे मम, पुरतोऽग्रे, प्रजल्पसे निरर्थकं वचो ब्रूषे । तव ते, वीर्यमवदानम्, पूर्वं दृष्टमिति दृष्टपूर्वम्, अवलोकितपूर्वम्, नूनं निश्चयेन, क्षितौ पृथिव्याम्, प्रभुद्रोहविधौ राजद्रोहकार्ये समर्थो दक्षः, त्वया भवता, समस्तुल्यः, न लक्ष्यते नो दृश्यते । उपजातिवृत्तम् ॥११४॥

विरम विरमेति—हे शत्रो हे अराते, विरम विरम विरतो भव विरतो भव, त्रिजगति त्रिलोक्याम्, त्वम्, एकोऽद्वितीयः, परिपूर्णः पातकैकपूर्णः, पातकिप्राग्रगण्यः पापिजनाग्रेसरः, विश्रुतोऽसि प्रसिद्धोऽसि, प्राणहारी जीवनघातकः, मम, बाणः शरः, पुरस्तात् अग्रे, प्रसरति प्रगच्छति, त्वमपि, समीके समरे, जीवरक्षाप्रयत्नं प्राणरक्षोपायम्, कुरु विधेहि । मालिनीवृत्तम् ॥११५॥

इति वदत इति—इत्येवम्, वदतः कथयतः, कुरुवीरस्य जीवन्धरस्य, अशनिगर्जनशङ्कावदान्येन वज्रगर्जनसंदेहदाननिपुणेन, विस्फारघोषेण विशालमौर्वीरवेण, सहितम्, दृढा चासावार्तिश्चेति दृढार्तिस्तया संघटितं सुदृढधनुष्कोटिसहितम् 'आर्त्तिः पीडा धनुष्कोट्योः' इति मेदिनी, कम्पमानो जीवो यस्य तं वेपमानप्रत्यञ्चम्, चापभुजम्, चापभुजगं धनुःपन्नगम्, आकृष्य समुत्तान्य, विषज्वालायमानान् गरलानलतुल्यान्, भल्लान् प्रासान्, काष्ठाङ्गारः कृतघ्नः, कौरवं प्रति जीवन्धरमुद्दिश्य, दुर्धर्षामर्षेण विकटकोपेन, ववर्ष वर्षति स्म ।

विच्छिद्य विच्छिद्येति—स वीरः पूर्वोक्तसुभटः, रिपोः शत्रोः, शरासात् कोदण्डात्, गलितान् निःसृतान्, गभीरान् सुदृढान्, अनेकान् बहून्, शरान् बाणान्, विच्छिद्य विच्छिद्य खण्डयित्वा खण्डयित्वा, सपत्ने रिपौ, अलक्ष्या वेगाधिक्येनादृश्याः संधानविकर्षमोक्षाः धारणकर्षणमोक्षा येषां तथाभूतान्, बाणान् शरान्, ववर्ष वर्षति स्म ॥११६॥

गृहीतपक्षा इति—संगरे युद्धे पक्षे वाग्युद्धे शास्त्रार्थे इति यावत्, वादिनः पूर्वपक्षस्थापिनो विदुषः, वदनान्मुखात्, शब्दा इव वाच इव, कौरवचापतः स्वामिदारासनात्, पुङ्खा बाणाः, प्रसस्रुर्निःसरन्ति स्म, उभयोः सादृश्यमाह—गृहीतपक्षाः समर्थितस्वाभिप्रायाः पक्षे धृतपत्त्राः, पटवश्चातुर्योपेताः पक्षे समर्था इति ॥११७॥

विपाठवर्षेण—कुरूद्वहस्य जीवकस्य, विपाठवर्षेण शरवर्षेण, नभःस्थली गगनभूमिः, द्राक् झटिति, पिहिताब्जबन्धुस्तिरोहितसूर्या, बभूव, रणाग्रे समराग्रे, धात्री पृथिवी च, युगपदेककालावच्छेदेन, तिरोहिता विहितारिक्षितिपालसेना शत्रुभूपालपृतना यस्यां तथाभूता, बभूव ॥११८॥

विपाठपञ्जरेणेति—मन्देतरो विशालः पराक्रमो यस्य सः, असौ जीवन्धरः, स्पन्दनायोग्यं

तदानीमुदारपराक्रमप्रथितभुजदण्डयोः समकालमिव गीर्वाणगणलक्ष्यमाणमार्गणसंधानविकर्षणमोक्षयोरन्योन्यं विजयाशाविजृम्भितरन्ध्रान्वेषणयोराश्चर्यकर्मकलाविलोकनसमयसंतुष्टवृन्दारकजनकरारविन्दसंदीयमानमन्दारकुसुमतुन्दिलसविधप्रदेशयोः मध्यप्रसृतमृत्युनासायमानबाहुदण्डविधृतचक्रीकृतकोदण्डतया कोपकुटिलितमृत्युभ्रूयुगलशङ्कासंपादकयोः प्रवृद्धोत्साहयोर्भयानकसमरमादधानयोः कुरुवीरकाष्ठाङ्गारयोः परस्परशरघट्टनजनितविस्फुलिङ्गपरम्परा मेघमालासु प्रविष्टापि न शान्तिमाससाद ।

> तादृक्षे समरे प्रसन्नमनसो वीरस्य सात्यंधरे-
> बाणालीशरदा विभिन्नवपुषि क्षीणे क्षणेनाखिले ।
> द्वेषिक्ष्मापशिलीमुखाभ्रपटले स्वीया तदा वाहिनी
> प्रोन्मीलन्मुखवारिजा प्रविलसत्क्षीराजहंसा बभौ ॥ १२० ॥
>
> जीवंधरस्य करपद्मगतं सपत्नशस्त्रालिवारणपरं घनदीप्रखेटम् ।
> अर्धे विभिद्य युधि राहुनिगीर्णचन्द्र-बिम्बार्धवत्प्रविदधत्स जगर्ज शत्रुः ॥ १२१ ॥
>
> कोपेनाथ कुरूद्वहः प्रतिदिशं ज्वालाकलापोर्मिलं
> चक्रं शत्रुगले निपात्य तरसा चिच्छेद तन्मस्तकम् ।

संचलनावहम्, विहङ्गमा एव पक्षिणः खेचरास्तेषाम्, कुलं समूहम्, विपाठपञ्जरेण शरशलाकागृहेण, बबन्ध बध्नाति स्म । शरसमूहैः शत्रवो निरुद्धा इति भावः ॥११९॥

तदानीमिति—तदानीं तस्मिन् समये, उदारपराक्रमेण विशालावदानेन प्रथितौ प्रसिद्धौ भुजदण्डौ ययोस्तयोः, समकालमिव युगपदिव, गीर्वाणगणेन देवसमूहेन लक्ष्यमाणा दृश्यमाना मार्गणानां बाणानां ग्रहणसंधानविकर्षणमोक्षा आदानधारणाकर्षणत्यजनानि ययोस्तयोः, अन्योऽन्यं परस्परम्, विजयाशया विजयाभिलाषेण विजृम्भितं वृद्धिङ्गतं रन्ध्रान्वेषणं छिद्रान्वेषणं ययोस्तयोः, आश्चर्यकर्मकलानां विस्मयावहकार्यवैदग्धीनां विलोकनसमये दर्शनकाले संतुष्टाः प्रसन्ना ये वृन्दारकजना देवसमूहास्तेषां करारविन्दैर्हस्तकमलैः संदीयमानानि वितीर्यमाणानि यानि कुसुमानि पुष्पाणि तैस्तुन्दिलः स्थूलीभूतः सविधप्रदेशो ययोस्तयोः, मध्ये प्रसृतः प्रसारं प्राप्तो यो मृत्युर्यमस्तस्य नासायमानयोर्घ्राणसदृशयोर्बाहुदण्डयोर्भुजदण्डयोर्विधृतमारोपितं चक्रीकृतं वर्तुलाकारं कोदण्डं धनुर्ययोस्तयोर्भावस्तत्ता तया, कोपकुटिलिते क्रोधवक्रीकृते ये मृत्युभ्रुवौ यमभ्रुकुटी तयोर्युगलं द्वयं तस्य शङ्कायाः संशयस्य संपादकौ विधायकौ तयोः, प्रवृद्धोत्साहयोर्वर्धमानोल्लासयोः, भयानकसमरं भयावहयुद्धम्, आदधानयोः कुर्वाणयोः, कुरुवीरकाष्ठाङ्गारयोः जीवन्धरकृतघ्नयोः, परस्परशरघट्टनेन मिथोबाणाघातेन जनिता समुत्पन्ना या विस्फुलिङ्गपरम्परा वह्निकणसन्ततिः सा, मेघमालासु घनराजिषु, प्रविष्टापि समन्तर्गताऽपि, शान्तिं विध्यापनम्, नाससाद न प्राप ।

तादृक्षे समर इति—तदा तस्यां वेलायाम्, तादृक्षे पूर्वोक्तप्रकारे, समरे युद्धे, अखिले सम्पूर्णे, द्वेषिक्ष्मापस्य शत्रुराजस्य शिलीमुखा एव बाणा एवाभ्रपटलं मेघमण्डलं तस्मिन्, प्रसन्नमनसः प्रमुदितचेतसः, वीरस्य वीर्याधारस्य, सात्यन्धरेर्जीवन्धरस्य, बाणाली शरसन्ततिरेव शरद् जलदान्तर्तुस्तया, क्षणेनाल्पेनैव कालेन, विभिन्नवपुषि खण्डितशरीरे, क्षीणे सति, स्वीया स्वकीया, वाहिनी नदी सेना च, प्रोन्मीलन्ति विकसन्ति मुखवारिजानि वदनकमलानि यस्यां तथाभूता, प्रविलसन्तः शोभमानाः क्षीराजहंसा लक्ष्मणलक्षितराजश्रेष्ठाः पक्षे शोभोपलक्षितहंसविशेषा यस्यां तथाभूता सती, बभौ शुशुभे । रूपकालङ्कारः ॥१२०॥

जीवन्धरस्येति—युधि युद्धे, जीवन्धरस्य सात्यन्धरेः, करपद्मगतं पाणिकमलस्थितम्, सपत्नशस्त्रालिवारणपरं शत्रुहेतिततिनिवारणतत्परम्, घनदीप्रखेटं सुदृढभास्वरफलकम्, अर्धे अर्धे भागे, विभिद्य खण्डयित्वा, राहुणा विधुन्तुदेन निगीर्णं निगलितं यच्चन्द्रबिम्बं शशिमण्डलं तस्यार्धवत्, प्रविदधत् कुर्वन्, शत्रुः काष्ठाङ्गारः, जगर्ज गर्जति स्म ॥१२१॥

कोपेनाथेति—अथ खेटच्छेदानन्तरम्, कुरूद्वहो जीवकः, कोपेन क्रोधेन, प्रतिदिशं

देवाः पुष्पमवाकिरन्नविकलं श्लाघासहस्रैः समं
लोकान्दोलनतत्परः कुरुबले कोलाहलः कोऽप्यभूत् ॥ १२२ ॥

तदानीं संत्रासपलायमानं शात्रवबलमवलोक्य, कुरुवीरः करुणाकरः क्षणादभयघोषणां विधाय, तद्बन्धुतां दीनामाहूय, तत्कालोचितसम्भाषणादिभिः परिसान्त्वयामास ।

विजया विजयाधिकेन पुत्रप्रवरेणाद्य बभूव वीरमाता ।
अधुना विधुना समानवक्त्रा मम पुत्री च चिराय वीरपत्नी ॥१२३॥

इत्युक्त्वा मातुलः सोऽयं गोविन्दधरणीपतिः ।
कुरुवीरं कुलोद्धारं कुतुकादभ्यनन्दयत् ॥ १२४ ॥

वसुन्धरा क्षुद्रकलत्रसंगात्संमार्ष्टुकामा समवेतदोषम् ।
कुरुप्रवीरस्य विशालदोषमुपाश्रिताभूदिति चित्रमेतत् ॥ १२५ ॥

तदनु जीवन्धरो मुकुलिताञ्जलिकञ्जानां समन्ततः सामन्तवसुमतीपालानामानतीरालोकनेनाङ्गीकुर्वाणः, पूर्वाचलमिव पयोजबन्धुर्गन्धसिन्धुरमधिरूढो, दूरादनुगच्छद्भिः सेनाध्यक्षैरनुक्षणं प्रतिपाल्यमानेक्षणावसरः, सामजविराजितैर्गरुडवेगगोविन्दपल्लवपतिलोकपालप्रभृतिभिर्महीपालैः परिवृतसविधप्रदेशः, शताङ्गसंगतैर्नन्दाढ्यप्रमुखैः सहोदरैः पद्मास्यप्रभृतिभिः सहचरैश्च परिशोभितः, प्रसन्न-

---

प्रतिकाष्ठम्, ज्वालाकलापोर्मिकं ज्वालासमूहसन्ततियुक्तम्, चक्रं शस्त्रविशेषम्, शत्रुगले वैरिकण्ठे, निपात्य पातयित्वा, तरसा बलेन, तन्मस्तकं शत्रुशिरः, चिच्छेद कर्तयामास । देवा अमराः, श्लाघासहस्रैर्बहुविधप्रशंसाभिः, समं सार्धम्, अविकलं पूर्णं यथा स्यात्तथा, पुष्पं कुसुमम्, अवाकिरन् ववृषुः । कुरुबले जीवन्धरसैन्ये, लोकान्दोलनतत्परो लोकोच्चालनदक्षः, कोऽप्यद्भुतः, कोलाहलः कलकलशब्दः, अभूत् ॥१२२॥

तदानीमिति—तदानीं काष्ठाङ्गारमहाप्रयाणकाले, संत्रासेन भयेन पलायमानं समन्ताद्धावमानम्, शात्रवबलं प्रत्यर्थिपृतनाम्, अवलोक्य दृष्ट्वा, करुणाकरो दयाखनिः, कुरुवीरो जीवन्धरः, क्षणादल्पेनैव कालेन, अभयघोषणामभयध्वनिम्, विधाय कृत्वा, दीनां दुःखीभूताम्, तस्य बन्धुतां बन्धुसमूहस्ताम्, आहूयाकार्य, तत्कालोचितसम्भाषणादिभिः तत्समययोग्यवार्तालापप्रभृतिभिः, परिसान्त्वयामास शमयामास ।

विजयेति—अद्याधुना, विजया मम भगिनी, विजयाधिकेन विजयेनाधिको विजयाधिकस्तेन विजयवर्धमानेन, पुत्रप्रवरेण श्रेष्ठपुत्रेण, वीरमाता वीरजननी, बभूव । अधुना साम्प्रतम्, विधुना शशिना, समानं सदृशं वक्त्रं मुखं यस्यास्तथाभूता, मम पुत्री च मे सुता च, चिराय चिरकालेन, वीरपत्नी वीरजाया, बभूव ॥१२३॥

इत्युक्त्वेति—मातुलो मातृसहोदरः, सोऽयं प्रसिद्धः, गोविन्दधरणीपतिर्गोविन्दमहीपालः, इति पूर्वोक्तप्रकारेण, उक्त्वा कथयित्वा, कुलोद्धारं वंशोद्धारकम्, कुरुवीरं सात्यन्धरिम्, कुतुकात्कौतूहलेन, अभ्यनन्दयत् प्रशशंस ॥१२४॥

वसुन्धरेति—वसुन्धरा वसुधा, क्षुद्रश्चासौ कलत्रश्चेति क्षुद्रकलत्रो नीचकाष्ठाङ्गारस्तस्य संगात्सम्बन्धात्, समवेतदोषं प्राप्तावगुणम्, संमार्ष्टुकामेव दूरीकर्तुमना इव, कुरुवीरस्य जीवन्धरस्य, विशालदोषं प्रचुरावगुणं पक्षे दीर्घबाहुम्, उपाश्रिता समालम्बिता, अभूद् बभूव, इति चित्रमाश्चर्यम् ॥१२५॥

तदन्विति—तदनु तदनन्तरम्, जीवन्धरो जीवकः, समन्ततः परितः, मुकुलितानि कुड्मलितानि अञ्जलिकञ्जानि हस्तपुटकमलानि येषां तेषाम्, सामन्तवसुमतीपालानां मण्डलेश्वरभूपालानाम्, आनतीर्नमस्कारान्, आलोकनेन दर्शनेन, अङ्गीकुर्वाणः स्वीकुर्वाणः, पूर्वाचलमुदयगिरिम्, पयोजबन्धुरिव सूर्य इव, गन्धसिन्धुरं मदमत्तगजम्, अधिरूढोऽधिष्ठितः, दूराद् विप्रकृष्टात्, अनुगच्छद्भिरनुयायिभिः, सेनाध्यक्षैः पृतनापतिभिः, अनुक्षणं प्रतिक्षणमपि, प्रतिपाल्यमानोऽपेक्ष्यमाण ईक्षणावसरोऽवलोकनकालो यस्य सः, सामजेषु गजेषु विराजिताः शोभितास्तैः, गरुडवेग-गोविन्द-पल्लवपति-लोकपालप्रभृतिभिः, महीपालै राजभिः परिवृतः परीतः सविधप्रदेशो निकटवर्तिभूभागो यस्य सः, शताङ्गसंगतै रथसहितैः नन्दाढ्यप्रमुखैर्नन्दाढ्यप्रधानैः, सहोदरैः सनाभिभिः, पद्मास्यप्रभृतिभिः पद्मास्यादिभिः सहचरैः मित्रैश्च, परिशोभितः समलङ्कृतः, प्रसन्नं

निजमुखसुधाकरालोकैरुल्लसता बलजलधिना मेदुरपुरोभागः, सहर्षोद्वेगमहमहमिकया सरभसापनीतातपत्रान्परस्परोत्पीडनकुपिततुरङ्गमनिवारणायाससहानेकैकशः प्रतिनामग्रहणं समीपगतैः काष्ठाङ्गारबन्धुभिरावेद्यमानान्प्रणामसमयप्रचलितमकुटतटघटितपद्मरागप्रभाप्रसरणकैतवेन प्रकटीकृतानुरागाञ्छात्रवपक्षलक्षितक्षोणीपतीन्यथार्हं बहुमन्यमानः, समरसमानीतसपत्नलक्ष्मीनिवासविकचपुण्डरीकायमानेन निजबलजलधिफेनकूटशङ्कावहेनातपत्रेण विभ्राजितः, पार्श्वद्वयसमुद्धूयमानचामरसमीरनर्तितकर्णावतंसः, पुरतो 'जय जय' इति मधुरमुच्चैः पठता बन्दिवृन्देन पापठ्यमाननिजविरुदवैभवः, क्रमेण समासाद्य तत्र ध्वजकलशतोरणवितानाद्यष्टशोभाभिरलंकृतासु रथ्यासु प्रविशमानः, सकलपुरतरुणीजनबाहुवंशगलितमुक्ताफलायमानैः पुष्पलाजोपहारैः संभाव्यमानो राजमन्दिरमाससाद । तत्र च,

> विसृष्टनिखिलावनीपतिचयः कुरूणां पति-
> र्मितैः परिजनैर्युतः प्रविशति स्म सोऽन्तःपुरम् ।
> निमग्नमरिकामिनीजनमतीव शोकाम्बुधौ
> निरीक्ष्य करुणाकरः सपदि सान्त्वनायोद्यतः ॥ १२६ ॥

ततः कुरुवीरः शोकसन्त्रासदीनमन्तःपुरिकाजनं समीपमानीय तत्र कुररीमिव क्रन्दन्तीं

प्रहृष्टं निजमुखमेव स्वकीयास्यमेव सुधाकरश्चन्द्रस्तस्यालोकैः प्रकाशैः, उल्लसता वर्धमानेन प्रसन्नीभवता च, बलजलधिना सेनासागरेण मेदुरो मिलितः पुरोभागो यस्य सः, सहर्षोद्वेगं प्रमोदोद्वेगसहितं यथा स्यात्तथा, अहमहमिकया अहं पूर्वमहं पूर्वमिति भावेन, सरभसं सवेगमपनीतं दूरीकृतमातपत्रं छत्रं येषां तान्, परस्परोत्पीडनेन मिथः संमर्दनेन कुपिता रुष्टा ये तुरङ्गमा अश्वास्तेषां निवारणे प्रतिरोधने आयाससहाः खेदसहास्तान्, प्रणामसमये नमस्कारवेलायां प्रचलितानि यानि मकुटतटानि मौलिपार्श्वाणि तेषु घटिताः खचिता ये पद्मरागा लोहितकमणयस्तेषां प्रभायाः कान्तेर्यत्प्रसरणं विस्तारस्तस्य कैतवं व्याजं तेन, प्रकटीकृतानुरागान् प्रदर्शितप्रेम्णः, शात्रवपक्षेण सपत्नपक्षेण लक्षिता युक्ता ये क्षोणीपतयो राजानस्तान्, यथार्हं यथायोग्यम्, बहुमन्यमानः तान्प्रति सन्मानं प्रदर्शयन् समरे संगरे समानीता समाकृष्टा या सपत्नलक्ष्मीः शत्रुश्रीस्तस्या निवासो वसतिस्थानं यद् विकचपुण्डरीकं प्रफुल्लपद्मं तद्वदाचरता, निजबलमेव जलधिर्निजबलजलधिः स्वकीयसेनापारावारस्तस्य फेनकूटस्य डिण्डीरपिण्डस्य शङ्कावहं संदेहावायकं यदातपत्रं छत्रं तेन, विभ्राजितः शोभितः, पार्श्वद्वये तटयुगे समुद्धूयमाने कम्प्यमाने ये चामरे प्रकीर्णके तयोः समीरेण पवनेन नर्तितः कम्पितः कर्णावतंसो यस्य तथाभूतः, पुरतोऽग्रे, 'जय जय' इति मधुरं मनोहरं यथा स्यात्तथा, उच्चैरुदात्तस्वरेण, पठता, बन्दिवृन्देन मागधसमूहेन, पापठ्यमानं भूयोभूयोऽतिशयेन वा पठ्यमानं निजविरुदवैभवं स्वकीर्तिसंपद्यस्य सः, एवम्भूतः सन् , क्रमेण क्रमशः, पुरीं राजपुरीनगरीम्, समासाद्य सम्प्राप्य, यत्र पुर्याम्, ध्वजकलशतोरणवितानाद्यष्टशोभाभिः पताकाकुम्भतोरणचन्द्रोपकप्रभृत्यष्टविधशोभोपकरणैः, अलंकृतासु विराजितासु, रथ्यासु वीथीषु, प्रविशमानः प्रवेशं कुर्वाणः, सकलपुरस्य निखिलनगरस्य तरुणीजनानां युवतिजनानां बाहुवंशेभ्यो भुजवेणुभ्यो गलितानि पतितानि यानि मुक्ताफलानि मौक्तिकानि तद्वदाचरद्भिः, पुष्पलाजोपहारैः कुसुमभर्जितधान्यपुण्योपायनैः, संभाव्यमानः सत्क्रियमाणः, सन् , राजमन्दिरं नृपतिनिकेतनम्, आससाद प्राप । तत्र च तस्मिंश्च राजमन्दिरे ।

विसृष्टेति—विसृष्टः प्रत्यावर्तितो निखिलावनीपतिचयोऽखिलनरेन्द्रसमूहो येन सः, मितैरल्पैः, परिजनैः परिवारैः, युक्तः सहितः, स पूर्वोक्तः कुरूणां पतिः स्वामी, अन्तःपुरं निशान्तम्, प्रविशति स्म प्राविशत् । तत्र, अतीवात्यन्तम्, शोकाम्बुधौ खेदपारावारे, निमग्नं ब्रुडितम्, अरिकामिनीजनं शत्रुस्त्रीसमूहम्, निरीक्ष्य दृष्ट्वा, करुणाकरो दयाकरः, सः, सपदि झटिति, सान्त्वनाय समाश्वासनाय, उद्यतस्तत्परो बभूव । पृथ्वीछन्दः ॥१२६॥

ततः कुरुवीर इति—ततस्तदनन्तरम्, कुरुवीरो जीवकः शोकसन्त्रासाभ्यां खेदभयाभ्यां दीनं कातरम्, अन्तःपुरिकाजनं निशान्तनारीसमूहम्, समीपं निकटम्, आनीय समाहूय, तत्र तेषु, कुररीमिव

काष्ठाङ्गारमहिषीं तत्पुत्रांश्चावलोक्य कृपातरङ्गितः परिसान्त्वनकलाप्रवीणः पीयूषमधुराभिर्विचित्राभिर्गिरां परम्पराभिः समाश्वासमानिन्ये ।

तदनु जलधौ भासां पत्यौ निमज्जति पश्चिमे
करधृतमणिश्रेणीदीपैर्जनैः परिसेवितः ।
सखिपरिवृतः सोऽयं कोशं विवेश शनैः शनै-
र्धनमणिगणैर्वस्त्रैरन्यैश्च वस्तुभिरुज्ज्वलैः ॥ १२७ ॥

तदनु कोशधनादिकं निजमुद्रया मुद्रयित्वा निद्रासुखमनुबुभूषुः कुरुवीरः प्रासादमधिरुह्य मणिमञ्चोपरि हंसतूलशयने सुष्वाप । ततश्च निशायामवसन्नायां प्राबोधिकजनहृद्यपद्यालापैर्मङ्गलविचित्रवादित्रारावैश्च प्रबुद्धोऽसौ जीवन्धरः कृतप्राभातिककृत्यः सकलपरिवारसहितो गोविन्दराजेन सह भगवज्जिनभवनमासाद्य तत्र पूजां विस्तारयामास ।

ततः सर्वैः साकं नृपभवनमासाद्य सहसा
विदेहक्षोणीशः सचिवगणमानीय पुरतः ।
समादिश्य श्रीमान्प्रजवमभिषेकप्रयतनं
समापृच्छच्चैवं कुतुकितमनाः कञ्जनयनः ॥ १२८ ॥

किं नवरत्नप्रभापरिहसितपुरन्दरसभामण्डपमभिषेकमण्डपं विनिर्मितम् । किं वा तत्र सर्व-

---

कोशापविर्णामिव, क्रन्दन्तीं रुदन्तीम्, काष्ठाङ्गारमहिषीं कृतघ्नकामिनीम्, तत्पुत्रान् तत्सुतांश्च, अवलोक्य दृष्ट्वा, कृपातरङ्गितो दयातरङ्गितः, परिसान्त्वनकलायां समाश्वासनचातुर्याम्, प्रवीणो दक्षः, पीयूषमधुराभिरमृतमिष्टाभिः, विचित्राभिर्विविधप्रकाराभिः, गिरां वाणीनाम्, परम्पराभिः सन्ततिभिः, समाश्वासं परिसान्त्वनम्, आनिन्ये प्रापयामास ।

तदनु जलधाविति—तदनु तदनन्तरम्, भासां पत्यौ सूर्ये, पश्चिमे पश्चिमाशावलम्बिनि, जलधौ सागरे, निमज्जति सति निमज्जनोद्यते सति, करेषु पाणिषु धृता अवलम्बिता मणिश्रेणीरूपा रत्नपङ्क्तिरूपा दीपा यैस्तैः, जनैर्लोकैः, परिसेवितः परिवृतः, सखिभिर्मित्रैः परिवृतो युक्तः, सोऽयं जीवन्धरः, शनैःशनैर्मन्दं मन्दम्, धनमणिगणैर्वित्तरत्नसमूहैः, वस्त्रैः पटैः, अन्यैश्च भिन्नैश्च, उज्ज्वलैर्निर्मलैः, वस्तुभिः पदार्थैः, उपलक्षितं कोशं भाण्डागारम्, विवेश विशति स्म । हरिणीच्छन्दः ॥१२७॥

तदनु कोशधनादिकमिति—तदनु तत्पश्चात्, कोशधनादिकं भाण्डारवित्तप्रभृतिकम्, निजमुद्रया स्वकीयनामाक्षरमुद्रया, मुद्रयित्वा मुद्रितं कृत्वा, निद्रासुखं स्वापसौख्यम्, अनुबुभूषुरनुभवितुमिच्छुः, कुरुवीरो जीवन्धरः, प्रासादं भवनम्, अधिरुह्याधिष्ठाय, मणिमञ्चोपरि रत्नपर्यङ्किकाया उपरि, हंसतूलशयने हंसतूलशय्यायाम्, सुष्वाप शिश्ये । ततश्च तदनन्तरञ्च, निशायां रजन्याम्, अवसन्नायां पूर्णायां सत्याम्, प्राबोधिकजनानां प्रबोधप्रयोजकलोकानां हृद्याश्च ते मनोहराश्च ते पद्यालापाश्च श्लोकालापाश्चेति तैः, मङ्गलविचित्रवादित्राणां मङ्गलप्रयोजकविविधवाद्यानामारावैश्च ध्वनिभिश्च, प्रबुद्धो जागृतः, असौ पूर्वोक्तः, जीवन्धरो जीवकः, कृतानि सम्पादितानि प्राभातिकानि प्रातःकालिकानि कृत्यानि येन सः, सकलपरिवारसहितो निखिलपरिजनयुतः, सन्, गोविन्दराजेन सह मातुलेन सार्धम्, भगवज्जिनभवनं भगवज्जिनेन्द्रमन्दिरम्, आसाद्य लब्ध्वा, तत्र मन्दिरे, पूजां सपर्याम्, विस्तारयामास वितताम ।

ततः सर्वैरिति—ततस्तदनन्तरम्, विदेहक्षोणीशो गोविन्दभूपालः सर्वैर्निखिलैः, साकं सह, नृपभवनं राजसदनम्, आसाद्य प्राप्य, सहसा झटिति, पुरतोऽग्रे, सचिवगणं मन्त्रिमण्डलम्, आनीय प्रापय्य, प्रजवं प्रवेगं यथा स्यात्तथा, अभिषेकप्रयतनं राज्याभिषेकसम्भारम्, समादिश्य समाज्ञाप्य, कुतुकितमनाः कौतूहलाक्रान्तचित्तः, कञ्जनयनः कमलनेत्रः, श्रीमान् शोभासम्पन्नः, एवं वक्ष्यमाणप्रकारेण, समापृच्छत् पप्रच्छ । शिखरिणीच्छन्दः ॥१२८॥

किं नवरत्नप्रभेति—नवरत्नप्रभाभिर्नूतनमणिदीप्तिभिः परिहसितः तिरस्कृतः पुरन्दरसभामण्डपः शक्रास्थानमण्डपो येन तथाभूतम्, अभिषेकमण्डपमभिषेकास्थानम्, विनिर्मितं रचितं किम् । किं वा तत्र

वर्णवृद्धाः संमिलिताः। कच्चित्सज्जीकृतानि सुरभिशीतलप्रसन्नतीर्थपूर्णानि कनककलशकुलानि। कच्चित्तत्र सम्भृतानि तदुपयुक्तोपकरणानि। किं कार्तान्तिका मङ्गलमुहूर्तकृतावधानाः। कच्चिन्नाना-देशनरपालाः सज्जीकृतोपायनाः संनद्धाः। किं वा नगररथ्याः परिष्कृताः।

इति प्रश्नं समाकर्ण्य सचिवाः सञ्जातादराः। सर्वं सुघटितं देवस्याज्ञयेति बभाषिरे॥ १२९॥

क्षीराम्भोधिपयःप्रपूर्णकलशानाहृत्य यक्षेश्वरो
यक्षैः स्वानुचरैस्तदा परिवृतः सूर्यप्रतीपच्छविः।
संप्रापत्कुरुकुञ्जरं पितृपदे राज्येऽभिषेक्तुं मुदा
तत्रत्यक्षितिपावलिः स्म भजते वैलक्ष्यवीकारसम्॥ १३०॥

ततश्चाभिषेकमण्डपमध्यस्थापितरत्नपीठोपरि विराजमानं कौरवं क्षीरवाराकरवारिभिर्यक्ष-राजगोविन्दमहाराजप्रमुखाः सहर्षमभिषिषिचुः। तदानीमनेकप्रहतपटहमृदङ्गशङ्खझल्लरीप्रभृतिवा-द्यारावस्तर्जयन्निव घनाघनमण्डलमास्फोटयन्निवाखिलजनश्रुतिमान्दोलयन्निव लोकमाह्वयन्निवाभि-षेकदिदृक्षुजनमाक्रमन्निव भुवनोदरमुदपादि।

तदनु दिव्यदुकूलविभूषणाञ्चितशरीरकुरूद्वहमूर्धनि।
मकुटमुज्ज्वलरत्नविभासुरं करधृतं निदधे स हि यक्षराट्॥ १३१॥

मण्डपे सर्वेषां वर्णानां वृद्धाः स्थविरजनाः, संमिलिता एकत्रिताः, सुरभि सुगन्धि शीतलं शिशिरं प्रसन्नं स्वच्छं च यत्तीर्थतोयं तीर्थोदकं तेन पूर्णानि सम्भृतानि, कनककलशकुलानि सुवर्णकुम्भसमूहान्, सज्जीकृतानि सुरचितानि, कच्चित् कामप्रवेदने, तत्र मण्डपे, तदुपयुक्तोपकरणानि राज्याभिषेकयोग्यसाधनानि, सम्भृतानि संधृतानि, कच्चित् कार्तान्तिका दैवज्ञाः मङ्गलमुहूर्ते कल्याणकालनिर्धारणे कृतं विहितमवधानं चित्तैकाग्र्यं यैस्तथाभूताः किं सन्ति, कच्चित्, नानादेशनरपाला नैकजनपदभूपाः सज्जीकृतोपायनाः सुरचितोपहाराः सन्ति, किं वा अथवा, नगररथ्याः पुरमार्गाः, परिष्कृताः परिशोभिताः।

इति प्रश्नमिति—इति पूर्वोक्तम्, प्रश्नमनुयोगम्, समाकर्ण्य श्रुत्वा, सञ्जातादराः प्राप्तसन्मानाः, सचिवा अमात्याः, देवस्य भवतः, आज्ञया समादेशेन, सर्वं कृत्स्नम्, सुघटितं सुरचितम्, इति बभाषिरे जगदुः॥१२९॥

क्षीराम्भोधीति—तदा तस्मिन् काले, सूर्यप्रतीपा दिवाकरसदृशी छविर्दीप्तिर्यस्य सः, यक्षेश्वरः सुदर्शनः, स्वानुचरैर्निजसेवकैः, यक्षैर्देवविशेषैः परिवृतः परीतः सन्, क्षीराम्भोधेः पयःपारावारस्य पयसा जलेन प्रपूर्णाः सम्भृता ये कलशाः कुम्भास्तान्, आहृत्य आनाय्य, कुरुकुञ्जरं जीवन्धरम्, मुदा हर्षेण, पितृपदे जनकधामनि, राज्ये साम्राज्ये, अभिषेक्तुं समुक्षितुम्, संप्रापदाजगाम, तत्रभवास्तत्रत्यास्ते च ते क्षितिपाश्च राजानस्तेषामावलिः पङ्क्तिः, वैलक्ष्यवीकारसं विस्मयावलोकनप्रीतिम्, भजते स्म भेजे। तदद्भुतं दृष्ट्वा सर्वे राजानो विस्मिता बभूवुरिति भावः॥१३०॥

ततश्चाभिषेकेति—ततश्च तदनन्तरञ्च, अभिषेकाय मण्डपमभिषेकमण्डपमभिस्नानास्थानं तस्य मध्ये स्थापितं निवेशितं यद् रत्नपीठं मणिमयासनं तस्योपरि, विराजमानं शोभमानम्, अधितिष्ठन्तमिति यावत्, कौरवं जीवन्धरम्, क्षीरवाराकरस्य पयःपयोधेः, वारिभिर्जलैः, यक्षराजः सुदर्शनः, गोविन्दमहाराजो विदेहाधीश्वरो जीवन्धरस्य मातुलः, तौ प्रमुखौ प्रधानौ येषां ते, सहर्षं सप्रमोदम्, अभिषिषिचुः स्नपयन्ति स्म। तदानीं तस्मिन् काले, अनेकेषां भूयसां प्रहतानां ताडितानां पटहमृदङ्गशङ्खझल्लरीप्रभृतिवाद्यानाम् आनकमुरजकम्बुझल्लरीप्रमुखवादित्राणाम् आरवः शब्दः घनाघनमण्डलं मेघसमूहम्, तर्जयन्निव भर्त्सयन्निव, अखिलजनश्रुतिं निखिललोककर्णम्, आस्फोटयन्निव विदारयन्निव, लोकं भुवनम्, आन्दोलयन्निव संचलयन्निव, अभिषेकदिदृक्षुजनं स्नपनविलोकनाभिलाषि लोकम्, आह्वयन्निव आकारयन्निव, भुवनोदरं जगन्मध्यम्, आक्रामन्निव समधिरोहन्निव, उदपादि समजनि।

तदन्विति—तदनु अभिषेकानन्तरम्, हि निश्चयेन, स पूर्वोक्तः, यक्षराट् यक्षेश्वरः सुदर्शनः, दिव्यैः

आपृच्छ्यैव कुरुभूपालमारुह्य व्योमयानकम् । आदिश्य परिवारं स्वमयात्सोऽपि मन्दिरम् ॥१३२॥

तदानीं निखिलनरपालकुलविलसितसल्लापं गोविन्दमहीवल्लभमग्रतो विधाय सप्रश्रयमवनतपूर्वकायेन पद्मास्येन दीयमानहस्तावलम्बः, सुरस्तम्बेरमसकाशं महान्तमौपवाह्यं गजराजमुदयधराधरमिव सरोजबन्धुरैरावणमिव गीर्वाणपतिरधिरूढः, प्रकृतिजनकुमुदषण्डचन्द्रमण्डलेन क्षीरोदधिडिण्डीरधवलेन स्थूलमुक्ताफलजालकावृतेनातपत्रेण परिष्क्रियमाणोर्ध्वभागः, पार्श्वद्वयोद्धूयमानाभ्यां राज्यलक्ष्मीकटाक्षतरङ्गाभ्यामिव पयःपारावारपरिलोलदूर्मिसंकाशकनकदण्डविलसितचामराभ्यां किञ्चिच्चञ्चलवसनाञ्चलः, सर्वतः सममपावृतकवाटपुटप्रकटवातायनतया कुरुपतिदर्शनकुतूहलसमुन्मीलितलोचनस्येव तत्पुरस्य हर्म्याग्रावलम्बिनीनां पौरनितम्बिनीनां कासाञ्चिदर्धपरिसमाप्तसाधनव्यापाराणां वामहस्तगतमणिदर्पणानां परिलसत्कोकारिपूर्णमण्डलानामिव राकारजनीनाम्, कासाञ्चन सरभसगमनविगलितमेखलाकलापाकुलितचरणपल्लवानां शृङ्खलाघटितचरणमारमदपट्टकरिणीनामिवापरासाम्, आर्द्रलाक्षारसारुणचरणसरोजानां कमलपरिपीतबालातपानामिव कमलि-

---

स्वर्गभवैर्दुकूलविभूषणैः क्षौमाम्बरालङ्कारैरञ्चितं शोभितं शरीरं गात्रं यस्य, स चासौ कुरूद्वहश्चेति तस्य मूर्धनि शिरसि, उज्ज्वलरत्नैर्दीप्यमानमणिभिर्विभासुरं शोभमानम्, करकृतं स्वहस्तस्थापितम्, मकुटं मौलिम्, निदधे निचिक्षेप । द्रुतविलम्बितवृत्तम् ॥१३१॥

आपृच्छ्येति—यक्षोऽपि कृतज्ञचरोऽपि, कुरुभूपालं सात्यन्धरिमहाराजम्, आपृच्छ्य आमन्त्र्य, व्योमयानकं विमानम्, आरुह्य समधिष्ठाय, परिवारं परिजनम्, आदिश्य नियोगं दत्वा, स्वं स्वकीयम्, मन्दिरं भवनम्, अयात् अगच्छत् ॥१३२॥

तदानीमिति—तदानीं तस्मिन् काले, निखिलनरपालकुलेन समग्रराजसमूहेन विलसितः कृतः सल्लापः सम्भाषणं येन तम्, गोविन्दमहीवल्लभं विदेहाधीश्वरम्, अग्रतः पुरस्तात्, विधाय कृत्वा, सप्रश्रयं सविनयम्, अवनतो विनम्रः पूर्वकायः शरीरस्य पूर्वभागो यस्य तेन, पद्मास्येन तन्नामप्रमुखमित्रेण, दीयमानोऽर्प्यमाणो हस्तावलम्बो हस्ताश्रयो यस्य सः, सुरस्तम्बेरमेण देवगजेन सकाशः सदृशस्तम्, महान्तं समुत्तुङ्गम्, औपवाह्यं वाहनयोग्यम्, गजराजं करीन्द्रम्, उदयधराधरं पूर्वाचलम्, सरोजबन्धुरिव सूर्य इव, ऐरावणं ऐरावतम्, गीर्वाणपतिरिव पुरन्दर इव, अधिरूढोऽधिष्ठितः, प्रकृतिजनाः प्रजाजना एव कुमुदषण्डः कुमुदसमूहस्तस्य चन्द्रमण्डलेन शशिबिम्बेन, क्षीरोदधेः क्षीरसागरस्य डिण्डीर इव हिण्डीर इव धवलं शुक्लं तेन, स्थूलं विशालं यन्मुक्ताफलजालकं मौक्तिकसमूहस्तेनावृतं तेन, आतपत्रेण छत्रेण, परिष्क्रियमाणः समलंक्रियमाण ऊर्ध्वभागो यस्य सः, पार्श्वद्वये तटद्वय उद्धूयमानाभ्यां प्रकीर्यमाणाभ्यामिव, राज्यलक्ष्मीकटाक्षतरङ्गाभ्यामिव साम्राज्यश्रीकेकरकल्लोलाभ्यामिव, पयःपारावारस्य क्षीरसागरस्य परिलोलन्त्यां संचलन्त्यामूर्मिभ्यां भङ्गाभ्यां संकाशौ सदृशौ ताभ्याम् । कनकदण्डाभ्यां सुवर्णदण्डाभ्यां विलसिते शोभिते ये चामरे बालव्यजने ताभ्याम्, किञ्चिन्मनाग् चञ्चलं चपलं, वसनाञ्चलं क्षौमप्रान्तं यस्य सः, सर्वतः समन्तात्, समं युगपत्, अपावृतकपाटपुटानि दूरीकृताररपुटानि अतएव प्रकटानि स्पष्टानि वातायनानि गवाक्षा यस्य तस्य भावस्तत्ता तया, कुरुपतिदर्शनस्य जीवन्धरावलोकनस्य कुतूहलेन कौतुकेन समुन्मीलितानि समुद्घाटितानि लोचनानि नयनानि येन तस्येव, तत्पुरस्य तन्नगरस्य, हर्म्याग्रावलम्बिनीनां भवनाग्रस्थितानाम्, पौरनितम्बिनीनां नागरिकनारीणाम्, कासांचित् कासामपि, अर्धपरिसमाप्तोऽर्धनिष्पन्नः प्रसाधनव्यापारोऽलङ्करणकार्यं यासां तासाम्, वामहस्तगतः सव्यकरस्थितो मणिदर्पणो रत्नादर्शो यासां तासाम्, परिलसच्छोभमानं कोकारिपूर्णमण्डलं चन्द्रपूर्णबिम्बं यासु तासाम्, राकारजनीनामिव पूर्णिमारात्रीणामिव, कासांचन कासामपि, सरभसगमनेन सवेगप्रधावनेन विगलितः भ्रष्टो यो मेखलाकलापो रसनासमूहस्तेनाकुलिता व्यग्राश्चरणपल्लवाः पादकिसलया यासां तासाम्, शृङ्खलया घटिता युक्ताश्चरणाः पादा यासां तथाभूता या मारस्य कन्दर्पस्य मदपट्टकरिण्यो मदोन्मत्तप्रधानकरेणवस्तासामिव, अपरासामन्यासाम्, आर्द्रलाक्षारसेन सरसयावकद्रवेणारुणानि रक्तानि चरणसरोजानि

नीनामन्यासाम्, मरकतमणिखचितवातायनदत्तवक्त्रारविन्दानां सुन्दरीमणीनां विकसितैकशत-पत्रशोभितां गगनतलविलसितां कमलिनीं तुलयन्तीनाम्, करारविन्दगलितमरन्दबिन्दुशङ्कासंपादकैर्नखसुधाकरपरिगलत्तुषारशीकरसन्देहसन्दायकैः सकुसुमैर्लाजाञ्जलिभिरवकीर्यमाणः, पुरःसरविविधवाद्यरवविमिश्रितेन पुरोयायिनां मङ्गलपाठकानां 'जय जय' इति मधुरवचनरचनानुयातेन संक्षोभसमुत्पतत्पुष्पलीनपुष्पन्धयझंकारमेदुरेण प्रासादपुञ्जसञ्जातप्रतिध्वानेन दीर्घतरतामुपगतेन कोलाहलेन मुखरितदिगन्तरः, तां पुरीं प्रदक्षिणीकृत्य द्वारदेशमवतीर्णः, प्रज्वलद्दीपशोभितकनकपात्रं वहन्तीनां वारवनितानां निचयेन विरचितनीराजनमङ्गलः, सत्यंधरात्मजो, विततवितानविलम्बिमुक्तादामविस्तारिते दन्दह्यमानधूपसुरभिले मणिमण्डपे प्रविश्य, कुलक्रमागतं सिंहासनमलञ्चकार।

> मोदाम्बुराशिर्व्यलसत्प्रजानां कुरुप्रवीरेन्दुमहोदयेन।
> पौराङ्गनानां नयनोत्पलेषु मरन्दधाराश्रुजलच्छलेन ॥ १३३ ॥
> क्षुद्रक्षितीशेन कृतं प्रजानां संक्षोभमालक्ष्य दयालुरेषः।
> राजा समा द्वादश नैजकीर्तिगौरां धरित्रीमकरां चकार ॥ १३४ ॥

पादपद्मानि यासां तासाम्, कमलैः पद्मैः परिपीतो गृहीतो बालातपः प्रातःकालिकलोहितघर्मो याभिस्तासामिव, अन्यासामितरासाम्, मरकतमणिखचितानि हरिन्मणिभिःस्यूतानि यानि वातायनानि गवाक्षास्तेषु दत्तं बहिर्निःसारितं वक्त्रारविन्दं मुखकमलं याभिस्तासाम्, अतएव विकसितेन प्रोत्फुल्लेन एकेनाद्वितीयेन शतपत्रेण कमलेन शोभिता समलङ्कृता ताम्, गगनतलविलसितां नभस्तलविशोभिताम्, कमलिनीं सरोजिनीम्, तुलयन्तीनामुपमिमानानाम्, सुन्दरीमणिनां युवतिरत्नानाम्, करारविन्देभ्यः पाणिपद्मेभ्यो गलिताः पतिता या मरन्दबिन्दवो मकरन्दशीकरास्तेषां शङ्कासम्पादकैः संदेहजनकैः, नखसुधाकरेभ्यो नखरचन्द्रेभ्यः परिगलन्तः परिपतन्तो ये तुषारशीकरा हिमकणास्तेषां संदेहदायकैः संशयजनकैः, सकुसुमैः सपुष्पैः, लाजाञ्जलिभिर्भर्जितधान्याञ्जलिभिः अवकीर्यमाणोऽवक्षिप्यमाणः, पुरःसराणां पुरोगामिनां विविधवाद्यानां विविधवादित्राणां रवेण शब्देन मिश्रितो मिलितस्तेन, पुरोयायिनामग्रयायिनाम्, मङ्गलपाठकानां मागधानाम्, 'जय जय' इति मधुरवचनरचनानुयातेन मिष्टवाग्रचनासहितेन, संक्षोभेण व्यग्रभावेन समुत्पतन्तः समुड्डीयमानाः पुष्पलीनाः कुसुमस्थिता ये पुष्पन्धया भ्रमरास्तेषां झङ्कारेणाव्यक्तशब्दविशेषेण मेदुरो मिलितस्तेन, प्रासादपुञ्जे राजभवनसमूहे सञ्जातः समुत्पन्नः प्रतिध्वानः प्रतिध्वनिर्यस्य तेन, दीर्घतरतां विशालताम्, उपागतेन प्राप्तेन, कोलाहलेन कलकलशब्देन, मुखरितदिगन्तरो वाचालितकाष्ठामध्यः, सन्, तां पुरीं राजपुरीनगरीम्, प्रदक्षिणीकृत्य परिक्रम्य, द्वारदेशं प्रवेशमार्गं प्रान्तम्, अवतीर्णः समवरूढः, प्रज्वलद्दीपशोभितं प्रकाशमानदीपविभ्राजितं यत्कनकपात्रं सुवर्णभाजनम्, वहन्तीनां दधतीनाम्, वारवनितानां वेश्यानाम्, निचयेन समूहेन, विरचितं विहितं नीराजनमङ्गलमारार्तिकमङ्गलं यस्य तथाभूतः, सत्यन्धरात्मजो जीवन्धरः, विततविताने विस्तृतचन्द्रोपके विलम्बीनि यानि मुक्तादामानि मौक्तिकमाल्यानि तैर्विस्तारिते वितते, दन्दह्यमानेन भूयोभूयोऽतिशयेन वा दह्यमानेन धूपेन सुगन्धिचूर्णेन सुरभिलं सुगन्धितं तस्मिन्, मणिमण्डपे रत्नास्थाने, प्रविश्य प्रवेशं कृत्वा, कुलक्रमागतं वंशपरम्परायातम्, सिंहासनं हरिविष्टरम्, अलञ्चकार शोभयामास। तदध्यारूढो बभूवेति भावः।

मोदाम्बुराशिरिति—कुरुप्रवीरो जीवन्धर एवेन्दुश्चन्द्रस्तस्य महोदयो महोद्गमस्तेन, प्रजानां लोकानाम्, मोदाम्बुराशिः प्रमोदपारावारः, व्यलसच्छुशुभे, अश्रुजलच्छलेन बाष्पसलिलव्याजेन, पौराङ्गनानां नागरिकनारीणाम्, नयनोत्पलेषु नेत्रकुवलयेषु, मरन्दधारा मकरन्दश्रेणिः, व्यलसत् प्रकटीबभूव ॥१३३॥

क्षुद्रक्षितीशेनेति—दयालुः कारुणिकः 'स्याद्दयालुः कारुणिकः' इत्यमरः, एषः जीवन्धरः, क्षुद्रक्षितीशेन काष्ठाङ्गारेण, कृतं विहितम्, प्रजानां लोकानाम्, संक्षोभं व्याकुलत्वम्, आलक्ष्य दृष्ट्वा, नैजकीर्तिगौरां स्वकीययशोधवलाम्, धरित्रीं पृथिवीम्, द्वादशसमाः द्वादश वर्षाणि 'हायनोऽस्त्री शरत्समाः' इत्यमरः,

वृद्धक्षत्रपदे निषण्णमकरोद्गन्धोत्कटं भूपति-
र्नन्दाढ्याय च यौवराज्यपदवीं प्रादात्कुरूणां पतिः ।
तत्तद्योग्यपदे चकार निखिलान्पद्मास्यमुख्यान्सखी-
नन्यांश्चापि धराधिपान्करुणया स्वे स्वे पदेऽस्थापयत् ॥ १२५ ॥

विद्याधरविशालाक्ष्या भाले चन्द्रार्धकोमले । पट्टबन्धनमातेने सोऽयं वसुमतीपतिः ॥ १२६ ॥
राज्ञामुपायनान्येष गृहीत्वा कुरुकुञ्जरः । ततो द्विगुणरत्नादिसार्थं प्रादान्मुदा नृपः ॥ १२७ ॥
यथार्हं मन्त्रिवृद्धानां बहुमानं धरापतिः । ततान वर्णवृद्धानामपि प्रत्येकमादरात् ॥ १२८ ॥

औदार्यप्रथमावतारसरणौ जीवन्धरे भूपता-
वर्थिभ्योऽभिमतप्रदानपदवीबद्धादरे जाग्रति ।
नाकानोकहदेवधेनुविलसच्चिन्तामणीनां कथा
हास्याय प्रवदन्ति सभ्यविबुधाः शास्त्राब्धिपारंगताः ॥ १२९ ॥

तदनु चतुरङ्गबलसंगतेन नन्दाढ्येन समानीतां निजजननीं विजयामहादेवीं पादयोः प्रणिपत्य, तामानन्दपयोनिधिमग्नामाधाय, तया सह समागतस्य तापससंदोहस्य वाञ्छितादधिकं द्रविणजातं प्रदाय, मुदा तेषां पुण्यैकलभ्यां मोक्षपदवीमुपदिदेश । अन्यैः समानीताः पद्मादिदेवीः समागत्य रहसि समालिङ्ग्य परिचुम्ब्य च सकलमनोव्यथानामवसानभूमिं हर्षातिभूमिं प्रापयामास ।

अत्यन्तसंयोगे द्वितीया, अकरां बलिरहिताम्, चकार । काष्ठाङ्गारेण परिशोषितां पृथिवीं द्वादशवर्षाणि यावत् करमुक्तां चकारेति भावः ॥ १२४ ॥

वृद्धक्षत्रपदे इति—भूपतिर्नृपः, कुरूणां पतिर्जीवन्धरः, गन्धोत्कटं वैश्याधिपम्, वृद्धक्षत्रपदे स्थविरक्षत्रियस्थाने, निषण्णं स्थितम्, अकरोत्, तं पितृतुल्यं विदधाविति यावत्, नन्दाढ्याय च गन्धोत्कटसुताय च, यौवराज्यपदवीं यौवराज्यपदम्, प्रादात् प्रदत्तवान्, पद्मास्यमुख्यान् पद्मास्यप्रधानान्, निखिलान् सर्वान्, सखीन् मित्राणि, तत्तद्योग्यपदे यो यस्य योग्यस्तस्मिन् पदे, चकार विदधे, अन्यानपीतरानपि, धराधिपान् राज्ञः, करुणया कृपया, स्वे स्वे पदे स्वकीये स्वकीये पदे, अस्थापयत् स्थापयामास ॥ १२५ ॥

विद्याधरेति—सोऽयं पूर्वोक्तः, वसुमतीपतिर्जीवन्धरः, विद्याधरविशालाक्ष्या गन्धर्वदत्तायाः, चन्द्रार्धकोमले रजनीकरार्धमृदुले, भाले ललाटे, पट्टबन्धनं पट्टराज्ञीबन्धनम्, आतेने चकार ॥ १२६ ॥

राज्ञामिति—एषः कुरुकुञ्जरः कुरुवंशप्रधानः, नृपो जीवकः, राज्ञां भूपानाम्, उपायनानि प्राभृतानि, गृहीत्वा समादाय, ततस्तद्दत्तोपायनप्रमाणात्, द्विगुणरत्नादिसार्थं द्विगुणीभूतमणिप्रभृतिसमूहम्, प्रादात् दत्तवान् ॥ १२७ ॥

यथार्हमिति—धरापती राजा, यथार्हं यथायोग्यम्, मन्त्रिवृद्धानां वृद्धसचिवानाम्, वर्णवृद्धानामपि ब्राह्मणादिषु वर्णेषु वृद्धा ज्येष्ठास्तेषामपि, प्रत्येकम्, आदरात् सन्मानात्, बहुमानं भूयान्समादरम्, ततान चकार ॥ १२८ ॥

औदार्येति—औदार्यस्य वदान्यत्वस्य प्रथमावतारः प्रथमप्रवेशस्तस्य सरणिर्मार्गस्तस्मिन्, अर्थिभ्यो याचकेभ्यः, अभिमतप्रदानपदव्यां मनोरथदानकार्ये बद्धो विहित आदरः सम्मानं येन तस्मिन्, भूपतौ राजनि, जाग्रति सति विद्यमाने सति, शास्त्राब्धिपारंगताः श्रुतसागरपारीणाः, सभ्यविबुधाः सभ्यविद्वांसः, नाकानोकहश्च देवधेनुश्च विलसच्चिन्तामणिश्च तेषां कल्पवृक्षसुरगवीशुभ्रचिन्तामणीनाम्, कथावार्ताः, हास्याय हासं कर्तुम्, प्रवदन्ति निगदन्ति । दानशूरोऽसावासीदिति भावः ॥ १२९ ॥

तदन्विति—तदनन्तरम्, चतुरङ्गबलसंगतेन चतुर्विधसैन्यसहितेन, नन्दाढ्येन, समानीतां समानीतां समुपस्थापिताम्, निजजननीं स्वमातरम्, विजयामहादेवीं विजया राज्ञीम्, पादयोश्चरणयोः, प्रणिपत्य नमस्कृत्य, तां मातरम्, आनन्दपयोनिधिमग्नां हर्षपारावारमग्नाम्, आधाय कृत्वा, तया मात्रा, सह साकम्, समागतस्य संप्राप्तस्य, तापससंदोहस्य तापससमूहस्य, वाञ्छितादभिलषितात्, अधिकं प्रभूतम्, द्रविणं धनम्, प्रदाय दत्त्वा, मुदा हर्षेण, तेषां तापसानाम्, पुण्यैकलभ्यां सुकृतैकप्राप्याम्, मोक्षपदवीमपवर्गमार्गम्, उपदिदेश

गोविन्दक्षितिपालकस्य तनुजां सल्लक्षणां लक्ष्मणां
कान्त्या काञ्चनवल्लरीसहचरीं वृत्ताब्जकोशस्तनीम् ।
राकाशीतकराननां रतिपतेश्चापायमानभ्रुवं
लग्ने सद्गुणगुम्भिते क्षितिपतिर्जग्राह पाणौ मुदा ॥ १४० ॥

तदानीं सरभसमितस्ततः प्रधावितस्य परिजनस्य करधृतवेत्रलतापरस्परघट्टनजनितशब्दमेदुरेण विशृङ्खलमन्त्रविद्वचनारावविजृम्भितेन सभास्तारजनकृताशीर्वादविस्तृतेन घूर्णमानान्तःपुरजनाभरणझङ्कारमनोहरेण पुरतो जननिःसारणपरकञ्चुकिजनशब्दबन्धुरेण निर्दयप्रहतदुन्दुभिप्रभृतिवाद्यध्वनिनिर्भरेणानेकसहस्रकलकलबहलेनोत्सवकोलाहलेन त्रिभुवनमपूर्यत ।

जयश्रिया साकममन्दकीर्तिं विन्दन्कुरूणां पतिरेष धीरः ।
राज्यश्रिया सार्धमिमां कुमारीं लब्ध्वा प्रजानां वलयं जुगोप ॥ १४१ ॥

इति महाकविहरिचन्द्रविरचिते श्रीमति जीवन्धरचम्पूकाव्ये
लक्ष्मणालम्भो नाम दशमो लम्भः ॥

समुपदिष्टवान् । अन्यैस्तैरैः समानीताः सम्प्रापिताः, पद्मादिदेवीः, समागत्य प्राप्य, रहसि विजने, समालिङ्ग्य समाश्लिष्य, परिचुम्ब्य च परिचुम्बनं विधाय च, सकलमनोव्यथानां निखिलमानसिककष्टानाम्, अवसानभूमिमन्तस्थानम्, हर्षातिभूमिं प्रमोदातिस्थानम्, प्रापयामास ।

गोविन्देति—क्षितिपतिर्जीवन्धरः, सन्ति समीचीनानि लक्षणानि चिह्नानि यस्यास्ताम्, कान्त्या रुच्या, काञ्चनवल्लरीसहचरीं सुवर्णलतासदृशीम्, वृत्ताब्जकोशस्तनीं वर्तुलकमलकुड्मलकुचाम्, राकाशीतकर इव पूर्णिमाचन्द्र इवाननं मुखं यस्यास्ताम्, रतिपतेर्मदनस्य, चापायमानौ कोदण्डायमानौ भ्रुवौ यस्यास्ताम्, गोविन्दक्षितिपालकस्य विदेहधरापतेः, तनुजां दुहितरम्, लक्ष्मणामेतन्नामधेयाम्, सद्गुणगुम्भिते-उत्तमगुणसहिते लग्ने मुहूर्ते, मुदानन्देन, पाणौ हस्ते, जग्राह स्वीचकार । तामुदवोढेति भावः ॥१४०॥

तदानीमिति—तदानीं लक्ष्मणापरिणयनकाले, सरभसं सवेगं यथा स्यात्तथा, प्रधावितस्य प्रगतस्य, परिजनस्य परिकरलोकस्य, करेषु धृताः करधृता हस्तारोपिताः, ताश्च ता वेत्रलताश्च तासां परस्परघट्टनेन मिथोघातेन जनितः समुत्पादितो यः शब्दस्तेन मेदुरस्तेन, विशृङ्खलाः स्वच्छन्दा ये मन्त्रविदां मन्त्रज्ञानां वचनारावा वचनशब्दास्तैर्विजृम्भितो वृद्धिंगतस्तेन, सभास्तारजनैः सभास्थितपुरुषैः कृतो विहितो य आशीर्वादः सम्यगाशंसाशब्दस्तेन विस्तृतो विततस्तेन, घूर्णमाना इतस्ततो भ्राम्यन्तो येऽन्तःपुरजनास्तेषामाभरणानि तेषां झङ्कारोऽव्यक्तशब्दविशेषस्तेन मनोहरो मनोज्ञस्तेन, पुरतोऽग्रे, जननिःसारणपरा लोकोत्सारणपरा ये कञ्चुकिजनशब्दा अन्तःपुरप्रतीहारीशब्दास्तैर्बन्धुरो मनोहरस्तेन, निर्दयं यथा स्यात्तथा प्रहतानि यानि दुन्दुभिप्रभृतिवाद्यानि दुन्दुभिप्रमुखवादित्राणि तेषां ध्वनिना शब्देन निर्भरः पूर्णस्तेन, अनेकसहस्रस्य भूयसां जनानामिति यावत्, यः कलकलोऽव्यक्तशब्दस्तेन, बहलः प्रचुरस्तेन उत्सवकोलाहलेन-उल्लासकलकलशब्देन, त्रिभुवनं त्रिलोकी, अपूर्यत पूर्णा बभूव ।

जयश्रियेति—जयश्रिया साकं विजयलक्ष्म्या सार्धम्, अमन्दकीर्तिं विशालयशः, विन्दन् लभमानः धीरो गभीरः, एषोऽयम्, कुरूणां पतिर्जीवन्धरः, राज्यश्रिया साम्राज्यलक्ष्म्या, सार्धं सह, इमाम्, कुमारीं लक्ष्मणाम्, लब्ध्वा प्राप्य, प्रजानां लोकानाम्, वलयं समूहम्, जुगोप रक्षति स्म ॥१४१॥

इति महाकविहरिचन्द्रविरचिते श्रीमति 'कौमुदी' व्याख्याधरे, जीवन्धरचम्पूकाव्ये लक्ष्मणालम्भो नाम दशमो लम्भः ।

एकादशो लम्भः

दोष्णा कुन्दसमानकीर्तिविसरैरामोदिनीं मेदिनीं
वाचा सत्यविलासमुत्तममधुस्यन्दप्रतीपश्रिया ।
चित्तेन क्षितिपालनीतिपदवीं नेत्रेण सर्वप्रजा-
योगक्षेमकलां बभार नृपतिर्हस्तेन दानोदकम् ॥ १ ॥

तस्मिन्नरपतौ तत्र प्रजापालनतत्परे । राजन्वती च भूरासीद्रत्नगर्भा वसुन्धरा ॥ २ ॥

तस्य च यशोमण्डलं शिशिरमपि शात्रवजनसंतापकारणम्, स्थिरमप्यनवरतभ्रमणशीलम्, निर्मलमपि मलिनीकृतारातिमुखकमलम्, धवलमपि प्रजानुरागपरिमेदुरम्, निन्दितराजमण्डलमप्यानन्दितमहाराजमण्डलमुदजृम्भत ।

तस्य च प्रतापाङ्कुरा दिक्सुन्दरीणां केशपाशेषु कल्हारशङ्काम्, कर्णदेशेषु किसलयस्तोमविभ्रमम्, घनकुचकुम्भेषु काश्मीरशोभाम्, कटिप्रदेशेषु कौसुम्भपटसंभावनाम्, कराम्बुजेषु कुरुविन्दमयकङ्कणविलासम्, पादतलेषु लाक्षारसविच्छित्तिं संपादयामासुः ।

वह्निप्रतप्तद्रुतहेमवर्णैः प्रतापलेशैः कुरुकुञ्जरस्य ।
लिप्तेषु सर्वेष्वपि भूमिभृत्सु मेरुभ्रमोऽभूत्सुरसुन्दरीणाम् ॥ ३ ॥

दोष्णेति—नृपतिर्जीवन्धरः, दोष्णा बाहुना, कुन्दसमानकीर्तिविसरैर्माध्यकुसुमकल्पयशोविस्तारैः, आमोदिनीं प्रहर्षिणीम्, मेदिनीं पृथिवीम्, उत्तममधुस्यन्दस्य श्रेष्ठमाक्षिकप्रवाहस्य प्रतीपा प्रतिपक्षिणी श्रीः शोभा यस्यास्तया, वाचा वचनेन, सत्यविलासं तथ्यशोभाम्, चित्तेन चेतसा, क्षितिपालानां राज्ञां नीतिपदवीं नयपद्धतिस्ताम्, नेत्रेण नयनेन, सर्वप्रजानां निखिलजनानां योगक्षेमयोरनर्जितप्राप्तिप्राप्तसंरक्षणयोः कला वैदग्धी ताम्, हस्तेन पाणिना, दानाय त्यागायोदकं जलमिति दानोदकम्, बभार दधार ॥ १ ॥

तस्मिन्नरपताविति—तत्र हेमाङ्गदमण्डले, तस्मिन् पूर्वोक्ते, नरपतौ जीवन्धरमहाराजे, प्रजापालनतत्परे जनावनदक्षे, सति, भूः पृथिवी, राजन्वती प्रशस्तराजयुक्ता, रत्नानि मणयो गर्भे मध्ये यस्यास्तथाभूता रत्नगर्भा, वसुन्धरा च धनधारिणी च अभूत् आसीत् ॥ २ ॥

तस्य चेति—तस्य च राज्ञः, यशोमण्डलं कीर्तिसमूहः, शिशिरमपि शीतलमपि, शात्रवजनस्य शत्रुसमूहस्य संतापकारणं दाहनिमित्तम्, स्थिरमपि स्थितिशीलमपि, अनवरतं निरन्तरं भ्रमणं सञ्चरणशीलं स्वभावो यस्य तत्, निर्मलमपि विमलमपि, मलिनीकृतानि कृष्णीकृतानि अरातीनां शत्रूणां मुखकमलानि वदनपद्मानि येन तत्, धवलमपि शुक्लमपि, प्रजाया लोकस्यानुरागेण लौहित्येन पक्षे प्रेम्णा परिमेदुरं स्निग्धम्, निन्दितं जुगुप्सितं राजमण्डलं चन्द्रबिम्बं येन तथाभूतमपि, आनन्दितं प्रहर्षितं महाराजमण्डलं पूर्णचन्द्रबिम्बं पक्षे महानृपतिसमूहं येन तत्, उदजृम्भत वृद्धिं प्राप । विरोधाभासोऽलङ्कारः ।

तस्य च प्रतापाङ्कुरा इति—तस्य च राज्ञः प्रतापाङ्कुरास्तेजःप्ररोहाः, दिक्सुन्दरीणां काष्ठाकामिनीनाम्, केशपाशेषु कचसमूहेषु, कल्हारशङ्कां रक्तारविन्दसंदेहम्, कर्णदेशेषु श्रवणप्रदेशेषु, किसलयस्तोमस्य पल्लवसमूहस्य विभ्रम भ्रान्तिं तम्, घनकुचकुम्भेषु पीनपयोधरकलशेषु, काश्मीरशोभां कुङ्कुमश्रियम्, कटिप्रदेशेषु मध्यदेशेषु, कौसुम्भपटस्य कुसुम्भरक्तवस्त्रस्य संभावनामुत्प्रेक्षाम्, कराम्बुजेषु पाणिपद्मेषु, कुरुविन्दमयकङ्कणविलासं पद्मरागमणिनिर्मितकटकविभ्रमम्, पादतलेषु चरणतलेषु, लाक्षारसस्य यावकरसस्य विच्छित्तिं शोभाम्, सम्पादयामासुश्चक्रुः ।

वह्निप्रतप्तेति—वह्निना पावकेन प्रतप्तं निस्तप्तम् अतएव द्रुतं स्यन्दितं यद्धेम सुवर्णं तस्य वर्णमिव वर्णं स्वरूपं येषां तैः, कुरुकुञ्जरस्य जीवन्धरस्य, प्रतापलेशैस्तेजोंऽशैः, लिप्तेषु दिग्धेषु, सर्वेष्वपि निखिले-

पद्माकराञ्चितस्यास्य राजहंसस्य सन्ततम् । बहुधावननिघ्नत्वमद्भुतं च न चाद्भुतम् ॥ ४ ॥

इयं[1] सुमधुराकारा लक्ष्मणा वरलक्षणा । राजहंसस्य पत्नीति परमाद्भुतमीक्ष्यते ॥ ५ ॥

अयं खलु लक्ष्माञ्चितोऽपि[2] पद्माभिख्याविराजितोऽपि सुमित्रानन्दनो, विजयानन्दनोऽपि कुण्डलाञ्चितकर्णो, धृतराष्ट्रोऽपि धर्ममयो, गन्धर्वदत्ताधिकहर्षोपि देवदत्ताधिकहर्षो, महिषीसंभवोऽपि वृषोत्पादी विरराज ।

लक्ष्मणाञ्चितगात्रोऽपि निर्मलः कुरुचन्द्रमाः । सदा कुवलयाह्लादी पद्मानन्दीति चाद्भुतम् ॥ ६ ॥

ष्वपि, भूमिभृत्सु पर्वतेषु, सुरसुन्दरीणां देवाङ्गनानाम्, मेरुभ्रमो हेमाद्रिसंदेहः, अभूत् । तद्गुणमूलकभ्रान्तिमानलङ्कारः ॥३॥

पद्माकराञ्चितस्येति—पद्माकरेण कमलकासारेणाञ्चितस्य शोभितस्य, अस्य जीवन्धरस्य, राजहंसस्य मरालविशेषस्य, सन्ततं सर्वदा, बहुधानेकप्रकारेण, वनस्य जलस्य निघ्नत्वमाधीनत्वं न भवतीत्यवननिघ्नत्वम्, अद्भुतमाश्चर्यंकरम्, आसीदिति शेषः, किञ्च, नाद्भुतं नाश्चर्यंकरं यतो बहुधानेकप्रकारेण वननिघ्नत्वं काननाधीनत्वं मरालविशेषस्य निसर्ग एव, अथवा बहुधावनस्य भूरिभ्रमणस्य निघ्नत्वमाधीनत्वं मरालस्य स्वभाव एव, पक्षिजातिरितस्ततः सदा धावत एव । परिहारपक्षे, पद्माया लक्ष्म्याः करेण पाणिनाञ्चितस्य पूजितस्य, अस्य राजहंसस्य श्रेष्ठनृपतेर्जीवन्धरस्य, सन्ततं सर्वदा, बहुधानेकप्रकारेण, वननिघ्नत्वं काननवासतत्परत्वम्, अद्भुतमाश्चर्यंकरम्, आसीत्, किञ्च नाद्भुतं नाश्चर्यंकरम् आसीत्, यतोऽनेकप्रकारेण अवननिघ्नत्वं रक्षणैकाधीनत्वं श्रेष्ठराजस्य निसर्ग एव । श्लेषः ॥४॥

इयं सुमधुराकारेति—सुमधुरोऽतिमनोहर आकारः संस्थानं यस्याः सा, वराणि श्रेष्ठानि लक्षणानि चिह्नानि यस्याः सा, इयमेषा लक्ष्मणा सारसस्य योषित्, राजहंसस्य मरालविशेषस्य पत्नी योषिद्, इत्येतत्, परमाद्भुतं परमाश्चर्यम्, ईक्ष्यते दृश्यते । सारसस्य योषित् राजहंसस्य कथं भवेदित्याश्चर्यम्, पक्षे लक्ष्मणा लक्ष्मणानामधेया कन्या, राजहंसस्य जीवन्धराभिधानस्य श्रेष्ठराजस्य पत्नी बभूवेति । 'हंसस्य योषिद् वरटा सारसस्य तु लक्ष्मणा' इत्यमरः ॥५॥

अयं खल्विति—खलु निश्चयेन, अयं जीवन्धरः, लक्ष्मभिर्बलभद्रचिह्नैरञ्चितोऽपि, पद्म इत्यभिख्या पद्माभिख्या रामनाम तया विराजितोऽपि समुद्भासितोऽपि, सुमित्राया नन्दन इति सुमित्रानन्दनो लक्ष्मण इति विरोधः पक्षे लक्ष्माञ्चितोऽपि पद्मानां कमलानामभिख्या शोभा तया विराजितोऽपि सुमित्राणि सुसुहृद आनन्दयतीति सुमित्रानन्दनः, विजयानन्दनोऽपि विजयेनानन्दयतीति विजयानन्दनोऽपि सन् कुण्डलाञ्चितश्चासौ कर्णश्चेति कुण्डलाञ्चितकर्णः कुण्डलाभिधानकर्णाभरणभूषितराधेय इति विरोधः, महाभारतसमरे कुण्डलाञ्चितकर्णस्य पराजयः प्रसिद्धो न तु विजय इति विरोधः पक्षे विजयायाः एतन्नाममातुर्नन्दनोऽपि पुत्रोऽपि कुण्डलाञ्चिते कर्णाभरणविशेषालङ्कृते कर्णे श्रवणे यस्य तथाभूतः । धृतराष्ट्रोऽपि धर्ममयो धर्मदेवमयः दुर्योधनादिजनको धृतराष्ट्रो धर्ममयो धर्मरूपो युधिष्ठिरपितृरूपः कथं भवेदिति विरोधः, पक्षे धृतं पालितं राष्ट्रं जनपदो येन तथाभूतोऽपि सन् धर्ममयो धर्मात्मक इति । गन्धर्वेभ्यो दत्तोऽधिको हर्षो येन तथाभूतोऽपि सन्, देवेभ्यो निर्जरेभ्यो दत्तोऽधिको हर्षो येन तथाभूत इति विरोधः पक्षे गन्धर्वदत्ताया एतन्नामपत्न्या अधिकहर्षोऽपि सन् देवेन सुदर्शनयक्षेण दत्तोऽर्पितोऽधिको हर्षो यस्य तथाभूत इति । महिषीसंभवोऽपि देहिकोत्पन्नोऽपि वृषोत्पादी बलीवर्दोत्पादक इति विरोधः पक्षे सत्यन्धरमहाराजपट्टराज्ञीजनितोऽपि वृषोत्पादी धर्मोत्पादक इति, विरराज शुशुभे । श्लेषमूलकविरोधाभासालंकारः ।

लक्ष्मणाञ्चितेति—लक्ष्मणा कलङ्केनाञ्चितगात्रोऽपि शोभितशरीरोऽपि निर्मलः कलङ्कातीत इति विरोधः पक्षे लक्ष्मणा विविधसामुद्रिकशास्त्रप्रणीतचिह्नेनाञ्चितगात्रोऽपि अथवा लक्ष्मणानामकभार्यया शोभितशरीरोऽपि निर्मलो निर्दोषः, कुरुचन्द्रमा जीवन्धरेन्दुः, सदा शश्वत्, कुवलयाह्लादी नीलोत्पलानन्दनः सन्नपि पद्मानन्दी कमलानन्दनो बभूवेति अद्भुतं विस्मयस्थानम् पक्षे कुवलयं महीमण्डलमाह्लादयति

१, पयस्सुमधुराकारा ब. । २, लक्ष्मणाञ्चितोपि ब. ।

कदाचिदसौ धरापतिर्विविधरत्नराशिभिर्महार्घैर्महनीयकान्तिकन्दलितमानन्दकरं सकलभव्यजनानामासेचनकं लेखलोचनानामकृत्रिमचैत्यालयप्रतिमं भगवज्जिनमन्दिरं शिल्पशास्त्रपारंगतैः शिल्पकैर्निर्मापयामास । तत्र च भगवतो नित्योत्सवपर्वोत्सवप्रमुखोत्सवपरम्परानिरन्तरनिष्पत्तये तत्समुचितानि[1] प्रशस्तक्षेत्राणि प्रतिपादयितुकामे शात्रवजनविरामे निखिलगुणाभिरामे साक्षात्कारो जीवंधरो विजयादेवीपूर्वकृतोपकारस्मरणजनितहर्षेण तत्क्षेत्राधिपत्यं तापसजनाय प्रज्ञापयामास ।

नृपस्य जननी ततो निखिलशीलमालाखनिर्व्यरज्यत विशालधीः कुटिलसंसृतावेकदा ।
अपश्यमिह पैतृकं पदममन्दकीर्तौ सुते पराक्रमजिताहिते किमधुनेति सा जानती ॥ ७ ॥

ततश्च सा देवी, अष्टापि स्नुषाः समीपे विधाय, हे वामालका हेमायितवल्लिकायमानतनुलताः सीमातीतगुणगुम्भिता मरालगामिन्यः पूर्वमेव यूयमष्टमालारूपेण मम स्वप्ने दृष्टाः, इदानीं धृतनवमालारूपेण, इत्युत्तरोत्तरं भवतीनां वैभवातिशयो विजृम्भतामिति प्रतिपाद्य, प्रकृतमर्थमेवं प्रकटयामास ।

समानन्दयतीति तथाभूतोऽपि सन्, पद्मां लक्ष्मीमानन्दयति वर्धयतीति तथाभूतो बभूवेति । विरोधाभासोऽलङ्कारः ॥६॥

कदाचिदसाविति—कदाचित् जातुचित्, असौ धरापतिर्नरेन्द्रः, महार्घैर्महामूल्यैः, विविधरत्नराशिभिर्नैकमणिमण्डलैः, महनीयकान्तिकन्दलितं प्रशस्तप्रभापूर्णम्, सकलभव्यजनानां निखिलभव्यप्राणिनाम्, आनन्दकरं हर्षविधायकम्, लेखलोचनानां निर्जरनयनानाम्, आसेचनकमतृप्तिकरम्, अकृत्रिमचैत्यालयप्रतिमं कृत्रिमेतरजिनालयसदृशम्, भगवज्जिनमन्दिरं भगवज्जिनचैत्यालयम्, शिल्पशास्त्रपारंगतैः वास्तुशास्त्रदक्षैः, शिल्पकैः कुशलकार्यकरैः, निर्मापयामास रचयामास । तत्र च भगवज्जिनमन्दिरे भगवतो जिनेन्द्रस्य, नित्योत्सवपर्वोत्सवौ प्रमुखौ येषु तथाभूता च उत्सवास्तेषां परम्परा तस्या निरन्तरनिष्पत्तये शश्वत्सिद्धये, तत्समुचितानि तदर्हाणि, प्रशस्तक्षेत्राणि समुत्तमस्थानानि, प्रतिपादयितुकामे प्रदातुमनसि, निखिलगुणाभिरामे सकलगुणसुन्दरे, साक्षात्कामे प्रत्यक्षपञ्चशरे, जीवन्धर इति यावत्, सति, विजयादेवी तदीयजननी, पूर्वकृतोपकारस्य स्मरणेन निध्यानेन जनितः समुत्पन्नो हर्षो मोदस्तेन, तत्क्षेत्राधिपत्यं तत्स्थानस्वामित्वम्, तापसजनाय तापससमूहाय, प्रज्ञापयामास दापितवान् ।

नृपस्य जननीति—ततस्तदनन्तरम्, निखिलशीलमालायाः समग्रशीलपङ्क्तेः खनिराकरः, विशालधीर्विपुलमतिः, नृपस्य जीवन्धरस्य सा पूर्वोक्ता जननी सवित्री, विजयेति यावत्, इह भुवने अमन्दा विपुला कीर्तिर्यशो यस्य तस्मिन्, पराक्रमेण वीर्येण जिताः पराभूता अहिता शत्रवो येन तस्मिन्, सुते पुत्रे जीवन्धर इति यावत्, पैतृकं पितृसम्बन्धि, पदं धाम, राज्यमिति यावत्, अपश्यम् अवलोकयम्, अधुना साम्प्रतम्, किम्, किं प्रयोजनं मदीयमवशिष्टम्, अपितु न किमपीति, जानती सती, एकदा एकस्मिन् काले, कुटिलसंसृतौ मायाविसंसारे, व्यरज्यत विरक्ता बभूव । पृथ्वीच्छन्दः ॥ ७ ॥

ततश्च सा देवीति—ततश्च तदनन्तरञ्च, सा देवी राज्ञी, अष्टापि स्नुषाः पुत्रवध्वः, समीपे निकटे, विधाय कृत्वा, हे वामाः कुटिलाः सुन्दरा वा अलकाश्चूर्णकुन्तला यासां ताः, हेमायिता सुवर्णायिता या वल्लिका लता तद्वदाचरन्ती तनुलता देहवल्ली यासां ताः, सीमातीतैरसंख्यैर्गुणैर्यथासौन्दर्यादिभिर्गुम्भिताः सहिताः, मरालगामिन्यो गजगामिन्यः, पूर्वमेव प्रागेव, यूयं भवत्यः, अष्टमालारूपेण वसुत्वसंख्यानेन, मम, स्वप्ने स्वप्नावलोकनकाले, दृष्टा अवलोकिताः, इदानीमधुना, धृता बिभ्रता नव नवसंख्याकाः पक्षे नवा नूतना या मालाः स्रजस्तासां रूपेण, दृष्टाः, इतीत्थम्, उत्तरोत्तरमग्रेऽग्रे, भवतीनां युष्माकम्, वैभवातिशय ऐश्वर्यप्रकर्षः,

---

१. प्रशस्तदेवोपकरनिबद्धयोग्यनदीमातृकदेवमातृकक्षेत्राणि च प्रतिपाद्य शात्रवजनविरामो निखिलगुणाभिरामः साक्षात्कारी जीवन्धरो ब० ।

अपारे घोरसंसारे विरक्तिर्विस्तृता हृदि । दीक्षायै त्वरयत्यद्य मां राकेन्दुनिभाननाः ॥ ८ ॥

यूयं खलु कुरुवंशलतामुक्ताफलायमानान्पुत्रानुत्पाद्य सन्ततं कान्तेन साकं सौख्यमनुभूय वयोऽन्ते दीक्षामुपागन्तुमर्हथेति ।

श्वश्रूगिरमिमां श्रुत्वा शोकविह्वलमानसाः । देव्यस्तस्याः पुरस्तस्थुर्नमिताननपङ्कजाः ॥ ९ ॥

ततश्च देवी विजया कुमारं समीपमानाय्य धराधिराजम् ।
कादम्बिनी हंसमिवारभट्या वैराग्यवाचा विधुरीचकार ॥ १० ॥

तदनु वैराग्यपदवीमनुगच्छन्त्या सुनन्दया सह महादेवी महीनाथं कृच्छ्रायमाणं कृच्छ्रेणानुज्ञाप्य यथाविधि श्रमणीधर्यायाः पद्मार्यायाः सकाशेऽदीक्षिष्ट । श्रमणीनामग्रगण्या पद्मार्या विजयासुनन्दाभ्यां विश्राणितश्रमणीपदा नभसो निपतिता रत्नवृष्टिरिव प्रव्रज्या न प्रतिषेध्येति महीनाथं बोधयामास ।

इति मधुरगिरा प्रबोधितोऽसौ नरपतिरानतमातृपादपद्मः ।
विनयभरवशाद्विवेश धीरो निजसदनं परिवारसम्परीतः ॥ ११ ॥

तदनु कतिपयदिवसापगमे क्रमेण देवीनामुदराणि सरसीनां जलानीव शशिबिम्बा गर्भा विविशुः ।

विजृम्भताम् वर्धताम्, इत्येवम्, प्रतिपाद्य कथयित्वा, प्रकृतं प्रस्तुतम्, अर्थं वृत्तम्, एवमनेन प्रकारेण, प्रकटयामास वर्धयामास ।

अपारे घोरसंसार इति—हे राकेन्दुनिभाननाः हे पूर्णचन्द्रसदृशवदनाः, अपारेऽनन्ते, घोरसंसारे भयंकरभवे, विषयार्थे सप्तमी, हृदि मानसे, विस्तृता वितता, विरक्तिर्वैराग्यम्, अद्य साम्प्रतम्, माम्, दीक्षायै प्रव्रज्यायै, त्वरयति प्रेरयति ॥ ८ ॥

यूयं खल्विति—यूयं भवत्यः, खलु निश्चयेन, कुरुवंशलतायाः कुरुवंशवल्लर्याः मुक्ताफलानीवाचरन्तीति तथाभूतान्, पुत्रान् सुतान्, उत्पाद्य समुत्पन्नान् कृत्वा, सन्ततं निरन्तरम्, कान्तेन पत्या, साकं सार्धम्, सौख्यं गार्हस्थ्यसुखम्, अनुभूय समुपभुज्य, वयोऽन्ते दशान्ते, दीक्षां प्रव्रज्याम्, उपागन्तुं प्राप्तुम्, अर्हथ इति योग्याः स्थेति ।

श्वश्रूगिरमिति—इमां पूर्वोक्ताम्, श्वश्रूगिरं श्वश्रूनिर्गतभारतीम्, श्रुत्वा निशम्य, शोकेन वियोगवार्ताश्रवणजन्यविषादेन विह्वलं दुःखीभूतं मानसं चेतो यासां ताः, देव्यो गन्धर्वदत्तादयः, नमितान्याननानि आननपङ्कजानि मुखारविन्दानि यासां ताः, तथाभूताः सत्यः, पुरतः पुरस्तात्, तस्थुस्तिष्ठन्ति स्म ॥ ९ ॥

ततश्च देवीति—ततश्च तदनु च, विजया देवी, धराधिराजं पृथिवीपतिम्, कुमारं जीवन्धरम्, समीपमभ्यर्णम्, आनाय्य प्रापय्य, कादम्बिनी मेघमाला, आरभट्या घोरगर्जितेन, हंसमिव मरालमिव, वैराग्यवाचा प्रव्रज्यागिरा, विधुरीचकार दुःखीचकार ॥ १० ॥

तदन्विति—तदनु तदनन्तरम्, वैराग्यपदवीं विरक्तिमार्गम्, अनुगच्छन्त्यानुयान्त्या, सुनन्दया गन्धोत्कटपत्न्या, सह सार्धम्, महादेवी विजया, कृच्छ्रायमाणं दुःखीभवन्तम्, महीनाथं जीवन्धरम्, कृच्छ्रेण कष्टेन, अनुज्ञाप्य सम्बोध्य, यथाविधि विधिपूर्वकम्, श्रमणीधर्यायाः साध्वीश्रेष्ठायाः, पद्मायाः पद्माभिधानाया आर्यिकायाः, सकाशे निकटे, अदीक्षिष्ट दीक्षां जग्राह । विजयासुनन्दाभ्यां जीवकजननीभ्याम्, विश्राणितं श्रमणीपदं प्रदत्तमार्यिकापदं यया सा, पद्मार्या, नभसो गगनात्, निपतिता च्युता, रत्नवृष्टिरिव मणिवृष्टिरिव, प्रव्रज्या दीक्षा, न प्रतिषेध्या न निषेधनीया, इतीत्थम्, महीनाथं जीवकम्, बोधयामास सम्बोधितवती ।

इति मधुरगिरेति—इति पूर्वोक्तप्रकारेण, मधुरगिरा मिष्टवाण्या, प्रबोधितः समाश्वासितः विनयभरवशात् विनयातिशयेन, आनतौ वन्दितौ मातृपादपद्मौ जननीचरणकमले येन तथाभूतः, धीरो गभीरः, नरपतौ राजा, परिवारसम्परीतः सन् कुटुम्बजनपरिवृतः सन्, निजसदनं स्वकीयभवनम्, विवेश प्रविष्टवान् ॥ ११ ॥

तदन्विति—तदनु तदनन्तरम्, कतिपयदिवसापगमे किञ्चिद्दिवसव्यतिगमनानन्तरम्, क्रमेणः क्रमशः,

गर्भच्छलेन संक्रान्तं प्रतिबिम्बं धरापतेः । ऊहुर्गन्धर्वदत्ताद्याः संनिभा दर्पणश्रिया ॥ १२ ॥

देवीजनस्य विकचोत्पलशोभि वक्त्रं कोकद्वयस्य सदृशं कुचयुग्ममासीत् ।
आनीलचूचुकतलं विलसत्तमालपत्राञ्चिताग्रनवहेमघटप्रतीपम्[1] ॥ १३ ॥

मणिकाञ्चीकलापेन दूयमानो दिने दिने । महिषीणां मध्यभागः क्रशिमानं जहौ तदा ॥ १४ ॥

तदनु प्राप्ते प्रसवसमये शुभदिवसे सावधानैर्नाडिपरिज्ञानसाधनस्वाधीनचित्तैर्गणकैर्गृहीते लग्ने देवीततिः कादम्बिनीवैरंमदान्पुत्रानसूत । ततः प्रहर्षविस्तारितलोचनः पृथ्वीकमनः पुत्रान्दृष्ट्वा शुभदिवसे कलितमहोत्सवस्तेषां गन्धर्वदत्ताप्रभृतिदेवीपुत्राणां सत्यंधर-सुदर्शन-धरणि - गन्धोत्कट-विजय - दत्त - भरत - गोविन्दनामधेयानि प्रकटीचकार ।

एवं सौख्येन वसतः पाकारिसदृशश्रियः । धराधिपस्य धीरस्य त्रिंशद्वर्षाण्ययासिषुः ॥ १५ ॥

ख्यातौ श्रीभरताधिराजसदृशो नीतौ च रामप्रभो-
स्तुल्यः संपदि पाकशासनसमः पृथ्वीपतिः कौरवः ।
धर्मे धर्मतनूभवेन तुलितस्तुल्योऽर्जुनेनाहवे
सोऽयं भाग्यनिधिः शशास वसुधां धृत्वा चिरं बाहुना ॥ १६ ॥

देवीनां गन्धर्वदत्तादीनाम्, उदराणि जठराणि, कर्माणि, सरसीनां कासाराणाम्, जलानि सलिलानि, शशिबिम्बा इव चन्द्रबिम्बानीव, गर्भा दौहृदानि, विविशुः प्रविष्टाः ।

गर्भच्छलेनेति—दर्पणश्रिया मुकुरलक्ष्म्या, संनिभाः सदृश्यः, गन्धर्वदत्ताद्याः, गर्भच्छलेन गर्भव्याजेन, संक्रान्तं प्रतिफलितम्, धरापते राज्ञः, प्रतिबिम्बं प्रतिमानम्, ऊहुर्धृतवत्यः ॥१२॥

देवीजनस्येति—देवीजनस्य राज्ञीसमूहस्य वक्त्रं वदनम्, विकचोत्पलशोभि प्रस्फुटारविन्दमिव शोभमानम्, कोकद्वयस्य चक्रवाकयुगलस्य, सदृशं सन्निभम्, आनीलचूचुकतलं श्यामाग्रप्रदेशम्, कुचयुग्मं स्तनयुगलम्, विलसत्तमालपत्रेण शोभमानतापिच्छच्छदेनाञ्चितो विराजितो योऽग्रनवहेमघटः पुरोवर्तिनूतनकाञ्चनकलशस्तस्य प्रतीपं सदृशम्, आसीद् बभूव । उपमा । वसन्ततिलकावृत्तम् ॥ १३ ॥

मणिकाञ्चीति—मणिकाञ्चीकलापेन रत्नरशनादाम्ना, दिने दिने वीप्सायां द्वित्वम्, दूयमानो दुःखीभवन्, महिषीणां राज्ञीनाम्, मध्यभागः कटिप्रदेशः, तदा तस्मिन् काले, क्रशिमानं कृशत्वं क्षीणतामिति यावत् । जहौ तत्याज । 'ओहाक् त्यागे' इत्यस्य लिटि रूपम् ॥१४॥

तदनु प्राप्त इति—तदनु तदनन्तरम्, प्रसवसमये प्रसूतिकाले, प्राप्ते समागते सति, शुभदिवसे श्रेष्ठवासरे, सावधानैरप्रमत्तैः नाडीपरिज्ञानस्य घटिकाज्ञानस्य साधनेषु मन्त्रविशेषेषु स्वाधीनं निजायत्तं चित्तं येषां तैः, गणकैर्दैवज्ञैः, गृहीते समाप्ते विदित इति यावत्, लग्ने मुहूर्ते, देवीततिर्महिषीसमूहः, कादम्बिनी मेघमाला, इरंमदानिव मेघज्योतींषीव, पुत्रान् सुतान्, असूत समुत्पादयामास । ततस्तदनन्तरम्, प्रहर्षेण प्रकृष्टप्रमोदेन विस्तारिते दीर्घे लोचने नयने यस्य सः, पृथ्वीकमनो महीपतिर्जीवन्धर इति यावत्, पुत्रान् सुतान्, दृष्ट्वा विलोक्य, शुभदिवसे श्रेष्ठदिने, कलितो महोत्सवो येन सः, तथाभूतः सन्, गन्धर्वदत्ताप्रभृतिदेवीपुत्राणां खेचरसुतादिमहिषीसूनूनाम्, सत्यन्धर-सुदर्शन-धरणि-गन्धोत्कट-विजय-दत्त-भरत-गोविन्दनामधेयानि, प्रकटीचकार प्रकटयामास ।

एवं सौख्येनेति—एवमनेन प्रकारेण, सौख्येन सुखेन, वसतो निवासं कुर्वतः, पाकारिसदृशी पुरन्दरतुल्या श्रीर्लक्ष्मीर्यस्य तस्य, धीरस्य धैर्यगुणोपेतस्य धराधिपस्य राज्ञः, त्रिंशत् त्रिंशत्संख्याकानि, वर्षाणि हायनाः, अयासिषुर्व्यतिजग्मुः ॥१५॥

ख्याताविति—ख्यातौ यशसि श्रीभरताधिराजेन प्रजापतिप्रथमपुत्रेण सदृशः समानः, नीतौ नये, रामप्रभो रामचन्द्रस्य, तुल्यः सदृशः, संपदि संपत्तौ, पाकशासनसमः शक्रसन्निभः, धर्मे धार्मिककार्ये, धर्मतनूभवेन युधिष्ठिरेण, तुलितः सदृशः, आहवे समरे, अर्जुनेन कौन्तेयेन, तुल्यः सदृशः, भाग्यनिधिः सुदैव-

---

[1] प्रदीपम् ब० ।

कदाचिद्वसन्ते विरहिजनदुरन्ते प्रसाधितवनान्ते वनप्रियविरुतमुखरिताशान्ते संप्रवृत्ते, पुष्पफलादिकमुपहारीकुर्वता वनपालेन [1]वनविहाराय विज्ञापितो वसुधापतिः, अष्टाभिः कान्ताभिः समं नगरान्निर्याय, पर्याप्तफलकुसुमपल्लवतल्लजमुपवनमासाद्य वनपालेन तत्र निवेद्यमानानेकैकशः पल्लवितपुष्पितफलिततरुनिकरान्निरीक्षमाणश्चिरं विजहार।

बलात्कुचं सपदि भङ्गुरमध्यभागं स्विद्यत्कपोलमलकाकुलवक्त्रबिम्बम्।
व्यालोलकङ्कणझणत्कृति तत्र देव्यः पुष्पमहं करतलैः कुतुकादकार्षुः ॥ १७॥

एवं चिरं विस्तारितद्विविधवनक्रीडाश्रान्तानां क्रीडासंमर्दविलुलितलतान्तानां व्यालोलनयनान्तानां [2]संदोहेन सह क्वचन निषण्णस्तत्र गन्धर्वदत्ताकुचकुम्भयुगले मारमदेभमदधारायमाणां कस्तूरीधारां निपातयन्, गुणमालावक्षःस्थले सुरभिलमृगमदमेदुरमलयजरसं लिम्पन्, सुरमञ्जर्या नाभिकुहरादारभ्य काश्मीरपङ्केन लतां विलिखन्, पद्मायाः कपोलयोर्मकरिकां विस्तारयन्, क्षेमश्रियो वदने मृगमदतिलकं विरचयन्, लक्ष्मणायाः स्तनमुकुलयुगले मकरिकापत्रं विचित्रयन्, अन्यासां च यथोचितं प्रसाधनानि विदधानो जीवन्धरः सहर्षमवर्तिष्ट।

भाण्डारः, सोऽयं प्रसिद्धः, पृथ्वीपतिर्महीपतिः, कौरवो जीवन्धरः, बाहुना भुजेन, चिरं दीर्घकालपर्यन्तम्, धृत्वा भृत्वा, शशास ररक्षति स्म ॥१६॥

कदाचिद्वसन्त इति—कदाचिज्जातुचित्, विरहिजनदुरन्ते विप्रलम्भिदुःखप्रदे, प्रसाधितवनान्ते समलंकृतवनमध्ये, वनप्रियाणां कोकिलानां विरुतैः शब्दैर्मुखरिताः शब्दायमाना आशान्ता दिगन्ता यस्मिन् तस्मिन्, वसन्ते पुष्पर्तौ, सम्प्रवृत्ते सति, पुष्पफलादिकं कुसुमफलप्रभृतिकम्, उपहारीकुर्वता समुपनयता, वनपालेन मालाकारेण, वनविहाराय उद्यानक्रीडायै, विज्ञापितो निवेदितः, वसुधापती राजा जीवन्धरः, अष्टाभिः कान्ताभिर्वल्लभाभिः, समं साकम्, नगरात् राजपुरीनामधेयात्, निर्याय निर्गत्य, पर्याप्ताः प्रचुराः फलकुसुमपल्लवतल्लजाः फलपुष्पकिसलयश्रेष्ठा यस्मिंस्तत्, उपवनमुद्यानम्, आसाद्य प्राप्य, तत्रोपवने, वनपालेन वनरक्षकेण, निवेद्यमानान् सूच्यमानान्, पल्लविताः किसलयिताः पुष्पिताः कुसुमिताः फलिताः, फलयुक्ताश्च ये तरुनिकरा वृक्षसमूहास्तान्, निरीक्षमाणो विलोकमानः, चिरं दीर्घकालं यावत्, विजहार व्यहार्षीत् विहारं कृतवान् चिक्रीड वा।

बलात्कुचमिति—तत्रोपवने, देव्यो राज्ञ्यः, सपदि झटिति, वल्गन्तः संचलन्तः कुचाः स्तना यस्मिंस्तत्, भङ्गुरो भङ्गोन्मुखो मध्यभागः कटिप्रदेशो यस्मिंस्तत्, स्विद्यन्तौ स्वेदयुक्तौ कपोलौ गण्डौ यस्मिंस्तत्, अलकाकुलं चूर्णकुन्तलव्याप्तं वक्त्रबिम्बं मुखमण्डलं यस्मिंस्तत्; व्यालोलानां चञ्चलानां कङ्कणानां कटकानां झणत्कृतिरव्यक्तशब्दविशेषो यस्मिंस्तत्, यथा स्यात्तथा, करतलैर्हस्ततलैः, कुतुकात् कौतूहलात्, पुष्पग्रहं कुसुमावचयम्, अकार्षुः कृतवत्यः। वसन्ततिलकावृत्तम् ॥१७॥

एवं चिरमिति—एवमनेन प्रकारेण, चिरं दीर्घकालपर्यन्तम्, विस्तारिता कृता द्विविधा द्विप्रकारा या वनक्रीडा काननकेलिर्जलकेलिश्च तया श्रान्ताः खिन्नास्तासाम्, क्रीडासंमर्देन क्रीडाविमर्देन विलुलितानि मर्दितानि लतान्तानि पुष्पाणि याभिस्तासाम्, व्यालोलाश्चपला नयनान्ता नेत्रप्रान्ता यासां तासाम्, कान्तानाम् वल्लभानाम्, संदोहेन समूहेन, सह सार्धम्, क्वचन कुत्रचित्, निषण्णः समुपविष्टः, तत्रोपवने, गन्धर्वदत्तायाः प्रथमपत्न्याः कुचकुम्भयोः स्तनकलशयोर्युगलं युगं तस्मिन्, मारमदेभस्य कामप्रमत्तकरिणो मदधारायमाणां दानजलधारावदाचरन्तीम्, कस्तूरीधारां मृगमदप्रवाहम्, निपातयन् मोचयन्, गुणमालावक्षःस्थले, गुणमालोरस्थले सुरभिलेन सुगन्धिना मृगमदेन कस्तूर्या मेदुरो मिलितो यो मलयजरसश्चन्दनरसस्तम्, लिम्पन् उपदिहन्, सुरमञ्जर्याः, नाभिकुहरात् तुन्दिगर्तात्, आरभ्य प्रारभ्य, काश्मीरपङ्केन कुङ्कुमद्रवेण, लतां वल्लीम्, विलिखन् अङ्कयन्, पद्मायाः एतन्नामकभार्यायाः, कपोलयोर्गण्डयोः, मकरिकां मकराकृतिम्, विस्तारयन् विततां कुर्वन्, क्षेमश्रिय एतन्नामन्याः पत्न्याः, वदने मुखे, मृगमदतिलकं कस्तूरीस्थासकम्,

१ विहाराय ब० । २ कान्तानां ब० ।

वृक्षाद्वृक्षमुदारशाखमचिरादाक्रम्य भूमीरुहान्-
व्यालोलान्विदधानमाहितभयादुड्डीनपक्षिव्रजान् ।
कीशानां निचयं ददर्श वसुधापालो वनाभ्यन्तरे
शश्वद्बालकगृह्यमाणजठरोग्रद्वानरीभिर्वृतम् ॥ १८ ॥
तत्रान्यसंपर्कमवेक्ष्य रुष्टां स्वां वानरीं कोऽपि युवा प्लवङ्गः ।
दीनस्वभावो विविधैरुपायैः शान्तां विधातुं न चिरं शशाक ॥ १९ ॥

तदनु रोषोत्कटमर्कटीं प्रकृतिस्थां कर्तुमक्षमतया बहुदीनदशामापन्नं मृतमिव भूमौ पतितं मायाविनं शाखामृगमवलोक्य भयविह्वलाङ्गी प्लवङ्गी समीपमासाद्य तदवस्थामपाचकार ।

प्लवङ्गतरुणस्ततः पनसपक्वपुष्यत्फलं ददौ वनमृगीमुदे विततहर्षनद्धान्तरः ।
जहार वनपालकः सपदि तत्फलं पेशलं करप्रचलयष्टितो मुदितवानरीं भर्त्सयन् ॥ २० ॥
इति सदयमशेषं वीक्षमाणो धरायाः पतिरथ विषयेषु व्याहताशाविशेषः ।
अतनुत हृदि चिन्तामेवमाजानधीरः कृतसुकृतविपाकः काललब्ध्या समेतः ॥ २१ ॥

विरचयन् कुर्वन्, लक्ष्मणाया एतन्नामकवल्लभायाः, स्तनमुकुलयुगले कुचकुड्मलयुगे, मकरिकापत्रं मकरीदलम्, विचित्रयन् चित्रितं कुर्वन्, अन्यासाञ्चेतरासाञ्च, यथोचितं यथार्हम्, प्रसाधनानि अलङ्करणानि, विदधानः कुर्वाणः, जीवन्धरः स्वामी, सहर्षं सप्रमोदं यथा स्यात्तथा, अवर्तिष्ट आसीत् ।

वृक्षाद्वृक्षमिति—वसुधापालो जीवन्धरः, वनाभ्यन्तरे काननमध्ये, वृक्षात् एकस्मात्तरोः, उदारशाखं महाशाखम्, वृक्षमितरं तरुम्, अचिराच्छीघ्रम्, आक्रम्य समारुह्य, भूमिरुहान् पादपान्, व्यालोलान् चञ्चलान्, आहितभयात् समुत्पन्नभीतेः, उड्डीना उत्पतिताः पक्षिव्रजाः पतत्रिसमूहा येभ्यस्तथाभूतान्, विदधानं कुर्वाणम्, शश्वन्निरन्तरम्, बालकैः शिशुभिर्गृह्यमाणं जठरमुदरं यासां तथाभूता उग्रास्त्यो या वानर्यो मर्कट्यस्ताभिः वृतं परीतम्, कीशानां वलीमुखानाम्, निचयं समूहम्, ददर्श विलोकयामास । शार्दूलविक्रीडितवृत्तम् ॥१८॥

तत्रान्यसंपर्केति—तत्र कीशनिचये, दीनस्वभावः कातरनिसर्गः, कोऽपि कश्चन, युवा तरुणः, प्लवङ्गो वानरः, अन्यस्याः संपर्कस्तमितरवानरीसंसर्गम् 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति पुंवद्भावः, रुष्टां कुपिताम्, स्वां स्वकीयाम्, वानरीं मर्कटीम्, विविधैर्बहुप्रकारैः, उपायैः साधनैः, शान्तां प्रकृतिस्थाम्, विधातुं कर्तुम्, चिरं दीर्घकालेनापि, न शशाक न समर्थोऽभूत् ॥ १९ ॥

तदन्विति—तदनु तदनन्तरम्, रोषोत्कटा क्रोधविकटा चासौ मर्कटी च वानरी चेति रोषोत्कटमर्कटी ताम्, प्रकृतिस्थां स्वभावस्थितां शान्तामिति यावत्, कर्तुं विधातुम्, अक्षमतया सामर्थ्याभावेन, बहुदीनदशामतिदीनावस्थाम्, आपन्नं प्राप्तम्, मृतमिव विगतचेतनमिव, भूमौ वसुधायाम्, पतितं स्खलितम्, मायाविनं मायायुक्तम्, शाखामृगं वानरम्, अवलोक्य दृष्ट्वा, भयेन त्रासेन विह्वलं व्यथितमङ्गं शरीरं यस्यास्तथाभूता प्लवङ्गी वानरी, समीपमभ्यर्णम्, आसाद्य प्राप्य, सा चावस्था चेति तदवस्था ताम्, तद्दशाम् अपाचकार दूरीकरोति स्म ।

प्लवङ्गतरुणस्तत इति—ततस्तदनन्तरम्, विततेन विस्तृतेन हर्षेण प्रमोदेन नद्धं व्याप्तमन्तरं हृदयं यस्य सः, प्लवङ्गतरुणो वानरयुवा, वनमृगीमुदे वानरीहर्षाय, पनसस्य क्षीरिवृक्षस्य पक्वं परिणतं पुष्यत्पुष्टं च यत्फलं तत्, ददौ ददाति स्म । वनपालक उद्यानरक्षकः, सपदि शीघ्रम्, करप्रचलयष्टितो हस्तचालितदण्डतः, मुदितवानरीं प्रसन्नमर्कटीम्, भर्त्सयन् तर्जयन्, सन्, पेशलं मनोहरम्, तत्फलं पनसफलम्, जहार हरति स्म प्रतिजग्राहेति यावत् । पृथ्वीच्छन्दः ॥ २० ॥

इति सदयमशेषमिति—अथानन्तरम्, इति पूर्वोक्तप्रकारेण, अशेषं समग्रमेतत् घटनाचक्रम्, सदयं सकृपं यथा स्यात्तथा, वीक्षमाणो विलोकमानः विषयेषु पञ्चेन्द्रियभोगेषु, व्याहतः प्रतिरुद्ध आशाविशेषस्तृष्णाविशेषो यस्य सः, आजानधीरो विचारचतुरः कृतसुकृतविपाकः प्राप्तपुण्योदयः, काललब्ध्या वैराग्यार्हसमय-

काष्ठाङ्गारायते कीशो राज्यमेतत्फलायते । मयते वनपालोऽयं त्याज्यं राज्यमिदं मया ॥ २२ ॥

या राज्यलक्ष्मीर्बहुदुःखसाध्या दुःखेन पाल्या चपला दुरन्ता ।
नष्टापि दुःखानि चिराय सूते तस्यां कदा वा सुखलेशलेशः ॥ २३ ॥

कल्लोलिनीनां निकरैरिवाब्धिः कृपीटयोनिर्बहुलेन्धनैर्वा ।
कामं न संतृप्यति कामभोगैः कन्दर्पवश्यः पुरुषः कदाचित् ॥ २४ ॥

राज्यं स्नेहविहीनदीपकलिकाकल्पं चलं जीवितं
शम्पावत्क्षणभङ्गुरा तनुरियं लोलाभ्रतुल्यं वयः ।
तस्मात्संसृतिसन्ततौ न हि सुखं तत्रापि मूढः पुमा-
नादत्ते स्वहितं करोति च पुनर्मोहाय कार्यं वृथा ॥ २५ ॥

विलोभ्यमानो विषयैर्वराको भङ्गुरैर्भृशम् । नारम्भदोषान्मनुते मोहेन बहुदुःखदान् ॥ २६ ॥

ममेयं मृद्वङ्गी मम तनय एषः प्रचुरधी-
रिमे मे पूर्वार्था इति विगतबुद्धिर्नरपशुः ।
अणुप्रख्ये सौख्ये विहितरुचिरारम्भवशगः
प्रयाति प्रायेण क्षितिधरनिभं दुःखमधिकम् ॥ २७ ॥

प्राप्त्या, समेतो युक्तः, धरायाः पतिर्जीवन्धरः, हृदि चेतसि, एवमित्थम्भूताम्, चिन्तां विचारसन्ततिम्, अत-नुत विस्तारयामास । मालिनीछन्दः ॥ २१ ॥

काष्ठाङ्गारायत इति—कीशो वानरः, काष्ठाङ्गार इवाचरतीति काष्ठाङ्गारायते, एतद् राज्यम्, फलमिवा-चरतीति फलायते, अयमेषः, वनपाल उद्यानपालः, अहमिवाचरतीति मयते, तस्मात्, इदमेतत्, राज्यं साम्राज्यम्, मया जीवकेन, त्याज्यं त्यक्तुमर्हम्, अस्तीति शेषः । यथा वनपालेन कीशात्फलमाच्छिन्नं तथा मया काष्ठाङ्गाराद्राज्यमाच्छिन्नम्, फलेन विना यथा कीशस्तप्यते राज्येन विना तथा काष्ठाङ्गारपरिजनोऽपि तप्यते तस्मात् परदुःखकारणमेतद्राज्यं मया त्याज्यमेवास्तीति भावः ॥२२॥

या राज्यलक्ष्मीरिति—या राज्यलक्ष्मीर्नृपतिस्वश्रीः बहुभिर्विपुलैर्दुःखैः कष्टैः साध्या प्राप्येति बहु-दुःखसाध्या, दुःखेन कष्टेन, पाल्या पालयितुमर्हा, चपला भङ्गुरा, दुरन्ता दुष्परिणामा, अस्तीति शेषः, नष्टापि सती, चिराय चिरकालपर्यन्तम्, दुःखानि कृच्छ्राणि, सूते समुत्पादयति, तस्यां राजलक्ष्म्याम्, सुख-लेशस्य लेश इति सुखलेशलेशः शर्मकणांशः, कदा वा कस्यां वा वेलायामपि तु न कस्यामपि वेलाया-मस्तीति भावः ॥२३॥

कल्लोलिनीनामिति—कल्लोलिनीनां नदीनाम्, निकरैः समूहैः, अब्धिरिव सागर इव, बहुलेन्धनैः प्रचुरसमिद्भिः, कृपीटयोनिर्वा वह्निरिव, कामभोगैर्विषयसेवनैः, कन्दर्पवश्यो मदनायत्तः, पुरुषो जनः, कदाचित् जातुचित्, कामं यथेच्छं यथा स्यात्तथा, न संतृप्यति न संतुष्टो भवति ॥२४॥

राज्यं स्नेहेति—राज्यं राजवैभवम्, स्नेहविहीना तैलरहिता दीपकलिका प्रदीपज्योतिरिति स्नेह-विहीनदीपकलिका ईषदूना स्नेहविहीनदीपकलिकेति स्नेहविहीनदीपकलिकाकल्पम्, जीवितमायुः, चलं चञ्चलम्; इयं तनुः एतच्छरीरम्,शम्पावत् सौदामिनीव, वयः दशा, लोलाभ्रतुल्यं चञ्चलमेघसदृशम्, अस्तीति सर्वत्र योज्यम् । तस्मात् कारणात्, संसृतिसन्ततौ संसारपरम्परायाम् सुखं शर्म, नहि निश्चयेन न विद्यते, तत्रापि संसृतिसन्ततौ मूढो मोहासक्तः, पुमान् पुरुषः, स्वहितं निजकल्याणम्, आदत्ते गृह्णाति, पुनर्भूयः, मोहाय विभ्रमाय, वृथा निरर्थकम्, कार्यं कृत्यम्, करोति च विदधाति च । शार्दूलविक्रीडितछन्दः ॥२५॥

विलोभ्यमान इति—भङ्गुरैर्नश्वरैः, विषयैः पञ्चेन्द्रियभोगैः, भृशं सातिशयम्, विलोभ्यमानः प्रला-भ्यमानः, वराको दीनो जनः, मोहेन विभ्रमेण, बहुदुःखदान् प्रचुरदुःखदातॄन् आरम्भदोषान्, हिंसादीनामार-म्भावगुणान्, न मनुते न मन्यते ॥२६॥

ममेयमिति—मम मे, इयं मृद्वङ्गी कोमलाङ्गी, मम, एषः, प्रचुरधीः प्रकृष्टमतिः, तनयः, पुत्रः मे,

ये मोक्षलक्ष्मीमनपायरूपां विहाय विन्दन्ति नृपाललक्ष्मीम् ।
निदाघकाले शिशिराम्बुधारां हित्वा भजन्ते मृगतृष्णिकां ते ॥ २८ ॥
तस्मात्क्लेशाचयाल्लब्ध्वा मानुषं जन्म दुर्लभम् ।
प्रमादः स्वहिते कर्तुं न युक्त इह धीमता ॥ २९ ॥

इति मनसि चिन्तयन्कुमुदिनीकान्तो द्वादशानुप्रेक्षया तत्क्षणमक्षोभ्यां विरक्तिं व्यवस्थापयन्, राज्यादिकं तृणाय मन्यमानः, तस्माद्वनान्निर्गत्य निर्वर्त्य च भगवज्जिनेन्द्रपूजाम्, धर्मामृतप्रदाननिरस्ततन्द्राद्योगीन्द्रान्मणिमयकिरीटकोटिविन्यस्तहस्ताम्भोरुहकुड्मलः कुम्भिनीपतिर्धर्मं शुश्राव ।

श्रुत्वा धर्मं वल्लभोऽयं धरित्र्या धीरः श्रीमान्धार्मविदो बभूव ।
तत्संस्कारे कोविदैर्बुद्धिमद्भिः शाणोल्लीढः सन्मणिर्निर्मलो हि ॥ ३० ॥
ततश्चारणयोः पूर्वं पूर्वजन्मबुभुत्सया । पप्रच्छ नरपालोऽयं प्रश्रयस्य वशंवदः ॥ ३१ ॥
नृपेण परिपृष्टोऽयमवधिस्पष्टलोचनः । यथावत्कुरुवीरस्य समाचष्ट पुराभवम् ॥ ३२ ॥

इमे, पूर्णार्थाः पूर्वसञ्चितधनानि, इतीत्थम्, विगता बुद्धिर्यस्य तथाभूतः, नरपशुः पुरुषाधमः, अणुप्रख्ये परमाणुतुल्ये, सौख्ये विषयशर्मणि, विहिता कृता रुचिरभिलाषो येन तथाभूतः, आरम्भस्य वशं गच्छतीत्यारम्भवशगः उद्योगं कुर्वाणः सन्, प्रायेण, क्षितिधरनिभं पर्वतप्रतिमम्, अधिकं प्रचुरम्, दुःखम् असमं, प्रयाति लभते ॥ २७ ॥

ये मोक्षलक्ष्मीमिति—ये जनाः, अनपायमविनश्वरं रूपं स्वभावो यस्यास्ताम्, मोक्षलक्ष्मीमपवर्गश्रियम्, विहाय त्यक्त्वा, नृपाललक्ष्मीं राजविभूतिम्, विन्दन्ति लभन्ते, ते निदाघकाले ग्रीष्मर्तौ शिशिराम्बुधारां शीतलसलिलधाराम्, हित्वा त्यक्त्वा, मृगतृष्णिकां मृगमरीचिकाम्, भजन्ते सेवन्ते । निदर्शनालङ्कारः ॥ २८ ॥

तस्मादिति—तस्मात्कारणात्, क्लेशाचयात् दुःखराशेः, दुर्लभं दुष्प्रापम्, मानुषं मानुष्यकम्, जन्म भवम्, लब्ध्वा प्राप्य, धीमता बुद्धिमता, इह लोके, स्वहिते निजश्रेयसि, प्रमादोऽनवधानता, कर्तुं विधातुम्, न युक्तो नोचितः ॥ २९ ॥

इति मनसीति—इत्येवम्, मनसि चेतसि, चिन्तयन् विचारयन्, कुरुकुमुदिनीकान्तो जीवन्धरः, द्वादशानुप्रेक्षया अनित्यत्वादिभावनया, तत्क्षणं तत्कालम्, अक्षोभ्यामचञ्चलाम्, विरक्तिं वैराग्यम्, व्यवस्थापयन् स्थिरां कुर्वन्, राज्यादिकं साम्राज्यप्रभृतिकम्, तृणाय मन्यमानः तुच्छं जानन् 'मन्यकर्मण्यनादरे' इति चतुर्थी, तस्मात्पूर्वोक्तात्, वनात् काननात्, निर्गत्य निष्क्रम्य, भगवज्जिनेन्द्रपूजां भगवदर्हत्सपर्याम्, निर्वर्त्य च कृत्वा च, धर्मामृतप्रदाने धर्मपीयूषवितरणे निरस्ता दूरीभूता तन्द्रालसता यस्य तस्मात्, योगीन्द्रात् मुनिराजात्, मणिमयकिरीटकोट्यां रत्नमयमौल्यग्रभागे विन्यस्तौ विक्षिप्तौ हस्ताम्भोरुहकुड्मलौ पाणिपद्मकोशौ यस्य तथाभूतः, कुम्भिनीपतिर्नृपतिः, धर्मं वृषोपदेशम्, शुश्राव शृणोति स्म ।

श्रुत्वा धर्ममिति—धीरो गभीरः, श्रीमान् लक्ष्मीमान्, अयमेषः, धरित्र्याः पृथिव्याः, वल्लभः स्वामी, अयं जीवन्धरः, धर्मं योगीन्द्रकृतवृषोपदेशम्, श्रुत्वा निशम्य, धर्मविधां वेदेति धार्मविदः, बभूव, आसीत्, तत्संस्कारे मणिसंस्कारे, कोविदैर्विद्वद्भिः, बुद्धिमद्भिर्धीमद्भिः, शाणोल्लीढो निकषोद्घृष्टः, सन्मणिरुत्तमरत्नम्, हि निश्चयेन, निर्मलो विमलो भवति । यथा शाणोल्लेखनेन सन्मणिर्विमलो भवति तथासौ धर्मोपदेशमाकर्ण्य धार्मविदो विमलाभिप्रायश्च बभूवेति भावः ॥ ३० ॥

ततश्चारणयोरिति—ततस्तदनन्तरम्, प्रश्रयस्य विनयस्य, वशंवदोऽनुकूलभाषी, अयं नरपालो राजा, पूर्वजन्मबुभुत्सया बोद्धुमिच्छा बुभुत्सा पूर्वजन्मनः प्राग्भवस्य बुभुत्सा जिज्ञासा तया, चारणयोश्चारणर्द्धिसम्पन्नयोर्मुनिराजयोः, पूर्वं ज्येष्ठम्, पप्रच्छ पृच्छति स्म ॥३१॥

नृपेणेति—नृपेण राज्ञा, परिपृष्टोऽनुयुक्तः अवधिरेव स्पष्टलोचनं यस्य सोऽवधिज्ञानस्पष्टनयनः, अयं ज्येष्ठमुनीन्द्रः, कुरुवीरस्य स्वामिनः, पुराभवं पूर्वजन्म, यथावत् यथाविधि, समाचष्ट जगाद ॥३२॥

अस्ति निखिलभुवनतलललामभूतं धातकीखण्डमण्डनायमानमतिविशालतया द्वितीयपृथिवीशङ्कासमागतेन पारावारेणेवातिगम्भीरेण परिघावलयेन परीतम्, विजयार्धगिरिशिखरशङ्कावहैरभ्रङ्कषैरनवरततन्तन्यमानमहोत्सवदिदृक्षासमागतवैमानिकजनविमानैरिव सुधाधवलैः सौधैः परिष्कृतम्, समुत्तुङ्गहर्म्यतलसंगतनितम्बिनीजनतरङ्गित[1]संगीतमङ्गलरवाकृष्यमाणाधोमुखहरिणाङ्कहरिणम्, कामिनीजनमणिभूषणप्रभानिरस्ततमःसङ्घातव्युत्पत्तिशून्यपौरलोकतया विघटितचक्रवाकयुगलं व्यर्थीकृतप्रदीपम्, भूमितिलकं नाम नगरम्।

तत्राभवत्पवनवेग इति प्रतीतो राजा विराजितगुणो विलसत्प्रतापः।
कीर्त्या पयोजलधिफेननिकाशकान्त्या व्यालिप्तविस्तृतसमस्तदिशावकाशः ॥ ३३ ॥

सती जयवती नाम रतिगर्वविमोचना। कान्ताभवन्नृपालस्य कर्णान्तायतलोचना ॥ ३४ ॥

यशोधर इतीरितो नरपतेः कुमारो भवान्बभूव जितमन्मथः स्ववपुषा घनश्रीपुषा।
तवाष्ट सुदृशो वधुः कमलजेन निष्पादिता गिरिद्वयधुरा स्थिरा इव मनोहरा विद्युतः॥ ३५ ॥

कदाचिद्भवान्यौवनपरिपुष्टाभिः कान्ताभिः करिणीभिरिव करीन्द्रः सहर्षमुपवनविहाराय

अस्तीति—भूमितिलकमेतन्नाम नगरम्, अस्तीति सम्बन्धः। कथम्भूतं तदिति निगद्यते—निखिलभुवनतलस्य कृत्स्नभूलोकस्य ललामभूतमाभरणोपमानम्, धातकीषण्डस्य द्वितीयद्वीपस्य मण्डनायमानं भूषणाय अतिविशालतया विपुलतरत्वेन, द्वितीयपृथिवीशङ्कासमागतेन द्वितीयवसुधारेकाप्राप्तेन, पारावारेणेव सागरेणेव, अतिगम्भीरेण अत्यगाधेन, परिखावलयेन खेयमण्डलेन 'खेयं खातं तु परिखा' इत्यमरः, परीतं व्याप्तम्, विजयार्धगिरिशिखरस्य रजताद्रिशृङ्गस्य शङ्कावहैः संशयधारकैः, अभ्रङ्कषैर्घनाघनैः, अनवरतं निरन्तरं तन्तन्यमानानां विस्तार्यमाणानां महोत्सवानां महाक्षणानाम् दिदृक्षया द्रष्टुमिच्छया समागतानि संप्राप्तानि यानि वैमानिकजनविमानानि देवसमूहव्योमयानानि तैरिव, सुधाधवलैश्चूर्णधवलैः, सौधैः भवनैः परिष्कृतं शोभितम्, समुत्तुङ्गेषु सून्नतेषु हर्म्यतलेषु धनिकावासतलेषु, संगताः सम्मिलिता ये नितम्बिनीजनाः स्त्रीसमूहास्तैस्तरङ्गितं प्राप्ततरङ्गकं यत्संगीतमङ्गलं गायनकल्याणं तस्य रवेण शब्देन आकृष्यमाणोऽवनीयमानोऽधोमुखो हरिणाङ्कस्य चन्द्रस्य हरिणो मृगो यस्मिंस्तत्, कामिनीजनस्य स्त्रीसमूहस्य मणिभूषणप्रभाभिः रत्नालंकारमरीचिभिर्निरस्तो दूरीकृतो यस्तमस्सङ्घातस्तिमिरसमूहस्तेन व्युत्पत्तिशून्या नियमहीना पौरलोका नागरिकनरा यस्मिंस्तस्य भावस्तत्ता तया, अविघटितचक्रवाकयुगलं अविरहितकोकयुगम्, व्यर्थीकृता मोघीकृताः प्रदीपा यस्मिंस्तत्, भूमितिलकम् एतन्नामधेयम्, एतन्नाम नगरं पुरम्, अस्ति विद्यते।

तत्राभवदिति—तत्र भूमितिलके नगरे, पवनवेग इति प्रतीतः प्रसिद्धः विराजिता गुणा यस्य सः, विलसन् प्रतापो यस्य सः, पयोधिजलफेननिकाशा सागरसलिलडिण्डीरसदृशी कान्तिर्दीप्तिर्यस्यास्तया कीर्त्या यशसा, व्यालिप्ता व्यादिग्धा विस्तृता वितताः समस्ता निखिला दिशावकाशाः काष्ठान्तरालानि येन तथाभूतः, राजा शासकः, अभवत् आसीत् ॥३३॥

सतीति—सती पतिव्रता, रतिगर्वविमोचना कामकामिनीमदमोचना, कर्णान्तायते लोचने यस्याः सा श्रवणान्तायतनयना, जयवती तदभिधाना, कान्ता वल्लभा, नृपालस्य पवनवेगाभिधानराजस्य, अभवदासीत् ॥३४॥

यशोधर इति—भवान् त्वम्, नरपते राज्ञः घनश्रीपुषा निविडलक्ष्मीपोषकेन, स्ववपुषा स्वकीयदेहेन, जितो मन्मथः कामो येन सः, यशोधर इतीरितः प्रसिद्धः, कुमारः पुत्रः, बभूव अजायत, तव भवतः, अष्ट अष्टसंख्याकाः, कमलजेन ब्रह्मणा, निष्पादिता रचिता, गिरिद्वयधुरास्तनयुगलरूपपर्वतद्वयभारेण, स्थिरा विद्यमानाः, मनोहरा रमणीयाः, विद्युत इव तडित इव, सुदृशः सुलोचनाः, वधुः शुशुभिरे पृथिवीच्छन्दः ॥३५॥

कदाचिदिति—कदाचिज्जातुचित्, भवान् त्वम्, यौवनपरिपुष्टाभिः, कान्ताभिः कामिनीभिः,

---

१. जनातरङ्गित ब०।

चलितः, पुरतः परिस्फुरन्तं पद्माकरमागत्य, तत्र कान्ताजनगतिनिरीक्षणलज्जितेष्विव मञ्जुलमञ्जीर-रवानुकारिविरावमुखरितारामेषु क्षणादुड्डीनेषु राजहंसेषु, निरवशेषमसञ्जातपक्षतया गगनोद्गमनाया-समर्थम्, विकचवारिजे सत्रासं विलुठन्तम्, पद्मिनीमुखकमलचलाचलनासामुक्ताफलायमानम्, वनदेवताविकचकुसुमकन्दुकशङ्काकरम्, अतिपेशलं राजहंसशावकं केनचिदनुचरेण भवनमानाय्य, कनकशलाकाकलितपञ्जरे निवेश्य, मधुरक्षीरोदनाद्युपचारेण निरवद्यं विवर्धयामास।

कदाचित्कान्तानां कुचकलशसीम्नि प्रियतमो
भवान्बालं हंसं नरवर निधायैवमवदत्।
अये त्वं पद्मानां विरहमनुभोक्तुं न हि पटु-
र्यतस्तद्वक्षोजाम्बुजमुकुलयुग्मेऽद्य विहर ॥ ३६ ॥

एवं मरालपोतमरालकुन्तलाभिः कान्ताभिः सह सन्ततं क्रीडयति भवति सहर्षमास्थिते, धर्मविदामग्रणीस्ते पिता हंसार्भकबन्धनोदन्तमाकर्ण्य कुपितस्त्वामाहूय बहुधा धर्मपरिपाटीं प्रकटयामास। तदनु कर्णामृतायमानधर्मबोधनविजृम्भितनिर्वेदः पित्रा निवारितोऽपि भवान्वैराग्य-समासादितजिनदीक्षादुश्चरतपश्चरणदक्षः, कान्ताभिरष्टाभिः साकं लोकोत्तरं तपःप्रकारमासाद्य,

करिणीभिर्हस्तिनीभिः सह, करीन्द्र इव गजेन्द्र इव, सहर्षं सानन्दं यथा स्यात्तथा, उपवनविहाराय उद्यान-क्रीडायै, चलितः प्रस्थितः, पुरतोऽग्रे, परिस्फुरन्तं शोभमानम्, पद्माकरं तटाकम्, आगत्य समासाद्य, तत्र पद्माकरे, कान्ताजनस्य जायासमूहस्य गतिनिरीक्षणेन गत्यवलोकनेन लज्जितेष्विव व्रीडितेष्विव, मञ्जुलो मनोहरो यो मञ्जीररवो नूपुरशब्दस्तस्यानुकारिणा विडम्बकेन विरावेण शब्देन मुखरितो वाचालितः आरामो यैस्तेषु, राजहंसेषु मरालविशेषेषु, क्षणादल्पेनैव कालेन, उड्डीनेषु समुत्पतितेषु सत्सु, निरवशेषं सम्पूर्णं यथा स्यात्तथा, असंजातपक्षतया—अनुद्भूतगरुत्तया, गगनोद्गमनाय अम्बरोत्पतनाय, असमर्थम् अशक्तम्, विकच-वारिजे स्फुट कमले, सत्रासं सभयं यथा स्यात्तथा, विलुण्ठत्तं लुण्ठनं कुर्वन्तम्, पद्मिन्याः कमलिन्याः मुखकमले वक्त्रवारिजे चलाचलं चञ्चलं यन्नासामुक्ताफलं घ्राणमौक्तिकं तद्वदाचरत्, पद्माकरवास्तव्या तटाकवासिनी या पद्मा लक्ष्मीस्तस्या वदनसरोजान्मुखारविन्दात् विगलत् पतत् यन्मन्दहासखण्डं स्मितशकलं तद्वत्संभाव्य-मानं समुत्प्रेक्ष्यमाणम्, वनदेवतायाः काननदेव्या विकचकुसुमकन्दुकं प्रस्फुटितपुष्पगेन्दुकं तस्य शङ्काकरं संशयदायकम्, अतिपेशलमत्यन्तमनोहरम्, राजहंसशावकं मरालबालकम्, केनचित् केनापि, अनुचरेण सेवकेन, भवनं राजमन्दिरम्, आनाय्य प्रापय्य, कनकशलाकाभिः सुवर्णदण्डिकाभिः कलितो निर्मितो यः पञ्जरः शलाकागृहं तस्मिन्, निवेश्य स्थापयित्वा, मधुरक्षीरोदनाद्युपचारेण मिष्टदुग्धभक्तप्रभृत्युपचारेण, निरवद्यं निर्दोषं यथा स्यात्तथा, विवर्धयामास पालयामास।

कदाचित्कान्तानामिति—हे नरवर हे पुरुषोत्तम, प्रियतमोऽतिशयेन वल्लभः, भवांस्त्वम्, बालं हंसं मरालशिशुम्, कदाचिज्जातुचित्, कान्तानां ललनानाम्, कुचकलशसीम्नि वक्षोजकुम्भसीमायाम्, निधाय निक्षिप्य, एवममेन प्रकारेण, अवदत् जगाद, हि निश्चयेन, अये हे मरालबाल ! त्वं पद्मानां कमलानाम्, विरहं विप्रलम्भम्, अनुभोक्तुमनुभवितुम्, न पटुर्न समर्थोऽसि यतः कारणात्, तत् तस्मात् कारणात्, अद्य साम्प्रतम्, वक्षोजाम्बुजमुकुलयुग्मे स्तनारविन्दकुड्मलयुगले, विहर विहारं कुरु। शिखरिणीच्छन्दः ॥ ३६ ॥

एवमिति—एवममेन प्रकारेण, मरालपोतं हंसशिशुम्, मरालकुन्तलाभिः, कुटिलकेशाभिः कान्ताभिः, पत्नीभिः, सह साकम्, सन्ततं शश्वत्, क्रीडयति क्रीडां कारयति, भवति त्वयि, सहर्षं सप्रमोदं यथा स्यात्तथा, आस्थिते विद्यमाने सति, धर्मविदां धर्मज्ञानाम्, अग्रणीरग्रेसरः, ते तव, पिता जनकः, हंसार्भकस्य मरालबालकस्य बन्धनोदन्तं बन्धनवृत्तान्तम्, आकर्ण्य निशम्य, कुपितः क्रुद्धः सन्, त्वां भवन्तम्, आहूय आकार्य, बहुधा नैकविधं यथा स्यात्तथा, धर्मपरिपाटीं धर्मसन्ततिम्, प्रकटयामास स्पष्टीचकार। तदनु तदनन्तरम्, कर्णामृतायमानं श्रवणपीयूषायमाणं यद्धर्मबोधनं धर्मोपदेशस्तेन विजृम्भितो वर्धितो निर्वेदो वैराग्यं यस्य सः, पित्रा जनकेन, निवारितोऽपि प्रतिषिद्धोऽपि, भवान्, वैराग्येण विरक्त्या समासादिता

कृतसुकृतविकसितं सहस्रारकल्पे देवभूयं चिरमनुभूय, महीतले महिलाभिरेताभिरष्टाभिः सह महीपतिरजायत। इति।

राजहंसशिशोः पूर्वं मातापितृवियोजनात्।
पित्रोश्चिराय विरहं राजहंस त्वमास्थितः॥ ३७॥

एवं योगीन्द्रवाणीमनुजनिजसखीस्निग्धवृन्दैः समेतः
श्रुत्वा राज्याद्विभीतः कुरुपतिरशनेः पातनाद्वा भुजङ्गः।
आनर्च्यानम्य चैनं पुरवरमगमत्संसृतिव्यङ्ग्यसौख्यं
मन्वन्हालाहलाभं तपसि निजमतिं सुस्थिरां संदधानः॥३८॥

तदनु वसुमतीवल्लभेन राज्यपरिपालनाय समादिष्टे युवराजे नन्दाढ्ये तपःसाम्राज्यमेव वरीतुकामे, कुरुवीरः पुनः संगतमङ्गलमुहूर्ते भगवत्पूजापुरःसरं विस्तारितमहोत्सवः प्रथितपराक्रम-लक्ष्मीविहारप्रसादायमानभुजं गन्धर्वदत्तानन्दनं सकलकलाविलासनिधिं चापविद्यापारीणगुणं कीर्तिप्रतापविभवेन रूपसंपदा चात्मानमनुकुर्वन्तं सत्यन्धराह्वयं राज्यभारेऽभिषिच्य तमेवमवादीत्।

असत्या वाणी ते तनय रसनाग्रे न वसताच्छ्रुवः प्रान्ते वक्त्रं पिशुनवचनं नेत्रसरणौ।
परस्त्रीणां रूपं मनसि च कुमार्गे व्यवसितिर्मुखे कोपावेशः सकलशशिबिम्बाभवदन॥३९॥

संप्राप्ता या जिनदीक्षा निर्ग्रन्थप्रव्रज्या तस्यां दुश्चरतपश्चरणेषु कठिनतपोऽनुष्ठानेषु दक्षः समर्थः, सन्, अष्टाभिः कान्ताभिर्वनिताभिः, साकं सार्धम्, लोकोत्तरं जगच्छ्रेष्ठम्, तपःप्रकारं तपश्चरणम्, आसाद्य प्राप्य, कृतं विहितं सुकृतस्य पुण्यस्य विकसितं विकासो यस्मिंस्तत् सहस्रारकल्पे द्वादशस्वर्गे, देवभूयं देवत्वम्, चिरं दीर्घकालं यावत्, अनुभूय भुक्त्वा, एताभिः पुरोवर्तमानाभिः, अष्टाभिः अष्टसंख्याकाभिः, महिलाभि-र्वनिताभिः, सह सार्धम्, महीपतिर्जीवन्धरमहाराजः, अजायत उदपादि। इति पुराभवम्, समाचष्टेति पूर्वसम्बन्धः।

राजहंसशिशोरिति—हे राजहंस हे नृपोत्तम त्वम्, पूर्वं प्राग्भवे, राजहंसशिशोर्मरालबालस्य, मातापितृवियोजनात् जननीजनकविरहात्; चिराय दीर्घकालं यावत्, पित्रोर्मातापित्रोः, विरहं विप्रलम्भम्, आस्थितः प्राप्तः॥ ३७॥

एवं योगीन्द्रेति—अनुजाः कनिष्ठभ्रातरो निजसख्यः स्ववल्लभाः स्निग्धाः स्नेहयुक्ता मित्रादयस्तेषां वृन्दैः समूहैः, समेतः सहितः, कुरुपतिर्जीवन्धरः, एवं पूर्वोक्तप्रकाराम्, योगीन्द्रवाणीं मुनिराजभारतीम्, श्रुत्वा निशम्य, अशनेर्वज्रस्य, पातनात्मोचनात्, भुजङ्गो वा पन्नग इव, संसृतिव्यङ्ग्यसौख्यं भवोत्पद्यमान-शर्म, हालाहलाभं तीव्रविषसदृशम्, मन्वन् जानन्, तपसि तपश्चरणे, सुस्थिरां सुदृढाम्, निजमतिं स्वमनीषाम्, संदधानः संधरन्, सन्, एवं योगीन्द्रम्, आनर्च्य पूजयित्वा, आनम्य च नमस्कृत्य च, पुरवरं नगरश्रेष्ठं राजपुरमिति यावत्, अगमत् ययौ॥ ३८॥

तदन्विति—तदनु तत्पश्चात्, वसुमतीवल्लभेन भूपालेन, राज्यपरिपालनाय राजवैभवपरित्राणाय, समादिष्टे समाज्ञप्ते, युवराजे राज्यासनारोहणार्हे, नन्दाढ्ये गन्धोत्कटसुते, तपःसाम्राज्यमेव तपोराज्यमेव वरीतुकामे स्वीकर्तुकामे, सति, कुरुवीरो जीवन्धरः, पुनरनन्तरम्, संगतमङ्गलमुहूर्ते प्राप्तोत्तमलग्ने, भगवत्पूजा-पुरस्सरं श्रीजिनेन्द्रार्चासहितं यथा स्यात्तथा, विस्तारितमहोत्सवो विततीकृतमहोल्लासः, सन्, प्रथिता प्रसिद्धा या पराक्रमलक्ष्मीर्वीर्यश्रीस्तस्या विहारस्य विहरणस्य प्रासादायमानौ भवनायमानौ भुजौ बाहू यस्य तम्, गन्धर्वदत्तानन्दनं गन्धर्वदत्तादारकम्, सकलकलानां निखिलवैदग्धीनाम् विलासनिधिं विभ्रमभाण्डारम्, चापविद्यायां धनुर्विद्यायां पारीणा निपुणा गुणा यस्य तम्, कीर्तिश्च प्रतापश्चेति कीर्तिप्रतापौ यशस्तेजसी तयोर्विभवेन ऐश्वर्येण, रूपसंपदा सौन्दर्यसम्पत्त्या च, आत्मानं स्वम्, अनुकुर्वन्तं विडम्बयन्तम्, सत्यन्ध-राह्वयमेतदभिधानं पुत्रम्, राज्यभारे नृपतित्वधुरि, अभिषिच्य, तं पुत्रम्, एवं वक्ष्यमाणप्रकारेण, अवादीत् जगाद।

असत्या वाणीति—सकलशशिबिम्बाभं पूर्णरजनीरमणमण्डलसदृशं वदनं वक्त्रं यस्य तत्सम्बुद्धौ

मनसि भगवतो जिनस्य पादौ श्रवसि धर्ममयामृतं विधेहि ।
प्रकृतिचयहिते च नेत्रवृत्तिं तनय सुखेन महीं प्रपालयेति ॥४०॥

एवं प्रकारेण निजनन्दनं सत्यन्धरं बोधयित्वा, इतरानपि तनयान् यथायोग्यं पदेषु प्रतिष्ठाप्य, श्रीवीरजिनचरणसरोजभक्तिभरेण वैराग्यवशेन च प्रेरितो महीपालः, सकलसहचरनिकरपरिवृतपार्श्वभागः, तुष्टाभिरष्टाभिः कान्ताभिर्दन्तुरितसविधप्रदेशः, पश्चादनुधाविन्या सत्यन्धरप्रमुखनन्दनपुरस्सरया वेलामतिक्रम्योद्गच्छन्त्येव वारिनिधिवारिवाहिन्या निर्दयसंताडितपटहप्रभृतितूर्यघोषविशेषप्रतिध्वानितकुलाचलकन्दरया मदमन्थरया पृतनयानुगम्यमानः, क्रमेण सप्रणामं तया विसृष्टः, श्रीसभासमीपमासाद्य तां त्रिःप्रदक्षिणीकृत्य प्रमुदितमना मनागितरविस्मयविस्तारिताक्षः प्राविक्षत् ।

यस्याः पार्श्वे रत्नरेणुप्रक्लृप्तो धूलीजालः शक्रचापानुकारी ।
अर्हन्नाथं मुक्तिलक्ष्म्या वरीतुं क्षिप्तं रेजे कङ्कणं वा समीपे ॥ ४१ ॥

यस्यां च गगनतलचुम्बिनः स्पन्दमानमन्दपवमानकन्दलवलमानध्वजाग्रमानस्तम्भाः क्रोधादीनां चतुर्णां निरसनाय प्रसृतसंसज्ज्ञद्मीतर्जनीकार्यधूर्वहा व्यराजन्त ।

हे सकलशशिबिम्बाभवदन, तनय पुत्र, ते तव, रसनाग्रे जिह्वाग्रे, असत्या मिथ्या, वाणी, श्रवःप्रान्ते कर्णप्रदेशे, वक्रं कुटिलम्, पिशुनवचनं खलवाक्यम्, नेत्रसरणौ नयनमार्गे, परस्त्रीणां परकीयपुरन्ध्रीणाम्, रूपं लावण्यम्, मनसि च चेतसि च, कुमार्गे कापथे, व्यवसितिरुद्योगः, मुखे वक्त्रे, कोपालेशः क्रोधावेगः, न वसतात् न निवसतु । शिखरिणीच्छन्दः ॥ ३९ ॥

मनसीति—हे तनय हे पुत्र, मनसि चेतसि, भगवतो जिनस्य भगवज्जिनेन्द्रस्य, पादौ चरणौ, श्रवसि कर्णे, धर्ममयामृतं धर्मरूपपीयूषम्, प्रकृतिचयहिते प्रजागणकल्याणे च, नेत्रवृत्तिं नयनवृत्तिम्, निधेहि कुरु, सुखेन शर्मणा, महीं वसुधाम्, प्रपालय रक्ष, इति, अवादीदित्यनेन सम्बन्धः ॥ ४० ॥

एवं प्रकारेणेति—एवं प्रकारेण-इत्थम्, निजनन्दनं स्वपुत्रम्, सत्यन्धरं बोधयित्वा समाश्वास्य, इतरानप्यन्यानपि, तनयान् पुत्रान्, यथायोग्यं यथार्हम्, पदेषु स्थानेषु, प्रतिष्ठाप्य प्रतिष्ठितान् कृत्वा, श्रीवीरजिनचरणसरोजयोः श्रीवर्धमानजिनेन्द्रपादारविन्दयोः भक्तिभरेण अनुरागातिशयेन, वैराग्यवशेन च विरक्तिनिघ्नत्वेन च, प्रेरितः प्राप्तप्रेरणः, महीपालो भूपः, सकलसहचरनिकरेण निखिलमित्रमण्डलेन परिवृतः परीतः पार्श्वभागो निकटप्रदेशो यस्य सः, तुष्टाभिः प्रसन्नाभिः, अष्टाभिः अष्टसंख्याकाभिः, कान्ताभिर्वनिताभिः, दन्तुरितो नतोन्नतः सविधप्रदेशो यस्य सः, पश्चात्पृष्ठभागे, अनुधाविन्या समनुगामिन्या, सत्यन्धरप्रमुखा नन्दनाः पुरस्सरा यस्यास्तया, वेलां तटम्, अतिक्रम्य समुल्लङ्घ्य, उद्गच्छन्त्या समुत्पतन्त्या, वारिनिधिवारिवाहिन्येव सागरसलिलस्रवन्त्येव, निर्दयं निष्कृपं यथा स्यात्तथा संताडितानि समाहतानि पटहप्रभृतीनि ढक्काप्रमुखानि यानि तूर्याणि वाद्यविशेषास्तेषां घोषविशेषेण शब्दविशेषेण प्रतिध्वानिताः प्रतिनिनादिताः कुलाचलकन्दरा यया तया, मदमन्थरया मदेन मन्थरा तया पृतनया सेनया, अनुगम्यमानोऽनुक्रियमाणः, क्रमेण क्रमशः, सप्रणामं सनमस्कारम्, तया पृतनया, विसृष्टस्त्यक्तः, सन्, श्रीसभासमीपं समवसरणनिकटम्, आसाद्य प्राप्य, तां श्रीसभाम्, त्रिःप्रदक्षिणीकृत्य परिक्रम्य, प्रमुदितमनाः प्रसन्नचेताः, मनागितरविस्मयेन विपुलाश्चर्येण विस्तारिते वितते अक्षिणी यस्य तथाभूतः सन्, प्राविक्षत् प्रविष्टो बभूव ।

यस्या इति—यस्याः श्रीसभायाः, पार्श्वे समीपे, रत्नरेणुप्रक्लृप्तो रत्नरजोनिर्मितः, शक्रचापानुकारी पुरन्दरकोदण्डविडम्बकः, धूलिसालो धूलिप्राकारः, अर्हन्नाथं श्रीजिनेन्द्रम्, वरीतुं स्वीकर्तुम्, मुक्तिलक्ष्म्या निर्वाणश्रिया, समीपे पार्श्वे, क्षिप्तं न्यस्तम्, कङ्कणं वा कटकं यथा, रेजे शुशुभे । शालिनीच्छन्दः ॥ ४१ ॥

यस्यां चेति—यस्यां च श्रीसभायाम्, गगनतलचुम्बिनो नभस्तलस्पर्शिनः, स्पन्दमानः संचलन् यो मन्दपवमानो मन्दसमीरणः तेन कन्दलवलमाना ध्वजाग्राः केत्वग्रा येषु तथाभूता ये मानस्तम्भाः ते, चतुर्णां चतुःसंख्यानाम्, क्रोधादीनां कषायाणाम्, निरसनाय दूरीकरणाय, प्रसृतसंसल्लक्ष्मीविस्तृतसभाश्रीस्तस्यास्तर्जनकार्यस्य भर्त्सनकृतेः धूर्वहा भारभारकाः, व्यराजन्त व्यशोभन्त ।

---

१. मन्थरया मु०

सालकान्तं मुखाभोगं दधत्यास्तत्सभाश्रियः ।
लीलादर्पणतां प्रापुः सरस्यो यत्र निर्मलाः ॥ ४२ ॥

यत्र च विकचपुण्डरीकषण्डमण्डिता स्फटिकस्वच्छसलिला सतारकेव व्योमलक्ष्मीः,महामहिमविराजितं विभुं विलोकितुमागतेव स्वर्लोककल्लोलिनी सुराङ्गनानेत्रविजिताभिरिव ह्रियान्तर्हिताभिः शफरीभिर्विराजिता खातिका विभाति स्म ।

प्रसूनानां वाटी सुरभिलतमा यत्र वितता
ततः सालो लोलन्मणिगणपरीतः समलसत् ।
चतुर्द्वारप्रान्तान्तरविलसिते नाट्यसदने
ततो मार्गे धूपाञ्चितकनककुम्भौ व्यलसताम् ॥ ४३ ॥

या खलु तत्र संमिलितभव्यसंदोहतो भगवद्दर्शनेन निर्गच्छत्पापपरम्पराभिरिव धूपघटनिर्यद्धूमरेखाभिः परीताभ्रभागा, ककुप्कामिनीजनकर्णपूरायमाणपल्लवतल्लजविराजितानामिन्द्रोद्यानजयार्थमुदस्तहस्तानामिवाभ्रङ्कषशाखानां चैत्यवृक्षाणां चतुष्टयेन विभ्राजितैर्विविधविचित्रधारायन्त्रलतामण्डपकाञ्चनक्रीडाशैलपेशलैश्चतुर्भिरुपवनैरुपेता, नानाविधमणिगणखचिततोरणया सुवर्णवेदिकयालङ्कृता, शिखावलदन्तावलदन्तिवैरिप्रमुखलाञ्छनलाञ्छिताभिर्गगनतलोद्वेल्लनसमाकृष्टसुरतरङ्गिणीतरङ्गसम्भावनासंपादकव्यामुक्तमुक्ताफलरुचिनिचयरुचिराभिर्वैजयन्तीभिर्विलसिता, भगवन्मुख-

सालकान्तमिति—यत्र विमला निर्मलाः, सरस्यः कासाराः, अलकान्तैश्चूर्णकुन्तलान्तैः सहित इति सालकान्तस्तम्, पक्षे सालेन प्राकारेण कान्तो मनोहरस्तम्, मुखाभोगमग्रप्रदेशं वक्त्रप्रान्तञ्च, दधत्याः, सभाश्रियः समवसरणलक्ष्म्याः, लीलादर्पणतां केलिमुकुरताम्, प्रापुर्लेभिरे ॥ ४२ ॥

यत्र चेति—यत्र च यस्यां च सभायाम्, विकचपुण्डरीकषण्डेन प्रस्फुटकमलसमूहेन मण्डिता शोभिता स्फटिकमिव सितोपल इव स्वच्छं निर्मलं सलिलं जलं यस्यास्तथाभूता, खातिका परिखा, सतारका सनक्षत्रा, व्योमलक्ष्मीरिव गगनश्रीरिव, महामहिमविराजितं लोकोत्तरप्रभावशोभितम्, विभुं जिनेन्द्रम्, विलोकितुम्, द्रष्टुम्, आगता समायाता, स्वर्लोककल्लोलिनीव सुरपुरस्रवन्तीव सुराङ्गनानां नेत्रविलासैर्नयनचेष्टितैर्विजितास्ताभिरिव, ह्रिया त्रपया, अन्तर्हिताभिरन्तर्गताभिः, शफरीभिर्मीनैः, विराजिता शोभिता, खातिका परिखा, विभाति स्म शोभते स्म ।

प्रसूनानामिति—यत्र समवसरणसभायाम्, सुरभिलतमा सुगन्धियुक्ता प्रसूनानां कुसुमानाम्, वाटी वर्गा, वितता विस्तृता, ततस्तदनन्तरम्, लोलन्मणिगणैः शोभमानरत्नसमूहैः परीतो व्याप्तः, सालो वप्रः, समलसत् शुशुभे, ततस्तदनन्तरम्, चतुर्णां द्वाराणां प्रान्तान्तरेषु मध्यावकाशेषु विलसिते शोभिते, नाट्यसदने नृत्यनिकेतने, व्यलसताम् व्यशोभेताम् । शिखरिणीच्छन्दः ॥ ४३ ॥

या खल्विति—या खलु धर्मसभा, तत्र संमिलिताश्च ते भव्याश्चेति संमिलितभव्यास्तेषां संदोहस्तस्मात्, भगवद्दर्शनेन जिनेन्द्रावलोकनेन निर्गच्छन्त्यो निर्गलन्त्यो याः पापपरम्परा दुरितश्रेणयस्ताभिरिव, धूपघटेभ्यो धूपकुम्भेभ्यो निर्यन्त्यो या धूमरेखा धूम्रलेखास्ताभिः, परीतो व्याप्तोऽभ्रभागो गगनप्रदेशो यस्यां सा, ककुप्कामिनीजनानां काष्ठाङ्गनाजनानां कर्णपूरायमाणैः श्रवणालंकारायमाणैः पल्लवतल्लजैः किसलयश्रेष्ठैर्विराजितानां शोभितानाम्, इन्द्रोद्यानजयार्थं नन्दनोपवनविजयार्थम्, उदस्तहस्तानामिव समुत्क्षिप्तपाणीनामिव, अभ्रङ्कषशाखानां गगनचुम्बिकाण्डानाम्, चैत्यवृक्षाणां चैत्यतरूणाम्, चतुष्टयेन चतुष्केण, विभ्राजितैः शोभितैः विविधानि नैकप्रकाराणि विचित्राणि विस्मयावहानि धारायन्त्राणि जलयन्त्राणि, लतामण्डपानि निकुञ्जानि काञ्चनक्रीडाशैलाः सुवर्णकेलिपर्वतास्तैः पेशलैर्मनोहरैः चतुर्भिश्चतुःसंख्याकैः उपवनैरारामैः, उपेता सहिता, नानाविधमणिगणैरनेकरत्नसमूहैः खचितौ निःस्यूतौ तोरणौ यस्यां तथाभूतया, सुवर्णवेदिकया काञ्चनवितर्दिकया, अलंकृता शोभिता, शिखावलो मयूरः, दन्तावलो हस्ती, दन्तिवैरी सिंहः, ते प्रमुखाः प्रधाना येषु तथाभूतानि यानि लाञ्छनानि चिह्नानि तैर्लाञ्छिताभिश्चिह्निताभिः, गगनतलोद्वेल्लनेन विहायस्तलप्रसरणेन, समाकृष्टाः ये सुरतरङ्गिणीतरङ्गा गङ्गाकल्लोलास्तेषां संभावनाया उत्प्रेक्षायाः सम्पादकानि कारकाणि

सरसिजाद्विगलद्दिव्यध्वनिश्रवणकुतुकेन कुण्डलीभूयोपतस्थुषा मेरुणेव कनकमयसालेन विलसिता, सकलचित्तहारिणा पुष्पितकल्पकवनेन परिशोभिता, निखिलजगदानन्दकन्दलसंदायिन्या चतुर्गोपुरचारुतमवज्रवेदिकया संघटिता, जिनपतिदर्शनकुतूहलेन प्रादुर्भूतान्नवपदार्थानिव नवनव स्तूपानर्चासनाथान्धारयन्ती, भगवद्दिदृक्षया समागतेन मूर्तेन वायुमार्गेणेव स्फाटिकप्राकारेण परिवृता, सन्ततपरिस्फुरन्निशाकान्तकान्तविनिर्मितैर्भव्यसंदोहाध्यासितैर्द्वादशकोष्ठैः प्रतिष्ठिता विरराज ।

तत्र प्रविश्य स च गन्धकुटीसमाख्ये स्थाने मणिस्फुरितसिंहहतासनाग्रे ।
पूर्वाचले रविमिव प्रविराजमानं वीरं ददर्श कुतुकेन जिनाधिराजम् ॥४४॥
प्रदक्षिणीकृत्य धराधिराजो भक्त्या जगत्पूज्यमथैष वीरम् ।
इयाज पूजाविधिना विधिज्ञस्तुष्टाव चैवं परितुष्टचित्तः ॥४५॥
स्वामिन्नम्बुदमार्गचुम्बिविटपै रुद्धाम्बराशान्तरो
गायन्भृङ्गरवैस्तवामलगुणान्नृत्यंश्चलैः पल्लवैः ।
रक्तस्तावकदर्शनेन विविधैः पुष्पप्रवालोत्करै-
र्मूर्तो वा मधुरेव वीर भवतो राजत्यशोकद्रुमः ॥४६॥

व्यामुक्तानि धृतानि यानि मुक्ताफलानि तेषां रुचिनिचयेन कान्तिकलापेन रुचिरा मनोहरास्ताभिः, वैजयन्तीभिः पताकाभिः विलसिता शोभिता भगवन्मुखसरसिजात् जिनेन्द्रवदनारविन्दात् विगलन्निःसरन् यो दिव्यध्वनिर्निरक्षरवाणी तस्य श्रवणं समाकर्णनं तस्मिन् कौतुकं कौतूहलं तेन, कुण्डलीभूय मण्डलाकारीभूय, उपतस्थुषा समुपस्थितवता, मेरुणेव रत्नसानुनेव, कनकमयसालेन काञ्चननिर्मितवप्रेण, विलसिता शोभिता, सकलचित्तहारिणा निखिलमनोवशीकरणदक्षेण, पुष्पितं कुसुमितं यत्कल्पकवनं कल्पानोकहकाननं तेन, परिशोभिता समलंकृता, निखिलजगतां कृत्स्नलोकानामानन्दकन्दलस्य प्रमोदसमूहस्य संदायिन्या प्रदायिकया, चतुर्गोपुरैश्चतुःप्रधानद्वारैश्चारुतमा मनोहरतमा या वज्रवेदिका पविमयवितर्दिका तया, संघटिता कलिता, जिनपतिदर्शनकुतूहलेन जिनेन्द्रावलोकनकौतुकेन, प्रादुर्भूतान् प्रकटितान्, नवपदार्थानिव जीवाजीवास्रवबन्धसंवरनिर्जरापुण्यपापाभिधानपदार्थानिव, अर्चासनाथान् मूर्तिसहितान्, नव नव प्रतिदिशं नव नव संख्याकान्, स्तूपान् मणिमयस्तूपान्, धारयन्ती दधती, भगवतो जिनेन्द्रस्य दिदृक्षा दर्शनेच्छा तया, समागतेन संप्राप्तेन, मूर्तेन मूर्तियुक्तेन, वायुमार्गेणेव पवनमार्गेणेव गगनेति यावत्, स्फाटिकप्राकारेण विशदोपलवप्रेण, परिवृता परीता, सन्ततं निरन्तरं परिस्फुरन्तो विकसन्तो ये निशाकान्तकान्ता चन्द्रकान्तमणयस्तैर्निर्मितै रचितैः, भव्यसंदोहेन भव्यजीवौघेनाध्यासिता अधिष्ठितास्तैः, द्वादशकोष्ठैर्द्वादशसभाभिः, प्रतिष्ठिता सहिता सती विरराज विशुशुभे ।

तत्र प्रविश्येति—तत्र धर्मसमायाम्, प्रविश्य प्रवेशं कृत्वा, स च जीवन्धरश्च, गन्धकुटीसमाख्ये गन्धकुटीनामके, स्थाने धामनि मणिस्फुरितं रत्नविभ्राजितं यत् सिंहधृतासनं हरिविष्टरं तस्याग्रे पृष्ठे पूर्वाचले उदयाचले रविमिव सूर्यमिव, प्रविराजमानं शोभमानम्, जिनाधिराजं जिनेन्द्रदेवम्, कुतुकेन कुतूहलेन ददर्श विलोकयामास ॥ ४४ ॥

प्रदक्षिणीकृत्येति—अथानन्तरम्, धराधिराजो नृपः एष जीवन्धरः, जगत्पूज्यं भुवनाभिवन्दनीयम्, वीरं वर्धमानम्, प्रदक्षिणीकृत्य परिक्रम्य, पूजाविधिना सपर्याविधिना, इयाज पूजयामास, विधिं जानातीति विधिज्ञः, परितुष्टचित्तः संतुष्टहृदयश्च सन्, एवं वक्ष्यमाणप्रकारेण, तुष्टाव स्तौति स्म ॥४५॥

स्वामिन्नम्बुदेति—हे स्वामिन् हे नाथ, हे वीर हे वर्धमानजिनेन्द्र, अम्बुदमार्गो गगनं तस्य चुम्बिनः स्पर्शिनो ये विटपाः शाखास्तैः, रुद्धाम्बराशान्तरो रुद्धान्तरीक्षकाष्ठामध्यः, भृङ्गरवैः षट्पदशब्दैः, तव भवतः अमलगुणान् निर्मलगुणान्, गायन् उच्चारयन्, चलैश्चञ्चलैः, पल्लवैः किसलयैः, नृत्यन् नृत्यं कुर्वन्, तावकदर्शनेन भवदवलोकनेन, विविधैरनेकप्रकारैः, पुष्पप्रवालोत्करैः कुसुमकिसलयसमूहैः, रक्तो लोहितवर्णो भक्त्यनुरागश्च, भवतस्तव, अशोकद्रुमः कङ्केलिवृक्षः, मूर्तः सदेहः, मधुरेव वा वसन्त एव वा, राजति शोभते ॥४६॥

वृष्टिः पौष्पी वरजिनपते तावकी सातिशुभ्रा
संद्रष्टुं त्वां गगनसरणेरागता चन्द्रिका किम् ।
यद्वा भीत्या कुसुमधनुषो हस्तपद्माच्च्युता द्राग्-
बाणश्रेणी नियतमखिलस्पष्टविज्ञानवार्धे ॥४७॥

क्वेयं लक्ष्मीरपारा क्व खलु जिनपते निश्चलं निःस्पृहत्वं
क्वासौ सुस्पष्टबोधः सकलविषयकः क्वेदृशानुद्धतत्वम् ।
रे रे सर्वे कुतीर्था वदत निजधियेत्येवमामन्द्रनादो
भोः स्वामिन्दुन्दुभिस्ते वदति जलधरध्वानपूरानुकारी ॥४८॥

सकलजगदीश्वर विश्ववेदनचतुर सुरधराधरधीर श्रीवीर, भवदीयातीतानागतवर्तमान-विज्ञानमसमानं भुवनत्रयैश्वर्यमहिमानं प्रकटीकुर्वाणम्, अमर्त्यैः स्वप्राभवप्रकाशनाय चक्रीकृत्य गगने त्रिधा विन्यस्तमिव क्षीरवाराशिसलिलम्, अत्यच्छस्वभावमपि भव्यौघानुरागमादधानं छत्रत्रयं विराजते ।

भामण्डले जिनपते तव दर्शनार्थं संप्राप्ततिग्मरुचिमण्डलशङ्क्यमाने ।
स्वातीतजन्मसरणिं मणिदर्पणाभे संपश्यति प्रविशदं खलु भव्यसङ्घः ॥४९॥

स्वामिन् जिनेन्दौ त्वयि जृम्भमाणे व्यर्थीकृतानामुडुराजभासाम् ।
द्राग्वेधसा दण्डनियन्त्रितानां राजीव ते राजति चामरालिः ॥५०॥

वृष्टिः पौष्पीति—अखिलं कृत्स्नं स्पष्टं विशदं यद्विज्ञं तस्य वार्धिः सागरस्तत्सम्बुद्धौ हे अखिलस्पष्ट-विज्ञानवार्धे ! हे वरजिनपते हे जिनेन्द्र ! अतिशुभ्रा सिततरा, सा प्रसिद्धा, तावकी भवदीया, पौष्पी कौसुमी, वृष्टिर्वर्षणम्, त्वां भवन्तम्, संद्रष्टुमवलोकयितुम्, गगनसरणेराकाशमार्गात्, आगता प्राप्ता, किं चन्द्रिका ज्योत्स्ना, यद्वाथवा, भीत्या भयेन, कुसुमधनुषः कामस्य, हस्तपद्मात्करकमलात्, नियतं निश्चितं यथा स्यात् तथा, द्राक् झटिति, च्युता पतिता, बाणश्रेणी शरसन्ततिः । उत्प्रेक्षा । मन्दाक्रान्तावृत्तम् ॥४७॥

क्वेयं लक्ष्मीरिति—हे जिनपते जिनेन्द्र; इयमेषा, अपारा विपुला, लक्ष्मीः श्रीः, क्व कुत्र, निश्चलं स्थिरम्, निःस्पृहत्वं वितृष्णत्वम्, क्व, सकलविषयको निखिलपदार्थज्ञाता, असौ सुस्पष्टबोधो विशदज्ञानम्, क्व, ईदृशानुद्धतत्वमीदृगप्रगल्भत्वम्, क्व, रे रे सर्वे कुतीर्था मिथ्यामतपक्षपातिनः, निजधिया स्वबुद्ध्या वदत कथयत, इत्येवम्, आमन्द्रनादो गभीरशब्दः जलधरध्वानपूरानुकारी मेघगर्जितप्रवाहविडम्बकः ते तव, दुन्दुभिरानकः, भो स्वामिन् हे नाथ ! वदति कथयति ॥ ४८ ॥

सकलजगदीश्वरेति—सकलं च तज्जगच्चेति सकलजगद् तस्येश्वरस्तत्सम्बुद्धौ हे सकलजगदीश्वर निखिललोकनाथ, विश्वेषां सर्वेषां वेदने ज्ञाने चतुरो दक्षस्तत्सम्बुद्धौ हे विश्ववेदनचतुर, सुरधराधर इव सुमेरुरिव धीरस्तत्सम्बुद्धौ हे सुरधराधरधीर, श्रीवीर श्रीवर्धमान, भवदीयातीतानागतवर्तमानविज्ञानं भवत्कालत्रितयज्ञानम्, असमानमनुपमम्, भुवनत्रितयैश्वर्यमहिमानं लोकत्रयविभवमाहात्म्यम्, प्रकटीकुर्वाणं प्रकटयत्, अमर्त्यैः सुरैः स्वस्य प्राभवं विभुत्वं तस्य प्रकाशनाय प्रकटनाय, चक्रीकृत्य मण्डलीकृत्य, गगने, नभसि, त्रिधा त्रिप्रकारेण, विन्यस्तं विनिक्षिप्तम्, क्षीरवाराशिसलिलमिव क्षीरसागरजलमिव, अत्यच्छस्वभाव-मपि धवलनिसर्गमपि, भव्यौघानुरागं भव्यप्रचयलौहित्यं पक्षे भव्यप्रचयप्रेमाणम्, आदधानं कुर्वाणम्, छत्रत्र-यम् आतपवारणत्रितयम्, विराजते शोभते ।

भामण्डल इति—हे जिनपते हे जिनराज, तव भवतः, दर्शनार्थं विलोकनार्थम्, संप्राप्तः समागतो यो तिग्मरुचिः सूर्यस्तस्य मण्डलमिव बिम्बमिव शङ्क्यमानं संदिह्यमानं तस्मिन्, मणिदर्पणाभे रत्नादर्शतुल्ये, भामण्डले एतन्नामप्रातिहार्ये, प्रविशदमतिस्वच्छं यथा स्यात्तथा, स्वातीतजन्मसरणिं निजपूर्वभवपरम्पराम्, खलु निश्चयेन, संपश्यति समवलोकते ॥ ४९ ॥

स्वामिन्निति—हे स्वामिन् हे नाथ, जिनेन्दौ जिनचन्द्रमसि, त्वयि भवति, जृम्भमाणे वर्धमाने सति,

कुरङ्गैरुद्गतग्रीवैः श्रूयमाणा निरन्तरम् । जितपीयूषधारा ते दिव्यभाषा विराजते ॥ ५१ ॥

सन्ततविनमदमरनिकरमकुटतटघटितमुक्तारुचिपुनरुक्तनखचन्द्रिकानन्दितनिखिलजननयन-नीलोत्पल श्रीवीर, तव पञ्चाननासनम्, उपवनमिव नानापत्रलतान्वितं व्याजृम्भमाणवदनैः पञ्चवदनैरञ्चितं च, वाराकरनीरमिव सरत्नमकरम्, हेमाचलशृङ्गमिवात्युन्नतम्, सकलजगदानन्दं कन्दलयति ।

एवंभूतैरष्टभिः प्रातिहार्यैर्जुष्टः श्रीमन्मां भवाब्धौ निमग्नम् ।
वीर स्वामिन्नुद्धरेति क्षितीशो भक्त्याधिक्याद्देवदेवं ननाम ॥ ५२ ॥

अनुज्ञां लब्ध्वासावथ जिनपतेर्मातुलमुखैः समेता भूपालो गणधरमिहानम्य कुशलः ।
गृहीत्वा निस्सङ्गं जिनपगदितं संयमवरं तपस्तेपे जीवन्धरमुनिवरस्तस्य सविधे ॥ ५३ ॥

कुरूपशोभितोऽप्येष सुरूप इति विश्रुतः । मदनोऽपि बभूवाद्य शिवसौख्यकृतादरः ॥ ५४ ॥

आस्तां तावदिदमन्यदद्भुततमसालक्ष्यते ।

व्यर्थीकृतानां निष्फलीकृतानाम्, अतएव, वेधसा विधात्रा, प्राग् झटिति, दण्डेन यष्ट्या नियन्त्रिता निरुद्धास्तासाम्, उडुराजभासां चन्द्रमरीचीनाम्, राजीव श्रेणिरिव, ते भवतः, चामरालिर्बालव्यजनपङ्क्तिः, राजति शोभते ॥५०॥

कुरङ्गैरिति—उद्गतग्रीवैरुन्नमितकण्ठैः, कुरङ्गैर्हरिणैः, निरन्तरं शश्वत्, श्रूयमाणा समाकर्ण्यमाना, जितपीयूषधारा पराभूतसुधाधारा ते भवतः, दिव्यभाषा दिव्यध्वनिः, विराजते विशोभते ॥५१॥

सन्ततेति—सन्ततं सर्वदा विनमन्तो नमस्कुर्वन्तो येऽमरनिकरा देवसमूहास्तेषां मकुटतटेषु घटिताः खचिताः या मुक्ता मुक्ताफलानि तासां रुच्या दीप्त्या पुनरुक्ता या नखचन्द्रिका नखर-ज्योत्स्ना तया नन्दितानि प्रसादितानि निखिलजनानां समग्रलोकानां नयनान्येव नीलोत्पलानि यस्य तत्सम्बुद्धौ, श्रीवीर श्रीवर्द्धमान, तव भवतः, पञ्चाननासनं सिंहासनम्, उपवनमिवोद्यानमिव, नाना-पत्रलताभिर्विविधदलवल्लरीभिः शिल्पत्वेन विन्यस्ताभिरन्वितं सहितम्, पक्षे वास्तविकदलवल्लरीभि-रन्वितम्, व्याजृम्भमाणवदनैः विकसन्मुखैः, पञ्चवदनैः सिंहैः, कृत्रिमैः पक्षे यथार्थमृगेन्द्रैः, अञ्चितं च शोभितं च, वाराकरनीरमिव समुद्रसलिलमिव, सरत्ना मकरा यस्मिंस्तत्, रत्नमयमकरसहितम्, हेमाचलशृङ्गमिव सुमेरुशिखरमिव, अत्युन्नतमतितुङ्गम्, सकलजगदानन्दं निखिलजनप्रमोदम्, कन्दलयति वर्द्धयति ।

एवंभूतैरिति—हे श्रीमन् हे लक्ष्मीमन्, हे वीर हे वर्द्धमान हे स्वामिन् हे नाथ, एवम्भूतै-रित्थंभूतैः, अष्टभिरष्टसंख्याकैः प्रातिहार्यैः जुष्टः सेवितः भवान्, भवाब्धौ संसारसागरे, निमग्नं ब्रुडितम्, माम्, उद्धर, निष्कासय, इति, भक्त्याधिक्यादनुरागातिशयात्, क्षितीशो जीवन्धरः, देवदेवं श्री-महावीरजिनेन्द्रम्, ननाम नमश्चकार । शालिनीच्छन्दः ॥ ५२ ॥

अनुज्ञामिति—अथानन्तरम्, कुशलो निपुणः, असौ भूपालो नृपः, जिनपतेर्जिनेन्द्रस्य, अनुज्ञा-मादेशम्, लब्ध्वा प्राप्य, मातुलमुखैर्मातृभ्रातृप्रधानैः, समेतः सहितः, इह सभायाम्, गणधरं गणेशम्, आनम्य नमस्कृत्य, जीवन्धरमुनिवरः सन्, निस्सङ्गं निष्परिग्रहम्, जिनपगदितं जिनेन्द्रोक्तम्, संयम-वरं श्रेष्ठसंयमम्, गृहीत्वा समादाय, तस्य गणधरस्य, सविधे निकटे, तपोऽनशनप्रभृतिकम्, तेपे तपति स्म । शिखरिणीच्छन्दः ॥ ५३ ॥

कुरूपशोभित इति—कुत्सितं रूपं कुरूपं तेन शोभितोऽपि राजितोऽपि सुरूपः सुन्दररूपसहित इति विरोधः पक्षे कुरुषु कुरुवंशेषु शोभितः समलंकृत इति । एष जीवकः, मदनोऽपि कामोऽपि पक्षे कामदेवपदवीधरोऽपि, अद्येदानीम्, शिवसौख्ये मोक्षसौख्ये कृतो विहित आदरः सम्मानं येन तथाभूतो बभूव आसीत् । विरोधाभासालंकारः ॥ ५४ ॥

आस्तामिति—अथवा, इदम् एतत्, आस्तां तावत्, भवतु नाम, किन्तु इदम्, अन्यत् इतरत्, अद्भुततममाश्चर्यातिशयकरम्, आलक्ष्यते दृश्यते ।

संगीतिव्यपदिष्टो यः सुहृद्भिरभिनन्दितः । सोऽयं सुहृज्जनेष्वासीदसंगीति प्रथां गतः ॥ ५५ ॥
देव्यो गन्धर्वदत्ताद्याः सहिताः स्वस्वमातृभिः । समीपे चन्दनार्यायाः संयमं जगृहुः परम् ॥ ५६ ॥

जीवन्धरोऽयं तपसि प्रवीणो यथाक्रमं नष्टघनाष्टकर्मा ।
रत्नत्रयं पूर्णमवाप धीरो महामुनिर्मान्यगुणाभिरामः ॥ ५७ ॥

अष्टाभिः स्वगुणैरयं कुरुपतिः पुष्टोऽथ जीवन्धरः
सिद्धः श्रीहरिचन्द्रवाङ्मयमधुस्यन्दिप्रसूनोच्चयैः ।
भक्त्याराधितपादपद्मयुगलो लोकातिशायिप्रभां
निस्तुल्यां निरपायसौख्यलहरीं संप्राप मुक्तिश्रियम् ॥ ५८ ॥

प्रजानां क्षेमाय प्रभवतु महीशः प्रतिदिनं सुवृष्टिः संभूयाद्भजतु शमनं व्याधिनिचयः ।
विधत्तां वाग्देव्या सह परिचयं श्रीरनुदिनं मतं जैनं जीयाद्विलसतु च भक्तिर्जिनपतौ ॥ ५९ ॥
कुरुकुलपतेः कीर्ती राकेन्दुसुन्दरचन्द्रिका विमलविशदा लोकेष्वानन्दिनी परिवर्धताम् ।
मम च मधुरा वाणी विद्वन्मुखेषु विनृत्यताद्विलसितरसा सालंकारा विराजितमन्मथा ॥ ६० ॥

इति महाकविहरिचन्द्रविरचिते श्रीमति जीवन्धरचम्पूकाव्ये मुक्तिलम्भो
नामैकादशो लम्भः ।

संगीतिव्यपदिष्ट इति—सुहृद्भिः सम्यग्दृष्टिभिः सुलोचनैर्वा, अभिनन्दितः प्रशंसितः, यो जीवकः, संगी परिग्रहवान्, इति व्यपदिष्टः कथितः, सोऽयम्, सुहृज्जनेषु सम्यग्दृष्टिपुरुषेषु सुलोचनेषु वा, असंगी परिग्रहरहितः, इति प्रथां प्रसिद्धिम्, गतः प्राप्तः, आसीद् बभूव, समीचीना गीतिः संगीतिस्तया व्यपदिष्टः व्यपदेशं प्राप्तः । विरोधाभासोऽलंकारः ॥ ५५ ॥

देव्यो गन्धर्वदत्ताद्या इति—स्वस्वमातृभिर्निजनिजजननीभिः, सहिता युक्ताः, गन्धर्वदत्ताद्या गन्धर्वदत्ताप्रभृतयः, देव्यो राज्यः, चन्दनार्यायाः एतन्नामगणिन्याः, समीपे पार्श्वे, परमुत्कृष्टम्, संयमं चारित्रम्, जगृहुर्गृहीतवत्यः ॥ ५६ ॥

जीवन्धरोऽयमिति—तपसि तपश्चरणे, प्रवीणो निपुणः, यथाक्रमं क्रमेण, नष्टानि घनानि अष्ट कर्माणि यस्य व्यपगतनिबिडाष्टकर्मा, धीरो गम्भीरः, मान्यगुणाभिरामो महनीयगुणसुन्दरः, महामुनिर्महायतिः, अयमेषः जीवन्धरः स्वामी, पूर्णं समग्रम्, रत्नत्रयं सम्यग्दर्शनज्ञानचारित्रात्मकम्, अवाप लेभे ॥ ५७ ॥

अष्टाभिरिति—अथाष्टघनकर्मक्षयानन्तरम्, अष्टाभिः अष्टसंख्यैः, स्वगुणैः सम्यक्त्वादिभिः, पुष्टः पोषं प्राप्तः, श्रीहरिचन्द्रस्य ग्रन्थकर्तुर्वाङ्मयमेव मधु मकरन्दं तस्य स्यन्दिनो ये प्रसूनोच्चयाः कुसुमसमूहास्तैः, सिद्धः प्रथितः, भक्त्यानुरागातिशयेनाराधितं सेवितं पादपद्मयुगलं चरणारविन्दयुगं यस्य तथाभूतः, अयमेषः, कुरुपतिः जीवन्धरः, लोकातिशायिनी प्रभा यस्यास्ताम्, निस्तुल्यां निरुपमाम्, निरपाया निर्विनाशा सौख्यलहरी सुखपरम्परा यस्यां ताम्, मुक्तिश्रियं निर्वृतिलक्ष्मीम्, संप्राप संलेभे ॥ ५८ ॥

प्रजानामिति—महीशो नृपः, प्रतिदिनं प्रतिवासरम्, प्रजानां लोकानाम्, क्षेमाय कल्याणाय, प्रभवतु समर्थो भवतु, सुवृष्टिः सुवर्षा, संभूयात् भवतु, व्याधिनिचयो रोगसमूहः, शमनं शान्तिम्, भजतु प्राप्नोतु, श्रीर्लक्ष्मीः, वाग्देव्या सरस्वत्या, सह सार्धम्, अनुदिनं प्रत्यहम्, परिचयं संपर्कम्, विधत्तां करोतु, जैनं जिनस्येदं जैनं जिनप्रणीतम्, मतम्, जीयात् जयतु, जिनपतौ जिनेन्द्रे, भक्तिरनुरागातिशयः विलसतु शोभताम् ॥ ५९ ॥

कुरुकुलपतेरिति—विमलविशदा निर्मलोज्ज्वला, आनन्दिनी हर्षिणी, कुरुकुलपतेर्जीवन्धरस्य, कीर्तिर्यशः राकेन्दुसुन्दरचन्द्रिका पूर्णचन्द्रचारुज्योत्स्ना, लोकेषु भुवनेषु, परिवर्धतां वृद्धिं प्राप्नुयात्, विलसितरसा सुशोभितशृङ्गारादिरसा, सालंकारा रूपकोपमाद्यलंकारसहिता, विराजितमन्मथा विशोभितमदना, मम कवेः, वाणी च भारती च, विद्वन्मुखेषु विपश्चिद्वक्त्रेषु, विनृत्यतां नृत्यं करोतु । हरिणीच्छन्दः ॥ ६० ॥

इति महाकविहरिचन्द्रविरचिते श्रीमति 'कौमुदी'व्याख्याधरे जीवन्धरचम्पूकाव्ये
मुक्तिलम्भो नामैकादशो लम्भः ।

जीवन्धर-चम्पूकाव्य

[हिन्दी अनुवाद]

•

प्रथम लम्भ

जिनके दोनों चरण, शोभायमान नखोंकी कान्तिरूपी आकाशगङ्गाके बीच कछुएके समान जान पड़ते हैं, सेवासे नम्रीभूत इन्द्रोंके हीरकमय मुकुटोंकी पङ्क्ति हंसके समान आचरण करती है, दर्शन करनेवाली देवाङ्गनाओंके नेत्रोंके समूह मछलियोंके समूहके समान जान पड़ते हैं और राजाओंकी अञ्जलियाँ कमल-कुड्मलोंके समान प्रतिभासित होती हैं, वे आदि जिनेन्द्र तुम सबकी रक्षा करें ॥१॥ जिन्होंने अपने शोभासम्पन्न चरणोंके द्वारा समस्त जगत्को आक्रान्त किया है, (पक्षमें जिसकी शोभायमान किरणें समस्त जगत्में व्याप्त हैं), जो श्रेष्ठ महिमाको करनेवाले हैं (पक्षमें जो अतिशय शीतलताको करनेवाला है), जिन्हें अनन्त सुख और अनन्त ज्ञान प्राप्त हुआ है, (पक्षमें जिससे जीवोंको अपरिमित सुखका बोध होता है), जिनकी कान्ति अथवा श्रद्धा संताप और अज्ञानान्धकारको नष्ट करनेमें प्रसिद्ध है (पक्षमें जिसकी निजकी कान्ति गर्मी और अन्धकार दोनोंको नष्ट करनेमें प्रसिद्ध है), जो सज्जनोंके समूहके अधिपति हैं (पक्षमें जो नक्षत्रोंके समूहका राजा है), जो अनन्त चतुष्टयरूप लक्ष्मीसे सहित है (पक्षमें अनुपम शोभासे सम्पन्न है) और जो दिव्यध्वनिसे सुशोभित होनेवाली समस्त कलाओंके स्वामी हैं (पक्षमें जो आकाशमार्गमें सुशोभित होनेवाली समस्त कलाओंसे प्रिय हैं) ऐसे धीर वीर चन्द्रप्रभ जिनेन्द्ररूपी चन्द्रमा हमारी बुद्धिरूपी नीलकमलिनीका विकास करें ॥२॥ जो हरीश पूज्य होकर भी अहरीश पूज्य हैं (पक्षमें जो हरि-विष्णु और ईश-रुद्रके द्वारा पूज्य होकर भी दिनके स्वामी सूर्य, उपलक्षणसे ज्योतिषी देवोंके द्वारा पूज्य हैं), सुरेश वन्द्य होकर भी असुरेशवन्द्य हैं (पक्षमें इन्द्रोंके द्वारा वन्दनीय होकर भी भवनवासी देवोंके इन्द्रों द्वारा वन्दनीय हैं), और जो अनङ्गरम्य—शरीरसे सुन्दर न होकर भी शुभाङ्गरम्य—शुभ शरीरसे सुन्दर हैं (पक्षमें-कामदेवके समान सुन्दर होकर भी शुभ शरीर-परमौदारिकशरीरसे सुन्दर हैं) ऐसे श्रीशान्तिनाथ भगवान् तुम सबका भला करें ॥३॥ जो सात हाथ उत्तुङ्ग परमौदारिक शरीरके धारक हैं, मोक्षसुखके करनेवाले हैं, सम्यग्दृष्टि मनुष्य सदा जिनकी स्तुति करते हैं और जो विषयासक्ति रूपी रागसे रहित हैं ऐसे श्रीवर्धमान स्वामीरूपी अपूर्व कामदेवकी मैं स्तुति करता हूँ। भावार्थ—इस श्लोकमें भगवान् वर्धमान स्वामीको अपूर्व कामदेव बतलाया है अर्थात् कामदेवका जैसा रूप काव्य जगत्में प्रसिद्ध है उससे विभिन्नरूप बतलाया है। प्रचलित कामदेव शरीर रहित है परन्तु वर्धमान स्वामी आयत-लम्बे परमौदारिक शरीरके धारक हैं, प्रचलित कामदेव शिव अर्थात् महादेवजीको सुख करनेवाला नहीं है अपितु उनके शत्रुरूपसे प्रसिद्ध है परन्तु वर्धमान स्वामी शिव अर्थात् मोक्षसुखके करनेवाले हैं, प्रचलित कामदेवको सम्यग्दृष्टि जीव अच्छा नहीं समझते पर वर्धमान स्वामीको अच्छा समझते हैं—सदा उनकी स्तुति किया करते हैं और प्रचलित कामदेव अपनी रति नामक स्त्रीके रागसे हीन नहीं हैं, सहित है परन्तु वर्धमान स्वामी रति अर्थात् विषयासक्ति रूप रागसे रहित हैं। इस प्रकार प्रचलित कामदेवसे विभिन्नता रखनेवाले वर्धमान स्वामीरूपी अपूर्व कामदेवकी स्तुति की गई है ॥४॥ जो लोकके ऊर्ध्वभागरूपी एकान्त स्थानमें मुक्तिरूपी स्त्रीके साथ विराजमान हैं, जिन्होंने अष्ट कर्म नष्ट कर दिये हैं और जो अत्यन्त विशुद्धताको प्राप्त हैं उन सिद्ध भगवान्का मैं हृदयमें चिन्तवन करता हूं ॥५॥ मैं सम्यग्दर्शन सम्यग्ज्ञान और सम्यक्चारित्ररूपी उस श्रेष्ठ रत्नत्रयकी आराधना करता हूँ जो कि भव्यजीवों का मुख्य आभूषण है, मुक्तिरूपी कान्ताको सन्तुष्ट करनेवाला है, और अज्ञानान्धकारके समूहको नष्ट करनेवाला है ॥६॥ जो कर्मोंको नष्ट करनेके लिए छुरी है, संसाररूपी समुद्रसे पार करनेके लिए जहाज है, जिसने अपने केशपाशसे मेघोंकी माला जीत ली है, और जो जिनेन्द्र भगवान्के

मुखरूपी कमलमें देदीप्यमान रहती है वह जिनवाणी—सरस्वती देवी जयवन्त रहे ॥७॥ जो निरतिचार सम्यक्चारित्र रूपी मणियोंसे सहित है (पक्षमें छिद्र रहित गोलाकार उत्तम मणियोंसे युक्त है) और दया दाक्षिण्य आदि अनन्त गुणोंसे गुम्फित है (पक्षमें अनेक धागोंसे गुंथी हुई है) उस पूर्वाचार्योंकी परम्पराको मैं एक अपूर्व माला मानता हूँ ॥८॥ गद्यावली और पद्यपरम्परा ये दोनों पृथक् पृथक् भी बहुत भारी आनन्द उत्पन्न करती हैं फिर जहाँ दोनों मिल जाती हैं वहाँकी तो बात ही निराली हो जाती है वहाँ वे दोनों शैशव और जवानीके बीच बिचरनेवाली कान्ताके समान बहुत अधिक हर्ष उत्पन्न करने लगती हैं ॥९॥ सुधर्माचार्य गणधरने जो कथा महाराज श्रेणिकके लिए कही थी उसी कथाको कहनेका हम प्रयत्न करते हैं ॥१०॥ महाकवि हरिचन्द्र कहते हैं कि मेरी वाणी चिरकाल बाद कृतकृत्य हो सकी क्योंकि उसने भाव जिनेन्द्र श्रीजीवन्धर स्वामीको स्वयं ही वरण किया है—उन्हें अपना प्रतिपाद्य विषय बनाया है ॥११॥ यद्यपि मेरी वाणी अत्यन्त मलिन है तथापि वह पापको नष्ट करनेवाले जीवन्धर स्वामीके चरित्रको पाकर निश्चित ही धीर वीर मनुष्योंको उस तरह सन्तुष्ट करेगी जिस तरहकी काले काजलकी कान्ति किसी बिम्बोष्ठी स्त्रीके नयनकमलकी संगति पाकर सन्तुष्ट करने लगती है ॥१२॥

